ॐतत्सत् ।

कर्म्ममीमांसादर्शनम् ।

(महर्षि-भरद्वाजसूत्रम्)

सभाष्यम् ।

धर्म्मसंस्कारपादौ ।

महामहोपाध्यायेन महामहाध्यापकेन श्रीअन्नदाचरणशर्म्मणा

तर्कचूड़ामणिना सम्पादितम् ।

वाराणस्यां

भारतधर्म्म सिण्डिकेट लिमिटेड द्वारा प्रकाशितम् ।

कलेर्गताब्दाः ५०३३ सम्वत् १९८९ वैक्रमाब्दे ।

प्रथमसंस्करणम्] [मूल्यं रूप्यकद्वयम् ।

अखिलभारतवर्षीयसंस्कृतविश्वविद्यालयः ।

गीर्वाणवाणीवैभवप्रतिष्ठापको विश्वविद्यालयोऽयमार्यजातेरेकमात्रविराड्धर्मपरिषदा श्रीभारतधर्ममहामण्डलेन संस्थापितोऽभूत् । प्रतिवत्सरमेष विश्वविद्यालयो नानानामधेयाः परीक्षा नियमितमादत्ते नैककेन्द्रकदम्बमस्य भारतवर्षस्य विभिन्नप्रान्तेषु प्रतिष्ठितमस्ति । यत्र कुत्रापि संस्कृतविद्यालयः पुस्तकालयो धर्मसभामन्दिरमाङ्गलभाषापाठालयो वा भवेत्, तत्सञ्चालकमहोदयैर्विश्वविद्यालयस्य केन्द्रस्थापनं विधित्सुभिरावेदनपत्रं प्रेष्य स्वस्थाने केन्द्रस्थापनार्थमितोऽनुमतिं ग्रहीतुं शक्यते, तत्कृते मुद्रितं केन्द्रावेदनपत्रं तन्नियमावली च निम्नाङ्कितप्रधानकार्यालयान्मूल्यं विनैव लभ्येते, प्रपूर्य प्रेषिते च केन्द्रावेदनपत्रे केन्द्रप्रमाणपत्रं मिलति ।

निम्नसङ्केते पत्रव्यवहारो विधेयः—

कार्याध्यक्ष--संस्कृतविश्वविद्यालय—कार्यालय,

श्रीमहामण्डलभवन, जगत्गंज, बनारस ।

सूर्योदयः ।

(इदं संस्कृतवाङ्मयमासिकपत्रम्)

अत्र भारतीयानां पण्डितप्रकाण्डानां साहित्यदर्शनविज्ञानशिक्षेतिहासादिगोचरा नव्यभावभूषिता लेखाः प्रकाश्यन्ते, भाषा चास्य सरसा सरला सुबोधा च बोभूयते, या किल सर्वेषां संस्कृतभाषानुरागिणां सुरभारतीसेवकानां सातिशयं मनोमोदाय कल्पते, भारतवर्षस्य बङ्गाल-विहार-मद्रास-पञ्जाबु-युक्तादिप्रदेशीयेषु विविधसंस्कृतविद्यालयेषु अनेकाङ्गलभाषापाठमन्दिरेषु च समधिकमस्य प्रचारो विद्यते । किं बहुना, बहवो विद्वांसो विलोक्य पत्रमिदं प्रशंसन्ति नितान्तं प्रमोदन्ते च । एतदखिलभारतवर्षीयसंस्कृतविश्वविद्यालयस्य मुखपत्रमास्ते । वार्षिकं रजतमुद्रापञ्चकं प्रयच्छद्भ्यः संरक्षकेभ्यो रूप्यकत्रयं वार्षिकं वितरद्भ्यः सभ्येभ्यश्च पत्रमदो मूल्यं विनैव दीयते, छात्रेभ्योऽसमर्थेभ्यः पुस्तकालयेभ्यश्च रूप्यकमेकमेव वार्षिकं मूल्यमादीयते ।

'सूर्योदय' पत्रेण सह सूर्योदयसंस्कृतग्रन्थमालाऽपि नियमितं निस्सरति, ततः सूर्योदयग्राहकाणां गृहेऽपूर्वसंस्कृतग्रन्थानां संग्रहोऽपि जायते ।

पत्रव्यवहारसङ्केतः—

कार्याध्यक्ष 'सूर्योदय' कार्यालय,

श्रीमहामण्डलभवन, जगत्गंज बनारस ।

ओंतत्सत् ।

कर्म्ममीमांसादर्शनम् ।

(महर्षि-भरद्वाजसूत्रम्)

सभाष्यम् ।

धर्म्मसंस्कारपादौ ।

महामहोपाध्यायेन महामहाध्यापकेन श्रीअन्नदाचरणशर्मणा
तर्कचूड़ामणिना सम्पादितम् ।

वाराणस्यां

भारतधर्म्म सिण्डिकेट लिमिटेड द्वारा प्रकाशितम् ।

कलेर्गताब्दाः ५०३३ सम्वत् १९८८ वैक्रमाब्दे ।

प्रथमसंस्करणम्]

[मूल्यं रूप्यकद्वयम् ।

गोपालचन्द्रचक्रवर्त्ती द्वारा
भारतधर्मप्रेस, काशीमें मुद्रित ।

कर्ममीमांसादर्शनोपक्रमः।

इह ब्रह्मणो विवर्तरूपे प्रकृतेर्वा विकारमये चराचरे जगति अनन्तविषयवासनासंसक्तानां जीवानां दुःखाऽत्यन्तनिवृत्तिपूर्वकचिरसुखशान्तिसमवाप्तये अध्यात्मज्ञानपरिशीलनमन्तरा न कोऽप्यन्यः समीचीन उपाय उपलभ्यते। श्रुतयः शास्त्राणि चास्य यथार्थसत्यस्य समर्थनं विदधति। "ऋते ज्ञानान्न मुक्तिरिति" ज्ञानमन्तरा न मुक्तिरुदेति, मुक्तिमृते च न निरतिशयानन्दावाप्तिर्भवतीति च सततं समुद्घोषयन्ति। तच्च निरतिशयानन्द-स्वरूपं मुक्तिपदं सूक्ष्मातिसूक्ष्मतयाऽतीन्द्रियतया च दर्शनशास्त्रमन्तरा न कोऽपि सम्यक्तया स्फुटमवगन्तुमर्हति। अतिक्रान्तस्थूलराज्यसीम्नोऽनन्तपारावारस्यातिवैचित्र्यास्पदस्य सूक्ष्मराज्यपयोनिधेरुत्तरणाय दर्शनशास्त्राण्येव केवलं ध्रुवतारायमाणानि मार्गनिदर्शकानि भवन्ति। अद्यत्वे भारतीयप्रजावर्गे स्वधर्माविश्वासः परधर्माभासजिघृक्षा तथा—

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः।
चत्वारि तस्य वर्द्धन्ते आयुर्विद्या यशो बलम् (मनुस्मृतिः)
आचारप्रभवो धर्मः सन्तस्त्वाचारलक्षणाः।
आचाराल्लभते ह्यायुराचाराल्लभते श्रियम् (महाभारतम्)

इत्यादिस्मृतिप्रतिपादितानां सर्वथा स्वश्रेयःसम्पादकानामपि सदाचाराणां वर्जनेच्छा, वेदपुराणेतिहासादिष्वश्रद्धा, वर्णाश्रमधर्मोपेक्षा, परलोकदेवर्षिपितृगणनिवासादिलोकास्तित्वसन्देहः, इत्यादयोऽनेके प्रबला दोषराशयः पाश्चात्यशिक्षासम्पर्कादितः समुद्भवन्ति। ते हि वस्तुतो वैदिकदर्शनशिक्षापद्धतिप्रचारमन्तरा न मूलत उन्मूलयितुं शक्यन्ते। सम्प्रति वैदिकदर्शनाध्ययनाध्यापनाद्यभाव एवैषामसद्भावानां संवर्द्धनसम्बलनादौ हेतुतामाश्रयतीति निर्विवादसिद्धम्।

स्थूलसूक्ष्मोभयप्रकृत्यवस्थायाः सप्तधा विभक्तत्वेन पर्य्यवेक्षणं केवलमन्तर्दृष्टिसम्पन्ना मुनय एव न विदधति, अपि तु स्थूल-विचारवतां मानवानामपि विवेकदृष्ट्येदमेव सिध्यति। प्रकृतेर्हि स्वभावत एव सप्त विभागा अवलोक्यन्ते। ज्योतिषां सप्त भेदा एव सूर्य्यस्य सप्ताश्वाः कथ्यन्ते। यथा ज्योतिषां सप्त भेदाः सन्ति, तथैव छायाया अपि सप्त भेदाः गण्यन्ते। इत्यत एव हेतो रागादपि मूर्तयो निर्मीयन्ते, छायाया अपि न्यूनाधिक्यकरणेन मूर्तयो विरच्यन्ते। तथैवासुरगणवासोपयोगिनः सप्ताधोलोका देवगणवासोपयोगिनश्च सप्तोर्ध्वलोका ब्रह्माण्डस्योर्ध्वाधोभागीयाङ्गोपाङ्गस्थानीया अभिधीयन्ते। कालविभागोऽपि सप्तदिनानां गणनया क्रियते, स्थूलशरीरोपादानानामपि सप्तसु धातुषु विभागो दृश्यते। यथा चाविद्याराज्यविभागः सप्तविधाभिरज्ञानभूमिभिः क्रियते तथैव विद्याराज्यविभागोऽपि सप्तभि र्ज्ञानभूमिभिः सम्पाद्यते। तासामेव सप्तानां ज्ञानभूमीनां क्रममनुसृत्य सप्तानां वैदिकानां दर्शनानामाविर्भावः स्वाभाविक एव। यतो हि वैदिकदर्शनसिद्धान्तो नित्यः शाश्वतिकोऽविकम्प्य इति सर्वतन्त्रसिद्धान्तसिद्धोऽर्थः।

तत्र सनातनवैदिकधर्मस्य दार्शनिकसिद्धान्ता अपि तथैव प्राकृतिकपद्धत्या सप्तधा विभक्ताः सन्ति । न्यायो वैशेषिकः सांख्यः योगः कर्ममीमांसा दैवीमीमांसा ब्रह्ममीमांसेति सप्त-सिद्धान्त-प्रतिपादकतया सप्त दर्शनानि पृथक्त्वेन व्यवस्थितानि । तत्र सप्तसु दार्शनिकसिद्धान्तभेदेषु न्यायवैशेषिकौ हि पदार्थवादसिद्धान्तप्रतिपादकावेवोच्येते । यतो हीमौ द्वावपि दर्शन-भेदौ यथाक्रमं स्वीयदार्शनिक-सिद्धान्तज्ञानभूमिं प्रकाशयन्तौ स्थूलपरमाणूनां नित्यत्वाङ्गीकारेणानुमानत एव परमात्मानं दर्शायितुं यतेते । ततश्च सांख्यप्रवचनमित्येकयापि संज्ञया व्यवह्रियमाणौ सांख्ययोगत्मना प्रसिद्धौ द्वावपरौ सिद्धान्तभेदौ प्रकृतिं विश्वजननीं पुरुषञ्च परमात्मानं नित्यत्वेन स्वरूपतः पृथक् प्रस्थापयतः । तत्रापि सांख्यसिद्धान्तेषु पुरुषाणां बहुत्वे-प्रकृतेश्चैक्ये स्फुटं समर्थ्यमाने, योगसिद्धान्तेषु च "क्लेश-कर्म-विपाकाशयैरपरामृष्टः पुरुष-विशेष ईश्वर" इति साक्षादेव पुरुषविशेषात्मना स्वीक्रियमाणेऽपीश्वरतत्त्वे प्रकृतिभिन्ना ततः पुरुषोऽपि भिन्नः द्वावपीमौ सर्वथा सर्वतः पृथक् प्रस्थानौ परस्परं विभिन्नौ—

"त्रिगुणमविवेकि, विषयः सामान्यमचेतनं प्रसवधर्मि,
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमानिति"

सांख्यकारिकोक्तदिशा कियदंशतः साधर्म्य-वैधर्म्यं जुषाणावपि विलक्षणधर्माणौ स्त इत्यत्रोभयोरप्यैकमत्यमेव । एवञ्च न्यायवैशेषिकसांख्ययोगात्मना चतुर्द्धा विभक्तानां दार्शनिकसिद्धान्तानां चतस्रोऽपि ज्ञानभूमीरतिक्रम्य मीमांसाशास्त्रस्य तिस्रो ज्ञानभूमयः परस्परं विभिन्ना भिन्नक्रमशालिन्यः पृथक्प्रस्थाना विलक्षणात्मकतयोपतिष्ठन्ते । तथा हि कर्मोपासनाज्ञानकाण्डात्मक-काण्डत्रये वेदराशिर्विभक्तो दृश्यते । ततश्च काण्डत्रयस्यास्य सत्ता-स्वीकृतौ न केषामपि विमतिरिति सर्वसम्मतः सिद्धान्तः । एवञ्च कर्म उपासना ज्ञानमिति त्रयाणामपि काण्डानां स्वीकृतेरावश्यकत्वे तन्मीमांसात्मकानां कर्ममीमांसोपासनामीमांसा (दैवीमीमांसा) ब्रह्ममीमांसास्वरूपाणां त्रयाणां, शास्त्राणामपि सत्तास्वीकृतेरप्यावश्यकत्वमेव । अतश्च न्याय-वैशेषिक-सांख्य-योग-दर्शनानां चतुर्णामपि ज्ञानभूमीनामनन्तरं मीमांसात्रयस्यापि तिस्रो ज्ञानभूमयः सर्वैरप्यङ्गीकरणीया एवेति । अत एव शास्त्रेषु 'ज्ञानदा, संन्यासदा, लीलोन्मुक्तिः, योगदा, सत्पदा, आनन्दपदा, परात्परा इति सप्तानां ज्ञानभूमीनां सप्तैव नामानि पृथक्तयोपलभ्यन्ते । तत्र चरमज्ञानभूमित्रयानुसारेण मीमांसादर्शनसिद्धान्तानामपि त्रित्वमस्ति। तद्यथा कर्ममीमांसादर्शनं कर्मकाण्डभागस्य कृते, मध्यमीमांसाऽपराह्वम् दैवीमीमांसादर्शनम् उपासनाकाण्डस्य कृते, चरमं ब्रह्ममीमांसादर्शनन्तु ज्ञानकाण्डस्यकृते इति वेदकाण्डत्रयानुसारि मीमांसादर्शनत्रयमपि अनादिकालतः प्रसिद्धमस्ति। तत्र त्रिष्वपि मीमांसादर्शनेषु कर्ममीमांसोत्तरार्द्धं जैमिनिमीमांसादर्शनं ज्ञानकाण्डीयमीमांसारूपं ब्रह्ममीमांसाऽपराख्यं वेदान्तदर्शनञ्चेति दर्शनशास्त्रद्वयमुपलब्धमासीत् । किन्तु कर्ममीमांसादर्शनस्य वापूर्वं दैवीमीमांसादर्शनञ्चेति दर्शनद्वयं महाकालगर्भे बहुकालाद्विलुप्तमेवासीत् । सम्प्रति अघटन-

घटनापटीयस्याः सर्वशक्तिशालिन्यां भगवत्या महामायाया अनुग्रहेण केनचन परलोकतत्त्वज्ञेनान्तर्दृष्टिशालिना परमकारुणिकेन महात्मना विश्वजनीनहितानुध्यानपरेण समाहितेन मनसोपासनाबलात् तयोः सूत्राणि समुपलब्धानि । अत्र हि सर्वजनीनाभ्युदयनिःश्रेयसाधकस्य करालकालमहिम्ना महाकालगर्भे विलीनस्य दर्शनद्वयस्याविर्भावे परमेशितुः परानुग्रहैव हेतुरिति यस्य महर्षिद्वयस्य सत्प्रेरणया सूत्राणीमानि समुपलब्धानि तदभिधाननिर्देशं पुरस्कृत्य प्रकाशितानि । नात्र सूत्र-समुपलब्धु र्महापुरुषस्य लेशतोऽणुरपि कर्तृत्वाभिमानः ।

दर्शनद्वयसूत्रसमुपलब्धुर्म्महात्मनोऽयमप्यनुभवोऽत्रमनाग् निर्दिश्यते यत्—शास्त्रादिषु समुपलभ्यमाना मन्त्रतपोयोगदैवशक्तयः सर्वा अपि ऋतम्भराप्रज्ञावधार्य्याः सत्या एव । सम्प्रत्यपि सदाचारोपासनासमृद्धया मानवो नित्यपितॄणामनुग्रहमासादयितुमर्हति । शरीरवाङ्मनसां शुद्धया, चित्ततीव्रसंवेगेन, स्थिरधारणया, ध्यानसिद्धया, द्रव्य-क्रिया-मन्त्रशुद्धया च साधकोऽधुनाप्यवश्यमेव देवतासाक्षात्कारं लभते । स्वनामरूपाभिनिवेशत्यागेनैकतत्त्वाभ्यासपुरःसरया शरणापन्नतया च धीरो नित्यर्षीणामपि दर्शनं लब्धुमर्हतीति केषाञ्चन विश्वासः । अस्तु, अद्यत्वे सुदुर्लभस्यास्य दर्शनद्वयस्योपलब्ध्या भारतीयदर्शनजगतो महन्मङ्गलं संवृतम् । यतश्च दैवीमीमांसादर्शनेनोपासनादर्शनाभावोऽपाकृतः । जैमिनिमुनिप्रणीतेन कर्म्ममीमांसोत्तरार्द्धेन सह पूर्वार्द्धमिदं मिलित्वा सम्पूर्णमखण्डितं कर्म्ममीमांसादर्शनं च सम्वृत्तम् ।

अस्य कर्म्ममीमांसापूर्वार्द्धस्वरूपस्य कर्म्ममीमांसादर्शनस्य प्रथमपादे धर्म्मरहस्यं, द्वितीयपादे च संस्काररहस्यं, तृतीयपादे तु कर्म्मरहस्यम्, चरमे चतुर्थपादेऽपि संस्कारशुद्धया क्रियाशुद्धिः तया च मोक्षाध्वनः रहस्यानि विस्तरशो विवेचितानि सन्ति ।

इदानीमस्य पूर्वार्द्धकर्म्ममीमांसादर्शनस्याविर्भावतः सनातनधर्म्मावलम्बिनां शास्त्रीयसिद्धान्तेषु सम्भाव्यमानानां सर्वासामपि शङ्कानां समूलमुन्मूलनं भविता । न क्वापि शङ्कालेशावकाशसम्भवोऽप्यधुना स्थास्यति । वर्णाश्रमधर्म्मावलम्बिनां सिद्धान्तानां दृढतया सुगुप्तिः, वेदशास्त्रीयवर्णाश्रमाचाराणामुपरि जायमानानां शङ्कानां सर्वथा निराकरणम्, ईश्वराज्ञास्वरूपाणां धर्म्माणां तत्त्वतः स्वरूपनिर्णयः, वर्णाश्रमधर्म्मयोः सर्वाङ्गीणा पुष्टिः सर्वाभ्यर्हितस्य सर्वसम्मतस्य च कर्म्मराज्यस्य गभीररहस्योद्घाटनेन तत्त्वज्ञानविकाशे विशेषसाहाय्यकरणमित्यादि बहुविधं साहाय्यमनेन कर्म्ममीमांसादर्शनेन भविष्यतीति विश्वासोऽस्माकम् ।

अपरञ्चेह धरातले कर्म्मराज्यविस्तारो हि सर्वैरेव धर्म्मावलम्बिभिः केनापि रूपेण स्वीक्रियत एव । तस्य विशेषाङ्गविस्तृतिविषये तु सनातनधर्म्मावलम्बिनां महर्षीणां दिव्यदृष्टिमतां परमकारुणिकानामेव सकलजनहिताधायको विस्तृतो विचारो विद्यते । अतश्चानेन कर्म्ममीमांसादर्शनेन सर्वधर्म्ममतावलम्बिनां परमं कल्याणं भविष्यतीति निःसन्दिग्धम् ।

वैदिकानां स्मार्तानां पौराणिकानां तान्त्रिकाणां वा सिद्धान्तराशीनां पुष्टि-

दार्शनिकमीमांसामन्तरा कदापि न सम्भवति, न च तत्र जायमानस्य विरोधिनामाक्रमणस्यैवापाकरणं सम्भवति । एवम्भूतस्य दार्शनिकग्रन्थस्याभावादेव सम्प्रति सनातनधर्मस्याचाराणां सिद्धान्तानाञ्चोपरि सर्वत्र आक्रमणं भवति । इदृशे धर्मविप्लवसमये धर्मरक्षायां बद्धपरिकरस्य चतुरस्रसामग्रीसम्पन्नस्य दार्शनिकग्रन्थरत्नस्योपलब्धिस्तस्य च निरन्तरायं पुस्तकरूपेण प्रकाशनं सर्वनियन्तुरन्तर्य्यामिणः परमेशितुरनवधिकृपामन्तरा नैव सम्भवतीति नतशिरोभिरास्तिकशिरोमणिभिरभ्युपेयमेव ।

इत्थञ्चेह देशकालात्मविज्ञानविदां विदुषाञ्चापरिश्रान्ताध्यवसायेन सम्प्रति सर्वेषामेव सप्तज्ञानभूमिमतां दार्शनिकग्रन्थरत्नानां पर्य्यवेक्षणगवेषणप्रकाशनानि भूरिप्रयासधनव्ययसाध्यान्यपि विधीयन्त एव । तत्र सर्वप्रथममस्य सभाष्यस्य कर्ममीमांसादर्शनस्य पूर्वार्द्धस्यातिशयोपयोगित्वात् प्रकाशनं जातम् ।

वैदिकोपासनाकाण्डीयं दैवीमीमांसादर्शनमपि प्राय एतत्तुल्यसंख्याकसूत्रसम्वलितमेव सभाष्यं प्रस्तुतं विद्यते, तदप्यचिरेणैव कालेन विदुषां दृष्टिपथे समागमिष्यतीति सम्भावयामः ।

योगदर्शने तु श्रीमतो महामुनेर्व्यासदेवस्य विस्तृतं भाष्यमुपलभ्यत एव तथापि तस्य साम्प्रतिकोन्मार्गगामिजनानामशेषशङ्कानिराकरणक्षममन्यदप्येकं संस्कृतभाष्यमितः प्रकाशनाय सुसम्पादितं विद्यते ।

सांख्यदर्शनस्य परमास्तिकदर्शनस्यापि सतस्तत्रार्षभाष्याभावेनाद्यावधितस्य महिमा निगूढ एवासीत् । इदानींत त्रा.पं सूत्रकृदभिप्रायानुसारि-विस्तृतं संस्कृतभाष्यं विरचितं विद्यते । यस्यावलोकनेन सुधियोऽद्यावधि तस्मिन्दर्शनेऽनीश्वरसांख्यसंज्ञयोपहितं कलङ्कं शीघ्रमेवापसारयिष्यन्ति ।

काण्डत्रयात्मकस्य वेदस्य चरमकाण्डस्वरूपप्रकाशकस्य ब्रह्ममीमांसादर्शनापराख्यस्यापि वेदान्तदर्शनस्य समन्वयनामकं भाष्यं प्रणीयमानमस्ति । यत्राभिहितानां षण्णामपि ज्ञानभूमीनां सिद्धान्तैः सह सप्तमज्ञानभूमिगतस्य वेदान्तदर्शनस्य सिद्धान्तानाञ्च समन्वयो भविता । येन सर्वत्रैव दर्शनशास्त्रेषु आपाततः प्रतीयमानो विरोधः समूलमुन्मूलितो भविष्यतीति धियैव न्यायवैशेषिकदर्शनयोरपि विस्तृतमन्यत् संस्कृतभाष्यं निर्मिमित्सितं विद्यते ।

यतो हि सप्तानामेषां दर्शनानां स्वस्वरूपेणेह जगति जागरूकत्वे सति नास्ति केषामपि विरोधिनां शक्तिर्यत्पुराणस्मृतिप्रभृतिषु कामपि शङ्कां समुत्थापयेदिति बुद्ध्यैवैषां दर्शनानां विस्तृतभाष्यविभूषितानां प्रकाशनं सम्पद्यते । येन सर्वत्रैव वैदिकज्ञानसूर्य्यज्योतिषां निर्वाधं स्यादविहतः प्रसार इति सर्वनियन्तारं जगदीश्वरमभ्यर्थयते—

श्रीअन्नदाचरणशर्मा तर्कचूडामणिः
(महामहाध्यापको महामहोपाध्यायश्च)

———

औंतत्सत् ।

कर्ममीमांसादर्शनस्य धर्म्मसंस्कारपादयो र्विषयानुक्रमणिका ।

विषयाः ... पृष्ठसंख्या

इति कर्ममीमांसादर्शनस्य धर्म्मसंस्कारपादयोः विषयानुक्रमणिका समाप्ता ।

श्रीविश्वनाथो जयति ।

कर्ममीमांसादर्शनम् ।

भाष्य-भूमिका ।

अनन्तदिङ्मण्डलमेव यद्वपुर्यद्रोमराजिश्च रवीन्दुतारकाः ।
यत्प्राणरूपेण तु कर्म राजते विराड्वपुष्कं पुरुषं तमाश्रये ॥१॥
यः सच्चिदानन्दमयोऽद्वितीयो भक्तैस्त्रिधैकोऽपि सदा सुदृश्यः ।
ब्रह्मेशरूपे च विराट्स्वरूपे परात्परेशं पुरुषं तमीडे ॥२॥
यद्ज्ञानसिन्धोरपि विन्दुमात्रमासाद्य जिज्ञासुगणाः कृतार्थाः ।
अद्यापि यस्यास्ति तपःप्रभावाद् द्विजातिवंशो विमलो धरायाम् ॥३॥
तं ज्ञानदीपोज्ज्वलितार्यवंशं श्रीमद्भरद्वाजमहर्षिवर्य्यम् ।
नत्वा समभ्यर्चितपादपद्मं प्रारभ्यते भाष्यमिदं विधातुम् ॥४॥

यथैक एवाद्वितीयः परमात्मा त्रिभिर्ब्रह्मेशविराड्रूपैः प्रतिभासत एवमेवा-ध्यात्माधिदैवाधिभूतभावत्रयसम्बद्धतयाऽपौरुषेयः सदा सत्तावान् वेदोऽपि काण्डत्रयात्मकः । तस्य च कर्मोपासनाज्ञानात्मकस्य काण्डत्रयस्य भावत्रयस्य च सम्बन्धेनैव वेदमाहात्म्यमधिकाधिकं विज्ञायते । वेदे च कर्मण एव पूर्वप्रति-पद्यत्वाम् । तदुक्तं स्मृतौ—

कर्मणाऽमी भान्ति देवाः परत्र, कर्मणैवेह प्लवते मातरिश्वा ।
अहोरात्रं विदधत्कर्मणैव, अतन्द्रितः शश्वदुदेति सूर्यः ॥
मासार्द्धमासानथ नक्षत्रयोगानतन्द्रितश्चन्द्रमाश्चाभ्युपैति ।
अतन्द्रितो दहते जातवेदाः समिध्यमानः कर्म कुर्वन् प्रजाभ्यः ॥
अतन्द्रिता भारमिमं महान्तं विभर्त्ति देवी पृथिवी बलेन ।
अतन्द्रिताः शीघ्रमपो वहन्ति सन्तर्पयन्त्यः सर्वभूतानि नद्यः ॥
हित्वा सुखं मनसश्चाप्रियाणि देवः शक्रः कर्मणा श्रैष्ठ्यमाप ।
बृहस्पति र्ब्रह्मचर्यं चचार समाहितः संशितात्मा यथावत् ॥
हित्वा सुखं प्रतिरुध्येन्द्रियाणि तेन देवानामगमद्गौरवं सः ।
तथा नक्षत्राणि कर्मणाऽमुत्र भान्ति रुद्रादित्या वसवोऽथापि विश्वे ॥

कर्मैव भवति जगतो मूलम् । तत एवोत्पत्तिस्थितिलयाः सम्भवन्ति ब्रह्माण्डस्य

तदुपजीव्यत्वादेव "एकोऽहं बहु स्यां प्रजायेय" एवमादयः श्रुतयः चरितार्थतां लभन्ते । कारणवारि कर्मण एव रूपान्तरम् ।

"नासदासीन्नो सदासीत्तदानीम् नासीद्रजो नो व्योमपरो यत् ।
किमावरीवः कुहकस्य शर्मन्नम्भः किमासीद् गहनं गभीरम् ।।
न मृत्युरासीदमृतं न तर्हि न रात्र्यन्ह आसीत् प्रकेतः ।
आसीदवातं स्वधया तदेकं तस्माद्धान्यान्नपरः किञ्चनाऽऽस ।।
कामस्तदग्रे समवर्त्तताऽधिमनसो रेतः प्रथमं यदासीत् ।
सतो बन्धुमसति निरविन्दन् हृदि प्रतिष्या कवयो मनीषा ।।"

एवं विधानां श्रुतीनामपि चारितार्थ्यं कर्मैव कारणत्वभाक् । ईश्वर एव रजोगुणाधिष्ठातृब्रह्म-सत्त्वगुणाधिष्ठातृविष्णु-तमोगुणाधिष्ठातृरुद्रभावं समासाद्य स्वयं ब्रह्माण्डस्योत्पत्ति स्थितिं लयञ्च विदधाति । अत्रापि कर्मण एव कारणत्वम् । अनन्तकोटिब्रह्माण्डस्य सृष्टिस्थितिप्रलयाः कर्मणैव भवन्ति । ब्रह्माण्डस्य स्थितिदशायां कर्मैव धर्मरूपतामापद्य ब्रह्माण्डं पाति । कर्मैव क्रमशो जीवमुद्भिज्जस्वेदजाण्डजजरायुजयोनिभिः समुन्नमय्य देवैरपि दुरापां मनुष्ययोनिं प्रापयति । अभ्युदयनिःश्रेयसौ च तदेव वितरति । परमपुरुषार्थकारणत्वात् कर्मणो महत्त्वं वेदेषु सर्वप्राधान्येन वर्णितम् । जीवदशायाः प्रथमविकाशसमये कर्मैव सहचरतामापद्यते जीवस्य । पूर्णज्ञानशक्तिप्रदानेन जीवन्मुक्तदशां प्रापय्य शरीरावसाने विदेहलयं सम्पादयति । अतः कर्मप्राधान्यमभ्युपगच्छतां विदुषां मतद्वयं परिलक्ष्यते । प्रथममतावलम्बिनो विपश्चित ईश्वरास्तित्वोपगमे न किञ्चिदपि प्रयोजनमाकलयन्ति । यस्मादादितोऽन्तं यावत् कर्मण एवोपलभ्यते शक्तिर्नेतरस्येति सिद्धान्तमिममाश्रित्य भुवि अनन्ता जैनबौद्धादि—संप्रदायाः प्रादुर्बभूवुः, संभविष्यन्ति चेति स्वतः सिद्धम् । कर्मप्रधानानां विद्वद्वर्याणां यदन्यन्मतं तत्सर्ववादिनामेव सम्मतम् । वेदानुकूलं सर्वहितप्रदं सर्वतन्त्रसिद्धान्तयुक्तं यन्मतं पूज्यपादैर्महर्षिभिरैकमत्यमालम्ब्य स्वीकृतं तदेव कर्ममीमांसादर्शनेन प्रतिपादितम् । कर्मणः पूर्णा गतिः, सूक्ष्मातिसूक्ष्मावस्था, कर्मबीजानां संस्काराणामुत्पत्तिस्थितिलयाः, कर्मणो जडक्रियायां चैतन्यस्यावश्यकता, एवमादिसमधिगम्यभावविदो मुनयो निर्विवादमीश्वरसत्तामङ्गीकुर्वन्ति । यतः पूर्णं दर्शनं पूर्णज्ञानेऽलं साहाय्यमावहति । न चैवंविधे ज्ञाने भ्रमसंभावनावस्थातुमर्हति ।

ईश्वरास्तित्ववादिषु कर्ममीमांसाप्रतिपादको वेदाभिहितकर्मकाण्डस्य साहाय्यसंपादकश्चैवं विधं सिद्धान्तद्वयं प्रचलितं वर्त्तते । यतो वेदेऽपि संस्कारशुद्धिं क्रियाशुद्धिञ्च समभिलक्ष्य प्रवर्त्तितौ द्वौ पन्थानौ ।

एकेन तावत्साक्षात् बाह्यशुद्धिर्जायते ततश्चान्तःशुद्धिः सम्पद्यते। द्वितीयेन तु युगपदेव बहिःशुद्धिरन्तःशुद्धिश्चेत्येतद्द्वयमभ्युपजायते। एकस्य बहिर्याग-सहायकत्वमपरस्यान्तर्यागसहायकत्वम्। प्रथमे क्रियासम्बन्धस्य द्वितीये विज्ञान-सम्बन्धस्य चाधिक्यम्। प्रथमस्याचार्य्या जैमिनि-क्रतु-दत्त-मैत्रेयादयो महर्षयः। परस्य च भरद्वाज-कश्यप-वशिष्ठ-बृहस्पत्यादयो महर्षयः। इति चतुर्विंशतिमते विज्ञानभाष्यादिशास्त्रेषु च समुपलभ्यते।

स्थूलातिस्थूलशारीरिकक्रियासम्बन्धतो विद्यते खल्वाचारस्य प्रथमधर्म-त्वम्। अपि चाचारबलमाश्रित्यैव परम्परया ब्रह्मसद्भावलक्षणः परमपुरुषा-र्थोऽपि समधिगम्यते। स्मर्य्यते च यथा—

"आचारमूला जातिः स्यादाचारः शास्त्रमूलकः।
वेदवाक्यं शास्त्रमूलं वेदः साधकमूलकः॥
क्रियामूलः साधकश्च क्रियापि फलमूलिका।
फलमूलं सुखं देव! सुखमानन्दमूलकम्॥
आनन्दो ज्ञानमूलश्च ज्ञानं वै ज्ञेयमूलकम्।
तत्त्वमूलं ज्ञेयमात्रं तत्त्वं हि ब्रह्ममूलकम्॥
ब्रह्मज्ञानं त्वैक्यमूलमैक्यं स्यात् सर्वमूलकम्।
ऐक्यं हि परमेशान! भावातीतं सुनिश्चितम्॥
भावातीतमिदं सर्वं प्रकाशभावमात्रकम्।"

सदाचारतो ब्रह्मसद्भावपर्यन्तं येन मीमांसादर्शनेन प्रतिपाद्यते तस्यैव महत्त्वाधिक्यमित्यत्र न कापि विप्रतिपत्तिः। सदाचारस्य मूलतत्त्वं, संस्कार-रहस्यं, संस्कारस्य प्रधानभेदाः, वर्णाश्रमधर्मविज्ञानं, स्त्रीपुरुषधर्माधिकारनिर्णयः, तयोर्मूलभित्तिः, नित्यनैमित्तिककाम्यानाञ्च कर्मणां रहस्यं, युक्तायुक्तकर्मणो-र्भेदाः, धर्माधर्मरहस्यं, धर्मस्य तदङ्गानाञ्च लक्षणानि, सामान्यधर्मस्य विशेष-धर्मस्य च तात्पर्य्यं, कर्मभिः सृष्टेः साक्षात् सम्बन्धः, जीवानां क्रमोन्नतिः, कर्मणा जीवानामूर्द्ध्वगतिरधोगतिश्च, परलोकवादः, जीवानामातिवाहिकगतिः, संस्कारशुद्ध्या क्रियाशुद्धिः, तया चापवर्गाधिगमः, एवमादीनां प्रधानविषयाणां सम्बन्धोऽस्ति कर्ममीमांसादर्शनेन सह। वर्णाश्रमधर्मभित्ते र्दार्ढ्यसम्पादने परमा-श्रयभूतमिदं कर्ममीमांसादर्शनम् नाम। ईश्वरभक्तेरास्तिकतायाश्च कर्ममीमांसा-दर्शनमेतत् परमनिदानम्। किञ्चानेन नास्तिकादीनां मतानि निरस्याधि-काधिकं स्फुटं दृढीक्रियते जन्मान्तरसद्भाववादः। अपि च कर्ममीमांसादर्शन-विज्ञानमन्तरा दैवीमीमांसादर्शनस्य ब्रह्ममीमांसादर्शनस्य च सिद्धान्तोपलम्भो-दुःशक एव। तस्मादस्य परमावश्यकत्वं सर्वहितात्मकत्वञ्चावश्यमभ्युपगन्तव्यम्।

यथा स्वानुशासनेन सह राज्ञः सम्बन्धस्तथैव कर्मभिर्ब्रह्मणोऽपि सम्बन्धः । ब्रह्मतच्छक्तयोरिव कारणब्रह्म-कार्यब्रह्मणोश्चाप्यभेदः । यथा साक्षाद्राजसम्मानमसंपादयन्नपि तदीयानुशासनपालकस्तत्प्रसादभाग् भवति, यथा वा राजमानं विदधदपि तदीयानुशासनमतिक्रम्य दण्ड्यः स्यात्, तथैवाज्ञानतः परमेश्वरमनङ्गीकुर्वाणा अपि कर्मविज्ञानानि यथावदनुतिष्ठन्तः परमेश्वरदयामासाद्यामुष्मिकैहिकोन्नतिमासादयितुम् । एवंविधस्यैव विज्ञानस्य साहाय्येन स्वस्वसंप्रदायानुकूलानि दर्शनानि निर्माय स्वस्वसाधनसरणिञ्च प्रवर्त्य जैनादिधर्मसंप्रदाया अभ्युदयं संप्राप्ताः । परन्तु या प्रजा राजानं तदीयमनुशासनञ्च सममाद्रियते सा यथा सुशिक्षिता सर्वथा योग्येति चोच्यते, तद्वद् यस्मिन् दर्शनशास्त्रे कर्मविज्ञानेश्वरविज्ञानयोः समानरूपेण निर्णयस्तदेवाभ्रान्तं पूर्णञ्चेति नात्र संशयः ।

प्रकृतेस्त्रैगुण्यात्मकत्वेन कर्तृकर्मणोरपि त्रैविध्यम् । तथा चोक्तं गीतोपनिषदि–

मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः ।
सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते ॥
रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः ।
हर्षशोकान्वितः कर्त्ता राजसः परिकीर्तितः ॥
अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते ॥
नियतं सङ्गरहितमरागद्वेषतः कृतम् ।
अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते ॥
यत्तु कामेप्सुना कर्म साहंकारेण वा पुनः ।
क्रियते बहुलायासं तद्राजसमुदाहृतम् ॥
अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म यत्तत्तामसमुच्यते ॥

अतोऽधिकारत्रैविध्येन कर्मणोऽपि त्रैविध्यं वेदेषु वर्णितम् । विज्ञानञ्चैतदनुसृत्य वेदप्रतिपादिता वैधी हिंसापि धर्मानुकूलैव सिद्धान्तिता । यथा कर्तृकर्मणोस्त्रैविध्यात् सात्त्विकराजसिकतामसिकभेदेनाधिकारस्य त्रैविध्यं तथैवाधस्थाधिकारभेदेन यज्ञधर्मत्रैविध्यम् । तदुक्तं गीतोपनिषदि—

अफलाकाङ्क्षिभिर्यज्ञो विधिदिष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥
अभिसंधाय तु फलं दम्भार्थमपि चैव यत् ।
इज्यते भरतश्रेष्ठ ! तं यज्ञं विद्धि राजसम् ॥

विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥

लक्षणैरेभिः सात्त्विकयज्ञ एव आदर्शस्थानीयो निःश्रेयसकरश्च सिद्ध्यति । राजसिकस्तु साक्षान्निःश्रेयसकरत्वाभावे ऽभ्युदयकरो ज्ञेय इति । तद्यथा — हिंसाविरहितः सात्त्विको यज्ञः सात्त्विकानुष्ठातृकृते परमधर्मो निःश्रेयसकरश्च किन्तु स एव राजसिककर्तृकृते प्रकृत्यधिकारविरुद्धत्वान्नोपयुज्यते । तत्कृते राजसिकयज्ञस्यैव परमधर्मत्वमभ्युदयकरत्वञ्चेति नात्रसंदेहावतारः । हिंसात्मकराजसिकयज्ञस्य राजसिककर्तृकृते समभ्युदयकारकत्वम्, यतोहि यज्ञेन तेनासौ कर्त्ता परमपुरुषार्थेऽग्रेसरो भवति । अतो यज्ञस्येदृशस्येदृशकर्तृकृते परमधर्मत्वं सिद्ध्यति । सिद्धान्ततस्तु राजसिकपशुयागे हिंसाजन्यं कुफलं कर्तरि नूनं समुदेति, किन्तु, तदपेक्षया प्रधानयज्ञस्यानुष्ठानेन कर्तुर्बहुलतरशुभफलावाप्तिस्तु प्रधानतया समुपजायते । अपि च भावशुद्धिद्वारा मङ्गलावाप्तिरूपमन्यत्फलन्तु विद्यत एव । अतो धर्मबाहुल्यात् हिंसात्मकराजसिकयागोऽपि राजसिकानुष्ठातृकृते साक्षादभ्युदयकरः परम्परया तु निःश्रेयसकरश्च । अतो वेदेषु वैधहिंसाया हिंसाकोटौ गणनैव नास्ति ।

धर्मस्वरूपनिर्णयावसरे पूज्यपादेन महर्षिणा कणादेनाभिहितम् "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" इति । इत्यतः तामसिकेन श्येनयागादिनैहलौकिकं, राजसिकेनाश्वमेधादिना पारलौकिकं स्वर्गादिसुखं समधिगम्यते । किन्तु तत्तत्सुखसाधनकर्मजन्यादृष्टक्षये यादृशः परिणामः संभवति स चोभयत्राप्यवश्यम्भावीति सिद्धम् । परमानन्दावाप्तिलक्षणं यत्त्वविनश्वरं सुखं तत्सात्त्विककर्मायत्तमेव । तस्मादत्र सात्त्विका एव कर्तारोऽधिकारभाजः ।

निष्कामकर्मयोगस्याधिकारो विलक्षण एव विद्यते । निष्कामव्रतपरायणैः कर्मयोगिभिरनुष्ठीयमानानि यावन्त्येव कर्माणि तावन्ति तेषामपवर्गाधिगमाय पर्याप्तानि, यतो हि खल्वेषां वासनाविलयेन स्वत एवोपजायते संस्कारशुद्धिः सदायुक्तत्वाच्च क्रियाशुद्धिः । तदुक्तं गीतोपनिषदि--

"कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥
यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥
त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः ॥

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ पुनश्च—
यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥
योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥
न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ॥
नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥
नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः
शरीरयात्रापि च ते न प्रसिध्येदकर्मणः ॥
कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि ॥
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥
सक्ताः कर्मण्यविद्वांसो यथा कुर्वन्ति भारत ।
कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहम् ॥
यस्य सर्वे समारम्भाः कामसंकल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥
त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः ॥
काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ॥
त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपःकर्म न त्याज्यमिति चापरे ॥
एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥
नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः ॥
दुःखमित्येव यत्कर्म कायक्लेशभयात्त्यजेत् ।

स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ॥
कार्य्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन।
सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः ॥
संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ॥
ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥
कर्मण्येवाधिकारस्ते माफलेषु कदाचन।
मा कर्मफलहेतु भूर्मा ते सङ्गोऽस्त्वकर्मणि" ॥

पूज्यपादेन महर्षिणा श्रीभरद्वाजेन प्रतिपादिते कर्ममीमांसाविज्ञाने कर्मणः पूर्ण-स्वरूपं, विस्तरेण तद्विज्ञानं, विविधा गतयश्चैवमाद्या विषयाः सम्यक् सन्दर्शिताः सन्ति। पूज्याङ्घ्रिसरोजेन परमर्षिणा भगवता जैमिनिना प्रणीतायां कर्ममीमांसायां कर्माधिकृत्य सार्वदैशिकविज्ञानं यन्न प्रतिपादितमुपलभ्यते, तत्रायं हेतुः यद् भगवान् जैमिनिर्निजगुरोरादेशमनुरुध्य केवलं वेदोक्तकर्मकाण्डीयक्रियापक्षस्यैव परिपुष्टये विशेषतः प्रयत्नं कृतवान्। फलतो भरद्वाजोक्तदर्शनशास्त्रं परमावश्यकं प्रतिभाति। यतोऽस्याध्ययनमन्तरा कर्मविज्ञाने जिज्ञासूनां प्रवेशो न भवितुमर्हति। सिद्धान्ततः कर्ममीमांसाशास्त्रस्येदं दर्शनं पूर्वार्द्धं श्रीजैमिनिकृतं कर्ममीमांसाशास्त्रमुत्तरार्द्धमिति सिध्यति। अस्तु-व्याहृतद्विप्रकारां कर्ममीमांसाविज्ञानशैलीं समभ्यस्यैव जिज्ञासवो वेदोक्तकर्ममीमांसायाः सर्वं रहस्यं वेत्तुं प्रभवन्ति नान्यथेति विज्ञानद्वयोभयस्याध्ययनं परमावश्यकमिति।

वेदस्य नित्यत्वमपौरुषेयत्वादभ्रान्तत्वाच्च। प्रलयकाले ज्ञानरूपेण वेदः परमात्मनि तिष्ठति। पुनश्च सृष्टिदशायां पृथक् पृथक् ब्रह्माण्ड-लोक-कल्प-देश-काल-पात्रेषु यथावश्यकमाविर्भवति। ये महर्षयस्तपःपूर्णतां संपाद्य योगस्य विशेषसिद्धिं प्राप्नुवन्ति तेषामेव समाधिसिद्धान्तःकरणेषु श्रुतिरूपेण वेदानामाविर्भाव इति। नैव वेदेषु भ्रमसंभावना। प्रकृतमानवास्तु वैज्ञानिकबुद्धेरल्पतया अन्तर्दृष्टेरभावेन च श्रुतीनामध्यात्माधिदैवाधिभूतरूपार्थत्रैविध्यं नैव बोद्धुं पारयन्ति। पूर्णज्ञानत्वेन समाधिगम्यबुद्धेरुपलब्ध्या च विकसितान्तःकरणस्य महर्षेः समक्षमेव श्रुतयः स्वीयं स्वरूपत्रयं प्रकटयन्ति। ये च वेदेषु परस्परविरोधिन उपदेशाः संदृश्यन्ते, ये च सत्त्वरजस्तमसां गुणानां विविधाः क्रियाकलापास्समुपलभ्यन्ते, योऽपि वेदेषु जीवानां भावत्रयात्मकोऽधिकारो वर्णितः, सर्वञ्चैतत् मानवानां स्वस्वतन्त्राधिकारमूलकमेव। कृत्स्न-

स्याधिकारस्य प्रतिपादकत्वाद् वेदस्य पूर्णत्वमेव सिद्ध्यति । वैदिककर्मकाण्डे स्वव्याहतधर्माधर्मनिर्णये च वेदस्यैव स्वतः प्रामाण्यम् । यथा ब्रह्मेशविराडात्मके त्रिविधस्वरूपे परमात्मा दृश्यते तथैव कर्मोपासनाज्ञानात्मककाण्डत्रये विभक्तो वेद उपलभ्यते । धर्मस्यान्येषामखिलानामङ्गानां त्रिष्वेवैषान्तर्भूतत्वात् त्रिविधस्यैतस्यैवाङ्गस्य सर्वप्राधान्यम् । काण्डत्रयात्मकत्वे च वेदस्यैतदेव कारणम् । वेदस्य त्रीण्यपि काण्डानि स्वस्वाधिकारानुसारं मुक्तिं प्रयच्छन्ति । विशेषतः कर्मणः प्राधान्यात् कर्मकाण्डविस्तारः कर्मकाण्डमाहात्म्यञ्चागमेऽधिकमुपलभ्यते । एवमुक्तवैदिककर्मविज्ञानोदये कर्ममीमांसायाः प्राधान्यम् ।

यथा हि वायोर्वेगेन जलाशये तरङ्गाः समुद्भवन्ति एवमेवानादिवासनासन्तानेनानादिकर्माण्युत्पद्यन्ते प्रकृतिराज्ये । तानि चानादिसिद्धानि । यथा-घातप्रतिघातैस्तरङ्गाणां स्वरूपाण्यनन्तानि भवन्ति तथैव गुणत्रयवैषम्येण कर्मगतयोऽनन्ताः संपद्यन्ते । विषमशीलया प्रकृत्या साकं नैसर्गिकः कर्मणः सम्बन्धः । कार्यब्रह्मात्मकस्य ब्रह्माण्डस्यैकः परमाणुरपि कर्मसम्बन्धं विरहय्य न वर्त्तते । ब्रह्माण्डस्यास्यैकं तृणमपि कर्मसम्बन्धमन्तरा स्थातुं न शक्नुयात् । न चावस्थान्तरमधिगन्तुं प्रभवेत् । अतः कर्मशक्तिः सर्वतो बलीयसी । यथा महाब्धेरन्तराले प्रवहदेकं तृणमनुकूलतरङ्गसाहाय्यं समासाद्य समुद्रतटं समुपेयात् नान्यथा, तथैव मानवैरनुकूलानि कर्माणि संगृह्यावश्यं क्रमोन्नतिप्राप्तिपुरःस्सरं शक्येत मोक्षपदमासादयितुम् । तस्मात् अनुकूलप्रतिकूलकर्मरहस्यं विज्ञायैव पुरुषार्थे ये प्रवर्त्तन्ते त एवाभ्युदयं लभन्ते । अपि च ये तत्त्वज्ञानेन कर्मणामकर्मणां विकर्मणाञ्च कुटिलां गतिं स्फुटमनुभवितुं समर्थास्त एव कर्मबन्धनं विभिद्य निःश्रेयसं समधिगच्छन्ति ।

प्रकृतिस्वभावस्यानुकूलं प्रतिकूलञ्च धर्माधर्मरहस्यं, जीवानामभ्युदयनिश्रेयसयोः साधकानां धर्माङ्गानां वर्णनं, धर्मस्य सूक्ष्मातिसूक्ष्मा गतय इत्यादयो विषया दर्शनस्यास्य प्रथमपादे वर्णिता इति हेतो र्भवति धर्मपाद इति संज्ञा तस्य पादस्य । द्वितीयपादे संस्कारविज्ञानं, संस्कारभेदविज्ञानं, संस्कारभेदाः, संस्कारशुद्ध्युपायादयश्च विषया वर्णिता इत्यस्य संस्कारपाद इति समाख्या । तृतीये पादे संस्कारशुद्ध्या क्रियाशुद्धिस्तथाक्रियाशुद्ध्युपायास्तद्भेदाश्च वर्णिता इति तस्य क्रियापाद इति संज्ञा । चतुर्थे क्रियाशुद्धीनां फलं मोक्षश्च प्रतिपादितस्तेनासौ मोक्षपादोऽभिधीयते । इति ।

ॐ तत्सत् ।

कर्ममीमांसादर्शनम् ।

धर्मपादः ।

कर्मोपासनाज्ञानकाण्डात्मकेषु वेदेषु प्रथमस्य कर्मकाण्डस्य प्रतिपादकमिदं मीमांसाशास्त्रम् । तत्रापि कर्मविज्ञानस्य प्राधान्यतो द्वैविध्यं पुण्यपापरूपसदसत्कर्मभेदात् । ते च धर्माधर्ममूलके तत्राधर्मस्य हानं धर्मस्योपादानम् इत्यनयोरेवाभ्युदयनिःश्रेयसौ प्रति कारणत्वात् धर्मविज्ञानप्रतिपादनार्थं धर्माभिधस्य प्रथमपादस्यारम्भं प्रतिजानीते—

अथातो धर्मजिज्ञासा ॥ १ ॥

अत्रायमथशब्दो मङ्गलार्थो मङ्गलार्थकस्य तस्य मन्त्ररूपत्वात् । मङ्गलाचरणस्य परम्परया शिष्टाचारात्, श्रुतितश्च फलदर्शनादिति तस्य प्रयोगः । अथ शब्दप्रयोगेणैव मनःपूतत्वं समधिगम्य ब्रह्मणि युज्यते । तेन ब्रह्मसम्बद्धेन मनसा समारभ्यमाणस्य कार्यस्य विघ्नविफलताभ्यां बाध्यत्वाभावात् शुभकार्यारम्भे मङ्गलाचरणप्रथा साधीयसी । श्रुतिश्च—"समाप्तिकामो मङ्गलमाचरेत्" इति । मङ्गलं विघ्नविध्वंसपूर्वकं समाप्तिसाधकं, विघ्नध्वंसकरमेवेति द्विविधः शिष्टाचारोऽपि गीयते । आनन्तर्येऽप्यथवात्राथशब्दस्तद्यथा—ज्ञानदा-संन्यासदा-योगदा-लीलोन्मुक्तीनां चतसृणां ज्ञानभूमीनामनुकूलानि चत्वारि न्यायवैशेषिकयोगसांख्यशास्त्राण्युपन्यस्य तदनन्तरमिदानीं सत्पदाख्यज्ञानभूम्यनुसारं कर्ममीमांसादर्शनं प्रतिपिपादयिषुर्भगवान् परमकारुणिको महर्षि र्लोककल्याणायादौ मङ्गलव्यञ्जकानन्तर्य्यवाचकस्य शास्त्रीयपद्धत्यनुकूलस्याथशब्दस्योपादानं करोति । अथेति । धर्मजिज्ञासामन्तरा वैदिकविज्ञाने प्रवेशो दुराप इति धर्मजिज्ञासा कर्तव्येत्यतोऽतः शब्दः । पूर्वव्याहृतानां चतसृणां ज्ञानभूमीनां विज्ञानेऽन्येषां सिद्धान्तानां निर्णयो जातः । तदनन्तरमिदानी धर्मविज्ञानं वर्णयति । अनुकूलप्रतिकूलभेदेन कर्मणो द्वैविध्यम् । अनुकूलकर्मैव धर्मपदवाच्यं प्रतिकूलकर्मैवाधर्मपदप्रतिपाद्यम्। मीमांसाशास्त्रम्—अनुकूलकर्मभेदं, तदङ्गवर्णनं, तत्कर्मणोत्तरोत्तराभ्युदयनिःश्रेयसौ च वर्णयति । अत एव प्रथमसूत्रे धर्मजिज्ञासेतिपदं प्रायुज्यत । दाहकत्वशक्तिशून्यस्य वह्नेर्नास्तित्वप्रतीतिरिव धर्मसत्ता-विरहितस्य ब्रह्माण्डस्य तदङ्गस्य वा

नास्तित्वमेव । तत्साहाय्यमाश्रित्यैव ब्रह्माण्डस्योत्पत्ति-स्थिति-लयाः सम्पद्यन्ते । अधर्मस्य साहाय्येन जीवोऽधिकाधिकामधोगतिं लभते । परन्तु धर्मस्यैव साहाय्येन जीवः क्रमश उन्नतिमधिगच्छन् अन्ते दुरापं मुक्तिपदं लभत इत्यतो धर्मजिज्ञासयैव सर्वं ज्ञातव्यमिति ॥१॥

शास्त्रमारभमाणस्तन्मुख्यविषयं धर्मं निरूपयति—

धारको धर्मः ॥२॥

समष्टिव्यष्टिरूपब्रह्माण्डपिण्डमयसम्पूर्णसृष्टिक्रियां धरति यः स धर्मः । व्युत्पत्तिलभ्यस्यैवार्थस्य श्रुतिस्मृति-बोध्यत्वं तद्यथा—"धर्मो विश्वस्य जगतः प्रतिष्ठा, लोके धर्मिष्ठं प्रजा उपसर्पन्ति । धर्मेण पापमपनुदति, धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं परमं वदन्ति" "धारणाद्धर्ममित्याहुर्धर्मो धारयते प्रजाः, यत्स्याद्धारण-संयुक्तं स धर्म इति निश्चयः" इति । धर्मेणैव पूर्वसंस्कारमनुसृत्यानन्तपिण्डब्रह्मा-ण्डात्मकसृष्टि रुत्पत्तिस्थितिलयशालिनी यथावद् सम्भवतीति दृश्यते । प्रत्येक-ब्रह्माण्डान्तर्गता अनेक-ग्रहोपग्रहादयः स्वस्वस्थानत उत्पद्य स्वस्मिन् स्वस्मिन् स्थाने-ऽधिवसन्तः पिण्डमयानन्तजीवशरीरं समाश्रयन्तो यन्महाकाशे यथावत्स्थितिं लभन्तेऽत्रापि हेतुर्धर्म एव । धर्मेणैव किल जीवदेहात्मकस्य पिण्डस्य सृष्टिस्थिति-प्रलयाः संपद्यन्ते । उद्भिज्जस्वेदजाण्डजजरायुजयोनीनामगणितानि स्वरूपाणि धारयन्तो जीवाः क्रमश उन्नतिं प्राप्य मानवीं योनिमासादयन्त्येतदपि धर्मनिबन्धन-मेव। धर्मस्यैव साहाय्यतः प्राणिभिरैहिकामुष्मिकाभ्युदयं प्राप्नुवद्भिः क्रमशो वन्य-पशुवद्भिल्लत्वाद्यवस्थातोऽन्त्यजैरनार्यैरार्यैः शूद्रैर्वैश्यैः क्षत्रियैर्ब्राह्मणैर्वेदज्ञैस्त-त्त्ववेत्तृभिर्वानप्रस्थैः संन्यासिभिः कुटीचरैर्बहूदकैर्हंसैः परमहंसैश्च भवद्भिरन्ते-ऽपवर्गोऽपि प्राप्यते । प्रथमदशायां जीवा अभ्युदयेन युज्यन्तेऽन्ते च मोक्षमाप्नुवन्ति तत्र धर्म एव कारणतामधिगच्छति । साधारणविशिष्टभेदेन धर्मद्वैविध्यम् । ब्रह्मा-ण्डस्य पिण्डस्य चोत्पत्तिस्थितिलयक्रिया येन धार्यतेऽसौ साधारणः । सृष्टेर्विशिष्टा अवयवा विशिष्टा अवस्था च धार्यते येन स विशिष्टः । तत्र मनुष्यधर्मजीवधर्मप्राकृ-तिकधर्मादयः साधारणधर्मत्वेनावगन्तव्याः । आर्यधर्मानार्यधर्मवर्णाश्रमधर्म-पुरुषधर्मनारीधर्मादयो विशिष्टधर्मत्वेनेति ॥ २ ॥

ननु धर्मः कुतः किं विधत्ते इत्याह—

अभ्युदयकरः सत्त्वप्राधान्यात् ॥ ३ ॥

पूर्वसूत्राद्धर्म इत्यनुवर्त्तते । सत्त्वबाहुल्यादिष्टसाधकत्वं धर्मस्येत्यर्थः । रजः-साहाय्यमाश्रित्य तमोभिमुखीभूय स्वस्वकारणसत्तायां जडपदार्थोलीनो भवति । यथोद्भिज्जशरीरवतः काष्ठस्य मृतशरीरस्य वा तमोगुणबाहुल्यात् सर्वेषां तदीय

क्षित्यादिभूतपञ्चकपरमाणूनां यथायथं स्वस्वहेतुभूते महाभूतपञ्चके जायते लयः । यदि चोक्तशरीरद्वयं नाग्निसात्क्रियेत, तत्तथैव स्थाप्येत वा तथापि तत् कालान्तरे यथावत्परिणामात्पूर्णलयमाप्नुयात् । परन्तु नैवंविधो विलयः संपद्यते चेतनस्य सत्त्वसापेक्षस्य । अयं हि क्रमशः सत्त्वगुणोद्रेकादुद्भिज्जस्वेदजाण्डजजरायुज-योनिमासादयन् मनुष्ययोनिमुपैति । निरुक्तयोनिषु यथाक्रमं सत्त्वगुणो विकास-मापद्यते । नृयोनावपि तेनैव न्यायेन प्रथमावस्थायामैहिकोन्नति द्वितीयदशायां च पारलौकिकोन्नतिः। एतदेवालोक्य महर्षिणा प्रतिपादितं यज्जीवानां गतिः सत्त्वप्राधान्यमूलेति । धर्मोऽभ्युदयप्रदो धर्माधिष्ठितस्य न कर्हिचिदधःसंपातः। किन्तूत्तरोत्तरमुन्नतिरेवोपजायत इति । अत्र स्मर्यते–"प्रकाशकत्वात्सत्त्वस्य ज्ञान-हेतुत्वमीर्य्यते । लघुत्वादूर्ध्वनेतृत्वं सत्त्वाद्धर्मो हि निर्वभौ" । धर्मः सत्त्वगुण-प्रकाशकतया ज्ञानहेतुः । सूक्ष्मतया सत्त्वोन्नतिनिदानम् ॥ ३ ॥

अपि च—

निःश्रेयसकरः शक्तिमत्त्वात् ॥ ४ ॥

धर्म इत्यनुवर्त्तते । धर्मो निःश्रेयसकरः, निरतिशयं श्रेयः, निश्चितं श्रेयो वा करोतीतिकरः तस्य करः सः, मोक्षजनक इत्यर्थः । विलक्षणशक्तिवैशिष्ट्यात् पर-ब्रह्मणः पर्याप्तां शक्तिं बिभ्रतो धर्मस्यैवाश्रयणात् योन्यन्तरं परिभ्रमन् जीवो मनुष्य-योनिं प्राप्नोति । अज्ञानततिनिमग्नस्य बालस्य मातृकृतपालनपोषणादिवत् धर्म-स्याज्ञानजीवदशायां क्रमशो जीवानुन्नमयतो मानवयोनिप्रदातृत्वम् । तद्योनिं समासादयतो जीवस्य कर्तव्याकर्तव्यज्ञानलाभः । तेन च तस्य स्वपिण्डस्य प्रभुत्व-संपादकत्वम् । तदानीं स मातृपित्राचार्यगुरुजनशास्त्रवेदसाहाय्येन धर्माधर्मभेद-बोधसामर्थ्यात् प्रथमदशायां राजानुशासन-समाजानुशासनयो द्वितीयदशायामा-चार्यानुशासनवेदानुशासनयोस्तृतीयदशायां योगानुशासनस्य साहाय्येनाधर्म-मार्गं परित्यज्यैकं धर्ममार्गमेवाश्रयते, तथा भवन् क्रमशोऽभ्युदयम् अनेकजन्मना सिद्धिं च लभते । तथा चोक्तं गीतोपनिषदि—

"प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ।
अनेकजन्मसंसिद्धस्ततो याति परां गतिम् ॥

स्मर्यते चात्र—"उन्नतिं निखिला जीवा धर्मेणैव क्रमादिह ।
विदधानाः सावधाना लभन्तेऽन्ते परं पदम्" ॥

प्रथमावस्थात एव जीवानां तत्तत्कर्माणि तत्सहचरतामापद्यन्ते । क्रियाशुद्धिस्तूत्तरोत्तरं संस्कारशुद्धितो जायते । मानवा यावन्ति सत्त्वान्युप-

चिन्वन्ति तावन्त्येव तत्त्वज्ञानान्यपि । उदिते पर्याप्ततत्त्वज्ञाने क्रियाया विरामात् निवृत्तकर्मबन्धनो जीवन्मुक्तो निःश्रेयसपदं लभते । ईदृशक्रमोन्नतावन्ते परमपद-प्राप्त्यर्थञ्च धर्मस्यैव शक्तिमत्त्वम् । इति ॥ ४ ॥

प्रसङ्गोपात्तमधर्मं वर्णयति—

प्रतीपकर्माऽधर्मः ॥ ५ ॥

प्रतीपं विपरीतं कर्मैवाधर्मपदवाच्यम् । ननु धर्मप्रतिपादके शास्त्रेऽधर्मानुसन्धानं मुधैवेति चेन्न, प्रतिकूलविषयस्वरूपप्रबोधनमन्तरा प्रतिपाद्यविषयस्य त्रैकालिकसम्बन्धेनादार्ढ्यप्रसङ्गात् । प्रकाशस्य पदार्थस्य पूर्णं परिज्ञानं तद्विरोधि-तिमिरपदार्थज्ञानाधीनमेव । न हि दुःखमनारुह्य नरः सुखं कः पदार्थ इति जानीयात् । अतः पूज्यपादैः महर्षिभिर्भरद्वाजोऽधर्मस्वरूपं प्रतिपादयाञ्चक्रार । यथा सत्त्वगुणवर्द्धकस्य कर्मणो धर्मत्वमेवं तमोगुण वर्द्धकस्यैवाधर्मसंज्ञा । येन येन शारीरिकवाचिक-मानसिक-कर्मणा तमल उपचयो भवेत्तस्यैवाधर्मपदवाच्यत्वम् । एतद्विमृश्यैवाधर्मकार्यं निर्णीय ततः शास्त्रानुशासनेन मनुष्यानपसारयति । धर्माधर्मलक्षणन्तु स्मृतौ—श्रुतिस्मृत्युदितो धर्मस्त्वधर्मस्तद्विपर्ययः । इति ॥ ५ ॥

प्रकारभेदेनोभयोः शक्तिसाम्यं प्रतिपादयति—

समौ शक्तिवैशिष्ट्यात् ॥ ६ ॥

धर्मोऽधर्म इतिद्वयमनुवर्त्तते । विशिष्टस्य भावो वैशिष्ट्यं शक्तेर्वैशिष्ट्यं प्रभाव इति यावत् । तस्मात् शाक्तप्रभावात् धर्माधर्मौ समानावित । यथा धर्मस्याभ्युदयपरमपुरुषार्थौ प्रति सर्वशक्तिशालित्वं तथैवाधर्मस्यापि जीवाधोगतिं प्रति । तथाहि धर्मसाहाय्येन मानवयोनिमासाद्य ब्राह्मण-देवर्षि-प्रभृति-स्वरूपमाश्रयमाणाः शक्नुवन्त्यधिगन्तुमपवर्गमपि । एवमधर्मप्रभावेण मनुष्या नरक-प्रेतत्व-पशुत्वादिकमुपलभमानाः स्थावरत्वं यावदधिगच्छन्तीत्यतोऽधर्मस्याधःकारिण्या गतेः सदा सर्वथा भेतव्यम् ॥ ६ ॥

अतोऽधर्मस्य हेयत्वमाह—

अहितत्वाद्धेयः ॥ ७ ॥

अधर्म इत्यनुवर्त्तते । हितप्रतिकूलत्वादधर्मो वर्जनीयः । यदैव मनुष्याः शरीरेण मनसा बुद्ध्या वा ऽधर्मान् संचिन्वन्ति तदैवाधःसरणं श्रयन्ते । कायिकेनाधर्मेणाधिभौतिकीं, मानसिकेनाधिदैविकीं, बुद्धिकृतेनाध्यात्मिकीमवनतिं तदानीमेवाश्नुवते । तस्मात् परमपुरुषार्थं कामयमानैः सद्भिरनुक्षणमेवाधर्मतो भयं संभाव्य ततो विरक्तिरास्थेयेति ॥ ७ ॥

ननु धर्माधर्मयो निर्णयः कथं संपद्यत इत्यत आह—

सत्त्वतमोभ्यां धर्माधर्मनिर्णयः ॥ ८ ॥

सत्त्वतमोगुणाभ्यां धर्माधर्मयोरवधारणं भवति । सत्त्वगुणवर्द्धको धर्मः, तमोगुणवर्द्धकोऽधर्म इत्यर्थः । स्मर्यते चात्र—

देवा ! उद्भावकं सत्त्वतमसोः कर्म कथ्यते ।
धर्मःसत्त्वप्रधानत्वादधर्मस्तद्विपर्ययः ॥ ८ ॥

नन्वेवं कुत्र भवतीत्यत्राह—

सर्वत्रैवं दर्शनात् ॥ ९ ॥

समष्टिव्यष्टिरूपेऽखिलप्रपञ्चे सत्त्वतमोभ्यामेव धर्माधर्मनिर्णयः तथा-अनुभवाद् वेदशास्त्रसदाचाराणाममुष्मिन् विज्ञाने संमतत्वाच्च । यतो हि मानवानां कायवाङ्मनोजन्यासु सर्वास्वपि क्रियासु वेदशास्त्रसदाचारानुरोधेन धर्माधर्मसम्बन्धनिर्णयः । वैदिकदर्शनविज्ञानतो लोके नैतादृशः, देशः, कालः, क्रिया, पदार्थो वा विद्यते यत्र धर्माधर्मसम्बन्धो नास्ति । यतो हि धर्म ईश्वरीयनियमः । स्मर्यते च—

या बिभर्त्ति जगत्सर्वमीश्वरेच्छा ह्यलौकिकी ।
सैव धर्मो हि सुभगे ! नेह कश्चन संशयः ॥ इति ॥ ९ ॥

अत्र प्रथममुदाहरणं दर्शयति—

भक्ष्याभक्ष्ये ॥ १० ॥

पूर्वसूत्रादेवमित्यनुवर्तते । भक्षितुं योग्यं भक्ष्यं तद्विपरीतमभक्ष्यं, भक्ष्यश्चाभक्ष्यश्च तयोः समाहारस्तस्मिन्नेवं भवति । सत्त्वप्रधानभक्ष्यभोजने धर्मः । तमःप्रधानाभक्ष्यभोजनेऽधर्म इति भावः । वैदिकविज्ञानाश्रयतो द्रव्यस्य पूतापूतत्वविमर्शस्सत्त्वतमोमूलकः संपद्यते, न तु बाह्यस्वरूपाश्रयतः । सत्त्वगुणसम्बन्धवतः पदार्थसमुदायस्य शुद्धत्वम् । तमोगुणसम्बन्धवतोऽशुद्धत्वम् । स्मृतिशास्त्रे भक्ष्याभक्ष्यनिर्णयस्य तदनुसारित्वात् । पूज्यपादा महर्षयः समाधिसिद्धया धिया सत्त्वगुणवर्द्धकान् पदार्थान् भक्ष्यश्रेण्यां तमोगुणवर्द्धकान् पदार्थानभक्ष्यश्रेण्यां गणयामासुः । तथा हि स्मर्यते मनुना—

लशुनं गृञ्जनञ्चैव पलाण्डुकवकानि च ।
अभक्ष्याणि द्विजातीनाममेध्यप्रभवाणि च ॥
लोहितान् वृक्षनिर्यासान् वृश्चनप्रभवांस्तथा ।
शेलं गव्यञ्च पेयूषं प्रयत्नेन विवर्जयेत् ॥

वृथा कृसरसंयावं पायसापूपमेव च ।
अनुपाकृतमांसानि देवान्नानि हवींषि च ॥
आरण्यानाञ्च सर्वेषां मृगाणां माहिषं विना ।
स्त्रीक्षीरञ्चैव वर्ज्यानि सर्वशुक्तानि चैव हि ॥
यत्किञ्चित् स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितम् ।
तत्पर्युषितमप्याद्यं हविःशेषञ्च यद्भवेत् ॥
चिरस्थितमपि त्वाद्यमस्नेहाक्तं द्विजातिभिः ।
यवगोधूमजं सर्वं पयसश्चैव विक्रिया इति ॥ १० ॥

अपि च—

स्पृश्यास्पृश्ये ॥ ११ ॥

स्प्रष्टुं योग्यं स्पृश्यं तद्विपरीतमस्पृश्यं, स्पृश्यञ्चास्पृश्यञ्च तयोः समाहारस्तस्मिन्नेवं भवति । सत्त्ववर्द्धकस्पृश्यस्पर्शे धर्मः तमोवर्द्धकास्पृश्यस्पर्शेऽधर्म इति भावः । सर्वव्यापकमहाप्राणस्य क्रियावत्त्वात् प्राणशक्तेराकर्षणविकर्षणक्रियायाः सर्वव्यापकत्वाच्च यत्र व्यक्ता यस्मिन् पदार्थे वा यो गुणो विद्यते तत्स्पर्शेन तेनैव गुणेन सम्बन्धोऽभिजायते । अत एव तामसिक प्राणिनः तामसिकपदार्थस्य वा, सात्त्विकप्राणिनः सात्त्विकपदार्थस्य वा स्पर्शेन तद्गुणसम्बन्धोऽवश्यं कर्तरि समुपजायते । विज्ञानञ्चेदमाश्रित्यैव पूज्यपादा धर्माचार्याः स्पृश्यास्पृश्ययोर्विचारं शास्त्रे विहितवन्तः । स्मर्यते च दिङ्मात्रम्—

प्रायश्चित्तीयतां प्राप्य दैवात्पूर्वकृतेन वा ।
न संसर्गं व्रजेत् सद्भिः प्रायश्चित्तेऽकृते द्विजः ॥
ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥
न संवसेच्च पतितैर्न चाण्डालैर्न पुल्कसैः ।
न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः ॥
मक्षिका विप्रुषश्छाया गौरश्वः सूर्यरश्मयः ।
रजो भूर्वायुरग्निश्च स्पर्शमेध्यानि निर्दिशेत् ॥ इति ॥ ११ ॥

किञ्च—

शुद्धाशुद्धे ॥ १२ ॥

शुद्धञ्चाशुद्धञ्च तयोः समाहारस्तस्मिन्नेवं भवति । सत्त्ववर्द्धकशुद्धवस्तुना धर्मः तमोवर्द्धकाशुद्धवस्तुनाऽधर्म इति भावः । विज्ञानमिदमाश्रित्य पदार्थानां शुद्धाशुद्ध्यो विचारः प्रतिपादितः । असंख्यजीवान् निहत्य प्राप्तस्य

मधुपदार्थस्य, गोरोचनादिपदार्थस्य च पवित्रतायास्प्रथमं स्थानम्। पदार्थानाञ्चामीषां हिंसाजन्यत्वेऽपि विपुलसत्त्वगुणवर्द्धकत्वात् धर्मजनकत्वमेव। पवित्रफलमूलकोटिप्रविष्टानामपि पलाण्ड्वादिपदार्थानां तमोगुणवर्द्धकत्वाद् अपूतश्रेण्यां गणना अधर्मजनकता चेति।

अपरञ्च—

पूजोपचारे ॥ १३ ॥

उपचरणमुपचारः पूजाया उपचारस्तस्मिन्नेवं भवति। सत्त्ववर्द्धकपूजोपचारेण धर्मः। तमोवर्द्धकपूजोपचारेणाधर्म इति भावः। इमामेव वैज्ञानिकसरणिमालम्ब्य उपासना-कर्मकाण्डयोः पूजाद्रव्योपचारद्रव्ये निर्णीते स्तः। पूजोपचारे धूपदीपनैवेद्यादयः, कर्मकाण्डोपचारे कुशतिलयवसमिधश्च सत्त्ववृद्धया सूक्ष्मगत्याऽन्तःकरणसंशोधनेन च दैवजगतः सम्बन्धाधाने समर्था इति तत्र गृहीताश्च। ननु कस्याँश्चिद् विशेषोपासनापद्धतौ, मारणवशीकरणादितान्त्रिकयागे, श्येनादिवैदिकयागे च कथं तामसिकद्रव्यसम्बन्धः? इति शङ्कायाः स्पष्टमेवोत्तरम्। तदेवाह यैर्यैरुपासनाकार्यैर्यज्ञकार्यैश्चात्मोन्नति-जगत्कल्याण-दैवराज्यसंवर्द्धनानि सम्पद्यन्ते, तानि सात्त्विककार्याणि। तत्र सात्त्विकोपचारसम्बन्ध आवश्यकः। यत्रानुष्ठातृभिरितरजनामङ्गलसम्बन्धस्तानि सर्वाणि कार्याणि तामसिकानि। तादृशतामसिककार्यैःसह तामसिकोपचारसम्बन्धः स्वतः सिद्धः ॥ १३ ॥

अन्यच्च—

वासो वसने ॥ १४ ॥

वाससो वस्त्रस्य परिधानेऽपि धर्माधर्मयो निर्णयो भवति। सत्त्ववर्द्धकवस्त्रपरिधाने धर्मः। तमोवर्द्धकवस्त्रपरिधानेऽधर्म इति भावः। एवमेवान्यत्रापि बोद्धव्यम्। पूज्यपादैर्महर्षिभिर्धर्माधर्मयोर्व्यापकत्वप्रदर्शनार्थं साधारणेऽपि वस्त्रपरिधानादिके कार्ये तत्सम्बन्धोऽभिधीयते। प्रवृत्त्याश्रमनिवृत्त्याश्रममाश्रित्य व्यवहरतोर्गृहस्थसंन्यासिनोः कृते परिधानीयस्य वस्त्रस्य भिन्नतया स्वस्वाधिकारविरुद्धमाचारतोरुभयोरप्यधर्मः—यथा—संन्यासिनां काषायवस्त्रं परित्यज्य बहुमूल्यवस्त्रपरिधानेऽधर्मः, ब्राह्मणक्षत्रियविट्शूद्रादीनां गृहस्थानां स्वस्वाधिकारविहितवस्त्रपरिधाने धर्मः, इतरथाऽधर्मः। तथैव नव्यवस्त्रपरिधानक्षणे स्वेष्टदेवस्मृतिपुरःसरा शास्त्रप्रकारानुसारिणी वस्त्रधृति धर्माय कल्पत इति ॥ १४ ॥

अथ धर्ममाहात्म्यविख्यापयिषया तदधिष्ठातृस्वरूपं व्याहरति—

सच्चिदेकं तत् ॥ १५ ॥

धर्मस्य विश्वधारकत्वेऽपि तदधिष्ठातुर्विश्वात्मनो विश्वोत्पत्तिस्थिति-लयकारिणो विश्वं विराड्रूपेण स्वस्मिन् बिभ्रतः परमात्मनः स्वरूपन्तु सद्रूपम्, चिद्रूपम्, एकमद्वितीयञ्चेति । व्याहृतञ्च गीतोपनिषदि—

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥ इति

अस्तिरूपेण तद् ब्रह्म सत्स्वरूपमत एव नित्यमिति । ज्ञानसत्तारूपेण चित्-स्वरूपम्, चित्सत्तामन्तरेण विश्वस्यास्तित्वप्रतीत्यभावात् । एकञ्चाद्वितीयमि-त्यर्थः । श्रूयते च—"सच्चिदानन्दमव्ययम्" तथा च—

सच्चिदानन्दमद्वैतं सच्चिदानन्दमव्ययम् ।
सच्चिदानन्दमात्रं हि सच्चिदानन्दनामकम् ॥ इति ॥ १५ ॥

नन्वेकञ्चेद् ब्रह्म तत्कथमिह नानात्वप्रतीतिरित्यत आह—

भेदप्रतीतिरौपाधिकत्वात् ॥ १६ ॥

ब्रह्मण एकत्वेऽपि उपाधिसम्बन्धात् भिन्नत्वेन प्रतीतिः । कारणब्रह्म-कार्य-ब्रह्मणोः कार्यब्रह्म-तदवस्थान्तरब्रह्मणोश्चैवंविधसर्वप्रकारद्वैतभाने उपाधिरेव-निदानम् । मायोपहितत्वादेवाज्ञानजन्येदृशद्वैतप्रतीतिः । तदीयविराड्रूपेण सतः, ब्रह्मरूपेण च चितः, पूर्णतया विकाशः समुपजायते । वस्तुतस्तु कार्य-ब्रह्मकारणब्रह्मणोरैक्यमेव । अधिगतजीवत्वानां जीवानां रजस्तमोगुणतारतम्येना-ज्ञानस्यापरिमेयत्वाद् यावद् भेदप्रतीतिस्तत्राज्ञानजन्योपाधेरेव निमित्तत्वम् । स्मर्यते च—

नैवात्र विस्मयः कार्यो भवद्भिर्विप्रपुङ्गवाः !
ईश्वरस्य च जीवस्य भेदो ब्रह्मणि कल्प्यते ॥
मायाविद्यात्मकान्नूनं क्रमादावरणाद्द्विजाः !
ब्रह्मणः प्रतिबिम्बो हि जीवो देहाभिमानकः ॥
स्वस्मात्स्वभावतो भिन्न ईश्वरस्तेन मन्यते ।
ईश्वरस्य च जीवस्य भेदो यावदुपाधितः ॥
तिष्ठेत्तावत्क्षणं विप्राः ! कथञ्चित् क कदाचन ।
जन्ममृत्युप्रवाहोऽसौ संसारो न निवर्त्तते ॥
ईश्वरे चैव जीवे च भेदबुद्धिः कदाप्यतः ।
न कर्तव्या द्विजश्रेष्ठाः ! तत्त्वज्ञैरात्मवेदिभिः ॥ इति ॥ १६ ॥

ननु निरस्ताज्ञानदशायां कीदृशी प्रतीतिरित्यत्राह--

कार्यकारणयोरनन्यत्वम् ॥१७॥

कारणस्य ब्रह्मणः कार्यस्योपाध्यादेश्चाभिन्नत्वेनैक्यादेकत्वप्रतीतिः । यद्यप्यज्ञानदशायां जीवाः कारणब्रह्मरूपेणात्मना कार्यब्रह्मरूपस्य परिदृश्यमान-जगतः पृथक्त्वं पश्यन्ति । तथाप्यात्मज्ञानलाभानन्तरं तत्त्वदर्शिनामित्थं बोधः समुपजायते यत्कारण-कार्यरूपयोरात्मजगतोरैक्यमेव । अज्ञानजनन्यविद्या, ज्ञान-जननी च विद्या । विकसति तमोगुणेनाज्ञानं सत्त्वगुणेन तु ज्ञानमिति । द्वैत-प्रतीतौ बन्धने चाज्ञानमेव कारणम् । ज्ञानेनाद्वैतब्रह्मसद्भावसमुदयानन्तरं लभ्यते च परमपुरुषार्थः । धर्म-साहाय्येन संस्कारशुद्धिं क्रियाशुद्धिञ्च विदधतः साधकाः क्रमशश्चित्तशुद्धिं लभमाना आत्मज्ञानं प्राप्नुवन्ति । तदानीमेव जीव-न्मुक्ता अभेदं प्रतियन्ति, अनुभवन्ति च कारणब्रह्मकार्यब्रह्मणोरैक्यम् । यद्यपि घटं पश्यतामज्ञानां तत्स्वतन्त्रत्वे बोधः समुपजायते, तथापि पदार्थज्ञानलाभा-नन्तरं पदार्थज्ञानव्युत्पन्नानां मृत्तिका कः पदार्थः? ततो घटोत्पत्तिः केन प्रका-रेणेति बोधवतां नैव विचिकित्सा मृत्तिकाघटयोरैक्ये । तथा तत्त्वज्ञानिनां जीव-न्मुक्तानामनुभवे कारणब्रह्म कार्यब्रह्मवाभिन्नत्वेनैव विषयो भवतीति ॥

यथा च श्रुतौ—

सर्वं ब्रह्ममयं प्रोक्तं सर्वं ब्रह्ममयं जगत् ।
सर्वमात्मैव शुद्धात्मा सर्वं चिन्मात्रमद्वयम् ॥
नित्य-निर्मलरूपात्मा ह्यात्मनोऽन्यन्न किञ्चन ।
अणुमात्रलसद्रूपमणुमात्रमिदं जगत् ॥
अणुमात्रं शरीरं वा ह्यणुमात्रमसत्यकम् ।
अणुमात्रमचिन्त्यं वा चिन्त्यं वा ह्यणुमात्रकम् ॥
ब्रह्मैव सर्वं चिन्मात्रं ब्रह्ममात्रं जगत्-त्रयम् ।
आनन्दं परमानन्दमृते किञ्चिन्न किञ्चन ॥
चैतन्यमात्रमोंकारो ब्रह्मैव सकलं स्वयम् ।
आत्मनोऽन्यत्तु सन्नास्ति सर्वमात्ममयं जगत् ॥
ब्रह्ममात्रमिदं सर्वं ब्रह्ममात्रमसन्नहि ।
ब्रह्मणोऽन्यतरन्नास्ति ब्रह्मणोऽन्यजगन्न च ॥
ब्रह्मणोऽन्यत् तृणं नास्ति ब्रह्मणोऽन्यत् पदं नहि ॥ १७ ॥

कार्यस्वरूपं किमित्यत्राह—

कार्यं कार्यत्वात् ॥ १८ ॥

कार्यसम्बन्धात् कार्यं ब्रह्मेति व्याह्रियते । व्यक्तावस्थापन्नं परिदृश्यमानमेतज् जगदेव कार्यं ब्रह्म । तत्त्वज्ञानां दृष्टौ तु कारणब्रह्मगताः सच्चिदानन्दभावाः कार्य-ब्रह्मण्यपि अनुस्यूताः प्रतीयन्ते । तत्रैतावानेव भेदो यत् सच्चिदानन्दात्मकभावत्रयस्य कारणब्रह्मण्यद्वैतरूपेण, कार्यब्रह्मणि त्वविद्याप्रभावादनेकरूपेण तारतम्यत उच्चावचा प्रतीतिः । अतो भावत्रयस्य हेतुत्वेन कारणब्रह्मणि विद्यमानत्वात् कार्यब्रह्म-रूपे जगत्यपि भावतारतम्यरूपेण वर्तमानत्वात् तत् कार्यब्रह्मेति गीयते। स्थितिश्च तस्य भावत्रयस्य कारणब्रह्मणि समत्वेनाद्वैतरूपेण च । यद्यपि समष्टि-दृष्ट्या कार्यब्रह्मण्यपि भावत्रयस्य तस्य तथैवास्तित्वप्रतीतिः, परन्तु अविद्याप्रभा-वादद्वैतभावस्य व्यष्टिदृश्ये समत्वेन प्रतीयमानत्वाभावात् कारणब्रह्मणि कार्यब्रह्मणि च भेदप्रतीतिः । वस्तुतस्तु तत्त्वज्ञानदशायामज्ञानविनाशेनोभयत्रापि जीवन्मुक्ताः समत्वेनैव सच्चिदानन्दभावमनुभवन्तीति ॥ १८ ॥

ननु कार्यब्रह्मनियामिकायाः शक्तेः किं स्वरूपमित्यत्राह—

नियन्तृत्वात् तत्त्वं धर्मस्य ॥ १९ ॥

धर्मस्य विश्वनियामकत्वाद् भगवद्रूपत्वम् । विश्वस्य सृष्टिस्थिति-लयानां यथावत् क्रमरक्षार्थं धर्म एव प्रधानं निदानम् । महाप्रलयानन्तरं कारणवारिणि ब्रह्माण्डगोलकोत्पत्तिस्तत्र च ब्रह्मविष्णुमहेशानामाविर्भावेन विश्व-सर्गस्ततश्च प्रजापतीनां मानसिकी सृष्टिस्तदनु जीवानां वैजी सृष्टिः । सर्वाणि चैतानि कर्माणि कारणवारिण्यन्तर्निहितसमष्टिसंस्कारस्य धर्मशक्त्यैव सम्प-द्यन्ते । तदनन्तरं सृष्टिक्रियातः प्रलयं यावत् तत्सुरक्षा ब्रह्माण्डपिण्डयोः स्थितिश्च धर्मेणैव सम्पाद्येते । तेनैव चाखिलेष्वपि ब्रह्माण्डरूपसौरजगत्सु सूर्यस्य मध्याकर्षणम्, तत्रैव चाखिलग्रहोपग्रहाणां च सूर्यलोकेन सहाकर्षण-विकर्षणशक्तिसमता च संसिध्यतः । सूर्यग्रहोपग्रहादिषु आकर्षण-विकर्षण नाम्ना द्वे शक्ती विद्येते । यथाकर्षणशक्तेः प्राधान्ये ह्येको ग्रहो ग्रहान्तरे प्रविश्य विनश्येत्, तथैव विकर्षणशक्तेः प्राधान्ये ग्रहाः स्वस्वस्थानतश्च्युता विनाशमुप-गच्छेयुः । तयोः साम्यं सम्पादयन्त्या धर्मशक्तेरेवाऽयं प्रभावो यन्नैवं कदापि जायते । ब्रह्माण्डस्य स्थितिक्रमो यथावत् यथानियमञ्च सततं संसरन्ने-वास्ते । यथा समष्टिब्रह्माण्डे स्वधर्मरक्षाबलेन ऋषयो देवताः पितरश्च ब्रह्माण्डं गोपायन्ति, तथैव व्यष्टिस्वरूपदेहपिण्डे जीवानां क्रमोन्नतिः, मुक्तिश्च धर्मेणैव

संजायेते। सृष्टिधर्ममनुसृत्य ब्रह्माण्डस्य प्रकृतिनियमतो जीवानाम्—उद्भिज्जस्वेदजाण्डजादियोनितो जरायुजयोनिं यावत्, जरायुजेष्वपि समुन्नतपशुयोनितो मनुष्ययोनिपर्यन्तं समेयमाना क्रमोन्नतिः समष्टिसृष्टेः धर्मप्रभावाद् एव सम्पद्यते। धर्मस्य सत्त्वगुणवर्द्धकत्वात् जीवानां सदैव क्रमोन्नतया सत्त्वगुण उत्तरोत्तरं विकासमापद्यते। मनुष्येष्वप्यन्त्यज-शूद्र-वैश्य-क्षत्रिय-ब्राह्मण-कुटीचर-बहूदक-हंस-परमहंसादिस्वरूपतो जीवानां क्रमोन्नतिं सम्पादयतस्तस्य परमपुरुषार्थसाधकत्वम्। समष्टिव्यष्टिसृष्ट्योर्नियन्तृत्वात् धर्मस्य भगवत्स्वरूपत्वम्। कार्यब्रह्मरूपस्य जगतो भगवद्रूपत्वे तन्नियामकस्यापि तथात्वं स्पष्टमेवेति॥ १९॥

ब्रह्माण्ड-पिण्डधारक-धर्मप्रादुर्भावविज्ञानं परिदर्शयति—

तमोरजःसाम्ये तद्विकाशः स्थितिमूलकत्वात्॥ २०॥

स्थितिमूलकत्वात् तमोरजसोः साम्ये धर्मप्रादुर्भावो भवतीत्यर्थः। पूर्वमेव धर्मस्य सत्त्वमूलकत्वं सिद्धान्तितम्। अतस्तमोरजसी समत्वेन ह्रासमुपगच्छतः, सत्त्वं च यदा प्रवर्द्धते तदैव सत्त्वमूलकस्य धर्मस्योदयः। स्मर्यते च—

आकर्षण-विशिष्टा या शक्तिः सा राजसी मता।
विकर्षणेन सम्पृक्ता शक्तिर्मे तामसी तथा॥
सामञ्जस्यं विकुर्वाणा तयोः शक्त्योर्द्वयोरिह।
सात्त्विकी सैव धर्मोऽस्ति शक्ति में नात्र संशयः॥ इति॥ २०॥

उपसंहरति—

तस्माद् ब्रह्माण्डधारकः॥ २१॥

धर्मस्य स्थितिमूलत्वात् तमोरजसोः साम्य एव तद्विकाशाद् ब्रह्माण्डधारकत्वम्। पूर्वव्याहृतविज्ञानतः परमाणुमारभ्य ब्रह्माण्डं यावद् अखिलमेव वस्तुजातं धर्मस्य नियन्त्र्या शक्त्यैव धार्य्यते। धर्मेणैव परमाणुद्वयसंयोगतः सर्गारम्भस्तद्रक्षा, पिण्डब्रह्माण्डयोर्यथावत् स्थितिः, सर्वेषां प्राणिनां क्रमोन्नतिश्च सम्पादिता भवन्ति। स्मर्यते च—

ब्राह्मणाः! नयते नूनं सर्वलोक-हितावहः।
ब्रह्माण्ड-पिण्डरूपायाः सृष्टेर्यो धारको महान्॥
मानवान् धर्म एवायं कैवल्याभ्युदयप्रदः।
संरक्ष्याज्ञानभूमिभ्यो ज्ञानभूमिं निरन्तरम्॥

ददच्चाभ्युदयं सम्यक् संप्रापय्यशान्तिमां क्रमात् ।
ज्ञानभूमिं ततो दत्ते निःश्रेयसमहो ? परम् ॥
अहमेवास्मि धर्मस्य स्थितिस्थानं द्विजर्षभाः !
धर्माकृतिर्ममैवास्ते शक्तिरेव सनातनी ॥
विराट्सृष्टेः प्रवाहस्य धारणं कृतवत्यहो ।
परिव्याप्नोति धर्मस्य शक्तिरेषैव धारिका ॥
परमाणुभ्य आ नूनं पूर्णां ब्रह्माण्डविस्तृतिम् ॥
शक्तेः संधारिकाया मे धर्मस्यैव प्रभावतः ।
सूर्येन्द्वादिग्रहाः सर्वे तथा नक्षत्रमण्डलम् ॥
उपग्रहादयोऽप्येवं विराड्देहे ममानिशम् ।
स्व-स्वकक्षामुपाश्रित्य भ्रमन्तेऽत्र समन्ततः ॥
सृष्टे रक्षाञ्च कुर्वन्ति साहाय्यं ददतो मिथः ।
दैवासुरेण युद्धेन दैव्याः सृष्टेः पवित्रताम् ॥
सम्पादयन्ती धर्मस्य धारिका शक्तिरुत्तमा ।
प्रतिष्ठापयते देवान् स्वस्वलोकेऽसुराँस्तथा ॥
निश्चितं मातृभावेन विप्राः ! धर्ममयेण मे ।
प्रकृतेः पालिता जीवाः पोषिताश्च निरन्तरम् ॥
उद्भिज्जात्स्वेदजं गत्वा स्वेदजादण्डजं तथा ।
ततो गच्छन्त्यहो विप्राः ! अण्डजाच्च जरायुजम् ॥
जरायुजेषु क्रमशो मर्त्ययोनिं गताः पुनः ।
भवन्ति मोक्षमार्गस्य नूनमेतेऽधिकारिणः ॥
धारिका शक्तिरेवासौ धर्मस्य विप्रपुङ्गवाः ! ।
क्रमादुन्नमयन्ती वै मानवानुत्तरोत्तरम् ॥
कृत्वाधिकारिणो ज्ञानभूमेरन्ते च तानहो ।
कैवल्यपदवीं तेभ्यः प्रददाति शनैः शनैः ॥
सर्वेषां रक्षको धर्मः सर्वजीवहितप्रदः ।
निखिलव्यापकश्चास्ति सर्वेभ्योऽभ्युदयप्रदः ॥ इति ॥ २१ ॥

सम्प्रति मानवधर्मं विभजते—

मानवधर्मश्चतुर्विधो विशेषासाधारणापत्साधारणभेदात् ॥ २२ ॥

विशेषासाधारणापत्साधारणभेदेन मानवधर्मश्चतुर्विधो विज्ञेयः । यस्या-

साधारणया शक्त्योद्भिज्जादेः सहजपिण्डसमूहस्य कोटिग्रहोपग्रहपरिपूर्णस्यानन्तब्रह्माण्डसंघस्य च भवति सुरक्षणम्, तस्य विश्वविधारकधर्मस्य विज्ञानवर्णनं पूर्वसूत्रे विधाय साम्प्रतं मनुष्यपिण्डोपयोगिधर्ममनेन सूत्रेण निर्दिशति भगवान् सूत्रकारः ।

तत्सनातनधर्मस्य पादाश्चत्वार आसते ।
साधारणविशेषौ हि तथाऽसाधारणापदौ ॥

इति स्मरणाद् विशेष-धर्मोऽसाधारणधर्म आपद्धर्मः साधारणधर्मश्चेति चतुर्धा विभक्तो मानवधर्म इति ॥ २२ ॥

तत्र विशेषधर्मं निरूपयति—

अधिकारप्राधान्यहेतुको विशेषधर्मः ॥२३॥

अधिकारस्य प्राधान्यं, तत् हेतुर्यस्य स अधिकारप्राधान्यमूलक इति यावत् विशेषधर्मोऽवगन्तव्यः । यो हि अधिकारिविशेषमधिकृत्य निर्णीयतेऽसौ विशेषधर्म इति भावः । आर्यधर्मोऽनार्यधर्मश्च विशेषधर्मौ, वर्णाश्रमधर्मस्य लोकत्रयपवित्रकर आचारसमूहो विशेषधर्मविज्ञानमनुसृत्यैव निर्दिष्टः, पुरुषधर्मो नारीधर्मः प्रवृत्तिधर्मो निवृत्तिधर्मो राजधर्मः प्रजाधर्मश्चेत्यादयो विशेषधर्म एवान्तर्भवन्ति । स्मर्यते चात्र—

ब्रह्मचर्य्यञ्च दाम्पत्यं निवासो निर्जने वने ।
त्यागो ह्यध्यापनञ्चैव याजनञ्च प्रतिग्रहः ॥
धर्मयुद्धं प्रजारक्षा वाणिज्यं सेवनादयः ।
विशेषस्यापि धर्मस्य सन्तीमाः खलु वृत्तयः ॥

तत्तदधिकारिव्यतिरिक्तानामनुष्ठानायोग्यत्वात् सार्वजनिकहिताधायको न भवति विशेषधर्मः । यथा हि कामिनीकाञ्चनात्यन्तराहित्यरूपः संन्यासधर्मो गृहस्थकृतेऽधर्मः, एवं गृहस्थधर्मोऽपि संन्यासिकृते तथैवेति निर्गलितोऽर्थः ॥२३॥

द्वितीयं वर्णयति—

शक्तिप्राधान्यनिमित्तोऽसाधारणधर्मः ॥ २४ ॥

असाधारण-धर्मो हि धार्मिकशक्तिप्राधान्यकारणको भवति । शक्तेः प्राधान्यं निमित्तं यस्य स इत्यर्थः । अत्र तु पूर्वजन्मसंस्कारोऽसाधारणतपोयोगबलादीनि वा निदानम्, अतो व्यक्तिविशेष एवाधिकारी भवत्यसाधारणधर्मस्य,—

"यदा कश्चिद् विशेषस्तु धर्मः शक्तिमवाप्नुयात् ।
अधिकां भावसंशुद्ध्या कोटिं साधारणस्य सः ॥
असाधारणधर्मस्याधिकारं लभते वहन् ।"

इति स्मरणात् । विशेषतो ह्यसाधारणधर्मे दैवशक्तेरावश्यकत्वमभ्युपगन्तव्यम् । यथा च महर्षिविश्वामित्रस्यासाधारणतपःप्रभावेण तस्मिन्नेव जन्मनि क्षत्रियत्वमपहाय ब्राह्मणत्वाधिगमो द्रौपद्याः पञ्चपतित्वेऽपि महामहिममनोबलेन स्वसतीत्वसंरक्षणम् । नन्दी-कुन्ती-गण्डकीप्रभृतयश्चाप्यत्रोदाहृताश्चेति ॥ २४ ॥

तृतीयं निर्णयति—

आपन्मूलक आपद्धर्मः ॥ २५ ॥

आपद्धर्मो हि विपत्तिमूलको भवति । स चापद्येव विधीयते । अत्र भावशुद्धिमुद्दिश्याधर्मकार्यमपि धर्मकार्यवद्विधेयत्वेन प्रतिपादितम् । स्मृतौ यथा—

"आत्मकल्पेन यो धर्मं कुरुतेऽनापदि द्विजः ।
स नाऽप्नोति फलं तस्य परत्रेति विचारितम् ॥
देशभङ्गे प्रवासे वा व्याधिषु व्यसनेष्वपि ।
रक्षेदेव स्वदेहं वै पश्चाद्धर्मं समाचरेत् ॥
येन केन च धर्मेण मृदुना दारुणेन च ।
उद्धरेद्दीनमात्मानं पश्चाद्धर्मं समाचरेत् ॥
आपत्काले तु सम्प्राप्ते शौचाचारं न चिन्तयेत् ।
स्वयं समुद्धरेत् पश्चात् स्वस्थो धर्मं समाचरेत् ॥इति ॥ २५ ॥

प्रसङ्गोपात्तां शङ्कां समाधत्ते—

तत्राधर्मोऽपि धर्मो भावशुद्धेः ॥ २६ ॥

आपद्धर्मो हि बाह्यरूपेणाधर्मवत् प्रतीयते । ननु अधर्मप्रतीतिजनकापद्धर्मस्य कथं धर्मसंज्ञकत्वमिति चेन्मैवं, धर्मो हि भावशुद्धिमपेक्षते, तदानीञ्च तस्या जागरूकत्वान्न काऽप्यनुपपत्तिः । तदेव समाहितं महर्षिणा सूत्रकारेण सूत्रमिदमाविर्भाव्य । स्मर्य्यतेऽप्यत्र—

भावतत्त्वस्य विज्ञानं पूर्णरूपेण वेदितुम् ।
अन्तःकरण-विज्ञान-स्वरूपं वच्मि वोऽग्रतः ॥
मनो बुद्धिरहङ्कारश्चित्तमेतच्चतुर्विधम् ।

अन्तःकरणमस्तीति वित्त यूयं पितृप्रजाः ! ॥
मनसोऽन्तर्विभागोऽस्ति चित्तञ्चाहंकृतिर्धियः ।
मायापाशैर्दृढैर्बध्वा योषित् संसारगोचरम् ॥
यथा संसारिभिर्जीवैः कार्यं कारयतेऽनिशम् ।
तथा चित्तं मनोबुद्धिमहङ्कारो नियम्य च ॥
कार्यं कारयते शश्वन्नानावैचित्र्यसंकुलम् ।
संस्कारानुचरा जीवा वर्त्तन्ते सर्वथा खलु ॥
वासनोत्पन्नसंस्कारा अभिबध्नन्ति प्राणिनः ।
आसक्तिरेव साक्षात्स्याद् बन्धस्यास्य तु कारणम् ॥
संस्कारो वासनाजन्यः संस्कारात् कर्म जायते ।
वासनोत्पद्यते भूयः कर्मणो नाऽत्र संशयः ॥
वासनातः पुनर्विज्ञाः ! संस्कारो जायते ध्रुवम् ।
सदैवं वासनाचक्रं जीवानाञ्च गतागतम् ॥
घूर्णायमानमस्तीह चक्रनेमिर्यथा रथे ।
पूर्वजन्मार्जिता यादृक् कर्मसंस्कारसंततिः ॥
एतज्जन्मकृतानां वा कर्मणां यादृशी स्मृतिः ।
अङ्किता जीवचित्ते स्यादासक्तिरपि तादृशी ॥
तदासक्त्यनुरूपेषु विषयेषु निरन्तरम् ।
प्रसज्जन्तेऽभितो जीवास्तदासक्त्यनुसारतः ॥
आसक्तिश्चित्तसाहाय्यान्मनस्युत्पद्यते ध्रुवम् ।
दम्पत्योः संगमाल्लोके मनश्चित्तस्वरूपयोः ॥
आसक्तेर्जायते जन्म नात्र कार्या विचारणा ।
प्रजातन्तुं यथा पुत्रः संरक्षँल्लभते पितुः ॥
सर्वाधिकारमासक्ति बिभ्राणा विषयाँस्तथा ।
सृष्टिं वर्द्धयते शश्वदिह दैवीं च मानवीम् ॥
बुद्धिसृष्टेस्तु सिद्धान्तमपरं वित्त साम्प्रतम् ।
बुद्ध्यहङ्कारसंयोगाद् भावतत्त्वोदयो भवेत् ॥
भावोऽपि द्विविधो ज्ञेयः शुद्धाशुद्धप्रभेदतः ।
भावोऽशुद्धस्तत्र बुद्धिं विधत्ते विषयाकृतिम् ॥
शुद्धो भावः क्रमाच्चित्तं कुर्वाणो निर्मलं तथा ।
बुद्धिं ब्रह्मपदं नूनं नयञ्छान्तिं प्रयच्छति ॥

आसक्तिवशगा जीवा अथवा भाव-नोदिताः ।
एतत्तत्त्वद्वयस्यैव साहाय्यात् कर्म कुर्वते ॥
कायिकं वाचिकं चैव तथा मानसमेव च ।
आसक्तौ किन्तु वैवश्यं भावे स्वातन्त्र्यमस्ति ह ॥
आनन्त्याद्विषयाणां तु बहुशाखासमन्विता ।
आसक्ति विद्यते नूनं शुद्धो भावो न तादृशः ॥
अतोऽद्वैतदशां नेतुमीष्टेऽसौ नाऽत्र संशयः ।
यतो ब्रह्मपदं विज्ञाः ! विद्यतेऽद्वैतमेव हि ॥
आसक्त्या कार्यकर्त्तारो जीवाः प्रारब्धयोगतः ।
श्रीगुरो दैवतानां वा प्रसादादेव सर्वथा ॥
पाशतुल्याद्धि विषयात् स्वान् निवर्तयितुं क्षमाः ।
अन्यथा विषये तेषां प्रसक्तिस्तत्र निश्चिता ॥
किन्तु शुद्धस्य भावस्य साहाय्यात् कार्यकारिणः ।
भाग्यवन्तो न सज्जन्ते विषयेषु कदाचन ॥
उत्तरोत्तरमेतेषां सर्वथोर्ध्वगति भवेत् ।
संगृहीता हि संस्काराः पूर्वजन्मनि यादृशाः ।
आसक्तिस्तादृशी जीवे प्रादुर्भवति निश्चिता ॥
तस्या एवानुसारेण जीववर्गो जनिष्यते ॥
हेयोपादेयताज्ञानं नास्ति कोऽप्यत्र संशयः ।
असत्यमपि सत्यं स्यात् प्रोक्तं जीवहिताय वै ॥
अधर्मो जायते धर्मः पशुहिंसा यथाऽध्वरे ।
यात्येवं भावसम्बन्धाच्चैतन्यं जडतामिह ॥
सत्यं मिथ्या भवेद्धर्मो जायतेऽधर्मरूपभाक् ।
भावशुद्धिसमायुक्तमसत् कर्माप्यतो ध्रुवम् ॥
आपद्धर्मे भजत्येव सद्धर्मत्वं न संशयः ॥
विधत्तेऽदश्च जीवानां मङ्गलं परमं सदा ।
गतिः सूक्ष्मास्ति धर्मस्य भवन्तोऽतः पितृव्रजाः ।
कुर्य्युश्चेत् कर्म मच्चित्ता भावशुद्धिपुरःसरम् ।
अधिकुर्य्युस्तदावश्यं पूर्णं धर्म्मं सनातनम् ॥
मन्त्राणां प्रणवः सेतुर्यथा मन्त्रच्युतिं किल ।
अपनोद्याशु सम्पूर्णां दत्ते मन्त्राधिकारिताम् ॥

तथैव भावसंशुद्ध्या, शक्ति धर्मस्य धारिका।
सन्तिष्ठते सदाऽक्षुण्णा नितरामूर्ध्वगामिनी॥
कदाचिदत एवालमापद्धर्मस्य निर्णये
अधर्मेणापि धर्मस्य स्वरूपे परिणस्यते॥ २६॥

कदायमाश्रयणीय इत्याह—

अयमाश्रेयः कालाऽन्यथाभावे॥ २७॥

नन्वापत्कालेऽधर्मस्य धर्मत्वे निश्चितेऽपि कथमस्योपयोगावसर इति शङ्कामपनेतुं सूत्रमिदमवतारयति भगवान् सूत्रकारः—

कालस्य अन्यथाभावे वैपरित्ये अयं आपद्धर्मः, आश्रीयते इत्याश्रय-आश्रयणीय इत्यर्थः।

आपत्काले ह्युपस्थिते सङ्कटापन्नस्य पुंसः सर्वथा विशेषधर्मसाधनासम्भवेऽस्य धर्मस्याश्रयणावसरो ज्ञेयः। केवलमापत्कालाश्रयणीयत्वादेवायमापद्धर्मो निगद्यते नास्त्यवसरोऽस्यानापत्काले। अनुकूले देशकालेऽनुकूलायां वा परिस्थितौ सर्वेषामपि विशिष्टधर्माणां पालनं सुशक्यमेव। विरुद्धे हि देशकाले तत्रापि च विशेषतः कालसङ्कटे ह्युपस्थिते धर्मभीरुरपि साधकः सर्वथा धर्मसङ्कटे-पतितोऽसमर्थो धर्ममिममाश्रयतीति प्रागपि विस्तरशो विवेचितमेव। स्मृतिष्वपि बहुश उपलभ्यते, तद्यथा—

तस्मिन् प्रतिभये काले क्षते धर्मे युधिष्ठिर!
बभ्रमुः क्षुधिता मर्त्याः खादमानाः परस्परम्॥
विश्वामित्रोऽथ भगवान् महर्षिरनिकेतनः।
क्षुधापरिगतो धीमान् समन्तात् पर्यधावत॥
स कदाचित् परिपतन् श्वपचानां निवेशनम्।
हिंस्राणां प्राणिघातानामाससाद वने क्वचित्॥
अहो कृच्छ्रं मया प्राप्तमिति निश्चित्य कौशिकः॥
पपात भूमौ दौर्बल्यात् तस्मिन् चाण्डालपक्कणे।
स चिन्तयामास मुनिः किन्नु मे सुकृतं भवेत्॥
कथं वृथा न मृत्युः स्यादिति पार्थिवसत्तम!॥
स ददर्श श्वमांसस्य कुतन्त्रीं विततां मुनिः।
चाण्डालस्य गृहे राजन्! सद्यः शस्त्रहतस्य वै॥
स चिन्तयामास तदा स्तैन्यं कार्यमितो मया।
न हीदानीमुपायो मे विद्यते प्राणधारणे॥

आपत्सु विहितं स्तैन्यं विशिष्टं च महीयसः ॥
विप्रेण प्राणरक्षार्थं कर्तव्यमिति निश्चयः ।
हीनादादेयमादौ स्यात् समानात्तदनन्तरम् ।
असम्भवे वाऽददीत विशिष्टादपि धार्मिकात् ॥
सोऽहमन्त्यावसायिनां हराम्येनां प्रतिग्रहात् ।
न स्तैन्यदोषं पश्यामि हरिष्यामि श्वजाघनीम् ॥

इत्येवं विचिन्त्य महर्षिविश्वामित्रो रात्रौ तत्रैव सुष्वाप। अनन्तरञ्च निशीथे निद्रितेषु चाण्डालपरिवारेषु शनैः श्वमांसापहरणकाम्यया पक्कणं प्रविष्टं पुरुषमवलोक्य अवबुद्धश्चाण्डालो जगर्ज । कोऽयमपजिहीर्षया मद्गृहं प्रविष्टो मद्धस्तेन स्वप्राणान् परिहातुं पर्युत्सुक इति । तच्छ्रुत्वा भीतभीतोऽतिह्रीणो मुनिरुवाच । अहं विश्वामित्रो मुनिः क्षुधार्तस्तव गृहं प्रविष्टः । साधुदर्शी त्वं कथम्मां हन्तुमुद्यतः । विश्वामित्रस्य वचो निशम्य त्रस्तो.वसन्नचेताश्चाण्डालः शय्यां त्यक्त्वा भूमिं परिगतो बद्धाञ्जलि र्वेपमानः सगद्गदमुवाच । भगवन्नस्मिन् सूचीभेद्ये तमसि निशीथे किमत्रागमनकारणम् ? विश्वामित्र उवाच—

क्षुधितोऽहं गतप्राणो हरिष्यामि श्वजाघनीम् ।
क्षुधितः कलुषं जातो नास्ति ह्रीरशनार्थिनः ॥
अटन् भैक्ष्यं न विन्दामि यदा युष्माकमालये ।
तदा बुद्धिः कृता पापे हरिष्यामि श्वजाघनीम् ॥
अग्नि र्मुखं पुरोधाश्च देवानां शुचिषद्विभुः ।
यथा वै सर्वभुग् ब्रह्मा तथा मां विद्धि धर्मतः ॥

ततश्चाण्डालोऽवदत्—

शृगालादधमं श्वानं प्रवदन्ति मनीषिणः ।
तस्याप्यधम उद्देशः शरीरस्य श्वजाघनी ॥
नेदं सम्यग् व्यवसितं महर्षे ! धर्मगर्हितम् ।
चाण्डालस्य स्वहरणमभक्ष्यस्य विशेषतः ॥
साध्वन्यमनुपश्य त्वमुपायं प्राणधारणे ।
न मांसलोभात्तपसो नाशस्ते स्यान्महामुने !
जानता विहितं धर्मं न कार्य्यो धर्मसङ्करः ।
मास्म धर्मं परित्याक्षीस्त्वं हि धर्मभृतां वर !
बह्वेवं प्रलपन्तन्तं विश्वामित्रोऽब्रवीन्मुनिः ॥
निराहारस्य सुमहान् मम कालोऽभिधावतः ।

न विद्यतेऽप्युपायश्च कश्चिन्मे प्राणधारणे ॥
येन येन विशेषेण कर्मणा येन केनचित् ।
अभ्युज्जीवेत् साद्यमानः समर्थो धर्ममाचरेत् ॥
ऐन्द्रो धर्मः क्षत्रियाणां ब्राह्मणानामथाग्निकः ।
ब्रह्मवह्नि र्मम बलं भक्ष्यामि शमयन् क्षुधाम् ॥
यथा तथैव जीवेद्धि तत्कर्तव्यमहेलया ।
जीवितं मरणाच्छ्रेयो जीवन् धर्ममवाप्नुयात् ॥
सोऽहं जीवितमाकाङ्क्षन्नभक्ष्यस्यापि भक्षणम् ।
व्यवस्ये बुद्धिपूर्वं वै तद्भवाननुमन्यताम् ॥
बलवन्तं करिष्यामि प्रणोत्स्याम्यशुभानि च ।
तपोभि र्विद्यया चैव ज्योतींषीव महत्तमः ॥

ततः पुनः पुल्कसो जगाद—

नैतत् खादन् प्राप्नुते दीर्घमायु-
नैव प्राणान्नामृतस्येव तृप्तिः ।
भिक्षामन्यां भिक्ष मा ते मनोऽस्तु
श्वभक्षणे श्वा ह्यभक्ष्यो द्विजानाम् ॥

पुनरुवाच मुनिः—

न दुर्भिक्षे सुलभं मांसमन्यत् ।
श्वपाक ! मन्ये न च मेऽस्ति वित्तम् ॥
क्षुधार्तश्चाहमगति र्निराशः ।
श्वमांसे चास्मिन् षड्रसान् साधु मन्ये ॥
स्थाने भवेत् स यशः प्रेत्यभावे
निःसंशयः कर्मणां वै विनाशः ।
अहं पुनर्व्रतनित्यः शमात्मा
मूलं रक्ष्यं भक्षयिष्याम्यभक्ष्यम् ।
बुद्धात्मके व्यक्तमस्तीति पुण्यम् ॥
मोहात्मके यत्र तथा श्वभक्ष्ये ।
यद्यप्येतत् संशयात्मा चरामि ॥
नाहं भविष्यामि यथा त्वमेव ।

एवमभिधायापहृतश्वमांसो मुनिः स्वकुटजमागत्य कृतनित्यक्रियोऽचिन्तयत्—

अथास्य बुद्धिरभवत् विधिनाहं श्वजाघनीम्

भक्षयामि यथाकामं पूर्वं सन्तर्प्य देवताः ।
ततोऽग्निमुपसंहृत्य श्राह्रेण विधिना मुनिः ।
ऐन्द्राग्नेयेन विधिना चरुमश्रपयत् स्वयम् ॥
ततः समारभत् कर्म दैवं पित्र्यञ्च भारत !
आहूय देवान् इन्द्रादीन् भागं भागं विधिक्रमात् ।
एतस्मिन्नेव काले तु प्रववर्ष स वासवः ॥
सञ्जीवयन् प्रजाः सर्वा जनयामास चौषधीः ।
विश्वामित्रोऽपि भगवान् तपसा दग्धकिल्विषः ॥
कालेन महता सिद्धिमवाप परमाद्भुताम् ।
स संहृत्य च तत्कर्म अनास्वाद्य च तद्धविः ॥
तोषयामास देवांश्च पितॄंश्च द्विजसत्तम ! ॥ इति ॥ २७ ॥

चतुर्थं विविनक्ति—

सर्वकल्याणसाधकः साधारणधर्मः ॥ २८ ॥

साधारणधर्मः सर्वेषां कल्याणकारको भवति। स हि उक्तलक्षणस्य मनुष्यधर्मस्य चतुर्षु भेदेषु अन्तिमो मानवमात्रहिताधायक इति भावः। स्मृतावस्य लक्षणं यथा—

"धीर्विद्या सत्यमक्रोध औदार्य्यं समदर्शिता ।
परोपकार-निष्कामभावप्रभृतयः शुभाः ॥
साधारणस्य धर्मस्य विद्यन्ते वृत्तयो ध्रुवम् ।"
"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥" इति ।

एष साधारणो धर्मः सर्वैरेवोच्चावचाधिकारनिरतैरार्य्यानार्यस्त्रीपुरुषगृहस्थसंन्यासिप्रभृतिभि निर्विशेषं निर्बाधमेवानुष्ठेय इति ॥ २८ ॥

धर्माङ्गं निरूपयति—

तदङ्गत्रैविध्यं त्रिभेदवत् ॥ २९ ॥

सृष्टेस्त्रैविध्यमिव धर्मस्यापि त्रयो भेदा अवगन्तव्याः। अनन्तप्रवाहात्मकसर्गसंघातस्य त्रिगुण-त्रिभाव-त्रिदेवादि-त्रिभेदवत् साधारणस्यापि धर्मस्य दानतपोयज्ञात्मकं भेदत्रयमस्ति। तथा हि।

"यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्त्तव्यानीति मे पार्थ ! निश्चितं मतमुत्तमम् ॥"
"अङ्गानां त्रिविधं रूपं युष्माभिरवधार्य्यताम् ।
यज्ञो दानं तपस्त्रीणि धर्माङ्गानि प्रधानतः ॥"

इत्यादिस्मरणात् । ननु के ते सर्गस्य त्रयो भेदा इत्युच्यते—अध्यात्ममधिदैवमधिभूतमिति । तत्राद्यस्य ज्ञानरूपस्य महर्षयो, द्वितीयस्य क्रियात्मकस्य देवाः, तृतीयस्य च स्थूलपाञ्चभौतिकस्वरूपस्य पितरश्चालका भवन्ति । इत्थं कार्यब्रह्मरूपिण्याः सृष्टेस्त्रिभेदवत् तन्नियन्तुर्धर्मस्याप्युक्तप्रकारतस्त्रिभेदत्वमिति ॥ २६ ॥

तत्र प्रथमाङ्गं यज्ञमुदाहरति—

अभ्युदयनिःश्रेयसकरो व्यापारविशेषो यज्ञः ॥ ३० ॥

अभ्युदयापवर्गप्रदो वेदशास्त्रविहितो व्यापार एव यज्ञपदेनाभिधीयते । स च त्रिष्वपि मानवधर्माङ्गेषु श्रेष्ठतमोऽपेक्षणीयश्च । तस्यैव विभागत्रयानुरूपं भगवतो वेदस्यापि काण्डत्रयात्मकत्वं प्रसिद्धम् । ईदृग् हि यज्ञस्वरूपं विस्तीर्णं यत् क्वापि शास्त्रे धर्माणां समेषामपि यज्ञशब्दाभिधेयत्वम् । तथा हि गीतोपनिषदि—

"द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतयः संशितव्रताः ॥"

एवं सत्यपि निखिलधर्माणामेव यज्ञशब्दवाच्यत्वे अत्र महर्षिसूत्रकारः साधारणधर्मस्य त्रिष्वङ्गेषु प्रथमं यज्ञरूपमेवाङ्गमभिप्रैति ॥ ३० ॥

तद्भेदं व्याचष्टे—

स त्रिविधः काण्डत्रयबोध्यत्वात् ॥ ३१ ॥

यज्ञोऽसौ काण्डत्रयप्रतिपाद्यत्वात् त्रिविधो भवति । यथा कर्मोपासनाज्ञानरूपास्त्रयो भेदास्तथैव यज्ञस्यापीति बोध्यम् । स्मर्य्यते चात्र—

तेषु यज्ञः प्रधानं स्यात्तस्य भेदास्त्रिधा मताः ।
ज्ञानोपासनकर्माणि यदुक्तानि मनीषिभिः ॥
यज्ञधर्मविभेदास्तु मुनीनां बहवो मताः ।
कर्मज्ञानोपासनाख्या भेदा मुख्यास्त्रयस्स्मृताः ॥ ३१ ॥

तत्र कस्य प्राधान्यमिति निर्दिशति—

मानसो गरीयान् संस्कार-प्राधान्यात् ॥ ३२ ॥

संस्कार-प्रधानतया मानसो यागः सर्वश्रेष्ठो भवति। जगतः सर्गस्थिति-प्रलयकारणं मन एव। "मन एव मनुष्याणां कारणम्बन्धमोक्षयो" रिति स्मरणात्। अन्यच्च "तदैक्षत बहुस्यां प्रजायेयेतिश्रुतेः। "सोऽभिध्याय शरीरात्स्वात् सिसृक्षुर्विविधाः प्रजाः" इत्यभिध्यानपूर्विकां सृष्टिं वदतो मनोश्चापि मनस एव सर्गनिदानत्वमभिप्रेतम्। अपरतश्च संस्कारस्यापि सर्वसुक्ष्मत्वाद्बलीयस्त्वाच्च तत्र मनसोऽतिशयसम्बन्धः तदित्थमुभयोः सातिशयसम्बन्धयुक्तत्वात् "उत्तमो मानसो यागो मध्यमो बहिरर्चनमिति" स्मरणाच्च मानसो यागो गरीयान् इति ॥ ३२ ॥

सम्प्रति प्रसङ्गात् संकल्पप्राधान्यं दर्शयति—

अतो धर्म्मे प्राधान्यं संकल्पस्य ॥ ३३ ॥

उक्तकारणात् धर्मे संकल्पस्य प्राधान्यं विज्ञेयम्। पूर्वसूत्रे संस्कारजन्य-मानसयज्ञप्रधानतासिद्धौ धर्मे संकल्पस्यैव प्राधान्यं सिध्यति संस्कारजनक-त्वात्। कर्मोपासनाज्ञानयज्ञेषु दानाद्यनन्तधर्म्माङ्गेषु च कर्तुः यथासंकल्पं तमोरजःसत्त्वात्मकविविधफलोपलब्धिः। निष्कामं कर्म तु चरमपुरुषार्थाय निःश्रेयसायैव परिकल्पते। अत एव वैदिकतान्त्रिकादयः सर्वेऽपि यागाः संकल्प-पूर्वकमारभ्यन्त इति ॥ ३३ ॥

प्रसङ्गसङ्गत्या शपथादीन्निर्दिशति—

शपथोपयोगित्वमतः ॥ ३४ ॥

हेतुनाऽनेन शपथस्योपयोगिता प्रतीयते। यज्ञोपवीतधारणानन्तरं ब्रह्मचर्योद्वाहवानप्रस्थेषु कुटीचक-बहूदकादिसंन्यासभेदेषु विविधभेदगुरुदीक्षा-प्रभृतिषु च शपथपूर्वकमेव मानवोऽधिक्रियते। धर्मे तदङ्गेषु संकल्पस्य प्रधान-तया संस्कारोत्पादकशपथस्योपयोगित्वमपि स्वतः सिद्धम्। अनेनैवान्तःकर-णाङ्किताः सूक्ष्मबीजभावमापन्नाः संस्काराः साधकस्य धर्म्मोन्नतिरूपं फलमुत्पाद-यन्ति इति ॥ ३४ ॥

कर्मयज्ञस्य प्रथमभेदं निरूपयति—

नित्यनैमित्तिककाम्यभेदात् त्रिविधं कर्म ॥ ३५ ॥

नित्यनैमित्तिककाम्यभेदेन त्रिधा भिद्यते कर्म। यस्य च विहितस्य कर्मणोऽनुष्ठानेन न विशेषपुण्योपलब्धिरपित्वननुष्ठानेन पापं भवति तन्नित्यं, यथा सन्ध्योपासनादि। तद्धि नैमित्तिकं विहितस्य यस्याकरणे नास्ति पापं, अनुष्ठानेन विशेषपुण्योपलब्धि र्यथा देवमन्दिरप्रतिष्ठादि। यस्य च विहितस्य साधनेन साधकानां समीहितं सिध्यति तच्च काम्यं, यथा-पुत्रेष्टियज्ञादि। एतेषां हि नित्य-

नैमित्तिककाम्यकर्मणां सविस्तरवर्णनं वेद-स्मृति-पुराण-तन्त्रादिषु सर्वत्रैव दृश्यते। स्मृतौ तद् यथाः—

निरूपितास्त्रयो भेदाः शास्त्रेष्वेतस्य कर्मणः।
नित्यं नैमित्तिकं काम्यमिति वच्म्यथ लक्षणम्॥
विशिष्टं यदनुष्ठाने पुण्यं नाप्नोति मानवः।
तन्नित्यं प्रत्यवायश्चाकरणे यस्य निश्चितः॥
यथा सन्ध्योपासनादावकृते प्रत्यवायिता।
कृतेऽपि नियमेनैव पुण्यं किञ्चिन्न लभ्यते॥
कृते यस्मिन् फलप्राप्तिरकृते तु न पातकम्।
एतन्नैमित्तिकं प्रोक्तं यथा तीर्थादि-सेवनम्॥
काम्यं तत् कार्यसिध्यर्थं सकामो विदधाति यत्।
यथाऽनपत्यः पुत्रेष्टि यागादीननुतिष्ठति॥ इति॥ ३५॥

विभागं व्याकुरुते—

भावत्रयसम्बन्धाच्च॥ ३६॥

पूर्वोक्तं कर्माऽध्यात्माधिदैवाधिभूतभेदेनाऽपि त्रिविधं भवति। अखिला एव सृष्टिपदार्था उपर्युक्तभावत्रितयसम्बन्धेन त्रिधा विभज्यन्ते। तद्धि मध्य-मीमांसाऽपरनामक-दैवीमीमांसायां सविस्तरं वर्णितमास्ते। एवं कर्मयज्ञमपि भावत्रयानुकूलं त्रिधा विभक्तं विदन्ति। तद्यथा आत्म-ज्ञानजनकं पुस्तकप्रण-यनादि कर्म अध्यात्मयज्ञं, शास्त्राचार्यानुमोदितमरिष्टादिशान्त्यर्थमनुष्ठा-नादि दैवशक्ति-प्रकाशकमधिदैवयज्ञम्, भूतान्तर-तृप्तिजन्यापूर्वफलोत्पत्ति-साधकं विहितं ब्राह्मणभोजनादि चाधिभूतयज्ञमाहुरिति—

स्मृत्यन्तरेऽपि—

आध्यात्मिकं तथा चाधिदैविकञ्चाधिभौतिकम्।
कर्मयज्ञं त्रिधा प्राहुर्बुधास्तत्त्वविमर्शिनः॥
क्रियते यत् स्वधर्मस्य स्वदेशस्योपकारकम्।
ज्ञानानुशीलनं यत्र ज्ञेयमाध्यात्मिकं हि तत्।
देवानां कार्य्यमुद्दिश्य यत्र यागादिकं भवेत्।
तादृशं सकलं कर्म विज्ञेयं ह्याधिदैविकम्।
तच्चाधिभौतिकं कर्म सर्वभूतार्थमेव यत्।
दीयतेऽत्रातिथिभ्योऽन्नं भोज्यन्ते ब्राह्मणादयः॥ ३६॥

इदानीं यज्ञस्याङ्गान्तरं प्रतिपादयति—

बहुविधे ज्ञानोपासने ॥ ३७ ॥

उपासनायज्ञज्ञानयज्ञयोर्बहुविधा भेदाः । दर्शनेऽत्र कर्मणो विशेषसम्बन्धात् कर्मयज्ञं, तदङ्गानि चोपवर्ण्य सूत्रेणानेनोपासनाज्ञानभेदानां दिग्मात्रं निर्दिशति । मध्यमीमांसानुसारत उपासनायज्ञस्य सन्त्यनेके भेदाः । तथा हि-क्रियासिद्धांशानुरूपं मन्त्रहठ-लय-राजयोगाख्याश्चत्वारो भेदाः; उपास्यभेदानुसारम् आसुरशक्त्युपासना, ऋषिदेवतापित्रुपासना, लीलाविग्रहोपासना (अवतारोपासना), सगुणब्रह्मोपासना, निर्गुणब्रह्मोपासना चेति पञ्चभेदाः; उत्तरमीमांसाऽपरनामकब्रह्ममीमांसानुसारं ज्ञानयज्ञस्य च श्रवण-मनन-निदिध्यासनात्मकं भेदत्रयमवगन्तव्यमिति ॥ ३७ ॥

साधारणधर्मस्याङ्गान्तरं व्याहरति—

द्वन्द्वराहित्यहेतु व्यापारविशेषस्तपः ॥ ३८ ॥

द्वन्द्वविनाशनिदानं व्यापारविशेषो हि तपःशब्देन व्यवह्रियते । शीतोष्णादिसुखदुःखरूपद्वन्द्वसहिष्णुत्वजन्यविशेषशक्तिप्राप्तिस्तपः । शीतोष्णत्वादिशारीरिक-वाचालत्वतुष्णीम्भावादिवाचनिक सुखदुःखादिमानसिकद्वन्द्ववृत्तीः सहित्वा विशेषसंस्कारशक्ति-समुपार्जनं वा तपः ।यथा हि मृगयाशक्तिशून्यः श्वा मृगयुना बद्धस्तच्छक्तिमासादयति । एवमेव निरुद्धतत्तद् द्वन्द्वभोगवेगः साधकः तत्तद्विषयिणीं प्रचुरशक्तिमधिगच्छति, तादृशशक्तिसंग्राहककर्मैव तपः ।

स्मर्यते चाऽत्र—

शरीरचित्तवचसां सौख्यं त्यक्त्वा शनैः शनैः ।
तेषान्निर्द्वन्द्वधर्मित्वापादनं तप उच्यते ॥
यथैकत्र दृढैः पाशैः पशो र्बद्धस्य सन्ततम् ।
प्रवर्द्धन्तेऽधिकं कायवेगविक्रमशक्तयः ॥
एवं कायमनोऽक्षाणां वर्द्धन्ते नितरां बलम् ।
तपसि स्थापनादेव सुखभोग विवर्जनात् ॥ इति ॥ ३८ ॥

तद्भेदानाह—

त्रिविधं तत् ॥ ३९ ॥

प्राग्धर्माङ्गस्य यज्ञस्याङ्गप्रत्यङ्गानि निरूप्य तपसश्च लक्षणमभिधाय महर्षिर्भरद्वाजोऽधुना जगत्पावनस्य तपोधर्मस्य भेदानाह—

तत् पूर्वोक्तं तपः शारीरिकवाचनिकमानसिकभेदेन त्रिधा भिद्यते ।

व्याकरोति श्रुतिरपि महत्त्वमेतस्य । तद्द्वारैव ब्रह्मविष्णुमहेश्वरा देवर्षिपितृगणाश्च स्वस्वकार्यमर्हन्ति साधितुम् । जागतिकालौकिककर्त्तव्यकारणं तदेव । तद्भेदत्रयलक्षणं दिङ्मात्रं प्रदर्शितं गीतोपनिषदि यथा—

देवद्विज-गुरुप्राज्ञ-पूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥
अनुद्वेगकरं वाक्यं सत्यं प्रियहितञ्च यत् ।
स्वाध्यायाभ्यसनञ्चैव वाङ्मयं तप उच्यते ॥
मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥ इति ॥ ३९ ॥

अथ किं स्वरूपं साधारणधर्मस्य चरमाङ्गं दानमित्युच्यते—

परस्वत्वजनको व्यापारविशेषो दानम् ॥ ४० ॥

स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पादको व्यापारो हि दानमित्युच्यते । साधारणधर्म-तृतीयाङ्गस्यैतस्याङ्गान्तरापेक्षया सुसाध्यत्वं बाह्यवृत्तिसाध्यत्वात् यज्ञतपोवत् साधनकाठिन्याभावाच्च । अत्र स्मृतिर्यथा—

स्वसम्बन्धमपाकृत्य यदन्यस्मै प्रदीयते ।
तद्दानमिति सामान्यलक्षणं मुनयो विदुः ॥
तत्रापि दत्तवस्तुभ्यः सम्बन्धं मानसं स्वतः ।
सर्वथा क्षपयेद्यस्तु स वदान्यशिरोमणिः ॥
अतीवदुष्करन्त्वेतत्कर्म प्रोक्तं मनीषिभिः ।
यदपाक्रियते चित्त-सम्बन्धश्चिरसम्भृतः ॥ इति ॥ ४० ॥

ननु कतिविधं दानमित्याह—

तत् त्रिविधम् ॥ ४१ ॥

तद् दानं त्रिविधं तिस्रो विधा यस्य तत् त्रिप्रकारं भवति । अभयदान-ब्रह्मदानार्थदानभेदात् । तत्रेष्टोपासनापद्धतिं तत्त्वज्ञानं वा द्वारीकृत्य गुर्वाचार्याणां शिष्यजिज्ञासुभ्यो निर्भयमुक्तिपथप्रदर्शनोपदेश एवाभयदानम्, विद्यादानमेव ब्रह्मदानम्, अन्नवस्त्रभूमिकन्या-धनैश्वर्यादिदानञ्चार्थदानमिति । स्मर्यते चात्र—

दानमर्थस्य विद्याया अभयस्येति च द्विजाः ।
इत्येवं त्रिविधं दानं मया पूर्वमुदीरितम् ॥
भवत्यभयदानं तद् गुरुणा करुणावशात् ।

संसारभयनाशाय सम्यग् यदुपदिश्यते ॥
संसारभयसंत्रस्त-जीवानाम्प्रविभीषताम् ।
शक्ताः सद्गुरवस्तत्र भयं मुख्यं व्यपोहितुम् ॥
यस्मात् सर्वेऽभयं दातुं नैव शक्ताः क्षितौ जनाः ।
तस्मादनुपयोगित्वाद् दानमेतदुपेक्ष्यते ॥
विद्यादानञ्चार्थदानमालोच्येते ततोऽधुना ।
तत्र पूर्वं ब्रह्मदानापरपर्यायमुच्यते ॥
कायेन मनसाऽर्थेन विद्यावृद्धिमिहेच्छता ।
यद् दानं दीयते सम्यग् ब्रह्मदानं तदीर्य्यते ॥
स्थापनं पाठशालानां महाविद्यालयस्य च ।
दुर्लभप्राक्तनानर्घ्यपुस्तकानां प्रकाशनम् ॥
तथा विरचनं तेषां ग्रन्थानामुपयोगिनाम् ।
दानञ्च पुस्तकादीनां विद्यार्थिभ्योऽथ पाठनम् ॥
एवं लेखनशैलीनां हितबुद्ध्या प्रवर्त्तनम् ।
ज्ञेयान्येतान्यपि ब्रह्म-दानान्तर्भावितानि वै ॥
हस्त्यश्वरथवस्त्रान्नकन्यारत्नावनीगृहम् ।
दीयते श्रद्धया यत्र चेतनाचेतनात्मकम् ॥
धनैश्वर्यादिकं सर्वं दीयमानमथार्थिने ।
ऋषिभिः प्रोच्यते सम्यगर्थदानमिति स्फुटम् ॥ इति ४१ ।

ननु स च धर्मः समग्रतया कतिविध इत्याह—

स चतुर्विंशतिविधः प्रकृतितत्त्ववत् ॥ ४२ ॥

प्रकृतेश्चतुर्विंशतितत्त्ववत् धर्मस्यापि चतुर्विंशतिभेदा भवन्ति, तस्य ब्रह्मशक्तिमहामायास्वरूपत्वात् । स्मर्यते चात्र—

साधारणस्य धर्मस्य वर्ण्येऽङ्गानि साम्प्रतम् ।
आकर्ण्यतां भवद्भिश्च सावधानेन चेतसा ॥
चतुर्विंशतितत्त्वानां नूनं सन्त्यनुरूपतः ।
अङ्गानि पूर्णधर्मस्य चतुर्विंशतिरेव भोः ॥

तत्र अर्थदानं, ब्रह्मदानम्, अभयदानमिति दानत्रयम्, कायिकं तपः, वाचनिकं तपः, मानसिकं तप इति तपस्त्रयम्, नित्यं कर्म, नैमित्तिकं कर्म, काम्यं कर्म, आधिभौतिकं कर्म, आधिदैविकं कर्म, आध्यात्मिकं कर्मेति षट्

कर्माणि, असुरोपासना, देवर्षिपितृपासना, अवतारोपासना, सगुणपञ्चोपासना, निर्गुणोपासना (ब्रह्मोपासना) मन्त्रयोगोपासना, हठयोगोपासना, लययोगोपासना, राजयोगोपासनेत्युपासनानवकम्, श्रवणं, मननं, निदिध्यासनमिति ज्ञानयज्ञत्रयम्, एवं सर्वसम्मेलनेन धर्मश्चतुर्विंशतिप्रकार इति ॥ ४२ ॥

अपि च—

प्रत्येकं त्रिविधं त्रिगुणात्मकत्वात् ॥ ४३ ॥

तमोरजः सत्त्वरूपत्रिगुणात्मकत्वात् प्रत्येकं धर्माङ्गं त्रिविधं भवति । अशेषद्वैतप्रपञ्चकारणभूताया मूलप्रकृते स्त्रैगुण्यात्मकत्वात् सृष्टिधारकधर्मस्यापि तथात्वं स्वभावसिद्धम् । पूर्वोक्तचतुर्विंशतिविधानां धर्माङ्गानां प्रत्येकं सात्त्विकराजसिकतामसिकभेदतस्त्रिविधत्वेन साधारणधर्मस्य द्विसप्ततिविधत्वमवगन्तव्यम् । सुस्पष्टमिदं प्रत्येतव्यं यदत्रैव धर्मस्य द्वासप्तत्यङ्गेषु विश्वस्या अपि पृथिव्या धर्मोपधर्म-सम्प्रदायपन्थमतानि सर्वाण्यन्तर्भवन्ति । स्मर्यते चाप्यत्र—

सर्वत्र व्यापकादस्मात् सर्वजीवहितैषिणः ।
धर्मात् सनातनादेव सर्वे धर्माः समुत्थिताः ॥
अङ्गानि त्रीणि धर्मस्य दानं यज्ञस्तपस्तथा ।
स्कन्धरूपाणि धर्मस्य शाखिनः पावनानि वै ॥
दानञ्चापि त्रिधा प्रोक्तं विद्यार्थाऽभयदानतः ।
तत्रापि गुणभेदेन नवधा दानमीर्य्यते ॥
एवं तपस्त्रिधा ज्ञेयं कायिकं वाचिकं तथा ।
मानसञ्चाथ गुणतः प्रत्येकं त्रिविधं पुनः ॥
यज्ञधर्मविभेदास्तु मुनीनां बहवो मताः ।
कर्मज्ञानोपासनाख्या भेदा मुख्यास्त्रयः स्मृताः ॥
कर्मयज्ञस्य षड्भेदा नित्यं नैमित्तिकन्तथा ।
काम्यमाध्यात्मिकञ्चैवाधिदैवञ्चाधिभौतिकम् ॥
सत्त्वादिगुणयोगेन भेदास्तत्रापि पूर्ववत् ।
अतोऽष्टादशधा कर्म प्रत्येकं गुणयोगतः ॥
तथैवोपासनायज्ञो बहुधा मुनिभिर्मतः ।
परं मुख्यप्रभेदास्तूपासनापद्धतेरिमे ॥
उपास्तिर्ब्रह्मणस्त्वाद्या द्वितीया सगुणस्य च ।
तृतीया स्मर्य्यते लीलाविग्रहोपासना बुधैः ॥
चतुर्थी पितृदेवर्षिगणानामस्त्युपासना ।

अन्तिमा क्षुद्रदेवानां प्रेतादीनां विधीयते ॥
अन्येऽपि तस्याश्चत्वारो भेदाः साधनपद्धतेः ।
तत्रादिमो मन्त्रयोगः स्थूलध्यानैकसाधनः ॥
द्वितीयो हठयोगः स्याज्ज्योतिर्ध्यानैकसाधनः ।
लययोगस्तृतीयोऽसौ विन्दुध्यानविधानकः ॥
राजयोगोऽन्तिमस्तत्र ब्रह्मध्यानं विधीयते ।
भेदा नवानामप्येषां गुणतः सप्तविंशतिः ॥
श्रवणं मननञ्चैव निदिध्यासनमेव च ।
त्रिधैवं ज्ञानयज्ञोऽपि नवधा स्याद्गुणाश्रयात् ॥
इत्यन्वशासु धर्मस्य मुख्यान् भेदानशेषतः ।
चतुर्विंशतिसंख्याकान् मुनयस्तत्त्वदर्शिनः ॥
एतेषामपि धर्माङ्गभेदानां गुणभेदतः ।
भेदा द्विसप्ततिर्भूयो भवन्तीति विभाव्यताम् ॥

अन्यच्च—

अहमेवास्मि भो देवाः ! धर्मकल्पद्रुमस्य च ।
बीजं मूलं तथाऽऽधारो नात्र कश्चन संशयः ॥
स्कन्धस्तस्य द्रुमस्याऽऽस्ते धर्मो वै विश्वधारकः
मुख्यं शाखात्रयश्चास्य यज्ञो दानं तपस्तथा ॥
ब्रह्मार्थाभयदानानि देवास्त्रैगुण्ययोगतः ।
दानस्य चोपशाखाः स्युर्नवधा नात्र संशयः ॥
तपोऽपि त्रिविधं ज्ञेयं कायवाणीमनोभवम् ।
त्रैगुण्ययोगेनास्यापि लघुशाखा नवासते ॥
उपशाखा अनेकाः स्यु र्यज्ञशाखासमुद्भवाः ।
काम्याध्यात्माधिदैवाधिभूत–नैमित्यनित्यकाः ॥
कर्मयज्ञप्रशाखाया भेदास्त्रैगुण्ययोगतः ।
त एवाष्टादशास्या हि प्रशाखाः सुमनोहराः ॥
पितृदेवर्षिवृन्दानामवतारगणस्य च ।
पञ्चानां सगुणब्रह्मरूपाणां निर्गुणस्य वै ॥
ब्रह्मणोऽपि सुरौघाणामुपास्तेः पञ्च भक्तितः ।
मन्त्रो हठो लयो राजाभिधानो योगतो ध्रुवम् ॥
अस्या भेदाश्च चत्वारो भेदा एवं नवासते ।

एते भेदा नवैवाहो देवास्त्रैगुण्ययोगतः ॥
उपास्तेरुपशाखाः स्युः संख्यया सप्तविंशतिः ।
श्रवणं मननं चैव निदिध्यासनमेव च ॥
त्रयोऽमी ज्ञानयज्ञस्य भेदास्त्रैगुण्ययोगतः ।
नवधा सन्विभक्तास्ताः प्रशाखा हि नवाःसते ॥
द्विसप्तत्या प्रशाखाभिः शाखाभिश्चैवमेव भोः ।
निजानां ज्ञानिभक्तानां धर्मकल्पद्रुमात्मना ।
विराजे स्वान्तदेशेऽहं निर्ज्जरा ! नात्र संशयः ॥ इति ॥ ४३ ॥

ननु धर्मस्य कियन्ति उपाङ्गानि तत्राह—

उपाङ्गानन्त्यं प्रकृतिपरिणामानन्तभावात् ॥ ४४ ॥

साधारण-धर्मस्य द्वासप्तत्युपाङ्गान्युपवर्ण्य तेषां विस्तृतस्वरूपमभिधातुं सूत्रयति महर्षिः सूत्रकारः । त्रिगुणात्मिकायाः प्रकृते गुणत्रयवैषम्यात् परिणामानामसंख्यत्वात् धर्मोपाङ्गानामप्यपरिमेयत्वं सम्भवति । स्मृतिरप्यत्र—

धर्मकल्पद्रुमस्यास्य पत्रपुष्पात्मकान्यहो ।
उपाङ्गानि न संख्यातुमर्हाणि कैरपि क्वचित् ॥
विचित्राणि मनोज्ञानि सन्ति तानि ध्रुवं सुराः ।

धर्माङ्गानां तप आदीनामङ्गभूतानि असंख्यानि अहिंसाधृतिक्षमादीनि धर्मोपाङ्गानि ज्ञेयानीति ॥ ४४ ॥

ननूपाङ्गानि किमात्मकानीत्याह—

त्रिगुणात्मकान्येतानि ॥ ४५ ॥

विश्वव्यापकस्य साधारणधर्म्मस्यासंख्येयत्वं संसाधितं पुनरपि तस्यैवालौकिको विस्तारोऽपि विविच्यते, एतानि उपाङ्गानि त्रिगुणस्वरूपाणि भवन्ति । प्रकृतिविकारजन्यनिखिलदृश्यप्रपञ्चस्य त्रिगुणात्मकत्वात् साधारणधर्मस्यानन्तोपाङ्गानां मध्ये सर्वेषामेव त्रिगुणभेदभिन्नत्वेन त्रिविधत्वं सुस्पष्टं विज्ञेयमिति॥४५॥

उपाङ्गे विशेषमाह—

उपाङ्गमेकमङ्गस्याङ्गानां वा भावानन्त्यात् ॥ ४६ ॥

भावस्यानन्त्यात् एकं धर्मोपाङ्गं अन्यस्य धर्माङ्गस्य धर्माङ्गानां वा उपाङ्गं भवितुमर्हति । त्रिगुणभेदत उपाङ्गानामानन्त्यं पूर्वसूत्रे प्रदर्श्य प्रकृतसूत्रे भावमवलम्ब्य पुनरपि तदनन्ततां प्रतिपादयति । सर्वगसकलजीवहितकर-साधारण-

धर्मस्यैकमुपाङ्गमपि भावानामानन्त्यमवलम्ब्य अन्यस्याऽप्युपाङ्गं सम्भवति एवमेकमप्युपाङ्गं बहूनामप्यङ्गानामुपाङ्गं भवति । पूर्वं विस्तरशो वर्णितस्य भावविज्ञानस्यावलम्बनेन उपाङ्गानाम् एवं विस्तारः स्वभावसिद्धः । स्मर्यतेऽत्र—

उपाङ्गान्यपि धर्मस्य वर्त्तन्ते भूरिशो ध्रुवम् ।
देशकालादिवैचित्र्यादुपाङ्गं ह्येकमेव च ॥
अङ्गानां त्वनेकेषामुपाङ्गं स्यादसंशयम् ।
अत्यन्तं वर्त्तते विज्ञाः ! धर्मस्य गहना गतिः ॥ ४६ ॥

प्रसङ्गोपात्तां तेषां शक्तिं विविनक्ति ।

शक्तिमन्त्यग्निस्फुलिङ्गवत् ॥ ४७ ॥

साधारणधर्मस्याङ्गोपाङ्गादिना भेदेऽनेकत्वं समाश्रिते तत्र भेदे शक्तितारतम्यमस्ति न वेति शङ्कां समाधातुमेवास्य सूत्रस्यावतारो महर्षिणा विहितः।

अग्निकणवदङ्गोपाङ्गानि शक्तिमन्ति भवन्ति । अतिशयिता शक्तिरस्ति येषामिति विग्रहे अतिशायने मतुप् तानि विलक्षणपूर्णशक्तिविशिष्टानीत्यर्थः । यथा हि-पावकस्फुलिङ्गा अनुकूलपवनतृणकाष्ठादियोगतः सर्वं भस्मसात् कर्तुमर्हन्ति, तथैव धर्माङ्गोपाङ्गान्यपि समुचितदेशकालपात्रसेवितानि अभ्युदयस्य तु का कथा निःश्रेयसकराणि अपि भवन्ति । एवं धर्मस्य प्रत्येकमप्यङ्गमुपाङ्गञ्च पूर्णशक्तिमदिति निःसन्दिग्धम् ॥ ४७ ॥

प्रसङ्गोपात्तां द्वितीयां शङ्कां समाधत्ते ।

विशेषशक्यमशक्यं साधारणेन ॥ ४८ ॥

ननु विशेषसाधारणयोर्धर्मयोः पृथक्त्वे धर्माङ्गोपाङ्गानां शक्तिसाम्ये च सिद्धे तयोः कार्य्यमपि समानमेव भवितुमर्हतीत्यादिशङ्कामपनुदति सूत्रेणानेन महर्षिर्भगवान् सूत्रकारः । विशेषधर्मेण यत् कर्त्तुं शक्यं साधारणेन न तदिति । तत्र दृष्टान्तः । ब्राह्मणत्वं, संन्यासित्वं, वर्णधर्मरजोवीर्यशुद्धिरित्यादिकं मानवो विशेषधर्मेणैवाधिगन्तुं शक्नोति न साधारणेन कथमपीति । साधारणधर्मानुष्ठानेन पूर्णोन्नतिमुपेतोऽपि पुमान् विशेषधर्मजन्याधिकारं न कदाचिदपि लब्धुं शक्नोति, इति सुनिश्चितम् । अपि च विशेष-धर्मपालिनी सती स्त्री पञ्चमलोकं प्राप्नुवती पापिनमपि निजपतिं तत्र नयति । किन्तु असती योगिनी तपस्विनी ज्ञानवती निःश्रेयसमधिगच्छन्त्यपि सतीत्वसुलभविशेषशक्तिं नैव लभते इति स्फुटं विशेषसाधारणधर्मयोरन्तरम् । इत्येवं वर्णधर्माश्रमधर्म-सतीधर्मादिविशेषधर्माणां किमप्यनिर्वचनीयमेव माहात्म्यम् ॥ ४८ ॥

प्रसङ्गतो विशेषधर्मस्य गौरवमुपसंहरति—

गरीयस्त्वमतो विशेषधर्मस्य ॥ ४९ ॥

अतो विशेषेण शक्यस्य साधारणेनाशक्यत्वाद्धेतोर्विशेषधर्मस्य गरीयस्त्वं बोध्यम् । अतिशयेन गुरुः गरीयान् तस्य भावः । अतिशयेन गुरुत्वमित्यर्थः । असाधारणधर्माऽपद्धर्म-साधारणधर्म-विशेषधर्मरूपेण चतुर्धा विभक्ते मानवधर्मे प्रथमद्वितीययोः क्रमशो विशेषाधिकारसम्पन्नालौकिकमहिमभिर्विपद्ग्रस्तैश्चानुष्ठेयत्वान्न तत्र सर्वजनीनसार्वभौमोपयोगिता । किन्तु तृतीयचतुर्थयोः समानतया सर्वजनीनसार्वभौमोपयोगिता सर्वथाऽस्तीति निःसन्दिग्धम् । तत्र परस्परं महदन्तरमिदमस्ति यद् साधारणधर्मेण सम्पादनीयं सर्वमेव कार्य्यं विशेषधर्मेणापि स्वाधिकारिणे सम्पाद्यते । परन्तु विशेषधर्मानुष्ठानेन यादृशं यावन्तं वाऽधिकारं तदधिकारी पुरुषः समश्नुते, न तावन्तं तादृशं वाऽधिकारं साधारणधर्मानुष्ठानेन कदापि कोऽपि प्राप्तुमर्हति । इत्येवं तृतीयचतुर्थयोः सत्यपि सार्वजनिकहिताधायकत्वे पूर्वोक्तसूत्रप्रतिपादनेन चतुर्थस्यैव सर्वप्राधान्यं सिध्यति । वेदे शास्त्रे चास्यैव वर्णनबाहुल्यमवलोक्यत इति ॥ ४९ ॥

तर्हि विशिष्टसाधारणयोः शक्तेः पूर्णतायामपि भेदः स्यादिति शङ्कां समाधत्ते—

पूर्णशक्तिमत्त्वं तूभयोः ॥ ५० ॥

उभयोर्विशेषसाधारणधर्मयोः पूर्णशक्तिमत्त्वं भवत्येव । पूर्णा शक्तिरस्ति ययोस्तयोर्भावस्तत्त्वं, पूर्णशक्तियुक्तत्वमित्यर्थः । ननु विशेषधर्मस्य प्राधान्ये वेदशास्त्रबहुवर्णनीयत्वे च सति साधारणधर्मस्याल्पशक्तिमत्त्वमिति चेन्न, द्वयोरेवाभ्युदयनिःश्रेयसप्रदाने शक्तितारतम्यविरहात् पूर्णशक्तिविशिष्टत्वम् ।

तथा हि—कोऽप्यधिकारी साधारणधर्मानुष्ठानप्रभावतोऽभ्युदयमधिगच्छन्निःश्रेयसमधिगन्तुमधिकारितां गच्छति । एवं विशेषधर्मोऽपि स्वाधिकारिणं यथावत्स्वानुष्ठातारम् ऐहलौकिकपारलौकिकाभ्युदयमुपप्रयच्छन् क्रमशोऽवश्यं निःश्रेयसमप्यर्पयति । अत उभयोरेव सार्वजनिकोपकारिता समानशक्तिमत्ता च बोद्धव्येति ॥ ५० ॥

मानवधर्मनिरूपणानन्तरं विशेषधर्मप्रसङ्गतः पुरुषधर्मं लक्षयति—

यागप्रधानो धर्मः पुरुषस्य कैवल्योपयोगित्वात् ॥ ५१ ॥

पुरुषस्य धर्मो यागप्रधानो भवति । यागः प्रधानं यत्र स यज्ञमुख्य इत्यर्थः । कुतः कैवल्योपयोगित्वात् । केवलस्यभावः कैवल्यम् एकाकिता मोक्ष इति यावत् ।

तस्योपयोगी तस्य भावस्तत्त्वं, तस्मात् । पुरुषधर्मस्य अपवर्गोपकारित्वात्, ज्ञानसाक्षात्सम्बन्धित्वात्, मोक्षसन्निधानाद्वा, विशेषधर्मत्वम् । मानवसृष्टौ स्त्रीपुरुषविभागद्वयसत्वात् तत्र येन विशेषधर्मेण पुरुषोऽभ्युदयनिःश्रेयसावधिगच्छति तमेव विशेषधर्मं वर्णयति । स्त्रीपुरुषविभागद्वयसम्वलितायां मानवसृष्टौ स्त्रीणां कैवल्याधिगमे यथा पुरुषत्वप्राप्त्यपेक्षा न तथा पुरुषाणां तेषान्तु स्वातन्त्र्येण कैवल्योपयोगित्वात् तद्धर्मस्य यज्ञप्रधानत्वम् । साधारणधर्मस्याङ्गत्रये यज्ञमात्रमाश्रित्याचार्य्यैः पुरुषधर्मस्य विहितत्वम् । पुरुषत्वजातेः कैवल्येन सह सम्बन्धाधिक्यम्, अपरतश्च साधारणधर्मस्य त्रिषु भेदेषु दानतपसो र्ज्ञानेन साक्षात्सम्बन्धराहित्यं । यज्ञस्य तु कैवल्यप्रदात्रा ज्ञानेन स्वाभाविकः सम्बन्धोऽभिमतः । यज्ञधर्मो हि कर्मोपासनाज्ञानात्मक-काण्डत्रयविभक्त इत्युदीरितं प्रागेव । सुतरां ज्ञानस्य यज्ञेन पुरुषेण च कैवल्यस्य नैकट्यसम्बन्धात् तत्प्रदायकयज्ञस्यापि पुरुषधर्मेण साक्षात् सम्बन्धभागित्वात् "यज्ञप्रधानतामेवं नृणां धर्म इति श्रुति" रितिस्मरणाच्च मोक्षोपयोगि-यागमुख्यः पुरुषधर्मः ॥ ५१ ॥

विशेषधर्मप्रसंगतो नारीधर्मस्वरूपमाह

तपःप्रधानो नार्याः कैवल्यानुपयोगित्वात् ॥ ५२ ॥

नारीधर्मस्यापि विशेषधर्मान्तर्गतत्वात्—तस्याः धर्मः तपःप्रधानः, तप एव प्रधानं मुख्यं यत्र सः तपोमुख्यं भवति । कुतः कैवल्यानुपयोगित्वात् । उपयोगोऽस्यास्तीति उपयोगी तस्य भाव उपयोगित्वं कैवल्यस्य नोपयोगित्वं तस्मात् साक्षान्मोक्षानुपयोगित्वादित्यर्थः । नारीधर्मो विशेषधर्मान्तर्गतः । सृष्टिस्वाभाविकप्रवाहे स्वतन्त्ररूपतो वक्ष्यमाणलक्षणरूपा द्विविधा धारोपलक्ष्यते स्त्रीधारा पुरुषधारा चेति । स्त्रीधारा हि प्रकृतिप्रधाना भवति, पुरुषधारा पुरुषप्रधाना । उभे अपि ते जड़प्रधानायामुद्भिज्जयोनावन्योन्याभिन्ने प्रथमसृष्टिविकाशं प्राप्नुतः । यतो हि आदिसृष्टेरादिपुरुषस्य परमात्मनो महामायायाः प्रकृतेश्च सम्बन्धतः प्रारभ्यमानत्वात् जीवानां प्रथमोत्पत्तौ तयोर्द्वयोः सत्ताया विद्यमानत्वस्यावश्यकत्वम् । उद्भिज्जीवेषु प्रायः पुष्पेष्वेव स्त्रीपुरुषयोः स्वतन्त्रशक्तेः प्रत्यक्षत एव विद्यमानतोपलब्धेः, अनयोरत्रैक्येऽपि पार्थक्यमस्त्येव, पुष्पेषु स्त्रीपुरुषयोः शक्तेः, बीजेषु च स्त्रीपुरुषरूपस्य दलद्वयस्य प्रत्यक्षतो विद्यमानत्वात् । क्वचन वृक्षेष्वपि विभागद्वयमुपलभ्यते । यतस्तयोः सत्वे एवोद्भिज्जसृष्टिप्रवाहस्य प्रवाहितत्वम् । स्वतन्त्ररूपावेतौ स्त्रीपुरुषात्मकसृष्टिप्रवाहौ क्रमशः उद्भिज्जतः स्वेदजामण्डजां साधारणजरायुजां च योनिमासादयन्तो मनुष्ययोनिमधिगत्य नवनवं संस्कारमर्ज-

यन्तौ निजस्वरूपपार्थक्यप्रदर्शनपुरःसरं निजसहजसंस्कारानुसारमभ्युदयार्थं प्रवर्त्तेते। संस्कारविरुद्धं कर्म न सम्भवति। मानवयोनिप्राप्तिं विना जीवोऽस्वतन्त्रो न नवीनं संस्कारमर्जयति। अतः साहजिकस्य कर्मणोऽपरिवर्तनीयत्वात् पुरुषः पुंस्त्वधारायां स्त्रियश्च नारीधारायां विवर्द्धमानौ शश्वत्संसारचक्रं चालयतः। अपरतश्च अद्वैतसिद्धिं विना न कैवल्याधिगतिः। अद्वैतसिद्धिश्च परमपुरुषस्य स्वरूपस्थितिरूपैव। अत एव कैवल्यप्राप्तये पुरुषधाराश्रितो जीव आत्मज्ञानेन स्वस्वरूपोपलब्धिमेवावलम्बते। स्त्रीधारामाश्रितश्च जीवः प्रथमं पुरुषतन्मयतामधिगत्य पुरुषधारामेत्यात्मज्ञानेनाद्वैतभावमयं स्वस्वरूपमवलम्बते। एतेनैतत् स्फुटं प्रतीयते यद् इमे स्वतन्त्रे पृथग् विभिन्ने स्त्रीपुरुषधारेऽनादिप्रवाहे प्रवहतः। स्त्रीजातेश्च स्वस्वरूपोपलब्ध्यै पुरुषधाराश्रयणस्यावश्यकत्वात् न साक्षान्मोक्षाधिकारः। अतो हि स्त्रीधारायां प्रवहतो जीवस्यान्यधाराश्रयणं यदावश्यकं तदा तस्य कृते तपोधर्माश्रयणमप्यावश्यकमेव। तपोधर्मश्च नारीजातिकृतेऽसाधारणकार्य्यसम्पादक इत्यभिहितं प्राग्। अतः सुतरां नारीधर्मो न साक्षान्मोक्षोपयोगी तस्मादसौ तपःप्रधानः। स्मर्यते चात्र "तपःप्रधानतामेति नारीधर्मो यतो मुने!" इति ॥ ५२ ॥

ननु ततः किमायातमित्याह—

ततः स्त्रीपारतन्त्र्यम् ॥ ५३ ॥

सृष्टेरादित आरभ्य स्वाभाविकसंस्कार-सहजकर्मानुसारं स्त्रीपुंसधारे पृथक् प्रवहत इत्येवं सृष्टेः प्रकृतिपुरुषात्मकतया उभयत्रोभयोः सम्बन्धसत्त्वेऽपि स्वभावत एव पुरुषधारायां पुंसः स्त्रीधारायाञ्च प्रकृतेः प्राधान्यं सिद्धम्। अपरतश्च नार्य्या धर्मस्य तपःप्रधानत्वात् तस्याः शरीरमनसोः पतिपरायणत्वमपि धर्मसिद्धम्। अतो नार्य्याः स्वातन्त्र्यं धर्मविरुद्धम्। सृष्टेः कारणगवेषणयेदमायाति यत् परमपुमान् स्वाधीनो निःसङ्गस्तथा चेतनस्वरूपः। मूलप्रकृतिश्च जडा संसर्गवती पराधीना। तत्कार्य्यरूपे सृष्टिप्रवाहेऽपि 'कारणगुणाः कार्य्यगुणानारभन्ते' इति नियमात् नार्य्या अपि पुरुषाधीनत्वं पारतन्त्र्यञ्च सिध्यति। यथाह स्मृतिः—

अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वै र्दिवानिशम्।
विषयेषु च सज्जन्त्यः संस्थाप्या आत्मनो वशे ॥
पिता रक्षति कौमारे भर्त्ता रक्षति यौवने।
पुत्रश्च स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥

बाल्ये पितुर्वशे तिष्ठेत् पाणिग्राहस्य यौवने ।
पुत्राणां भर्त्तरि प्रेते न भजेत् स्त्री स्वतन्त्रताम् ॥ इति ॥ ५३ ॥

इदानीं पुरुषसम्बन्धतः सिद्धान्तमाह ।

स्त्रैणस्य पापसम्बन्धित्वमतः ॥५४॥

अतो हेतोः स्त्रैणस्य स्त्रीजितस्य स्त्रीतन्त्रस्येति यावत् पापसम्बन्धित्वं भवति । पापस्य सम्बन्धोऽस्यास्तीति पापसम्बन्धी तस्य भावः । पापयुक्तत्वमित्यर्थः । प्रकृतिनियमतः पुरुषस्य स्वाधीनत्वे नार्य्याश्च पराधीनत्वे सिद्धे, पुरुषस्य साहजिकोऽयं धर्मो यत् स्वाधीनः स स्त्रियं स्ववशे विदध्यात् । इतो वैपरीत्ये पुरुषस्य स्त्रैणयेऽधार्मिकत्वम् । यतो हि स्वस्याभ्युदयसम्पादकतायां स्वयमेव स तेनान्तरायं समुपार्जयति । पुरुषस्य स्त्रैणयं स्मृतिष्वपि बहुशो विगर्हितम् । पराधीनत्वधर्मविशिष्टायाः स्त्रियः स्ववशे स्थापनमेव पुरुषस्योचितम् । तस्य स्वाधीनधर्मत्वात् । अन्यथा स्वयं स्वधर्मस्य बाधकत्वात् स्त्रैणोऽधार्मिको भवति । स्मर्य्यते च—

अवीरस्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनाम् ।
एषामन्नन्न भोक्तव्यं सोमविक्रयिणस्तथा ॥

पुरुषस्य स्वातन्त्र्यन्नार्य्याश्च पराधीनत्वं दाम्पत्यधर्मपालने हेतु र्न तूच्छृङ्खलत्वे ॥ ५४ ॥

ननु मनुष्यत्वेनैकरूपयोः स्त्रीपुरुषयोः कथं धर्मभेद इत्याह—

द्वे धारे स्वतन्त्ररूपत्वात् ॥ ५५ ॥

नारीधर्मस्य वैलक्षण्यविज्ञानं भगवान् महर्षिः सूत्रकारो ब्रूते—तत्सृष्टिकालादेव स्त्रीधारा पुरुषधारा चेति द्वे धारे, द्वौ प्रवाहौ, स्तः स्वतन्त्ररूपत्वात् । स्वतन्त्रं रूपं, यस्य तस्य भावः स्वतन्त्ररूपत्वं तस्मात् । सर्गनिदानभूतयोः प्रकृतिपुरुषयोः सत्ताद्वयात्मकत्वात् तत्कार्यरूपायाः सृष्टेर्धाराद्वयात्मकता विज्ञानसिद्धा । धाराद्वयमासाद्य जीवानां क्रमोन्नतिरभ्युदयोऽपवर्गप्रकारश्च पूर्वमेवादीरितः । स्त्रीपुरुषयो राध्यात्मिकाधिदैवाधिभौतिक-पार्थक्यं वेदसम्मतम् । स्मर्य्यते च—

द्विधा कृत्वाऽऽत्मनो देहमर्द्धेन पुरुषोऽभवत् ।
अर्द्धेन नारी तस्यां स विराजमसृजत् प्रभुः ॥ ५५ ॥

ननु स्त्रीधर्मस्य कैवल्यानुपयोगित्वे स्त्रीधारा कदाचिदपि कैवल्याधिकारिणी न स्यादित्याह—

स्त्रीधारा पुंधारामयी कैवल्याधिकारिणी ॥ ५६ ॥

स्त्रीपुंसधारयोः पार्थक्ये मूलप्रकृतिधर्मसमूहस्य स्त्रीधारायामेव विद्यमानत्वात् स्त्रीजातेः पूर्णोऽभ्युदयो निःश्रेयसञ्च कथं सम्भवतः ? पराधीनायाश्च तस्या मोक्षोऽसम्भव एवेत्यादि शङ्कामपनुदति । स्त्रीधारा नारीशरीरधारणात्मकप्रवाहमयी पुंधारामयी पुरुषशरीरधारणात्मकप्रवाहमयी सती कैवल्याधिकारिणी भवति । केवलस्य भावः कैवल्यं मोक्षः, अधिकारः सामर्थ्यं सोऽस्यास्तीति अधिकारिणी, कैवल्यस्याधिकारिणी मोक्षाधिकारिणीति यावत् । स्त्रीशरीरविशिष्टो जीवः पुरुषतन्मयताविधायकेन सतीत्वधर्मबलेन उन्नतपुंशरीरमेव प्राप्य अद्वैतभूमावारुह्यात्मज्ञानबलेन कैवल्यमधिगच्छतीति भावः । अयमेव नारीधर्मे विशेषो यत् क्रमपद्यधिकारमाश्रिता नारी प्रबलसतीत्वधर्मप्रभावतो द्रुतमेवोन्नतपुरुषयोनिमासादयितुमर्हति । इत्येवं तस्याः पराधीनत्वेऽपि सर्वाभ्युदयनिःश्रेयसोपलब्धौ पुरुषापेक्षया महत्सौकर्य्यम् । वर्णाश्रमधर्मानुष्ठानजनितक्रमोन्नतिः पुरुषाणामेव न नारीणां, तासां केवलं, सतीत्वेनैव मोक्षाधिगमत्वात् । सतीत्वस्य च नीचवर्णयाऽपि स्त्रिया पालनीयत्वात् । पुरुषाणां क्रमोन्नत्यपेक्षया स्त्रीणां मोक्षे सौकर्य्यात् नारीजातेः पारतन्त्र्यधर्माश्रयणमवलोक्य स्त्रैणा एव पुरुषाः स्वादूरदर्शितया शङ्किता भवन्ति । वस्तुतस्तु नारीजातेरिदं शास्त्रोक्तास्वातन्त्र्यतपोधर्मानुष्ठानात्मकं सतीत्वं भूषणमेव न तु दूषणमिति ॥ ५६ ॥

प्रसङ्गतः शक्तिः कतिधेत्याह—

शक्तिर्द्विविधाऽऽकर्षणविकर्षणभेदात् ॥ ५७ ॥

आकर्षणमाकृष्टिः स्वसमीपवर्त्तिकरणं, विकर्षणं विकृष्टिः । आकर्षणं च विकर्षणं च तयोर्भेदात् शक्तिर्द्विधा । द्वे विधे यस्याः सा द्विप्रकारा भवति । पूर्वविज्ञानदार्ढ्याय विज्ञानं वर्णयति । जगतोऽस्य स्थूलसूक्ष्म-प्रपञ्चानां सर्वेष्वेवाङ्गेषु आकर्षणविकर्षणात्मिका द्विविधा शक्तिरुपलभ्यते । स्थूलप्रपञ्चे च परमाणुत आरभ्य ग्रहोपग्रहान्तेषु अनयोरेव शक्त्योः कार्यं स्फुटं प्रतीयते । परमाणुमारभ्य ब्रह्माण्डं यावत् सर्वत्रैवाकर्षणविकर्षणे विलसतः । एकेन सृष्टिदशायां रजोगुणसाहाय्येन परमाणव आकृष्यन्तेऽन्येन लयकाले तमःसाहाय्येन विकृष्यन्त इत्येताभ्यामेव सर्वपदार्थानामाविर्भावतिरोभावौ सम्पाद्येते । एकस्यैवाश्मनः काष्ठस्य वा परमाणुपुञ्जाः तस्योत्पत्तौ परस्परं संगत्य दृढाः सम्पद्यन्ते, सैव तस्याश्मनः काष्ठस्य वा राजसिकावस्था अस्यामेवावस्थायां तत् वर्द्धते । यदा तयोस्तामसिकः परिणामो भवति तदा तयोर्मिलिताः परमाणवः

परस्परं विभिद्यन्ते । ते चाश्मकाष्ठे स्वस्वरूपतश्च्युते विनश्यतश्च । एकब्रह्माण्डस्यापि ग्रहोपग्रहाणामीदृश्येवावस्थोहनीया । ग्रहोपग्रहाणां सृष्टिदशायां परमाणवः परस्परं वियुज्य ब्रह्माण्डस्यैव प्रलयं संसाधयतः । स्थूलस्येदमुदाहरणम् सूक्ष्मस्यैतदाह-अन्तःकरणेऽपि तद्वृत्तिरूपौ रागद्वेषावाकर्षणविकर्षणरूपौ भवत इति । स्मर्य्यते चात्र—

सम्बध्येतेऽथ शक्ती द्वे आकर्षणविकर्षणे ।
दिवौकसो रागमूला शक्तिराकर्षणात्मिका ॥
भवद्भिरवगन्तव्या समुद्भूता रजोगुणात् ॥
विकर्षणाख्या या शक्तिरपरा द्वेषमूलिका ।
अवधार्य्या भवद्भिः सा समुत्पन्ना तमोगुणात् ॥
आभ्यां द्वाभ्यां हि शक्तिभ्यां ब्रह्माण्डं निखिलं तथा ।
पिण्डं समस्तमाच्छन्नं सत्यमेतद्वदामि वः ।
एतच्छक्तिद्वयं ह्यास्ते मयि नैवास्म्यहं तयोः ॥
बलाच्छक्तिद्वयस्यास्य कर्मजातमथाखिलम् ।
सुविभक्तं द्विधा देवाः ! उत्तरोत्तरवर्द्धकम् ॥
सृष्टे द्वन्द्वात्मिकाया मे वाहं वाहयत्यहो ॥ ५७ ॥

शक्तिद्वयविज्ञानं विवरीतुकामो सूत्रयति—

तत्राकर्षणं नार्य्या विकर्षणं पुंसः ॥ ५८ ॥

आकर्षणविकर्षणात्मकशक्तिद्वयव्याप्तमेवेदं चराचरं जगत् । तत्र नारीशरीरे आकर्षणस्य पुरुषकाये च विकर्षणस्य विद्यमानत्वान्नार्य्या आकर्षणशक्तिस्वरूपत्वम्, पुरुषस्य च विकर्षणशक्तिस्वरूपत्वम् । एवञ्च तयोरधिकारस्य स्वधर्मस्य च पार्थक्ये नाणीयानपि सन्देहावसरः । स्त्रियाश्चाकर्षणशक्तिरूपत्वात्सृष्टिप्रपञ्चे प्राधान्यम् । आकर्षणशक्तितः सर्गक्रिया विकर्षणशक्तितो त्रिलयनक्रियेति पूर्वमेव स्फुटं प्रतिपादितम् । पुरुषश्चैकतो मिथुनीभावमुपेत्य सन्तानात्मना नारीशरीरे प्रविश्य स्वविलयननिदानतामाश्रयति । तत्रैवापरतो नारी पुरुषशक्तिमाकृष्य सृष्टिनिमित्तत्वमधिगच्छतीत्यादि बहुशः स्मृतिशास्त्रेष्वप्युदीरितम् ।

आकर्षणस्वरूपं हि शरीरंयोषितामिह।तथा विकर्षणं नृणां शरीरं स्यात् स्वरूपतः ।

श्रुतिश्च—"आत्मा वै जायते पुत्रः अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे आत्मा वै पुत्रनामासि त्वं जीव शरदां शतम्" ॥ ५८ ॥

प्रसङ्गोपात्तां शङ्कामपनुदति—

निःश्रेयसं तत्समन्वये ॥ ५६ ॥

तयोः समन्वयो यस्मिन् तत्, तस्मिन् सति निःश्रेयसं भवतीत्यर्थः। अर्थात्-तमोरजोरूपयोराकर्षणविकर्षणयोः समन्वयस्थानीये सत्त्वगुणसमुद्रेके मोक्षोऽधिगम्यत इति।

ननु सृष्टिप्रलयकर्त्र्योरेव शक्त्योः स्त्रीपुंसयो र्विद्यमानत्वात् स्थित्यभ्युदयनिःश्रेयसादीनामवसराभावे सिद्धे दाम्पत्यसम्बन्धादितः कथं मोक्षाधिगतिसम्भवः ? उच्यते-यथा रजस्तमःपरिणतमनो रागद्वेषयोः सम्प्रलीनयोः सत्त्वसमुद्रेकेण योगिराजो द्वन्द्वातीतो भूत्वा कैवल्यपदमश्नुते, तथैव सोऽत्रापि बाह्य-विषयात्मके जगति योगिराड् ऊर्ध्वरेता दाम्पत्यसम्बन्धसम्वलितयोराकर्षणविकर्षणयो र्जयेन द्वन्द्वातीतो भूत्वा मुक्तावुत्तिष्ठते। इत्यत एव वानप्रस्थाश्रमे सपत्नीकानामपि पुंसां कामादिजयेन मोक्षमार्गाग्रणीत्वविधानं शास्त्रादिषूपलभ्यते।

"अन्योन्यस्याऽव्यभिचारो भवेदामरणान्तिकः।
एष धर्मः समासेन ज्ञेयः स्त्रीपुंसयोः परः" इति मनूक्तेः।

पतिभक्त्या सतीत्वसाहाय्येन च नारी मुक्तिमार्गाभिमुखी भवति। पुरुषश्च गृहस्थः स्त्रीदुर्गसुरक्षित एकपत्नीव्रतेन मोक्षाध्वनो विजेता भवितुमर्हति। स्मृतिषु बहुशो विस्तारोऽस्य प्रामाण्ये। तथा हि—

समता च द्वयोर्यत्र शक्त्योः संजायते शुभा।
तत्रैव सत्त्वसंजुष्ट-ज्ञानानन्दस्थिति र्भवेत् ॥
अहं तस्यामवस्थायां सत्त्वमय्यां सदा सुराः।
नन्वाविर्भावमापन्नः सन्तिष्ठे नात्र संशयः ॥
काऽप्यवस्था बन्धहेतुः शक्तिद्वयसमन्विता।
जीवानां सर्वथा देवाः ! जीवत्वस्यैव पोषिका।
सत्त्वावस्था तृतीया या सैव मुक्तिप्रदायिका।
एतच्छ्रौतरहस्यं हि ज्ञायतां विबुधर्षभाः ॥
भिन्ना त्रिगुणवैचित्र्याच्छक्तिद्वैविध्यमात्मना।
दृष्टिगोचरतामेति श्यामात्र जगतीतले ॥
शक्ती ते एव कथ्येते आकर्षणविकर्षणे।
रागद्वेषौ च पितरौ नात्र कश्चन संशयः ॥
आद्ये स्थूलेऽपरौ सूक्ष्मौ विद्येते पितरौ ध्रुवम्।

एतयो गुंणसम्बन्धः प्रोच्यते साम्प्रतं मया ॥
अस्ति रागो रजोमूलस्तथाकर्षणमेव च ।
विकर्षणं तथा द्वेषस्तमोमूलश्च विद्यते ॥
समन्वये द्वयोः सत्वगुणो नूनं विकाशते ।
अतः समन्वयादेव तयोर्विश्वस्य धारिका ॥
विश्वं रक्षति मच्छक्तिः सात्विकी धर्मरूपिणी ।
नित्या सा वर्तते नित्यं विश्वकल्याणकारिणी ॥
आरभ्य पितरोऽनेकग्रहोपग्रहतोऽखिलम् ।
अएवन्तं स्थितिमादत्ते तस्मादेव समन्वयात् ॥
तथा समन्वयस्यैव दशायां रागद्वेषयोः ।
जीवान्तःकरणे सत्वगुणस्यैव प्रकाशतः ॥
ज्ञानं विकाशते सम्यग् धर्मभाव उदेति च ।
पुण्यापुण्यप्रवाहो हि वहते नात्र संशयः ॥
द्वे एव भवतः शक्ती आकर्षणविकर्षणे ।
नारीधारासु जीवानां नृधारास्वपि सर्वतः ॥
ब्रह्मानन्दानुभूतेः स्याल्लोभात् स्पर्शेन्द्रियेण वै ।
दम्पतीसंगमः साक्षात् पवित्रः सात्विकः शुभः ॥
सत्त्वभावमयः पुण्यो वर्तते संगमक्षणः ।
आधिदैविकपीठस्योत्पादको नाऽत्र संशयः ॥
विष्णुस्वरूपमादाय ब्रह्माण्डस्य स्थितिक्षणे ।
ब्रह्माण्डेऽस्मिन् यथाकृष्टो विष्णुपीठस्वरूपिणि ॥
सन्तिष्ठे पितरो नूनं दम्पतीसंगमे तथा ।
आकृष्यन्ते त्रिधा देवाः पीठस्योत्पादके स्वतः ॥
यथाकालं यथादेशं यथापात्रं तथाऽनघाः ।
भवन्तः पितरस्तत्र रजोवीर्याश्रयेण हि ॥
आकृष्यन्ते वपुर्दातुं जीवाय स्थूलमद्भूतम् ।
अन्ये देवगणा नेतुं शरीरैरातिवाहिकैः ॥
युक्ताञ्जीवगणांस्तत्र सूक्ष्मदेहावलम्बिनः ।
पूर्वेभ्यो भोगलोकेभ्य आकृष्यन्ते न संशयः ॥
रजःशक्त्या ततस्तत्र तमःशक्तिः परास्यते ।
तेन पीठे विनष्टे वै रजोजातबलाश्रयात् ॥

पतितस्यैव वीर्यस्य सहयोगेन सर्वथा ।
नारीदेहे भवेन्नूनं गर्भाधानं न संशयः ॥
यथायोग्यं तथा यूयं जीवानां सूक्ष्मदेहिनाम् ।
सन्निवासोपयुक्तानि स्थूलदेहगृहाण्यहो ।।
संयच्छथ नयन्ते च जीवांस्तत्रैव निर्जराः !
पराजितं तमो नैव स्यात् तत्र रजसा यदि ॥
रजस्तमोभ्यां पितरो ! भावशुद्धिपुरस्सरम् ।
अग्रेसरद्भ्यां सततं सत्त्वं ज्ञानमयं प्रति ।।
नृनारीभेदरूपाश्च द्वन्द्वधर्मप्रभावतः ।
लब्ध्वा वहिर्गताभ्यां हि पराभक्तिं ममोत्तमाम् ॥
यदि सत्वे विलीयेत तर्ह्यावृष्या महर्षयः !
रहितं सृष्टिधर्मेण कैवल्यं शाश्वतं पदम् ।।
अनेनैवाध्वना गम्यमिति संसूचयत्यलम् ।
नैवात्र संशयः कोऽपि विद्यते पितृपुङ्गवाः ! ५६ ॥

प्रसङ्गसङ्गतिसम्प्राप्तं नारीमहिमानमाख्याति ।

प्रकृतित्वान्नार्य्या अर्चनमभ्युदयाय ॥ ६० ॥

सृष्टौ प्रकृतेरेव प्राधान्यमित्यत्र सर्वाण्यपि दर्शनशास्त्राण्यैकमत्यं जुषन्ते । तामेव केचन दर्शनशास्त्रकारा मूलप्रकृतिं कथयन्ति । केऽपि महामायामभिदधति । अन्ये ब्रह्मशक्तिमाहुः । परन्तु सर्गक्रियायां प्रकृतेः प्राधान्ये नास्ति केषाञ्चनापि विमतिः । अतोऽत्र सर्वतन्त्रसिद्धान्तसिद्धेऽस्मिन् विषये नास्ति विमर्शावसरः । यथा धर्मपथमनुसरन् पुरुषः प्रकृतिसेवयाऽभ्युदयं समश्नुते । यथा च स जगज्जननीं महामायां समभ्यर्च्य तत्सेवया चाभ्युदयनिःश्रेयसावधिगच्छति । तथैव सूक्ष्मधर्मगतिविदाचार्य्यैः सूत्रकृत् विज्ञानसिद्धं सिद्धान्तमिममतिदिशति । स्त्रीणामर्चनयाऽवश्यं पुरुषोऽभ्युदयमधिगच्छतीति । स्मृतिषु शतशोऽतिदिश्यते

यत्र नार्यस्तु पूज्यन्ते, रमन्ते तत्र देवताः
यत्रैतास्तु न पूज्यन्ते, सर्वास्तत्राफलाः क्रियाः ।
पितृभिर्भ्रातृभिश्चैताः, पतिभिर्देवरैस्तथा
पूज्या भूषयितव्याश्च, बहुकल्याणमीप्सुभिः ।
शोचन्ति जामयो यत्र, विनश्यत्याशु तत्कुलम्
न शोचन्ति तु यत्रैता वर्द्धते तद्धि सर्वदा
जामयो यानि गेहानि, पश्यन्त्यप्रतिपूजिताः

तानि कृत्या-हतानीव, विनश्यन्ति समन्ततः ॥
तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः ।
भूतिकामै र्नरैर्नित्यं सत्कारेषूत्सवेषु च ॥

मूलप्रकृत्या स्त्रीधारायाः सन्निहितः सम्बन्ध इत्यभिहितं प्राग् । अतः सर्वा अपि स्त्रियः प्रकृतिस्वरूपा इति विज्ञानाविरुद्धम् । सप्तशतीगीतायां देवीभागवते चैवमेवाभिहितम् ।

"विद्याः समस्तास्तव देवि भेदाः ।
स्त्रियः समस्ताः सकला जगत्सु ॥"
या याश्च ग्रामदेव्यः स्युस्ताः सर्वाः प्रकृतेः कलाः ।
कलांशांशसमुद्भूताः प्रतिविश्वेषु योषितः ॥

आर्यजातौ महिलानामर्हणं प्रशस्तमित्यत एव शास्त्रैरपि 'न स्त्री स्वातन्त्र्यमर्हतीत्याद्याज्ञप्तम् । नार्य्यः पावित्र्यपराङ्मुखा न स्युः, सदैवार्य्यमहिलासु सतीत्वबीजमन्तर्निहितं स्यात्, द्विजातिषु विधवापुनरुद्वहनस्याशालेशोऽपि नाङ्कुरितः स्याद्, आर्य्यनार्य्यश्च परपुरुषस्मरणेऽपि स्वात्मानं विगर्हितं मन्येरन् इत्यादयः सदाचारा आर्यजातिषु नारीणां सत्काराभ्यर्चनातिशयविधानादेव प्रचलिताः । यथा पर्वतीयप्रदेशेषु विशीर्णा महार्घाः प्रस्तरखण्डा न केनापि महार्घत्वेनाद्रियन्ते । त एव वज्रमणि-नीलमणिप्रभृतयः प्रस्तरजातयोऽपि तदर्घवेदिभिः पुंभिरादरातिशयात्सुरक्ष्यन्ते । तथैवार्य्यजातिसंस्कारेष्वेव नारीसत्कृतिः परमकर्तव्यतया निहिता विरूढमूला च सञ्जाता विद्यतेऽत एव सर्वाण्यपि शास्त्राणि ऐकमत्येनैवात्र नारीणां सत्कारसम्मानपावनत्वाद्यभिवृद्ध्यर्थमेव पूर्वोक्तान् सदाचारान् विहितवन्ति ।

ननु नारीजातेरेव प्रकृतिस्वरूपत्वात् सदाचारभ्रष्टाया अपवित्राया निरंकुशत्वमुपेताया अपि नार्य्याः कथन्नार्हणीयत्वम् ? कथञ्चार्य्यशास्त्रेषु कदाचाराया आर्य्यनार्य्याः परित्यागविधानम्, इति शङ्कायाम् उत्तरयति । ब्रह्मशक्तिर्हि ब्रह्मोन्मुखी सती प्रकृतिरुच्यते सैव तत्पराङ्मुखी विकृतिरुच्यते । तथैव प्रकृतिस्वरूपा सदाचारादिसम्पन्नैव नारी समादरणीया भवति, न तु विकृतिभावापन्नाऽनेकपुरुषाश्रया स्वस्वरूपतश्च्युता । शास्त्राण्यप्यत एव प्रकृतेरेवाभ्यर्चनं समामनन्ति न तु विकृतेरपि । अपरञ्च विकृतेरनादरं विना प्रकृतेः सत्कृतिरेव न सम्भवतीति विकृतेस्तिरस्कृतिरेव प्रकृतेः समर्चनम् । वेदशास्त्रादिष्वपि नारीजातिकृते ये ये सदाचारा उपदिष्टास्ते सर्वेऽपि तत्सम्बन्धतः प्रकृतिपूजाभिप्रायका एवोहनीयाः । ६० ॥

इदानीं धर्मनिरूपणप्रस्तावे प्रथमं धर्ममाचारं प्रतिपिपादयिषुः सूत्रयति—

आचारः स्थूलसम्बद्धः ॥ ६१ ॥

स्थूलेन सह सम्बद्धः सम्बन्धमापन्नो हि व्यापारविशेष आचार इत्युच्यते । स्थूलशरीरेण यावत्यो धर्मानुरूगा धर्मप्रसविन्यश्चेष्टापरम्पराः समुत्पद्यन्ते ता एव आचारशब्दवाच्या अभिधीयन्ते । यथा हि—

पादव्यापारः, स्थितिः, मृदम्बुभिश्च शरीरशुद्धिः, वृद्धोपसेवनम्, गुरुजन-प्रणमनादि, सर्वेऽपि स्थूलपूजोपचरणादयोऽत्रोदाहर्तव्याः । एवमेव नारीधर्मे, पुरुषधर्मे, वर्णधर्मे, आश्रमधर्मादिषु च विभिन्ना आचारा विहिता विद्यन्ते । स्मृतिष्वप्येवमेव गीयते—

यतो धर्मानुकूलो यो व्यापारो वपुषोऽखिलः ।
सद्भिः प्रोक्तः सदाचारो नन्वसौ पुण्यवर्द्धनः ॥ ६१ ॥

तत्र वैशेष्यं प्रतिपादयति—

अत एवाद्यः ॥ ६२ ॥

स्थूल-सम्बन्धादेव आचारः प्रथमो धर्मो भवतीति नात्राणीयसी अपि विचिकित्सा । स्थूलसाधनयोग्यतामधिगम्यैव साधकः सूक्ष्मसाधनयोग्यता-माश्रयति, क्रमशः स्थूलत्वमार्गतः सूक्ष्मतानुसारित्वात्साधनगतेः । इतोऽपि सदाचारस्य धर्मे प्राथम्यम् । सर्वेष्वपि विशेषधर्मेषु सदाचारस्यैव अग्र.सन-सम्बन्धभागित्वात्प्राथम्यं धर्मे । स्मृतिष्वप्येवमेवाभिहितम् तथा हि—

सर्वप्रधान आद्यश्च गरीयान् व्यापकस्तथा ।
सदाचारो विशेषेषु धर्मेषु विद्यते द्विजाः ॥
आचारः प्रथमो धर्मः श्रुत्युक्तो स्मार्त एव च ।
तस्मादेतत्समायुक्तो नित्यं स्यादात्मवान् द्विजः ॥ ६२ ॥

तन्महिमानमाख्याति—

आचार-प्रधानौ वर्णाश्रमावाधिभौतिक-प्राधान्यात् ॥ ६३ ॥

आधिभौतिकस्य प्राधान्यं, तस्मात्, वर्णाश्रमधर्मौ, आचारः प्रधानं यत्र तौ, तथोक्तौ ज्ञेयौ । आधिभौतिक-प्राधान्यमूलतया वर्णाश्रमधर्मयो राचारस्य सर्वाभ्यर्हितत्वमूहनीयम् इति सूत्रार्थः ।

वर्णाश्रमधर्मयोराधिभौतिकशुद्धिः सर्वाग्रणीः । तत्र च ज्ञानेनाध्यात्मशुद्धिः कर्मणाधिदैविकशुद्धिः रजोवीर्य्यशुद्ध्याधिभौतिकी शुद्धिरित्येवं वर्णाश्रम-

धर्मयोराधिभौतिकशुद्धेः प्राधान्यमिति निश्चप्रचम् । यतो हि—ज्ञानकर्मणी साध्ये सम्भवतः । रजोवीर्य्यशुद्धिस्तु न साध्यतामर्हति । वर्णाश्रमधर्मयोश्चाधिभौतिक-शुद्धेः प्राधान्यम् सदाचारेऽपि तस्या एव प्राधान्यम् । अतश्च वर्णाश्रमधर्मयोराचारस्य प्राधान्यं सुतरां सिद्धम् । स्पष्टप्रतिपत्तये उदाहरति यथा—यस्य पुंसः कायो ब्राह्मणरजोवीर्य्यजन्यो न विद्यते तेन च यदि शिक्षयाऽध्यात्माधिदैव-शुद्धिरूपे ज्ञानकर्मणी समुपार्जिते अपि स्यातां, तथापि ते ब्राह्मणतां तस्य न सम्पादयिष्यतः । नापि च तस्य निवृत्तिदशायां सन्यासाधिकारं साधयिष्यतः । यतो हि ब्राह्मणत्वे प्राधान्यमाश्रिताया ब्राह्मण-मातृपितृ-रजोवीर्य-जन्यकायगत आधिभौतिक-शुद्धेरपेक्षिताया अनुदयात् न कोऽप्यन्य-वर्णभवोऽनार्य्यो वा एकस्मिन्नेव जन्मनि ब्राह्मणत्वं लब्धुमर्हति । अत्रेदं स्वारस्यं यत् वर्णाश्रमधर्मयो रजोवीर्य्यशुद्धि-रूपाधिभौतिकी शुद्धिर्नाभ्यासजन्याऽपि तु जन्मसिद्धैव भवतीति सा स्वाभाविकी इत्येतदेव सर्वतोऽपि वैशिष्ट्यं तस्याः । अतो वर्णाश्रमधर्मयोराधिभौतिकशुद्ध्याः प्राधान्येन सदाचारस्यापि प्राधान्यं सुनिश्चितमिति निर्विवादसिद्धम् ॥ ६३ ॥

अन्यच्च—

यागे बाधनमनाचारात् ॥ ६४ ॥

अत एव अनाचारेण यागे यज्ञे बाधनम् विघ्नबाहुल्यं भवति । आचार-विज्ञानदृढ़तायै अन्यथाऽप्युदाहरति । वेदशास्त्रविहिता यावन्तो यागा दैव जगत्सम्बद्धा यितारोऽनुष्ठायेरन् ते च यदि शास्त्रविधिमुत्सृज्याचारसंबन्धं विहायानाचारत एव सम्पादितास्युस्तर्हि तत्रावश्यमसुरप्रेतादिबाधोपस्थिता स्यात् ।

सूक्ष्मदैवराज्येन यथा देवर्षि-पितॄणां सम्बन्धस्तथैवासुराणामपि तेन सम्बन्धः । प्रेतादयोऽपि सूक्ष्मदैवजगत एव जीवाः । यदि क्वापि यज्ञानुष्ठान-वेलायां स्थान-दिग्बन्धन-सदाचारादिशुद्धिभि र्यागशुद्धि स्तथर्त्विजां शरीरशुद्धिश्चानादृते स्यातां तदा असुरादयः प्रेतादयश्च प्रविश्यावश्यं तं यज्ञं विनाशयेयुः, यज्ञभागश्च न देवादिभिर्गृहीतः स्यात्; किन्तु एभिरेव तामसिक-राजसिक-प्राणिभिस्तदीयो भागो भुक्तः स्यात् । अत एव वैदिकेषु तत्सम्मतान्य-शास्त्रीययागादौ च आचारमूलाधिभौतिकी शुद्धिश्चावश्यमपेक्ष्यते तद्विद्भिर्महर्षिभिः । आचारस्येदमपि विलक्षणमेकं महत्त्वन्न विस्मरणीयम् ॥ ६४ ॥

इदानीं शारीरिकं धर्म्मं निरूप्य मानसं तमाह—

नियमो मानस-धर्मः ॥ ६५ ॥

यथा धर्मानुकूलः शारीरिको व्यापार आचारशब्दभाग्भवति तथैव

धर्मप्रसविता मानसो व्यापारलक्ष्यो नियम इति शब्देनाभिधीयते । अनन्ताश्चान्तःकरणवृत्तयो द्विधा हि क्लिष्टाक्लिष्टभेदेन विभक्ता उपलभ्यन्ते । महर्षिणा पतञ्जलिनापि योगदर्शने—

"वृत्तयः पञ्चतय्यः क्लिष्टा अक्लिष्टाः"

इत्युदीरितम् । पञ्चविधा अपि वृत्तयः क्लिष्टाक्लिष्टभेदेन द्वैविध्यं भजन्त इति । या हि वृत्तयस्तामसं भावं तत्परिणाममधर्मं वर्द्धयन्ति ताः क्लिष्टाः । याश्च सत्त्वगुणं तत्परिणामं धर्मं समेधयन्ति ता अक्लिष्टा निगद्यन्ते । तत्र ताः सर्वा अपि मानसीः क्लिष्टवृत्तीर्निरुध्य अक्लिष्टवृत्तिसमुद्भावनेन ये ये सत्त्वपरिणामिनो व्यापारा उत्पद्यन्ते ते सर्वेऽपि महर्षिभि र्नियमशब्देनाभिधीयन्ते । यथा—धृतिः, मानसिकं तपः, परोपकार-प्रवृत्तिः, सद्विचारः, सत्य-सङ्कल्पश्चैतादृशाः सर्वेऽपि मानसिकाः सद्भावा नियमान्तर्गता एव ॥ ६५ ॥

तत्र यद्वैशिष्ट्यन्तदाह—

त्रिगुणमयान्यङ्गोपाङ्गानि ॥ ६६ ॥

तस्य नियमस्य अङ्गोपाङ्गानि त्रिगुणमयानि सत्त्वरजस्तमोमयानि ज्ञेयानि ।

आचारस्य स्थूलधर्मतया तद्विभागस्य त्रिगुणभेदेन विभाजितुमशक्यत्वात् सूक्ष्मजगद्विषयत्वेन नियमस्य त्रिगुणविभागभिन्नत्वात्तद्विभागं निर्वक्ति । यथा साधारणधर्मस्य सर्वेषामप्यङ्गोपाङ्गानां त्रिगुणभेदतस्त्रैविध्यम् । तथैव नियमस्याङ्गोपाङ्गानामपि गुणत्रयविभागात् त्रैविध्यमव्याहतम् ।

ननु धर्मप्रसूनामक्लिष्टवृत्तीनां सत्त्वगुणपरिणामस्वरूपाणामेव नियमशब्दवाच्यत्वे कथं पुनस्तस्य तामसराजससात्त्विकादि गुणत्रयभेदेन त्रैविध्यम् इति शङ्केत चेत्तत्रोच्यते—यथा सत्त्वपरिणामस्य ब्राह्मणत्वम् सत्त्वरजसोः परिणामस्य क्षत्रियत्वमित्यादिप्रतिनियतगुणविभागसम्बन्धसत्त्वेऽपि सत्त्वपरिणामस्य ब्राह्मणस्यैव सात्त्विक-राजसिक-तामसिकादि-विभागा भवितुमर्हन्ति । तथैवात्रापि सत्त्वगुणपरिणामस्वरूपस्यापि मानसव्यापारस्य नियमस्य सात्त्विकादिभेदभिन्नत्वे न काप्यनुपपत्तिः ॥ ६६ ॥

प्रसङ्गतः प्राप्तां शङ्कां समाधत्ते ।

सर्व-धर्मत्रैविध्यं गुणत्रयभेदात् ॥ ६७ ॥

गुणानां त्रयम्, तस्य भेदात्, सर्वे च ते धर्मास्तथोक्तास्तेषां त्रैविध्यम् । नियमस्यैव केवलस्य कथं त्रैगुण्यम् किमन्ये धर्मसमुदाया न त्रैविध्यभाज-

इतिशङ्कां समाधातुमेवाविर्भावितमिदं सूत्रम् महर्षिणा सूत्रकारेण । सर्वेऽपि प्राकृतिका भावास्त्रैगुण्यभाजो नेह कोऽपि पदार्थस्त्रिगुणातीतो भवितुमर्हति । क्वाऽपि पदार्थे तस्य विवेचने क्लेशाधिक्यं स्यादित्यन्यदेतत् । परन्तु कस्यापि सूक्ष्मातिसूक्ष्मतः स्थूलातिस्थूलं यावत् सर्वेषामेव पदार्थानां त्रिगुणत्वनियमात् सर्वेऽपि धर्म-भेदास्त्रिगुणभेदभिन्ना इति विज्ञानसिद्धम् ॥ ६७ ॥

तत्र त्रयाणां तारतम्यतोऽभ्यर्हितत्वं विविनक्ति—

उत्तरोत्तरस्य गरीयस्त्वम् ॥ ६८ ॥

तेषु तामसिकादि-त्रिविधेष्वपि धर्मेषु उत्तरोत्तरस्य तामसिकाद्राजसस्य ततोऽपि सात्त्विकस्य श्रेष्ठत्वम् । तथा हि तामसिको धर्मोऽभ्युदयमैहलौकिकं दातुमर्हति । क्वापि तेन हानिरपि तदनुष्ठातुः सम्भवति । राजसिकेन तु ऐहलौकिकपारलौकिकोभयाभ्युदयो ध्रुवं सम्पाद्यते । सात्त्विकस्तु क्रमशोऽभ्युदयद्वयं वितरन्नन्ते निःश्रेयसमप्यर्पयतीति तस्य स्वभावसिद्धम् ॥ ६८ ॥

भावभेदेनापि सर्वेषां त्रैविध्यं प्रतिपिपादयिषुराह—

सर्वं भावत्रयात्मकम् ॥ ६९ ॥

धर्मस्य सर्वाण्यप्यङ्गोपाङ्गानि त्रिगुणभेदतो यथा श्रेणित्रये विभक्तानि तथैवाधिभूतादिभावभेदतोऽपि तानि त्रैविध्यं जुषन्ते । तच्च स्मृतावीदृक्—

ममैव सच्चिदानन्दभावत्रय-समाश्रयात्
नन्वाध्यात्माधिदैवाधिभूतरूपं महर्षयः ।
भावत्रयं हि सर्वस्मिन् कार्य्य-ब्रह्मणि भासते ।
दृश्यं नातो भवेत् किञ्चिच्छून्यं भावत्रयेण वै ।
एतास्तिस्रस्त्रिभावानां विश्वं व्याश्नुवते कलाः
आधिदैविकमाध्यात्म्यं रूपं धृत्वाधिभौतिकम् ॥

इत्येवं विज्ञानक्रमतः सिद्धमिदं यत् प्रत्येकं धर्माङ्गमुपाङ्गं वा साधारणधर्मगतं विशेषधर्माश्रितं वा स्यात् सर्वत्रैव भावत्रयानुकूलं शुद्धित्रयमप्यपेक्षयत एवेति ॥ ६९ ॥

तत्परिणाममाख्याति—

पूर्णं त्रिभावोपगमात् ॥ ७० ॥

त्रयश्च ते भावास्तथोक्तास्तेषामुपगमात् स्वीकारात् सर्वमेव पूर्णं सर्वाङ्गसम्पन्नं स्यात् ।

साधारण-विशेषादिसर्वेषामेव धर्माणामङ्गमुपाङ्गं वा त्रिविधशुद्ध्यैव पूर्णतामासादयति नान्यथा।

उदाहरणस्वरूपतो यथा-विशेषधर्मान्तर्गतस्य वर्णधर्मस्य प्रस्तावे ब्राह्मणोऽप्येकस्तदैव स्वपूर्णस्वरूपं विन्दते यदा स स्वोपयोगिना पूर्णज्ञानेनाध्यात्मिकीं कर्मणा चाधिदैविकीं ब्राह्मण्या मातु र्ब्राह्मणस्य च पितू रजोवीर्य्याभ्यां स्थूलशरीरसम्बन्धिनीम् आधिभौतिकीं शुद्धिमासादयन् त्रिविधशुद्धिसम्पन्नः स्यात्। साधारणधर्मान्तर्गतश्चैवमेको यज्ञोऽपि तदैव पूर्णाङ्गः स्याद्यदा तस्य आध्यात्मिकशुद्धिरूपः सङ्कल्प उत्तमः स्याद् आधिदैविकात्मिका च शास्त्रोक्ता क्रिया यथाविधि सुसम्पन्ना स्याद् आधिभौतिकशुद्धिस्थानीया च घृतादि-पदार्थशुद्धिः समीचीना भवेत्, इत्येवमादिषु सर्वेष्वपि धर्मेषु सर्वाङ्गतः सर्वथा पूर्णशुद्ध्यैव तेषां पूर्णशक्तिमत्ता सिध्यति नेतरथेति ध्रुवमूहनीयम् ॥ ७० ॥

गुणानां किं निदानमित्याह—

गुणाः शक्तिमूलाः ॥ ७१ ॥

धर्मनिर्णये शक्तिमूलक एव त्रिगुणविचारो भवति। सत्त्वं रजस्तम इति त्रयो गुणा मूलप्रकृते र्महामायापरनामिकाया ब्रह्मशक्तेरेवेति त्रयोऽपि आदिशक्तिसम्बन्धित्वात् शक्तिमूलका एव ज्ञेया इति मूलसिद्धान्तानुसारेण धर्माचार्य्या महर्षयो धर्मनिर्णये कर्तव्ये शक्तिसम्बन्धाश्रयेणैव सर्वत्र त्रिगुणविचारं विहितवन्तः ॥ ७१ ॥

इदानीं गुणमूलं विविच्य भावमूलं निर्वक्ति।

शुद्धिमूलाश्चान्ये ॥ ७२ ॥

अन्ये भावाः शुद्धिमूला भवन्ति। यथा गुणविचारः शक्तिमूलकस्तथैव भावविचारोऽपि शुद्धिहेतुको ज्ञेयः। त्रिधा अपि शुद्धिप्रकाराः पूर्वमेवाभिहिताः। त्रयोऽपीमे भावा ब्रह्मणः सच्चिदानन्दरूपादेव त्रिभावादधिरोहन्ते। यथा दैवीमीमांसादर्शने ब्रह्मेशविराजां सम्बन्धो ब्रह्मणः सच्चिदानन्दरूपाद्भावत्रयात्परिलक्षितस्तथैवेहापि तेनैव भावत्रयेण आध्यात्माधिदैवाधिभूतात्मकभावत्रयस्य सम्बन्धो विहितो विद्यते—अत एव तत्र दर्शनेऽभिहितम्।

"गुणैः सृष्टिस्थित्यन्ता भावै स्तदनुभवः।"

चित्स्वरूपस्य ब्रह्मणो भावा अपि त्रयो ज्ञानमूलका एवेति निःसन्दिग्धम्। ज्ञानमेव मलविक्षेपावरणान्यपाकृत्य जीवन्मुक्तिपथभाजः करोत्यतो ज्ञानमूलकं भावत्रयमपि शुद्धिमूलकमिति सर्वतन्त्रसिद्धान्तः ॥ ७२ ॥

उभयसम्बन्धतो धर्माधर्मनिर्णयविज्ञानमाह—

भावव्युत्क्रमः शक्तिप्राधान्यात् ॥ ७३ ॥

शक्तेः प्राधान्यं तस्मात्, शक्तिप्राधान्यापेक्षया भावानामाधिभूताधिदैवाध्यात्मादीनां व्युत्क्रमः वैपरीत्यं ज्ञेयम् । तथा हि–यत्र शक्तीनां विवेकः कर्तव्यस्तत्र भावेषु वैपरीत्येन व्यवहर्तव्यम् । यत्र धर्मनिर्णये शक्त्यपेक्षा विद्यते, तत्र भावव्युत्क्रममपेक्ष्यैव विचारनिर्णयो विधेय इत्यर्थः । यतो हि गुणेषु शक्तिमूलकत्वं भावेषु शुद्धिमूलकत्वमित्यभिहितं प्रागेव । शक्तिविकाशश्च स्थूलसाहाय्येन सूक्ष्मेषु आधिक्येनानुभवनीय इत्येतदेवास्मिन् विज्ञाने हृदयम् । उदाहरणतो यथा—वर्णाश्रमधर्मयोः शक्तिप्राप्तेरेव प्रधानोद्देश्यतया तत्राचारनिर्णये कर्तव्ये आध्यात्माधिदैवाधिभूतशुद्धिषु क्रमश उत्तरोत्तरं प्राबल्यम् । तथा हि यदि कस्मिंश्चित् पुंसि शुद्धे ब्राह्मणमातृपितृजन्ये रजोवीर्य्ये विद्येते चेत्तर्हि ब्राह्मणत्वसाधिकाया आधिभौतिकशुद्धेस्तत्र सत्वाद् अन्ययोर्द्वयोराधिदैवाध्यात्मशुद्धयोरभावेऽपि तस्य ब्राह्मणत्वमक्षुण्णं स्वीकरणीयमेव । यदि तत्र ब्राह्मणकर्मणाधिदैवशुद्धिरपि स्यात्तर्हि स श्रेष्ठो ब्राह्मणः । ततोऽध्यात्मज्ञानादिनाऽध्यात्मशुद्धिसत्त्वे तु किं वाच्यं तस्य । स तु सर्वश्रेष्ठः पूर्णो ब्राह्मणपदभाजामग्रणीरेवेत्याद्यन्यत् ।

आश्रमधर्मनिर्णयेऽप्ययमेव न्यायोऽनुसरणीयः । यथा कश्चन ब्राह्मणजातिगोऽविद्वानपि सन्यास-संस्कारेण यथाविधि संस्कृतः स्यात्तर्हि स सन्यासिपदभाग् भविष्यति । पूर्ववद् यदि तत्र कुटीचकबहूदक-हंस-परमहंसादिधर्माणां कस्यापि योग्यता पूर्णतयोपलभ्येत चेदुत्तमः संन्यासी स गण्येत । तत्रैव यदि जीवन्मुक्तस्यात्मज्ञानिनोऽपि लक्षणान्युपलभ्येरंस्तर्हि तु स सर्वोत्तमः सन्यासिनामग्रग एव भवेत् । किं वाच्यं तस्य माहात्म्यं स तु एकोऽपि लक्षाणां कल्याणकारी दीनानां बहूपकर्ता सर्वमान्यः सर्वस्तुत्यो नारायणस्वरूप एव । अत एवोक्तम् यद् वर्णाश्रमधर्मनिर्णये सर्वास्यहिता रजोवीर्य्यशुद्धिस्तदनन्तरं कर्मशुद्धिस्ततोऽन्तिमा ज्ञानजन्या शुद्धिरिति। यतः शक्तिविचारेण भावस्य व्युत्क्रमो भवतीति बहुशोऽभिहितमेव । यथा सृष्टौ मूलप्रकृतेः प्राधान्यं परमपुरुषस्य चाप्राधान्यं तद्वदेवात्रापि प्रकृतिसम्बन्धिनां गुणानां शक्तिविचारे पुरुषसम्बन्धिनोऽध्यात्मभावस्य गौणता प्रकृतिसम्बन्धिनश्चाधिभौतिकभावस्य प्राधान्यं समुचितमेव ॥ ७३ ।

प्रसङ्गतो धर्ममाहात्म्यमाख्याति ।

सर्वशक्त्याश्रयो धर्मः कार्य्यकारणभावात् ॥ ७४ ॥

त्रिगुणात्मिकया प्रकृत्या सृष्टिस्थितिलयात्मिकायाः क्रियाया अभ्यु-

दयनिःश्रेयसप्रदात्र्या क्रियया धर्मस्य च कार्य्यकारणभावात्मक-सम्बन्धसत्त्वात् धर्मस्य सर्वशक्तिशालित्वम्। धर्मेण जीवा अभ्युदयनिःश्रेयसभाजो भवन्तीति धर्मः क्रियाविशेषसम्बन्धवान्, त्रिगुणात्मिका प्रकृतिस्तु परिणामित्वात् कर्मणां जनयित्री। इत्येवं धर्मः सर्वासामेव स्थितिमतीनामुन्नतिशीलानाञ्च शक्तीनामाश्रयः। यतो हि धर्मेण जगतां स्थितिः, तेनैव च जीवानामभ्युदयनिः श्रेयसावपि सिध्यत इति ॥ ७४ ॥

एतस्य वैज्ञानिकं रहस्यमुपवर्णयति—

प्रकृतेः सर्वशक्तिमत्वात् ॥ ७५ ॥

ब्रह्मशक्तिरूपिण्या मूलप्रकृतेः सर्वशक्तिमत्त्वे सर्वेषामेव शास्त्रकाराणामैकमत्यम्। अनन्तकोटिब्रह्माण्डप्रसूः ब्रह्माण्डपिण्डात्मिका जगद्धात्री जगज्जननी सृष्टिस्थिति-प्रलयकारिणी ब्रह्मशक्तिः सर्वासामेव शक्तीनामाश्रयभूतेत्यत्र नास्ति प्रमाणविज्ञानयोरपेक्षा। एवञ्च धर्मस्यापि तस्या एव ब्रह्मशक्तेः प्रकृते नियमरूपत्वात् तया सह कार्य्यकारणभावात्मक-सम्बन्धाश्रयत्वाच्च तस्यास्तत् सर्वशक्तिमत्वं तत्र विश्वधारके धर्मेऽपि सुस्पष्टमेव ॥ ७५ ॥

विशेषधर्मप्रसङ्गेन जातिधर्मं निर्णयति—

प्रकृतिमूलो जातिधर्मः ॥ ७६ ॥

प्रकृतिर्मूलं यस्य प्रकृतिहेतुक इति यावत् एवम्भूतो जातिधर्मो ज्ञेयः। वर्णधर्मेण साक्षात् सम्बन्धत्वानयं विशेष-धर्मरूपो जातिधर्मः प्रकृतिगतो विज्ञेयः। प्रथम एव परिणामे त्रिगुणात्मिकायाः प्रकृते र्गुणपरिणामक्रमतो जातिवर्गः परिणमते। तत्र चत्वारो विभागाः स्वभावसिद्धाः। यथा ऊर्ध्वगाः सत्त्वप्रधाना अधोगास्तमःप्रधाना मध्यस्था हि सत्त्वरजःप्रधाना रजस्तमःप्रधानाश्चेति। रजोगुणस्योभयसहायकत्वात् प्रकृतिसाम्राज्यीयचेतनवर्गे चतुर्णामेषां विभागानां स्थितिः स्वाभाविकी। एवमेव सर्वत्रैव स्वेदजाण्डज-जरायुजादिचतुर्विधभूतसंघेषु चतसृणां श्रेणीनामुपलब्धि र्दृश्यते—श्रुतिस्मृतिषु बहुधा प्रपञ्चितोऽयं विषयः—

प्रजापतिरकामयत प्रजायेयेति स मुखतस्त्रिवृतं निरमिमीत तमग्निर्देवता अन्वसृजत ब्राह्मणो मनुष्याणामजः पशूनां तस्मात्ते मुख्याः......बाहुभ्यां पञ्चदशं निरमिमीत तमिन्द्रो देवता अन्वसृजत राजन्यो मनुष्याणामाविः पशूनां तस्मात्ते वीर्यवन्तो........मध्यतः सप्तदशं निरमिमीत तं विश्वेदेवा देवता अन्वसृज्यन्त वैश्यो मनुष्याणां गावः पशूनां ......सोऽन्येभ्यो भूयिष्ठा हि देवता अन्वसृज्यन्त ....शूद्रो मनुष्याणामश्वः पशूनाम्।

लघु यत् कोमलं काष्ठं सुघटं ब्रह्मजाति तत् ।
दृढङ्गं लघु यत् काष्ठमघटं क्षत्रजाति तत् ॥
कोमलं गुरु यत् काष्ठं वैश्य-जाति तदुच्यते ।
दृढाङ्गं गुरु यत् काष्ठं शूद्रजाति निगद्यते ॥
लक्षणद्वययोगेन द्विजातिः काष्ठसंग्रहः ॥७६॥

एतद्विज्ञानं स्पष्टयति—

तस्माद्वर्णधर्मस्तथा ॥ ७७ ॥

सत्वादिगुणत्रयस्य पूर्वोक्तस्वाभाविकचतुःश्रेण्यनुसारं मनुष्येषु ब्राह्मण-क्षत्रिय-वैश्य-शूद्रभेदेन चत्वारो वर्णाः प्राकृतिकाः स्वभावसिद्धा इत्यर्थः ।

ननु यदि वर्णधर्मविभागो नैसर्गिकस्तदा सर्वत्रैव देशेषु मनुष्याणां सामाजिकव्यवस्थायां कथन्न वर्णधर्मस्य सामञ्जस्यं विकाशश्चावलोक्यते ? अत्रोच्यते मानवानां पूर्णावयवजीवत्वेन स्वधर्मभ्रंशनशक्तिमत्वस्यापि सत्वात् तत्रैव धर्माधर्माधिकारनियमनमुपलभ्यते नान्ययोनिगेषु जीवेषु । स्मृतिशास्त्रेऽप्येवमेवोक्तम् ।

मनुष्येषु महाराज ! धर्माधर्मौ प्रवर्ततः ।
न तथाऽन्येषु भूतेषु मनुष्यरहितेष्विह ॥

अत एवादिसर्गे सर्वे ब्राह्मणा एवोद्भवन्ति । पुनश्च ये तत्र स्वब्राह्मभावेन पतितसमाजलङ्घ्यं वर्णधर्मदुर्गेण सुगोपायन्ति त आर्य्या एवेह तिष्ठन्ति । ये च सर्वथा त्यक्तवर्णाश्रमाचाराः स्वच्छन्दतो भ्रष्टाचारा भूत्वा कामचारा भवन्ति त एवानार्य्या गण्यन्ते । स्मृतिषु यथा—

असृजद्ब्राह्मणानेव पूर्वं ब्रह्मा प्रजापतीन्
आत्मतेजोभिनिर्वृत्तान् भास्कराग्निसमप्रभान्
न विशेषोऽस्ति वर्णानां सर्वं ब्राह्ममिदं जगत्
ब्रह्मणा पूर्वसृष्टं हि कर्मभिर्वर्णतां गतम्
कामभोगप्रियास्तीक्ष्णाः क्रोधनाः प्रियसाहसाः ।
त्यक्तस्वधर्मा रक्ताङ्गास्ते द्विजाः क्षत्रतां गताः ॥
गोभ्यो वृत्तिं समास्थाय पीताः कृष्युपजीविनः ।
स्वधर्मान्नानुतिष्ठन्ति ते द्विजा वैश्यतां गताः ॥
हिंसाऽनृतप्रिया लुब्धाः सर्वकर्मोपजीविनः ।
कृष्णाः शौचपरिभ्रष्टास्ते द्विजाः शूद्रतां गताः ॥ इति ७७ ॥

एतदेव पुनर्द्रढयति—

सङ्करोऽश्वतरवत् ॥ ७८ ॥

आदिसर्गे मानवानां यो वर्णधर्मो निर्णीत स्तत्र यदि साङ्कर्य्यदोष आपतेत्तदा अश्वतरवंशोच्छेद इव मनुष्याणां मनुष्यत्वविनाश एव सम्पद्येत। वर्णधर्मस्य प्राकृतिकत्वात् सृष्टेरादित एव तस्य सत्तेति दार्शनिकविज्ञानतो वेदशास्त्रादितोऽपि सिध्यति। अनन्तरञ्च यो हि मनुष्यसमाजो रजोवीर्य्यशुद्ध्या स्ववर्णधर्मं सुगोपायति स तु कल्पान्तं स्वसत्तां मानवमर्य्यादाञ्च स्थापयति। यो हि स्वस्वातन्त्र्यं स्वाधिकारञ्चापालयन् वर्णधर्मं भ्रंशयन् ।रजोवीर्य्यशुद्धिं विनाशयति सोऽश्वतरवत् भाविनीं सृष्टिमेवोन्मूलयति। यथा अश्वतरस्याग्रे वंशवृद्धि र्न जायते तद्वदेव वर्णधर्मविरहितो मानवसमाजोऽनार्य्यो भूत्वा कालान्तरे च धर्मविमुखोऽसभ्यो भवन् महाकालगर्भे विलीनः स्ववंशोच्छेदमेवाश्रयति ॥ ७८॥

शङ्कासमाधानाभ्यामेतदीयं विज्ञानं द्रढयति—

तदुन्नतिर्विशिष्टसंयोगिवृक्षवत् ॥ ७९ ॥

तस्य सङ्करस्य उन्नतिरभ्युदयो विशिष्टाश्च ते संयोगिनो वृक्षास्तद्वत्। ननु वर्णाश्रमधर्ममर्य्यादाविरहितेष्वप्यनार्य्येषु धनबुद्धिविद्याबलादिभिरभ्युदयो दृश्यते तत्र को हेतुरिति शङ्कां समाधातुमेवास्य सूत्रस्योद्भवः। तथा हि— आम्रादि वृक्षेषु संयोगि-वृक्षाणामाम्रादीनि फलानि बृहन्ति सुस्वादूनि च भवन्ति, परन्तु ते तरवो न चिरस्थायिनो नापि तेषां बीजेनाग्रे वृक्षसृष्टिपरम्पराः सम्पद्यन्ते। यतो हि संयोगिवृक्षाणां बीजवापेन जायमाने वृक्षे न तादृशानि पीवराणि महान्ति वा फलान्युद्भवन्ति। प्रत्युत क्रमश स्तेषां सृष्टिपरम्परोत्तरोत्तरं क्षीयमाणा विलीयत एव। तथैवानार्य्यजातीनां साङ्करी सृष्टिः कियत्कालं यावत् स्वीयं विशेषचमत्काराभ्युदयं दर्शयन्त्यपि अवसानेऽधोगतिमुपगता प्रकृतिगर्भे विलीना नष्ट-भ्रष्टैव भाविनीति निश्चप्रचम् ॥ ७९ ॥

प्रत्यक्षत एवेदं विज्ञानं प्रमाणयति—

तथा सर्वत्र दर्शनात् ॥ ८० ॥

भौगोलिकेतिहासनिरीक्षणतोऽपि पुष्यतितरामिदं विज्ञानम्। यस्मिन् वंशे साङ्करी प्रजा जायते तस्योच्छित्तिरावश्यकी। यतो हि नित्यपितृगणा नैतादृशं वंशं संरक्षितुं कृतयत्ना भवन्ति। अत एव पृथिव्या अनादिकालत एव वर्णाश्रमधर्मव्यवस्थाविरहिता असंख्याता जातयः समुत्पन्नाः, परन्तु ताः सर्वा अपि वर्णाश्रममर्य्यादा-विरहिताः सङ्कर्य्यो भूत्वा महाकालसमुद्रे निमग्ना नामशेषा न

श्रूयन्ते । निश्चितमिदं यत् वर्णाश्रमधर्मविहीना कापि मनुष्यजाति र्नेह पृथिवीतले चिरस्थायिनी नापि नियमतोऽभ्युदयं विन्दमाना निःश्रेयसाधिकारिणीति ॥ ८० ॥

वर्णधर्म्मप्रयोजनं प्रतिपाद्य वर्णशुद्धेरुपायमाह—

त्रिभावतो वर्णशुद्धिः ॥ ८१ ॥

अध्यात्माधिदैवाधिभौतात्मकभावत्रयावलम्बनतो वर्णधर्मस्य शुद्धि र्भवतीत्यर्थः । तत्र ज्ञानेनाऽध्यात्मभावस्य कर्मणाऽधिदैवभावस्य मातृपितृरजोवीर्य्यसाहाय्येन चाधिभौतभावस्य सुरक्षेति । विना ज्ञानेनात्मनो नावरणोच्छेद इति ज्ञानमाध्यात्मिकशुद्धेधे हेतुः । सर्वस्या एव जातेस्तदीयं साहजिकं कर्म तज्जीवनाय भगवदुपासनारूपमेव भवति । तेनैव तु प्रकृते र्महामातृरूपाया यथार्हमर्हणं भवति । अत एव स्ववर्णोचितेन कर्मणाऽधिदैवशुद्धिरपि स्वाभाविकी स्थूलकायस्य च मूलमुपादानं मातृपितृरजोवीर्य्यमेवेति तेनैवाधिभौतिकी शुद्धिरपि साधीयसीति त्रिविधामपि वर्णधर्मस्य शुद्धिमिमान्येव ज्ञानादीनि त्रीणि सम्पादयन्तीति स्मृतयोऽपि जगुः—

रजोवीर्यविशुद्धयैव भवत्यत्र सुरक्षितम् ।
आधिभौतिक-संशुद्धेर्बीजं नु पितरो ध्रुवम् ॥
विदित्वा पीठमर्यादां संस्कारशुद्धिपूर्विकाम् ।
भवताञ्च कृपापुञ्जैः पितरो रक्षितं भवेत् ॥
आधिदैविकसंशुद्धे र्बीजं नूनं चिरन्तनम् ।
सत्त्वलक्षणसङ्गो वै स्वस्मिञ्छश्वद्विकाशितः ॥
क्रियमाणैः प्रयत्नैश्चेद्भवेद्बीजं सुरक्षितम् ।
नूनमाध्यात्मसंशुद्धेर्नात्र कार्य्या विचारणा ॥
त्रिविधानां हि बीजानां रक्षयैवंविधैः क्रमैः ।
वर्णाश्रमाख्यधर्मस्य बीजं स्याद्रक्षितं ध्रुवम् ॥ ८१ ॥

शुद्धेरभावादसम्पूर्णत्वं वर्णधर्मस्येति संसाधयति—

अङ्गवैकल्यादपूर्णता ॥ ८२ ॥

अङ्गानां वैकल्यात् भङ्गतोऽपूर्णत्वं वर्णधर्मस्येति सूत्रार्थः । पूर्वविज्ञानतो निश्चीयते यदत्र त्रिविधास्वपि शुद्धिषु यस्या ययोर्वा यावदल्पत्वं तावदेव वर्णधर्मोऽपूर्णतेति निर्विवादम् । उदाहरणतो यथा—कश्चिद् ब्राह्मणोऽध्यात्मशुद्धिविकलश्चेत्तर्हि स ब्राह्मणत्वस्य तृतीयांशद्वयेनापेतः, यदि स एवाध्यात्माधिदैवशुद्धिद्वयेन विकलस्तर्हि स जातिब्राह्मणः, तृतीयांशत एव ब्राह्मणत्वं तस्मिन् । रजो-

वीर्य्यशुद्धिस्त्वावश्यकी तस्याः साध्यत्वाभावात् । एवमेवान्येष्वपि वर्णेषु अङ्ग-वैकल्यमूहनीयम् । स्मृतावप्युक्तम् ।

"तपःश्रुतञ्च योनिश्चेत्येतद्ब्राह्मणकारणम् ।
तपः-श्रुताभ्यां यो हीनो जातिब्राह्मण एव सः" ॥ ८२ ॥

प्रसङ्गसङ्गतिप्राप्तं ब्राह्मणभेदविज्ञानं ब्रूते—

अतो ब्राह्मणानेकविधत्वम् ॥ ८३ ॥

अतोऽस्मात्पूर्वकथितविज्ञानादेव स्मृतिशास्त्रादिषु देवादि-संज्ञकानां ब्राह्मणानां कल्पना कृता बहुशोऽवलोक्यते। यतो हि यत्र ब्राह्मणेषु रजो-वीर्य्यशुद्धिरूपाऽधिभौतशुद्धिस्तु विद्यते, परन्तु ते अध्यात्माधिदैवात्मिके द्विविधे अपि शुद्धी न विद्येते प्रत्युतानेकास्त्रुटयो बहुविधाश्च दोषा स्तत्र ब्राह्मणेषु व्याप्तास्तदनुकूलत एव तैस्तै र्लक्षणै स्तेषां ब्राह्मणानां विविधाः श्रेण्यो विभक्ताः। तथा हि—

देवो मुनिर्द्विजो राजा वैश्यः शूद्रो निषादकः ।
पशुर्म्लेच्छश्च चाण्डालो विप्रा दशविधाः स्मृताः ॥
सन्ध्यां स्नानं जपं होमं देवतातिथिपूजनम् ।
वैश्वदेवञ्च कुर्वाणो विप्रो देवः प्रकीर्त्यते ॥
शाके पत्रे फले मूले वनवासे सदा रतः ।
निरतोऽहरहः श्राद्धे स विप्रो मुनिरुच्यते ॥
वेदान्तं यः पठेन्नित्यं सर्वसङ्गं परित्यजेत् ।
सांख्ययोगविचारस्थः स विप्रो द्विज उच्यते ।
अस्त्राहताः सुधन्वानः संग्रामे सर्वसम्मुखे ।
आक्रम्य निर्जिता येन स विप्रः क्षत्र उच्यते ॥
कृषिकर्मरतो यश्च गवाञ्च प्रतिपालकः ।
वाणिज्य-व्यवसायी च स विप्रो वैश्य उच्यते ॥
लवणस्याथ लाक्षायाः कुसुम्भ-क्षीर-सर्पिषाम् ।
विक्रेता मधुमांसानां स विप्रः शूद्र उच्यते ॥
तस्करश्चैव पापी च सूचको दंशकस्तथा ।
मत्स्यमांसे सदा लुब्धः प्रोच्यते स निषादकः ॥
ब्रह्मतत्त्वं न जानाति ब्रह्मसूत्रेण गर्वितः ।
तेनैव स च पापेन विप्रः पशुरुदाहृतः ॥
वापी-कूप-तड़ागानामारामसरसां तथा ।

निःशङ्कं रोधको यस्तु स विप्रो म्लेच्छ उच्यते ॥
क्रियाहीनश्च मूर्खश्च सर्व-धर्म--विवर्जितः ।
निर्दयः सर्वभूतेषु विप्रश्चाण्डाल उच्यते ॥८३॥

वर्णधर्मस्य प्रधानमाश्रयमभिधत्ते—

बीजप्राधान्यं सर्वत्र ॥ ८४ ॥

मानवेतरासु सर्वास्वपि चतुराशीतिलक्षयोनिषु यथा बीजस्यैव प्राधान्यं तद्वदेव वर्णधर्मेऽपि बीजस्यैवाभ्यर्हितत्वम् । अत एव रजोवीर्य्यशुद्धिरूपाया आधिभौतिकशुद्धेस्तत्र सर्वाभ्यर्हितत्वं परमावश्यकत्वञ्च । यतो हि ज्ञानकर्मणी साध्ये भवतोरजोवीर्यशुद्धिस्तु न साध्या, सा हि मातृपित्रधीनाऽपरिवर्तनीया च । तत्रापि बीजस्य प्राधान्यं सर्वत्रैव जगति दृश्यते यद्भूमिभेदेनोद्भिज्जसृष्टिषु तारतम्यमाश्रितास्वपि बीजप्राधान्यं न हीयते । यादृग्बीजं भवति तादृगेवाग्रे सर्गः प्रचलति, तस्मात्सर्वत्र बीजाभ्यर्हितत्वमेव स्वीकरणीयम् ॥ ८४ ॥

अवान्तर-सङ्गतिप्रसङ्गतः पितृ-माहात्म्यं वर्णयति—

पितृकृपाऽभ्युदयहेतुश्चक्रसम्बन्धात् ॥ ८५ ॥

पितृणां कृपा गमनागमनचक्रसम्बन्धेनाभ्युदयानामैहलौकिकपारलौकिकानां हेतुर्भवति । स्मृतिष्वपि गमनागमनचक्रसम्बन्धे बहु प्रपञ्चितम् ।

तथा हि—

अनुभूतमिदं त्वास्ते युष्माभिः पितरो ध्रुवम् ।
मर्त्य-योनिं समासाद्य जीवाः सर्वे समन्ततः ॥
गमागमनचक्रेषु प्रविशन्ति न संशयः ।
पश्यन्ति किन्तु वै चक्रं भाग्यवन्तो न केऽप्यदः ॥
परिधिस्तस्य चक्रस्य द्विधा भिन्नोऽस्त्यसंशयम् ।
तत्रैकः प्रेतलोकोऽस्ति मृत्युलोकोऽपरस्तथा ।
असौ चक्रस्य परिधिः पितृलोकावधिक्रमात् ॥
विस्तीर्य्य प्रथमं पश्चात् नरके स्वरपि ध्रुवम् ।
विस्तृणाति तपोलोकपर्य्यन्तं नात्र संशयः ॥
नैवात्र विस्मयः कार्य्यो भवद्भिर्विश्वभूतिदाः !
तमःप्रधानं प्रथमं चक्रमेतदनन्तरम् ॥
तमोरजःप्रधानञ्च रजःसत्वप्रधानकम् ।
शुद्धसत्त्वप्रधानं हि जायते तदनन्तरम् ॥

ऊर्ध्वलोकं ततो मृत्युलोकं व्याप्नोति केवलम् ।
परिधिस्तस्य चक्रस्य ततोऽन्ते मयि लीयते ॥

गमनागमनचक्रस्य केन्द्रस्वरूपोऽयं मृत्युलोकः । जीवा मृत्योरनन्तरं लोकान्तरे परिभ्रम्य पुनरत्रैवावर्तन्तेऽस्य कर्मभूमित्वात् । अस्मिन्नेव लोके जीवा मातृगर्भे प्रविशन्ति नान्यत्रेत्यस्य लोकस्य वैचित्र्यम् । गर्भाधानवेलायां मातापित्रो र्युग्मदेहे स्वत एव पीठस्थिति र्जायते । पीठरहस्यञ्च दैवीमीमांसादर्शने विस्तरशो वर्णितम् । मातुराकर्षणशक्त्या पराजितायां पितुर्विकर्षणशक्तौ पीठवेद्यामुपस्थिता देवा जीवान्मातृगर्भे प्रवेशयन्ति । नित्यपितृगणाश्च तेषां स्थूलशरीरनिर्माणे साहाय्यमाचरन्ति । जीवानां स्थूलशरीरमेव तेषां भविष्यत्कर्मसंग्रहे निमित्तम् । यादृगेवोत्तमं स्थूलशरीरं पुरुषः प्राप्नोति तादृगेवोत्तमं कर्म साधु सम्पादयितुं सोऽर्हति । नित्यपितरो हि यथाकर्म स्थूलदेहं निर्मान्ति । तत्प्रतिनिधिभूतो जनकश्च सृष्टौ वीजप्राधान्याज्जीवजन्मनिदानतामेति । इत्येवं सहजचक्रसम्बन्धित्वात् स्थूलदेहनिर्माणनिदानात् नित्यपितृप्रतिनिधित्वात् गर्भाधानसंस्कारसम्पादकत्वाच्च पितैवेह जगति परमपूज्यः । तस्य पितुरभ्यर्चनेन धर्मोपलब्ध्याऽभ्युदयाधिगतिरित्यत्र कः सन्देहः । स्मृतावप्युक्तम्—

"पिता धर्मः पिता स्वर्गः पिता हि परमं तपः" इति ॥ ८५ ॥

प्रसङ्ग-सङ्गत्या दायभागविज्ञानं वर्णयति ।

अत एव दायभागो व्यवस्थितः ॥ ८६ ॥

अत एव गमनागमनचक्रस्य पारलौकिकाध्वसहायकत्वादेव आर्य्याणां दायभागो व्यवस्थितः पारलौकिकाध्वसहायकत्वदृष्ट्या विभक्त इत्यर्थः । यथा मृत्युलोके स्थूलशरीरसम्बन्धतः परमसहायकत्वाद् गमनागमनचक्रोपयोगित्वाच्च पितृपूजा विहिता, तथैवागमनचक्रस्य पारलौकिकमार्गसाहाय्याधानात् पुत्रो ऽन्यश्च तदधिकारी स्वाधिकारं यथोचितं दायभागविभक्तं स्मृतिशास्त्रादिभिः प्रतिग्राह्यते । प्रेतश्राद्धादिना प्रेतलोकविमोचनात् नित्यनैमित्तिकादिश्राद्धकृत्य-दानादिधर्मानुष्ठानतश्च नरकलोकविमोचनादन्यान्यलोकेषु तृप्त्याधानात् पुत्रो गमनागमनचक्रे परमसहायकः । अतो दायभागाधिकारी स प्रधानतयेहाभिहितः । एतद्विज्ञानानुकूलमेवान्येऽपि दायभागाधिकारिणो भवन्ति, नान्ये । आर्य्यशास्त्रादिविहितो दायभागो धर्मविज्ञानसिद्धो न मोहजनित इति स्मृतिष्वप्युदीरितम्—

एष स्त्रीपुंसयोरुक्तो धर्मो वो रतिसंहितः ।
आपद्यपत्यप्राप्तिश्च दायभागं निबोधत ।
ज्येष्ठ एव तु गृह्णीयात् पित्र्यं धनमशेषतः ।
शेषास्तमुपजीवेयुर्यथैव पितरं तथा ।
ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरम् ।
ततोऽर्द्धं मध्यमस्य स्यात्तुरीयन्तु यवीयसः ।
ज्येष्ठश्चैव कनिष्ठश्च संहरेतां यथोदितम्
येऽन्ये ज्येष्ठकनिष्ठाभ्यां तेषां स्यान्मध्यमं धनम् ।
एवं समुद्धृतोद्धारे समानांशान् प्रकल्पयेत्
उद्धारेऽनुद्धृते त्वेषामियं स्यादंशकल्पना ।
एकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्द्धं ततोऽनुजः ।
अंशमंशं यवीयांस इति धर्मो व्यवस्थितः ॥ ८६ ॥

प्रसङ्गत आधिभौतिकशुद्धेः प्राधान्यमाह—

जन्मप्राधान्यं पार्थिवत्वात् ॥ ८७ ॥

पृथिव्या विकारः पार्थिवस्तस्य भावस्तस्मात् जन्मन एव प्राधान्यम् मुख्यता वर्णाश्रमधर्मे इति शेषः । इह मृत्युलोके जीवस्य मातापित्रो रजो-वीर्य्यसाहाय्येन मातृगर्भनिवासपूर्वकं स्थूलदेहोपलब्धिरिति स्थूलदेहस्यैव वैशिष्ट्यमङ्गीक्रियते । नान्यत्र सूक्ष्मलोकेष्वियं व्यवस्था । अपरञ्च आधिभौतिक-शुद्धेराध्यात्मादिशुद्धिवत्साध्यत्वाभावात् वर्णधर्मे तस्या एवाभ्यर्हितत्वमिति प्रागेव प्रमाणितम् । इदानीञ्च पुनरभ्यासेन वर्णाश्रमधर्मे जन्मनः प्राधान्यं प्रतिपादयति, पार्थिवतत्त्वप्रधानेऽस्मिन् मृत्युलोके जीवानां स्थूलदेहसम्भूतिः प्रधानतः पार्थिवादेव तत्त्वाद् भवतीति जन्मनः प्राधान्यमवश्यमापतति । पार्थि-वतत्त्वप्रधानेऽस्मिन् मृत्युलोके विना पार्थिवतत्त्वप्रधानं देहं न किमपि कार्य्यं सिध्यति । तच्च पार्थिवतत्त्वप्रधानं कार्यं जन्मनैवासाद्यत इति वर्णाश्रमधर्मे जन्मनः प्राधान्यं स्वतः सिद्धम् ॥ ८७ ॥

अन्यथाऽपि विज्ञानमिदं द्रढयति—

गुणाश्रयत्वाच्च ॥ ८८ ॥

स्थूलो देहस्त्रिगुणाश्रयो भवतीत्यतोऽपि वर्णाश्रमधर्मे जन्मतः प्राधान्यं ज्ञेयम् । श्रीमता भगवतापि श्रीमद्भगवद्गीतायां स्वयमभिहितम् ।

"चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः" इति

पूर्वजन्मार्जित-संस्कारानुकूलमेव जीवानां विशेषवर्णे, ब्राह्मणक्षत्रियादिजातौ जन्मेति योगदर्शनेऽपि पतञ्जलिनोक्तम्—

"सति मूले तद्विपाको जात्यायुर्भोगः" इति ।

कर्माशयनिदानभूतेषु क्लेशेषु सत्सु तेषां कर्माशयानां विपाकः परिणति र्जात्यायुर्भोगरूपतो भवतीत्यर्थः । एतेन सिध्यतीदं पूर्वजन्मार्जितप्रधानसंस्काराश्रयेणैव जीवो जातिविशेषे जन्म गृह्णातीति । तदानीञ्च पूर्वसंस्कारानुसारेणैव तस्य प्रकृति र्भवति । तदनुकूल एव गुणपरिणामस्तस्य स्थूलदेहे सम्पद्यते तस्यैव प्रकृतिविलासक्रीडास्थलत्वात् । गुणानां विकासः स्थूलदेहे स च मातापितृजस्ततश्च वर्णाश्रमधर्मे जन्मनः प्राधान्यमिति 'च' शब्दसंसूचितेनानेन विज्ञानेन सुदृढं प्रतिपादितम् ॥ ८८ ॥

आधिभौतिकशुद्धेर्महिमानमभिदधाति--

अविद्योऽप्याचारवान् विप्रः प्रणम्योऽन्यैः ॥ ८९ ॥

नास्ति विद्या यस्याऽसावपि विप्र आचारवान् सदाचारी चेदन्यैः क्षत्रियादिभिः प्रणम्य एवेति सूत्रार्थः । पूर्वविज्ञाने वर्णाश्रमधर्मे जन्मनः प्राधान्यं गौरवञ्च समर्थितम् ॥ तत्र दृष्टान्तमाह–यदि कश्चन ब्राह्मणजातिगो विद्यया ज्ञानेन विरहितोऽपि कदाचारहीनः सदाचारसम्पन्नश्चेत् सोऽन्यैः क्षत्रियवैश्यशूद्रानार्य्यादिभिरवश्यमेव प्रणम्यो भवति । 'अत्राचारवान्' इतिशब्दतः पतितस्य प्रणमानर्हत्वं द्योतितम्, अपिशब्देन च जन्मप्राधान्यपोषकविज्ञानं दृढीकृतम्

ब्राह्मणमहत्त्वे चानेकशः स्मृतिवचनान्युपलभ्यन्ते । तथा हि--

भूतानां प्राणिनः श्रेष्ठाः प्राणिनां कृतबुद्धयः ।
बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ॥
उत्तमाङ्गोद्भवाज्ज्यैष्ठ्याद्ब्रह्मणश्चैव धारणात् ।
सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः ॥ ८९ ॥

पुनश्च—

अतत्त्वज्ञोऽपि सन्यासी तथा ॥ ९० ॥

पूर्वसूत्रे वर्णधर्मोदाहृत्या जन्मप्राधान्यविज्ञानदृढतां संसाध्येदानीमाश्रमधर्मदृष्टान्तेनापि तदेव द्रढयति । आधिभौतिकशुद्ध्या जन्मप्राधान्यया यथा वर्णगुरु र्ब्राह्मणो विद्यातपोभ्यां विहीनोऽपि सर्वेषां नमस्यस्तथैव ब्राह्मणजातौ गृहीतजन्मतया सन्याससंस्कारसंस्कृत्या च तत्त्वज्ञत्वाभावेऽपि सन्यासाश्रमगतो विप्रोऽन्येषामाश्रमान्तरगानां मानवानां प्रणम्य एवेति नाणीयस्यप्यत्र संशयितिः ।

यद्यपि ब्राह्मणवर्णो गृहीतजन्मनः संन्यासदीक्षादीक्षितस्यापि सन्यासिनो यथायोग्यं कर्मित्वं ज्ञानित्वञ्चापेक्षितमेव तथापि जन्मप्राधान्याद् ब्राह्मणत्वेन सन्याससंस्कारतस्तल्लिङ्गादिना चाऽधिभौतिकपरिवर्तनेन सहैव सर्वस्तुत्यः सर्वप्रणम्यः स भवतीति द्वितीयेन 'अपि'शब्देन संसूचितम् । स्मृतिष्वपि सन्यासिमाहात्म्यवर्णनं बहुधैवमुपलभ्यते ।

अतो विवेकसम्पन्नः सन्यासी विमलाशयः
ज्ञानाब्धिपारगो देवाः श्रद्धेयो भवतामपि ॥ ६० ॥

आधिभौतिकशुद्धिमुक्त्वेदानीमन्ये अप्याह—

यत्नादन्ये ॥ ६१ ॥

अन्ये आधिदैवाध्यात्मिकशुद्धी यत्नात् उपासनाज्ञानादिनाऽपि साधयितुं शक्ये भवत इत्यर्थः ।

आधिभौतिकी शुद्धिर्हि जन्मना सम्बध्यते न तु साधनेन, किन्तु, इतरे आधिदैवाध्यात्मिकशुद्धी सम्बध्येते साधनेनापि । यद्यपि पूर्वजन्मसंस्कारेणैव कर्मोपासनाज्ञानानि मानवेषूत्पद्यन्ते । तथापि तानि पुरुषार्थसाध्यान्यपि भवन्तीत्यसन्दिग्धम् । स्ववर्णाश्रमानुकूले कर्मोपासने अनुष्ठिते आधिदैवशुद्धिं शास्त्रादिज्ञानमात्मानात्मविचारादितत्त्वज्ञानञ्चाध्यात्मशुद्धिं दिशत इत्याधिभौतिकशुद्धिव्यतिरिक्ते उभे अपि शुद्धी यत्नसाध्ये स्तः ॥ ६१ ॥

वर्णाश्रमधर्मस्य निदानमाधिभौतिकीं शुद्धिमुक्त्वा तन्महिमानमाख्याति—

वर्णाश्रमाभ्यां स्थूलसूक्ष्मे रक्ष्ये ॥ ६२ ॥

वर्णधर्माश्रमधर्माभ्यां क्रमशः स्थूलसर्गरूपस्य मृत्युलोकस्य सूक्ष्मसर्गरूपस्य दैवलोकस्य च संरक्षणं क्रियते । मानवजातिश्च वर्णाश्रमधर्मेणैव ।स्वज्ञानं गोपायन्तीह पार्थिवेऽपि जगति चिरं जीवितुमर्हति । तद्विरहिता तु कालान्तरेण पशुवद् व्यवहरन्ती स्वात्मविनाशमेवासादयति । अतश्च मानवजातेः संरक्षकोऽयं वर्णाश्रमधर्मः स्थूलसृष्टेरपि संरक्षकस्तथाऽनेनैव पितरो देवगणा ऋषयोऽपि सम्वर्द्धिता भवन्तीति वर्णाश्रमधर्मोऽयं स्थूलसूक्ष्मसृष्टिसंरक्षकः । तस्याष्टौ प्रधानोपकाराः स्मृतिशास्त्रे प्रतिपादिताः । तथा हि—

आर्य्यजातेर्वीर्यरक्षाऽध्यात्मिकी च क्रमोन्नतिः ।
पितॄणां वर्द्धनाऽनल्पा तत्कृपा-प्राप्तिरेव च ॥
सहोच्चैर्देवलोकैश्च सम्बन्धस्थापनं भृशम् ।
विबुधानां प्रसादश्च विश्वमङ्गलसाधकः ॥

तथा स्वभावसंसिद्ध-संस्कारोदयसाधनम् ।
बीजरक्षाऽऽत्मबोधस्य कैवल्याधिगमोऽपि च ।
वर्णाश्रमाणां धर्माणामष्टावेतानि मुख्यतः ॥ ६२ ॥

अन्यच्च—

उपकारानन्त्यम् ॥ ६३ ॥

स्थूल-सूक्ष्म-राज्य-संरक्षणातिरिक्ता अन्येऽपि वर्णाश्रमधर्मतोऽनन्ता उपकाराःसमुद्भवन्ति । सृष्टिप्रपञ्चानां स्थूलदैवराज्यरूपविभागद्वयान्तर्गतत्वात् सर्वेषामेव विषयाणां तत्सम्बद्धत्वात्सर्वेऽप्युपकाराः पूर्वकथितोपकारद्वयान्तर्गता एव भवन्ति। तथापि मानवानां सर्वेऽप्यभ्युदया अपेक्षिताः पदार्था वर्णाश्रमधर्मतः सिध्यन्तीति सूत्रेणानेनानन्तशब्दतः संसूच्यते। तथा हि-दैवराज्ये ऋषीणां देवानां नित्यपितृगणानाञ्च सम्बर्द्धनम्, परलोकगतानान्नारकीयानां जीवानामुद्धारः, असुराणां बलह्रासः, देवानां बलवृद्धौ साहाय्यसम्पादनम्, मनुष्यजातौ च यथाधिकार यथाक्रमञ्च कामार्थधर्ममोक्षाणां सम्प्रदानम्, आत्मज्ञानपरम्परया मृत्युलोकतोऽनुच्छेदः, प्रवृत्तिनिवृत्तिधर्मश्रृङ्खलायाश्चिराय सङ्गोपनम् त्रिलोकीपावनस्य सतीधर्मस्य बीजानुच्छित्तिः, मानवसमाजे विद्या बुद्धि-धन जन-सङ्घ-शक्तिबलसम्बर्द्धनम्, उन्नताभ्यश्चार्य्यजातिभ्यो रजोवीर्य्यशुद्धिमर्य्यादायाः स्थिरीकरणम् आर्य्यजातेश्चाकल्पं दृढ़ीकरणम् इत्यादीनि फलान्यसंख्येयानि वर्णाश्रमधर्मत एव प्राप्यन्ते । तदेवमग्रे यथावसरं विज्ञानस्यैतस्य मूलसिद्धान्तरहस्यं संक्षेपतो विवरिष्यते ॥ ६३ ॥

इदानीं तद्वैशिष्ट्यं प्रतिपादयति—

बीजरक्षणमार्य्यजातेः ॥ ६४ ॥

आदिसर्गे सनकसनन्दनादयश्चत्वारः परमहंसा आविर्भूताः, ततश्च प्रजापतिगणानां सृष्टिः, इत्येतद्द्वयमपि भगवतो ब्रह्मणः सृष्टिः । तदनन्तरम् प्रजापतिभिश्चालिता प्राथमिकी सृष्टिः ब्राह्मणानामेवाऽभूदित्युक्तं प्राक् । ततश्च ब्राह्मणतो बैजी सृष्टिः प्रारब्धा या क्रमशो ह्रसन्ती निम्नमार्गप्रसृता मनुष्यानवनमयन्ती अधोमुखी प्रावर्तत, यां निरोद्धुमेव परमकारुणिकोऽसौ सर्वज्ञो मुनिर्मनुः वर्णाश्रमर्य्यादासेतुञ्चकार । येनेयमार्य्यजातिरसभ्यतयाऽनार्य्यतामनासादयन्ती न विलीयते ।

जैवैशसहजभेदतः कर्मणां त्रैविध्यमित्यग्रे स्फुटी भविष्यति । येन मानवेतरे प्राणिनः सञ्चाल्यन्ते तदेव सहजं, येन दैवञ्जगत् तदैशं, येन तु मानव-

गणाः सञ्चाल्यन्ते तद्धि जैवं कर्माभिधीयते। सुकृतदुष्कृतयोरधिकारात् स्वातन्त्र्येण सम्प्रमुद्दामप्रवृत्तित्वस्याश्रयणात् जैवकर्माधिकारी मानवसङ्घः स्वभावत एवाधोमुखीनो भवति। स च स्वपिण्डाधिपतिरित्यपि तस्य निरङ्कुशत्वे हेतुः।

इत्येवमनन्ता अनार्य्यजातयोऽत्र पृथिव्यां निरङ्कुशत्वमुपेताः कालगर्भे विलीनाः। केवलेयमार्य्यजातिरेव सुदृढवर्णाश्रममर्य्यादासेतुसुगुप्ताऽविच्छिन्नोर्ध्वमुखीना पर्वतवदकम्पा तिष्ठति। वर्णाश्रमधर्म एवास्या बीजरक्षक इत्यनेन विज्ञानेन फलतः पर्य्यवसितम् ॥ ९४ ॥

अपरमपि विशेषमाह—

क्रमोन्नतिराध्यात्मिकी ॥ ९५ ॥

यदा जीवोऽन्यां योनिमतिक्रम्य मृत्युलोके मानवयोनौ प्रविशति तदैव स गमनागमनचक्रे पतित्वा तदधिकारवान् पौनः पुन्येन तत्रावर्तमानोऽत्र कर्मभूमावुन्नतेरवनते र्वा संस्काराणां संग्रहे प्रभवति, नान्यत्रोर्ध्वाधोलोकयोस्तयो र्भोगभूमित्वात्।

कर्मबीजात्संस्कारादेव जीवो वर्णाश्रममर्य्यादान्तर्गतः क्रमश उन्नतोन्नतं संस्कारमर्जयन् ज्ञानाधिकाराभिमुखो भवति। जन्मान्तरवादविज्ञाने पूर्णविश्वासभाजां वर्णाश्रमिणां चतुर्णां वर्णानामाश्रमाणाञ्चाधिकारे न परस्परमीर्ष्याद्वेषावसरः। प्रतिवर्णं रजोवीर्य्य-शुद्धिः, प्रतिवर्णञ्च धर्मसंस्कारः, प्रत्याश्रमञ्च धर्मसाधनाभ्यासो मानवान्नियमत आत्मज्ञानाभिमुखान् करोतीति वर्णाश्रमधर्मे एव सौलभ्यम्। चतुर्ष्वपि वर्णेषु चतस्रोऽपि साध्या वासना भोगेन तृपयित्वा आश्रमाणां प्रथमे द्वित्वे प्रवृत्तिनिरोधेन चरमद्वये च निवृत्तिसंस्कारोन्नमनेनान्ततो जीव आत्मज्ञानमधिगत्य स्वस्वरूपानन्दाम्बुधिमुपेत्य चिरशान्तो भवति न स पुनरावर्तते। वर्णाश्रममर्य्यादाविरहितास्वनार्य्यजातिषु नेदृशी क्रमोन्नतिपरम्परा नापि नियमबद्धव्यवस्था सम्भाव्यते। चतुर्ष्वपि वर्णेषु कामार्थधर्ममोक्षाणां परस्परशृङ्खलया आश्रमेष्वपि प्रवृत्तिनिवृत्त्योः परस्परविभागात् वर्णाश्रमव्यवस्थावत्य एव जातयो नियमतो गमनागमनचक्रे परिभ्रम्य स्वकर्मिकोन्नताबुन्मुख्यः क्रमश आध्यात्मिकोन्नतिमासादयितुमर्हन्तीति विस्तरशोऽस्य विज्ञानमग्रे स्फुटतामेष्यति ॥ ९५ ॥

विशेषान्तरमाह—

पितृ-सम्वर्द्धना तत्कृपाप्राप्तिश्च ॥ ९६ ॥

सर्वतन्त्रसिद्धान्तसिद्धोऽयं विषयो यज्जीवो मानवयोनिमुपेत्य प्रथमं प्रेतलोकेष्वेव गतागतं लभते ततश्चानार्य्यमानवयोनावायाति तदनन्तरं नरकपितृलोकगतो भूत्वा पितृगणानामनुकम्पामुपलभ्य रजोवीर्य्यात्मकं मातापितृजं यथोचितं स्थूलदेहमुपादत्ते। तत्रापि अर्य्यमादिनित्यपितृगणानान्तु पूर्णानुकम्पा तत्रैवार्य्यजातौ रजोवीर्य्यशुद्धिसंरक्षिकायाम्भवति नान्यत्र, यतस्ते रजोवीर्य्यशुद्धिमत्या एव जातेरक्षणमीहन्ते पिण्डोदकप्राप्तिनिदानान्न सङ्करायास्तदभावात्। अपि च तेषामनुकम्पा तदैव भवति यदा ते निश्चयतोऽवगच्छन्ति यदियं मनुष्यजातौ रजोवीर्य्यशुद्धयधिकारिणीति, इमां मनुष्यजातिं सुरक्षितुमस्माकं सौकर्य्यमस्तीति। पितृविज्ञानञ्च दैवीमीमांसादर्शने विस्तरशो वर्णितम्।

वर्णाश्रमव्यवस्थावतामेव मानवानामाध्यात्मिकक्रमोन्नतिः सुव्यवस्थिता, अत एव तैस्तैराचारैः पितॄणां कार्य्ये सौकर्य्यमापद्यते। वर्णाश्रमधर्मे च रजोवीर्य्यशुद्धया पितृगणाः प्रसीदन्ति, संवर्द्धन्ते। स्वानुग्रहेण च तत्कुलानि ताश्च जातीः संरक्षन्तः साहाय्यं सर्वथाऽऽचरन्तीत्यपरोऽयं वर्णाश्रमस्य धर्मस्य विशेषः ९६॥

अन्यच्च—

देवलोकसम्बन्धः॥ ९७॥

दैवीमीमांसापराभिधाने मध्यमीमांसादर्शने दैवराज्यस्य तत्सञ्चालकानामपि विस्तृतं वर्णनं विद्यते, कर्मणः सूक्ष्मजगतश्च सञ्चालकौ देवासुरावुभावासाते। असुरा अपि देवविशेषा एव। तत्रासत्तमसोः सम्बन्धोऽसुरैः सत्त्वसत्त्वयोश्च देवैः सहेति विज्ञानसिद्धम्। वर्णाश्रमसदाचारैः सात्त्विकभावापन्ना मानवाः सात्त्विकै र्देवै र्घनिष्ठ-सम्बन्धभाजो भवन्तीति विशेषान्तरमिदं वर्णाश्रमधर्मस्य॥ ९७॥

पुनश्च—

देवप्रसादः॥ ९८॥

वर्णाश्रममर्य्यादायाः समुचितसमादरेण क्रमशः सत्त्वाभिवृद्ध्याऽविद्याविनाशेन विद्यासाहाय्येन च कर्मोपासनाज्ञानसाम्यतयाऽध्यात्मिकोन्नतिर्जायते। इत्येवं यथाक्रमं सत्त्वस्य नियमतो वर्द्धनतः पूर्वसूत्रोक्तकारणकलापतश्च देवाः प्रसीदन्ति। पुनश्च वर्णाश्रमधर्मे यज्ञमहायज्ञादीनामनुष्ठानबाहुल्याद्देवप्रसादस्य सुलभोऽवसरः सततमेव विद्यते।

अन्यथापीमं विषयं विवृणुते तथाहि—वर्णाश्रमधर्मत इन्द्रियवश्यभावापन्ना

आसुरी वृत्तिरपक्षीयते, आत्माश्रिता च दैवी वृत्तिर्वर्द्धते । वर्णधर्मतः स्वत एव जीवाः कामार्थधर्ममोक्षेषु क्रमश उत्तरोत्तरमारोहन्ते । आश्रमधर्मतश्च प्रथमं सर्वतोमुखीनां प्रवृत्तिं निरुध्य निवृत्तिमार्गारूढास्तत्पूर्णतामधिगच्छन्ति । इत्यतो वर्णाश्रमधर्मतो मानवेषु दैवभावः समेधते इत्यसन्दिग्धम् । इत्येवं दैवभाव-समेधक आसुरभावापहारको वर्णाश्रमधर्मो यासु जातिषु विद्यते तासु विश्व-मङ्गलकरो देवप्रसादः स्वतः सिद्धः ॥ ६८ ॥

अपरञ्च—

स्वाभाविकः संस्कारोदयः ॥ ६६ ॥

स्वाभाविकः संस्कारो मुक्तिकारणम् अस्वाभाविकश्च च बन्धकारणम् इति । वर्णाश्रमधर्मानुकूला वैदिकसंस्कारसंघाः सर्वेऽपि स्वाभाविकसंस्कार-समेधका इत्यस्य दर्शनस्य संस्कारपादे निदर्शितम् । परमकारुणिकै र्महर्षिभि-रुत्तरोत्तरम् अस्वाभाविकसंस्कारापहारकाः स्वाभाविकसंस्कारसमेधका एव वर्णाश्रमाऽचारा निर्धारिता इत्यतो वर्णाश्रमधर्मतो मानवानां स्वाभाविका मुक्तिप्रदाः संस्कारा नियमतो नित्यमभिवर्द्धन्ते । तथा शूद्रतो वैश्येषु तमो-रजसोः, वैश्यतश्च क्षत्रियेषु रजःसत्त्वयो स्ततश्च क्रमशो ब्राह्मणे सत्त्वस्य प्रधान-तया संस्कार उत्पद्यते । संन्यासे च ते सर्वेऽपि संस्काराः स्वाभाविक-संस्काररूपेण परिणमन्ते । इत्येवं जीवा वर्णाश्रमधर्मेण प्रोन्नमन्तोऽन्ते जीव-न्मुक्तपदमधिरोहन्ति । वर्णाश्रमधर्मस्येदं माहात्म्यं यत्तेनोत्तरोत्तरमधिका स्वाभाविकाः संस्काराः परिस्फुटा भवन्ति ॥ ६६ ॥

पुनरप्याह—

वीजरक्षणमात्मबोधस्य ॥ १०० ॥

घोरेऽस्मिन् परिवर्तमाने मृत्युलोके शक्तिशालिन्याञ्च कर्मभूमौ मानवः सत्कर्मतो देवत्वमसत्कर्मतश्च पशुत्वमपि विन्दतीति सुनिश्चितम् । अतश्च मानवजातिरार्य्यभावादप्यनार्य्यतामधिगच्छन्ती पशुतामासादयितुमप्यर्हतीति भीतिः सम्भाव्यत एव । यतो हि मानवानां स्वपिण्डाधिष्ठातृत्वेन दुष्टेन्द्रिया-श्व-वशवर्त्तितयाधोगमनस्य स्वाभाविकं रहस्यमभिहितं प्राक् ।

परन्तु यस्यां मानवजातौ प्रवृत्तितो निवृत्तेरधिकः समादरः । तत्प्रधा-नतया ब्राह्मणो भूदेवत्वेन गण्यते, तदीयामाज्ञामादायैव राजानो राज्यसिंहा-सनमारोहन्ति तदनुशासनानुसरणञ्च स्वीयं धर्मं मन्यन्ते । तस्यां मानवजातौ सुतरामात्मज्ञानस्य वीजरक्षणं स्वभावसिद्धम् । यस्यां मनुष्यजातौ

महाराजाधिराजोऽपि चक्रवर्ती सम्राड् नारायणांशत्वेन परिगीयते, किन्तु तत्रैव भिक्षुः सन्यासी कौपीनभृदपि केवलमात्मज्ञानप्रधानतया साक्षान्मूर्तिमान् नारायण एव निगद्यते। तत्रात्मज्ञानस्य बीजरक्षणन्तु साहजिको धर्मः।

यस्यां मनुष्यजातौ शारीरिकवाचनिकमानसिकादिषु सर्वेष्वपि कर्मसु प्रतिपदमाध्यात्मिकमेव लक्ष्यं सर्वाभ्यर्हितत्वेनानुस्यूतं दरिदृश्यते, तथा वर्णाश्रमनारीधर्मादिषु सर्वत्रैव सदाचारेष्वपि स्वात्मज्ञानोन्नतेरेवादर्शः स्फुटं परिलभ्यते तत्रानायासत एवात्मज्ञानस्य बीजरक्षणं सुसिद्धम्। अतः सुदृढव्यवस्थाविभूषितेन वर्णाश्रमधर्मेणात्मज्ञानबीजरक्षणमिह पृथिव्यामाकल्पं शाश्वतं सुदृढमेव ॥१००॥

पुनश्च वर्णाश्रममहिमानं द्रढयति—

निःश्रेयसाधिगमः ॥१०१॥

कर्मणः पूर्णाधिकारेण रजोवीर्य्यशुद्धया च याधिभूतशुद्धिः, उपासनायाः पूर्णाधिकारेण ईश्वरविषयकपूर्णज्ञानेन च याधिदैवशुद्धिः, पूर्वोक्तकारणकलापतश्च याध्यात्मशुद्धिः प्रजायते। तासु सर्वास्वपि सुसम्पन्नासु स्वत एव तत्त्वज्ञानोदयो न तत्र कारणान्तरापेक्षा। वर्णाश्रमधर्मे मुक्तिरेव चरमप्रयोजनमिति सर्वतन्त्रसिद्धान्तः। तत्र हि वर्णगुरो ब्राह्मणस्य सर्वाण्येव कर्माणि मुक्तिप्रयोजनकान्येव। आश्रमगुरोश्च संन्यासिनः साक्षान्मुक्तिस्वरूपवत्त्वमेव वर्णितम् इत्येवं मुक्त्यैकलक्ष्यपरे वर्णाश्रमधर्मे कैवल्याधिगमस्तु सुतरां स्वतः सिद्धः ॥१०१॥

वर्णाश्रमधर्मोपकारमाहात्म्यं विस्तरशो विविच्येदानीमधोगमननिरोधिका स्तच्छक्तीर्विविनक्ति—

ब्राह्मौजस्तपसा ॥१०२॥

वर्णाश्रमधर्मः कीदृगनन्तोपकारकारी मानवसमूहस्येति दिग्मात्रं निर्दिश्य सूत्रकृन्महर्षि र्वर्णाश्रममर्य्यादावतामन्तर्निगूढाः शक्तीरभिधत्ते। तथा हि या शक्तिर्वर्णाश्रमाऽऽचारवतोऽधोगमनात् निवारयति सदोन्नतिपथं निनीषति सैव तेजः शब्देनोच्यते। स्मृतिष्वपि —

> "या मे शक्तिः सदा जीवान् समाकर्षति माम्प्रति।
> तदेव तेजः सम्प्रोक्तं यतो वेदान्तपारगैः॥"

का सा शक्तिः, यस्यास्तेज इत्यभिधानम् इत्युपरितनेन सूत्रेण निर्दिष्टम्। तस्य तेजसो भेदद्वयम्। एकं ब्राह्मं तेजो यद् ब्राह्मणेषु तिष्ठति। द्वितीयं

क्षात्रं तेजो यत् क्षत्रियेषु भवति । ब्राह्मणक्षत्रियावेव धर्मरक्षकावित्यनयोरेव तेजसः सत्ता । नान्यवर्णेषु तस्य स्वाभाविकी सत्तास्तीति—

स्मृतावप्युदीरितम्—

"ब्राह्मणा धर्मवक्तारः क्षत्रिया धर्मपालकाः" ।

तत्र कथं ब्राह्मं तेजो ब्राह्मणेषु सम्भृतम्भवतीत्यनेन सूत्रेणोच्यते, तपसा ब्राह्मम् ओजस्तेजः सुरक्षितं भवति । तच्च मुक्तिपदम् । क्षात्रं तेजोऽभ्युदयप्रदम् । तयोर्ब्राह्मं तेजोऽतिगरीय इति तपसैवाधिकशक्तिशालिना सुरक्ष्यते । तस्य च रूपमुक्तं प्राक् इह ब्राह्मणास्तपोबलेन यावत्तेजो-बलं संग्रहीष्यन्ति तावदेव वर्णाश्रमधर्मस्य तद्धर्मिणाञ्च सङ्कोपनम् अवनतेर्निरोधञ्च करिष्यन्ति ॥ १०२ ॥

द्वितीयमाह—

क्षात्रं दानेन ॥ १०३ ॥

ब्राह्मं तेजो यथा तपसा चीयते, तद्वदेव क्षात्रं तेजोऽपि दानेन वर्द्धते । ब्राह्मस्य तेजसो रक्षणे यावानायासो न तावान् प्रयासो द्वितीयस्य क्षात्रतेजसो गुप्त्यै । ब्राह्मणो हि सर्वमपि लौकिकमैश्वर्य्यमिन्द्रियसुखञ्च परित्यज्य तपसि प्रवर्तेत, तद्वदेव क्षत्रियेणापि भोगैश्वर्य्यादिलिप्सुनापि सता दानपरायणेनैव भवितव्यम् । अनुदारे कृपणे दानधर्मविरहिते राजनि न क्षात्र-तेजःस्थितिः सम्भाविनी ।

तपोविज्ञानालोचनं यथा तपःशक्त्या ब्रह्मतेजोऽभिवृद्धिर्विज्ञायते तथैवौदार्य्येण निर्लोभेन सात्त्विकदानसम्प्रसक्तया च क्षत्रियाः प्रोन्नताः समृद्धियुजो निजेन संरक्षितेन क्षात्रेण तेजसा वर्णाश्रमधर्मिणोऽपि संरक्षन्तीति ॥ १०३ ॥

उभयोर्निर्गमप्रकारमाह—

उभयोर्निर्गमो योगाहवाभ्याम् ॥१०४॥

योगश्च आहवश्च योगाहवौ ताभ्याम् उभयो ब्राह्मणक्षत्रिययोः क्रमशो निर्गमोऽभ्युदयो भवति ।

पूर्वसूत्रेण ब्राह्मणक्षत्रिययोः क्रमशस्तपस्यादानधर्माभ्याम्मुख्याभ्यां तत्तेजसोः संरक्षणेन सह वर्णाश्रमिणां कल्याणोन्नतिरपि सम्भवतीत्युक्त्वा इदानीं तयोश्चरमोन्नतिप्रकारमनेन सूत्रेण प्रतिपादयति—

तथा हि—ब्राह्मं तेजः प्रयाणकाले ब्राह्मणं योगशक्तिसम्पन्नमूर्ध्वलोकन्नि-

नीषति । क्षात्रं तेजः क्षत्रियं युद्धमृत्युनोर्ध्वलोकं समुन्नयति । ब्राह्मणस्य कृते योगबलेन क्षत्रियस्य कृते धर्मयुद्धेन शरीरत्यागादन्यो न कोऽपि शुभावहो मार्गः ।

उक्तञ्च—

"द्वाविमौ पुरुषौ लोके सूर्य्यमण्डलभेदिनौ
परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः ।
"अयन्तु परमो धर्मो यद्योगेनात्मदर्शनम् ।"
"धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते," इति ।

योगेनात्मानुसन्धानं युद्धेन च धर्मानुसन्धानमुभयोः संबद्धमिति शुभावहो विधिः ब्राह्मणस्य शान्तित्वात्तपस्वित्वाद्योगित्वाच्च योगस्यावसरस्तूपलभ्यत एव । क्षत्रियस्य तु धर्मयुद्धावसरानुपलम्भात् शरीरत्यागासम्भवात् किं विधेयमिति प्रश्ने तस्य सत्येवं व्यतिकरे योगबलेन शरीरत्यागे यत्नविधानमेव प्रशस्यम्, यतो हि योगानुष्ठानम् न कस्यापि वर्णाश्रमस्य स्वाधिकारविरुद्धम् ॥ १०४ ॥

उभयोः साक्षात् फलं ब्रूते ।

ते निःश्रेयसाभ्युदयप्रदे ॥ १०५ ॥

ते ब्रह्मक्षात्रतेजसी क्रमशो निःश्रेयसस्याभ्युदयस्य तौ तथोक्तौ तयोः प्रदे समर्पके स्तः । यथा सभामण्डपं यज्ञमण्डपं वा स्तम्भबलेन स्तम्भाश्रयमेव तिष्ठति । तथैव वर्णाश्रमधर्म्मौ ब्राह्मणक्षत्रियबलेन तदाधारावेव प्रतिष्ठेते आश्रमधर्मस्य वर्णधर्ममूलकत्वात् । विना वर्णधर्मं नाश्रमधर्मव्यवस्थितिः । तथा ब्रह्मक्षत्रयोरुभयोः सम्पृक्तबलविरहान्न वर्णाश्रमधर्मयोरपि कस्यचन साधीयसी स्थितिः । सर्वमप्याभ्युदयिकं कृत्यं क्षत्रियैः सम्पाद्यते, नैःश्रेयसिकश्च मार्गो ब्राह्मणैः संरक्ष्यत इत्युभाभ्यामपि परस्परं साहाय्यमाचरद्भ्यां जगद्रक्षणं गमनागमनचक्रसंरक्षणञ्च क्रियते । अन्यथाऽपीदं विज्ञानं विवरीतुं शक्यते । तथा हि, सर्वधर्मरक्षणं धार्मिकनृपानुशासनतः प्रचरति । मोक्षप्रदज्ञानमार्गरक्षणञ्च ब्राह्मणाध्यवसायेन संसाध्यते । इति ब्रह्मतेजसो निःश्रेयसप्रदत्वं क्षात्रस्य च तस्याभ्युदयप्रदत्वमवश्यमङ्गीकरणीयम् । स्मृतिष्वपि बहुशो ब्राह्मणक्षत्रियसंम्बन्धचर्चा श्रूयते तथाहि—

ब्राह्मण्यमुत्तमा दृष्टिः क्षात्रमप्रतिमं बलम् ।
ते यदा चरतः सार्धं तदा लोकः प्रसीदति ॥
नाब्रह्म क्षत्रमृध्नोति नाक्षत्रं ब्रह्म वर्द्धते ।
ब्रह्म क्षत्रं च सम्पृक्तमिह चामुत्र वर्द्धते ॥

ब्रह्म क्षत्रेण संसृष्टं क्षत्रञ्च ब्रह्मणा सह ।
उदीर्णौ दहतः शत्रून् वनानीवाग्निमारुतौ ॥ १०५ ॥

प्रसङ्गसंप्राप्तं चातुर्वर्ण्यस्य चतुर्वर्गसम्बन्धमभिधत्ते ।

चातुर्वर्ण्ये चतुर्वर्गः ॥ १०६ ॥

इह खलु प्रयोजनमुद्दिश्यैव जनानां प्रवृत्तिर्दृश्यते । तत्र चतुर्धा हि प्रयोजन-विभागो चतुर्वर्गशब्देन निर्दिश्यते । ते च यथा कामार्थधर्ममोक्षा इति क्रमशोऽभिधीयन्ते । तथैव क्रमशश्चतुर्णां शूद्रवैश्यक्षत्रियब्राह्मणानां धर्मतस्तैः सह सम्बन्धोऽपि प्रतीयते । प्रतिवर्णं धर्मपर्य्यालोचनयैवास्य विज्ञानस्य सार्थक्यभानमुदेति । स्मृतावपि निर्दिष्टम्—

स्वभावतो नियोज्येरन् प्राणिनां सम्प्रवृत्तयः ।
चतुर्धा नात्र सन्देहो विद्यन्ते विश्वभूतिदाः ॥ १०६ ॥

तत्र शूद्रधर्मं निर्वक्ति ।

कामप्रधानः शूद्रः ॥ १०७ ॥

चतुर्षु प्रयोजनेषु किमपि प्रयोजनमुद्दिश्यैव प्राणिनां प्रवृत्तयो नियुज्यन्ते। तत्र शूद्रप्रवृत्तयः कामरूपं प्रयोजनमुद्दिश्य परिणमन्ते कामस्याऽऽद्यप्रयोजनत्वात्। स्मृतावप्युक्तम् —

प्रकृतेः शूद्रवर्णस्य दासी कामस्य सत्यलम् ।
तमोधाराश्रिता शश्वज्जायते परिणामिनी ॥

अत एव गीतोपनिषद्यपि शूद्रस्य स्वभावजं कर्म तमःपरिणामरूपमेवोक्तम्—

"परिचर्य्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥ १०७ ॥

वैश्यधर्ममिदानीम्ब्रूते—

अर्थप्रधानो वैश्यः ॥ १०८ ॥

पूर्वोक्तविज्ञानानुरूपतो वैश्यवर्णस्य प्रकृतिरर्थप्रयोजनाभिमुखी परिणमते उक्तञ्च गीतोपनिषदि—

"कृषिगोरक्ष्यवाणिज्यं वैश्यकर्मस्वभावजम्" ।

स्मृतावप्यस्यैव विज्ञानस्य परिपोषो दृश्यते—

प्रकृतिर्वैश्यवर्णस्य सत्यर्थानुचरी सदा ।
अस्मिन् प्रधानतो लोके जायते परिणामिनी ॥ १०८ ॥

अधुना क्षत्रियस्य धर्ममाह—

धर्मप्रधानः क्षत्रियः ॥ १०९ ॥

शूद्रवैश्यप्रकृतिर्हि क्रमशः कामार्थप्रयोजनमभिलक्ष्य परिणमतः । कामार्थयोरिन्द्रिय-सेवामूलकत्वात् तदनुसारिण्योः प्रकृत्योर्न कथमपि तेजोऽपराभिधस्यौजसोऽभिसम्बन्धः । अत एवौजसोऽभिक्रमः क्षत्रियब्राह्मणधर्मयोरेवास्तीति पूर्वमेवोदीरितम् । अनेनापि सूत्रेण तदेव विज्ञानं पुनर्द्रढयति—यद् धर्मात्मज्ञाने एव जीवान् भगवत्तेजःशक्त्याऽध्यात्म-सन्निकर्षं प्रापयतः । तत्राद्यं धर्ममाश्रित्य क्षात्रतेजःसमाश्रिता क्षत्रियप्रकृतिरध्यात्मभावमभिलक्ष्य परिणमते । स्मृतिष्वेवमुपलभ्यते—

क्षत्रियप्रकृतिर्धर्मलक्ष्येणैव प्रधानतः
परिणामं किलाप्नोति पितरो नात्र संशयः ॥

गीतोपनिषद्युक्तक्षत्रियस्वाभाविकधर्मतोऽप्यस्यैव विज्ञानस्य द्रढ़िमावमृश्यते । तथा हि—

शौर्य्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥ १०९ ॥

सम्प्रति ब्राह्मणस्य तमभिधत्ते—

मोक्षप्रधानो ब्राह्मणः ॥ ११० ॥

आत्मज्ञानाश्रितं ब्रह्मतेजो मोक्षलक्ष्याश्रयणतोऽधिगम्यतेऽत्र नाणुरपि सन्देहावसरः । इत्यस्मादेव हेतो र्ब्राह्मी प्रकृति र्मुक्तिमभिलक्ष्य प्रवहन्ती स्वरूपपारावारे समुपेता विश्राम्यति । स्मृतावप्युक्तम्—

ब्राह्मणप्रकृतिर्मुख्यं मोक्षलक्ष्यं निरन्तरम् ।
समाश्रित्य प्रयत्नेन नूनमग्रे सरेदिह ॥

भगवतापि ब्राह्मणस्य सहजकर्मनिर्णयवेलायां श्रीगीतोपनिषद्युद्घोषितम् ।

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥

अत एव जगति केवलमात्मज्ञान-विस्तारहेतुं पुरुषार्थमवलम्बमानाः तपोव्रतञ्च स्वीयं मुख्यं सांसारिकं कर्तव्यं मन्यमानाः परोपकारपरायणा ब्राह्मणास्त्रिलोकपूज्या महीतले विचरन्ति । उक्तञ्च—

ब्राह्मणस्य तु कायोऽयं क्षुद्रकामाय नेष्यते
कृच्छ्राय तपसेऽत्यर्थं प्रेत्यानन्तसुखाय च ॥ ११० ॥

आर्य्यजातेर्वर्णधर्मं व्याख्याय नारीधर्मविज्ञानं विस्तरशो ब्रूते

नारीधर्मः पारतन्त्र्यप्रधानः ॥ १११ ॥

वर्णाश्रमधर्मे पुरुषधर्माश्रयेण वर्णधर्मस्य प्राधान्यात्तद्विज्ञानं पार्थक्येन विस्तरशो विविच्येदानीं नारीधर्मविज्ञानं विवेक्तुकामः सूत्रयति—नार्य्या धर्मः पारतन्त्र्यं पराधीनत्वं प्रधानं यत्र स परायत्त इत्यर्थः ।

वर्णधर्मशुद्धयैवाश्रमधर्मसंस्थितिः, नारीधर्मशुद्ध्या च वर्णधर्मशुद्धिरिति नारीधर्मशुद्धिरेव प्रधानं निदानं वर्णाश्रमधर्मे ।

सत्सु पुरुषेषु पावित्र्यपरेष्वपि क्षणमात्रमपि यदि काऽपि आर्य्यमहिला स्वपावित्र्यं विहाय परपुरुषाश्रयिणी भवेत् तदा वर्णाश्रमधर्मस्तु भ्रष्टः स्यादेव । तेनैव सह तस्या एतत् कुलं सा जातिरपि नष्टभ्रष्टे भूत्वा नित्यपितॄणामनुकम्पातोऽपि विरहिते स्याताम् । यतो हि नित्यपितरः साङ्करीः प्रजा नानुगृह्णन्ति । नारीजातेः पावित्र्याश्रय एव केवलं वर्णाश्रमधर्मोऽवलम्बते स्वस्वरूपमिति तस्याःपावित्र्यरक्षणार्थमेव पारतन्त्र्यपरत्वं तद्धर्मस्य महर्षिभिः प्रतिष्ठापितम् ।

कौमारावस्थायां तासां मातापितृवश्यत्वन्तु क्रमेव । स्वपरिणयार्थमपि ताः पितृमात्रधीना एव तिष्ठन्ति । यतो हि बालिकानां परिणयो दानधर्मत्वेनार्य्यशास्त्रेषु गीयते । दानपात्रान्वेषणं तस्मै देयत्वेन तस्याः समर्पणमपि पितुः प्रधानं कर्मेति स्वपरिणये नारीणां पितृपारवश्येन पारतन्त्र्यं शास्त्रसिद्धम् ।

यौवने च पत्युर्वशे संस्थितिस्तासां निगदितैव । सतीनां नारीणां कर्मणा वचसा मनसा स्वभर्तृपारतन्त्र्यमभिहितमेव । यदि च दुर्भाग्यतो वैधव्यदुःखेनाभिभूताः स्युस्तदाऽपि समाजाधीनत्वसम्बन्धेन स्वकुटुम्बपारतन्त्र्यं सिद्ध्यत्येवेत्यतो नारीधर्मस्य पारतन्त्र्यमूलकत्वं सर्वथापि न विनश्यतीति स्मृतिष्वप्युपलभ्यते ।

बालया वा युवत्या वा वृद्धया वापि योषिता ।
न स्वातन्त्र्येण कर्तव्यं किञ्चित्कार्य्यं गृहेष्वपि ॥
बाल्ये पितुर्वशे तिष्ठेत् पाणिग्राहस्य यौवने ।
पुत्राणां भर्तरि प्रेते न भजेत् स्त्री स्वतन्त्रताम् ॥ १११ ॥

तन्निदानमाह—

प्रकृतिजन्यत्वात् ॥ ११२ ॥

सर्गविज्ञानपरिशीलनत इदमेव सिद्ध्यति यदादिपुरुषात् परमात्मनस्तच्छक्तिरूपायाश्च मूलप्रकृतेः सम्बन्धतः प्रवहन्तीयं सृष्टिप्रवाहधारा । स्वनिदानभूतयोस्तयोरेव प्रकृतिपुरुषयोरनुरूपं स्त्रीधारा पुरुषधारा चेति धाराद्वैविध्य-

माश्रयति । उक्तमेतत्प्रागेव । "कार्य्यगुणान् कारणगुणा आरभन्ते" इत्येष नैयायिकानां प्रवाद एतद्विज्ञानमूलक एव । सांख्यदर्शने च कथं प्रकृतेः पराधीनत्वं कथञ्च पुरुषादृते तस्याः सत्ताया एवाभावः । कथं हि पुरुषार्थं एव तस्याः सर्वोऽपि व्यापार इति साधु निर्णीतम् ।

नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः ।
गुणवत्यगुणस्य सतस्तस्कार्थमपार्थकञ्चरति" इत्यादिभिः ।

अतो ये स्वभावाः मूलप्रकृतौ विद्यन्ते त एव पूर्णविकासवत्यां नार्य्यामपि स्युरिति विज्ञानसिद्धम् । यद्यप्युद्भिज्जादिस्त्रीधारायां प्रकृतेस्ते भावा न पूर्णतयोपलभ्यन्ते तथापि पूर्णावयवसम्पन्नायां मनुष्यत्वयोनौ पूर्णावयवाया नारीजातेः स्वभावः पुरुषपारतन्त्र्यरूपः पूर्णतया विकशितः स्यादिति स्वभावसिद्धम् ॥ ११२ ॥

विवाहसम्बन्धेनापीदं विज्ञानं द्रढयति—

तस्माद्दान-प्रधानो विवाहः ॥११३॥

यद्यपि विवाहस्य बहवो भेदा मानवजातौ शास्त्रादिषु चोपलभ्यन्ते तथापि कन्यादानप्रधान एव विवाहो धर्म्यो बहुसम्मतश्च । नारीजातेः पारतन्त्र्यप्रधानत्वात्स्वयम्वरणादिप्रथा न साधीयसी, नापि सा प्रथा तत्स्वभावानुकूला किन्तु कुमार्य्याः कन्यादानपद्धत्यनुरूपः कन्यादानप्रधान एव परिणय उत्तमः । यतो हि तस्यामवस्थायां कन्या पितुर्वशवर्तिनी पराधीनसर्वकृत्याऽत स्तदनुरूपमुत्तमं योग्यं वरमन्विष्य तेन तस्याः कन्यादानविधिना पाणिग्रहणं सर्वोत्तमः संस्कार इति सर्वत्रैव श्रुतिस्मृतिषूपलभ्यते—

आच्छाद्य चार्चयित्वा च, श्रुतिशीलवते स्वयम् ।
आहूय दानं कन्याया ब्राह्मो धर्म्मः प्रकीर्तितः ॥
दश पूर्वान् परान् वंश्यानात्मानं चैकविंशकम् ।
ब्राह्मी-पुत्रः सुकृतकृन्मोचयेदेनसः पितॄन् ॥ ११३ ॥

प्रसङ्गसङ्गतं सर्वानर्थमूलं विधवोद्वाहं निन्दति—

विधवोद्वाहो व्योम कुसुमवदतः ॥ ११४ ॥

अतो विवाहस्य दानमूलकत्वादत्र च दातुरभावाद् विधवाया उद्वाहो व्योम्नआकाशस्य कुसुमवत् पुष्पवद् असम्भव इति यावत् । प्रथमत आर्य्यजातौ विवाहपद्धतेः कन्यादानमूलकत्वात् मातापित्रोर्दत्तायाः कन्यायाः पुनर्दानेऽधिकार एव नास्ति । अन्योऽपि दाता न सम्भवति अधिकाराभावादेव । मृतस्य

पत्युरेव तत्राधिकारात् तस्य चाभावाद् अन्यस्य च तत्रानधिकाराद् विधवाया-उद्वाह आकाशकुसुमवदसम्भव एवेति पूर्वमुक्तस्य दानलक्षणस्य मर्माभिजानतां विदुषान्न तिरोहितम् ।

अपरतश्च नारीजातेः प्रकृतिधर्मशालिनीत्वात्, पराधीनधर्मायास्तस्याः पत्यन्तरग्रहणेन तत्स्वभावसिद्धम्, प्रत्युत सर्वथा विपरीतमेव ।

अन्यतश्च नार्य्याः सतीत्वमेव प्रधानं धर्मस्ततश्च पत्यन्तरग्रहणस्य मानसिक्यपि कल्पना तस्या आदर्शस्वरूपस्य सतीत्वस्य विनाशक इत्यतो विधवायाः पत्यन्तरग्रहणकल्पनाऽपि खपुष्पायमाणैव भाति । यथा संन्यासिविवाहः पापमूलम्, तज्जन्या सन्ततिरपि-

चाण्डाल-प्रत्यवसित-परिव्राजक-तापसाः ।

तेषां जातान्यपत्यानि चाण्डालैः सह वासयेदिति ॥ स्मृतेः—

चाण्डालश्रेणिगा भवति । तथैव द्विजातिषु विधवोद्वाहोऽधर्ममूलम् । सर्वस्वनाशनिदानं सर्वानर्थहेतुरपि गीयते । वर्णाश्रमधर्मे च यथा यादृक् संन्यासाश्रमगः पुमान् पूज्यः पुरुषसम्मानभाक् तथैव निवृत्तिधर्मिणी विधवाऽपि सम्मानार्हं पूज्यं पदं नारीषु विन्दति ।

इत्येवं निवृत्तिमार्गमारूढायाः सर्वपूज्यत्वमधिगताया विधवायाः पुनरुद्वाहादिना प्रवृत्तिमार्गपातनस्यासम्भवात्तद्भ्रंशनस्य महापापनिदानत्वाच्च विधवोद्वाह आकाशकुसुमवदसम्भव एवेति संक्षेपः ॥ ११४ ॥

प्रसङ्गतः कन्योद्वाहकालं निर्णयति—

कन्यावस्थायां प्राशस्त्यमुद्वाहस्य ॥ ११५ ॥

नार्य्या धर्मस्य पारतन्त्र्यमूलकत्वाद्विवाहसंस्कारो हि नारीजातेर्मुख्यः संस्कार इत्यतः सूत्रकृत्तत्कालनिर्णयं वक्ति । रजःप्रवृत्तितः पूर्वं नारी कन्याशब्दभाग् भवति । तस्यामेवावस्थायां तस्याः परिणयसंस्कारो धर्म्यः शास्त्रसम्मतश्च तथा हि—

त्रिंशद्वर्षो वहेत् कन्यां हृद्यां द्वादशवार्षिकीम् ।
त्र्यष्टवर्षोऽष्टवर्षां वा धर्मे सीदति सत्वरः ॥
ऊर्ध्वं दशाब्दाद्या कन्या प्रागरजोदर्शनात्तु सा ।
गान्धारी स्यात्समुद्वाह्या चिरञ्जीवितुमिच्छता ॥
अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।
दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥

तस्माद्विवाहयेत्कन्यां यावन्नर्तुमती भवेत्।
विवाहोऽष्टमवर्षायाः कन्यायास्तु प्रशस्यते ॥

इत्यादिभिः स्मृतिवाक्यैर्नार्य्या विवाहकालोऽष्टमवर्षत आरभ्य द्वादशवर्षं यावत् सिध्यति। तत ऊर्ध्वं रजस्वलात्वदोषदूषितत्वात्तदभ्यन्तरे कन्यायाः परिणयसंस्कारमनाचरतोऽधिकर्तुः पापसम्पर्कः। उपर्य्युक्तानां वचसां पर्य्यालोचनया कन्याविवाहकालस्याष्टमवर्षतो द्वादशवर्षावधित्वविधानेन ततः पूर्वं परतश्च तस्य दोषावहत्वं सिध्यति। ततः पूर्वन्तु अतिबालिकात्वेन संस्कारसिद्धावेव बाधोऽपरतश्च—

"सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः
तृतीयोऽग्निस्ते पतिस्तुरीयस्ते मनुष्यजः"
सोमो ददद्गन्धर्वाय गन्धर्वो ददद्ग्नये ॥
रयींश्च पुत्रांश्चादादग्निर्मह्यमथो इमाम्।

इत्यादिप्रमाणैः सार्धसप्तमवर्षं यावद् देवानामेव कन्यास्वधिकारस्य विद्यमानत्वात् मनुष्याधिकाराभावात्तन्मध्ये कन्याया दानं ग्रहणञ्चोभयमपि पापाधायकम्, तथा "स्वसत्त्वनिवृत्तिपूर्वकपरसत्त्वोत्पादनरूपस्य दानलक्षणस्य तत्रासङ्गत्या दातुर्ग्रहीतुश्च व्यर्थः प्रयास इत्यत एव—

"षडब्दमध्ये नोद्वाह्या कन्या क्वापि विचक्षणै"रिति

निषेधः "गुरुशुद्धिवशेन कन्यकानां समवर्षेषु षडब्दकोपरिष्टादिति" विधिश्चोपलभ्यते, एवं द्वादशवर्षत ऊर्ध्वम्—

मासि मासि रजः स्त्रीणां रसजं स्रवति त्र्यहम्।
वत्सराद्द्वादशादूर्ध्वं याति पञ्चाशतः क्षयम् ॥
द्वादशाब्दात्समारभ्य प्रतिमासं त्र्यहावधि।
रजः स्रवति नारीणां याति पञ्चाशतः क्षयम् ॥

इति प्रमाणेन रजोदर्शनसम्भवात् पुरुषसम्बन्धेच्छोत्पत्त्या नारीजातेः प्रधानादर्शस्वरूपस्य सतीत्वधर्मस्य विघातशङ्काया अवश्यम्भावात् ततः पूर्वमेव कन्यावस्थायां परिणयसम्पादनेन नारीजातेः पारतन्त्र्यधर्मस्य सुगुप्तिः सतीत्वधर्मविकाशस्याऽपि पूर्णोऽवसर इत्युभयमपि साधु समर्थ्यते।

ननु रजस्वलात्वदोषसम्भवभीत्या द्वादशाब्दतः पूर्वं दशवर्षत ऊर्ध्वं नार्य्याः परिणयविधानन्तु समुचितं, किन्तु न्यूनातिन्यूनतोऽष्टमवर्षस्य प्रारम्भावधित्वविधानं कथं संगच्छत इति प्रश्नं समाधत्ते—यदा कन्यायाः स्त्रीत्वचिन्हं लज्जा-संकोच-वस्त्रसम्वरणावगुण्ठनादिकं परिस्फुटं परिदृश्येत तदैव तदन्तः-

करणस्य पतिदुर्गगुप्त्याऽऽदर्शसतीत्वधर्मोदययोग्यत्वसम्पादनं समुचितमिति । प्रायोऽष्टमवर्षे एवैषां स्त्रीत्वाभिव्यञ्जकानां लक्षणानामुद्गमो दृश्यते । अपरं तेऽश्चाधिदैविकदृष्ट्या सार्धसप्तवर्षावधि देवानामधिकारस्य विद्यमानत्वात्तावत्कालं कन्यायास्तदधीनत्वात् तैः सर्वथा गोप्यमानायाः सतीत्वमर्य्यादायाः तेषामधिकारस्यापगत्या विघातशङ्कया तद्रक्षार्थं कस्यचनाधिकारिणो हस्ते तस्याः समर्पणं समुचिततममेव । अन्यतश्चाध्यात्मिकदृष्ट्याऽष्टमवर्षे एव कुमार्य्याः पूर्णता सम्पद्यते इत्यत एव तदवस्थायाः कुमार्य्याः पूजनं शास्त्रादौ विहितम् ।

न च तदवस्थायाः कुमार्य्याः पतिसङ्गमायोग्यत्वात्तदानीन्तनपरिणयविधायकशास्त्रस्याप्रामाण्यम् । आर्य्याणां विवाहसंस्कारस्य धर्मसंग्राहकत्वान्न कामतृप्तिमूलत्वम्, सङ्गमकालस्य चान्यत्रान्यथापि विधानात् । सङ्गमकालस्तु—

पूर्णषोडशवर्षा स्त्री पूर्णविंशेन सङ्गता ।
शुद्धे गर्भाशये मार्गे रक्ते शुद्धेऽनिले हृदि ॥
वीर्य्यवन्तं सुतं सूते ततोन्यूनाब्दयोः पुनः ।
रोग्यल्पायुरधन्यो वा गर्भो भवति नैव वा ॥
ऊनषोडशवर्षायामप्राप्तः पञ्चविंशतिम् ।
यद्याधत्ते पुमान् गर्भं कुक्षिस्थः स विपद्यते ॥
जातो वा न चिरं जीवेज्जीवेद्वा दुर्बलेन्द्रियः ।
तस्मादत्यन्तबालायां गर्भाधानं न कारयेदिति ॥

इत्याद्यायुर्वेद-स्मृति-देश-काल-पात्राद्यनुचिन्त्यैव निर्णयः ॥ ११५ ॥

प्रसङ्गतो नारी-प्राधान्यं कुत्रेति निर्णयति—

सर्गे नार्य्याः प्राधान्यं कौशेयकीटवत् ॥ ११६ ॥

यथा पुरुषजातीयकौशेयकीटः केवलं कौशेयतन्तुबीजमुत्पाद्य पृथग् भूत्वाऽवस्थान्तरे परिणमते स्त्रीजातीय एव कौशेयकीटः सर्वं कौशेयकृत्यं सम्पादयति तथैव सृष्टिक्रियायां स्त्रीजातेरेव प्राधान्यम् ।

तथा हि गर्भाधानक्षणाव्यवहितोत्तरक्षणेऽप्यकस्मात्पुरुषः पञ्चत्वमापद्येत चेन्न काऽपि हानिः भ्रूणस्य । परन्तु यदि स्त्री गर्भाधानावधितो दशमासाभ्यन्तरमपि विनाशमापद्येत चेन्नैव स्याद्बालोत्पत्तिः सर्वथा सर्जनक्रियैव निरुद्धा स्यात् । अतो जनन्याः स्थितिस्तु दशमासावधिरावश्यकी मानवसर्गे । अतः सर्गक्रियायां नारीजातेः प्राधान्यमवश्यमङ्गीकरणीयम् ॥ ११६ ॥

प्रसङ्ग-सङ्गतिसम्प्राप्तं नारीधर्मविज्ञानं पुष्णाति—

तच्छुद्धिसंरक्षणं क्षेत्रवत् ॥ ११७ ॥

सृष्टौ नारीजातेः प्राधान्यात्तया सह तस्या एव गरीयान् सम्बन्धः । अतः प्राधान्यशुद्ध्यैव सृष्टेः शुद्धिरित्यत एव नारीजातेर्यावन्तो धर्माः कर्तव्यानि च निर्दिष्टानि तत्र सर्वत्रैव नारीजातेः शुद्धेरेवोद्देशः प्रधानतया प्रतिपादितः ।

यथा क्षेत्राणि कर्षणैः निःशर्कराणि प्रस्तररहितानि विधाय यावत् शुद्धानि कृतानि स्युस्तावदेव तत्र बीजोप्तिः साधीयसी स्यात्, शस्यञ्च साधु सम्पन्नं स्यात्, तद्वदेव नारीजाति र्यावत् सदाचारादिना पुरुषदुर्गरक्षया सतीत्वादिधर्मैश्च शुद्धा सुगुप्ता स्यात्, यावच्च तत्र नारीजातेरुपयोगिनः पारतन्त्र्यादिकाः तासां स्वाभाविका भावा वृद्धिं गताः स्युस्तावदेव मानवजातेर्मङ्गलं तत्सृष्टौ च सद्बुद्धि-प्रतिभा-सत्समृद्धिसमुदयः समेधितः स्यादिति विज्ञानाश्रयेणैव महर्षयो नारीधर्मान् प्रणीतवन्तः ॥ ११७ ॥

प्रसङ्गतो नारीधर्मनिदानं निर्वक्ति—

विफलं कामकलोत्तेजनम् ॥ ११८ ॥

शुद्धे क्षेत्रे प्रशस्तशस्यसमृद्धये यथा बीजोप्तेः कौशलमपेक्ष्यते तथैव शुद्धसन्तानाय गर्भाधानसंस्कारसमये शास्त्रविधिना केवलं वीर्य्यदानमेव पुरुषस्य प्रधानं कर्तव्यं नेतरदित्यतः स्त्रियं चञ्चलां कृत्वा कामोन्मत्तात्वकरणमनावश्यकं विफलञ्च ।

विषयानन्दभोगलोभतः पुरुष एव स्त्रियं चञ्चलां करोति । स्त्री तु स्वभावत एव लज्जाधैर्य्यादिगुणावलीभिः पुरुषसन्निधौ धरावद्धीरैव तिष्ठति । पुरुषेण चाञ्चल्यादिविधानन्त्वस्वाभाविकम्, अतः कौमारावस्थायां सौभाग्यावस्थायां वा नारीसमीपे,चाञ्चल्य-कामोन्मत्तात्वचेष्टादि-विधारणं सर्वथापि गर्हितमेव नार्य्याः धैर्य्यसंस्थापनमेव प्रधानं पौरुषं कर्म ॥ ११८ ॥

विज्ञानदार्ढ्याय तत्फलमभिधत्ते—

पापाय तत् ॥ ११९ ॥

स्त्रीषु कामकलोद्दीपनं पापजनकं स्त्रीणां क्षेत्रस्थानीयानां सुकुमारमतीनां चाञ्चल्यादिना कामकलोद्दीपनादिकार्यं तासां स्वभावविरुद्धत्वात् तपोधर्मप्रातिकुल्याच्चाधर्मनिदानम् । यद्धि सत्त्वगुणवद्धर्मकं सदभ्युदयनिःश्रेयसप्रदं तद्धि पुण्यशब्देनोच्यते । यच्च तमोगुणवद्धर्मकं सदधो नयति तत्पापमभिधीयते ।

अतश्च चाञ्चल्यमधैर्य्यं निर्लज्जतामूलकञ्च कामकलोत्तेजनं सर्वमपि नारीणां कृते पापाधायकमेव ॥ ११९ ॥

वैज्ञानिकं कारणं ब्रूते—

नैसर्गिकत्वविरहात् ॥ १२० ॥

नार्य्यां चाञ्चल्योत्पादिकायाः तपोधर्मनाशिकाया धैर्य्यशीलविरोधिकायाः परमानन्दस्वरूपायाः मुक्तेर्विरोधिन्याः कामकलायाः उत्तेजनम् तत्स्वभावविरुद्धत्वात् सुतरामधर्मजनकम् । नारीजातेर्धर्मस्य तपोमूलकत्वात् तस्यां धैर्य्यसंरक्षणस्य यावन्तो व्यापारास्त एव धर्मवर्द्धकास्तद्विरोधिनश्चास्वाभाविका एव । कामप्रेम्णो रात्रिन्दिववत्परस्परविरोधात्, प्रेमविरोधिनां कामोद्दीपकानां व्यापाराणामेव नारीजातिधर्मे निषेधः । यतो हि पापजनिका एतादृश्यो वृत्तयो नारीणां सहजस्वभावविरुद्धा इति यत्नतो महर्षिभिर्निवारिताः ॥ १२० ॥

इदानीं पुण्यजनकहेतुमाह—

पुण्याय तत्प्रसन्नता सर्गशुद्धिहेतुत्वात् ॥ १२१ ॥

पूर्वसूत्रैः पापाधायककार्य्याणि निषिध्याधुना नारीसम्बन्धतः पुण्यजनककार्य्याण्याह अनेन सूत्रेण—क्षेत्राणां शुद्ध्या यथा शस्यसमृद्धिर्जायते तथैव यत्र नार्य्यः प्रसन्नचेतसस्तिष्ठन्ति तस्या जातेः तस्य कुलस्य वा ध्रुवमभ्युदयः संपद्यते । अभ्युदयहेतुश्चावश्यं पुण्याधायकः ।

सृष्टि-शुद्धिश्च नारीशुद्धिमपेक्षते । यतश्च नारीप्रसादस्य वृद्धिस्तद्धि कार्य्यजातं सृष्टिसम्बन्धतः पुण्यजनकमिति सुनिश्चितम् । सृष्टिशुद्धिश्च नारीशुद्धितः साध्यते । यतश्च सृष्टिशुद्धिस्तस्य पुण्यजनकत्वे नाणुरपि सन्देहावसरः । पुण्यञ्च धर्मस्यैव परिणामः । धर्मत एव सर्गरक्षणम्भवतीति प्रागेवोक्तम् ।

अतश्च धर्मसमेधकानां कार्य्याणां सृष्टिपावनत्वविधाने प्राधान्यं सृष्टेः पवित्र्यं हि तस्या अभ्युदयनिदानमित्यपि न विस्मरणीयम् ।

नारीजातेः क्षेत्ररूपत्वात् सृष्टेर्निदानत्वाच्च तस्याः प्रसन्नतया सृष्टेः पावित्र्योत्तमतयोः कः सन्देहः ।

वैषयिकसम्बन्धतोऽपि नार्य्याः प्रसादस्योत्पत्तेः किन्तदेवैतस्य लक्ष्यमितिशङ्काया उत्तरमिदम्—यन्नहि वैषयिक-प्रसन्नतामात्रं वस्तुतः प्रसन्नताशब्दवाच्यं भवितुमर्हति । यतोहि वैषयिक-सुखप्रदा प्रसन्नता क्षणिका परिणामे दुःखदैव । प्रत्युत सा प्रसन्नतैव नोच्यते या दुःखोदर्का स्यात् ।

"धर्माविरुद्धः कामोऽस्मि" इति गीतोक्तेः—धर्म-विरुद्धावर्थकामौ दुःखदौ नरकप्रापकौ चेत्यतः धर्माऽविरुद्धावेव तौ समाश्रित्य धर्ममोक्षाव-भिलक्ष्य वा सुसञ्जाता प्रसन्नतैव तच्छब्दवाच्या नान्या। धर्मसमेधकादि-सद्व्यापारजन्यैव नारीजातीया प्रसन्नता सृष्टेः कल्याणकरी पुण्यार्जयित्री चेति संक्षेपः ॥१२१॥

प्रसङ्गतः सृष्टि-प्रातिभाव्यमाह—

प्रातिभाव्याधिक्यम् ॥१२२॥

सृष्टिकार्य्ये दम्पत्योः समानेऽपि सम्बन्धे नार्य्या एव तत्र प्राधान्यमिति साधु साधितं प्राक्तनेन सन्दर्भसङ्घेन। अधिकारेण सहैव दायित्वापरपर्य्यायं प्रातिभाव्यमपि संसक्तमेवास्ते इत्यपि सर्वतन्त्रसिद्धान्तसिद्धम्। यथा कस्य-चन देशस्य यदि कश्चन शासकः स्यात्तर्हि तस्य देशस्योन्नत्यवनत्यादीनां सर्वेऽपि भारास्तस्यैव शिरसि संस्थिता भवेयुरिति। एवमेव नारीजातेः सृष्टौ प्राधान्यसत्त्वे तद्दायित्वमपि तस्यास्तथैव संसक्तम्।

उदाहरणतो यथा सृष्टिव्यापारे पुरुषस्य क्षणमात्रं प्रयोजनम् नार्य्यास्तु दश मासान् व्याप्य प्रयोजनमिति पूर्वमेवोक्तम्।

पुरुषः स्वव्यभिचारेण तु केवलं एकाकी एव पतति। नारी तु स्वैरिणी चेत् स्वात्मानं स्वकुलं स्वकुटुम्बं निजजातिमपि सर्वथा सर्वतः पातयेत्। नित्यपितॄणां सम्बन्धोऽपि तत्कुलात् तस्या जातेर्विच्छिन्नः स्यात्।

इत्येवं सर्गकार्य्ये पुरुषापेक्षया नारीणामधिकारस्याधिक्यात् तासां तेन सह प्रातिभाव्यमपि समधिकमेव सिध्यति ॥ १२२ ॥

नार्य्या धर्मस्य मौलिकं विज्ञानं साधयति—

तपो रक्ष्यमतः ॥ १२३ ॥

नारीणां तपो-धर्म-रक्षयैव कायवाङ्मानसशुद्ध्युपहित-दायित्वप्रतिपा-लनम्भवितुमर्हतीति नारीधर्मस्य तपोमूलकत्वं प्राकृतिकनियमानुकूलमेव मह-र्षिभिः प्रतिष्ठापितम्। केवलस्य तपोधर्मस्यैव प्रतिपालनेन नारी पूर्वोक्तं सर्वमप्य-धिकारं प्राप्तुमर्हति। नारीजातेः सर्वेऽपि सदाचारास्तपोधर्मभित्तिमाश्रित्यैव वेदशास्त्रादिषु निर्णीताः ॥ १२३ ॥

प्रसङ्गतः सतीभेदानाह—

सती चतुर्विधा ॥ १२४ ॥

सृष्टेः स्वाभाविकभेदचतुष्टयं यथोद्भिज्जस्वेदजाण्डजजरायुजासु योनिषु, ब्राह्मणक्षत्रियवैश्यशूद्रेषु वर्णेषु, ब्रह्मचर्य्यगार्हस्थ्यवानप्रस्थसन्यासात्मकेषु

चाश्रमेषु विद्यते, तथैवेहाऽपि सतीषु नारीष्वपि महर्षिभि र्भेदाश्चत्वार उपदिष्टाः सर्वोत्तमोत्तममध्यमसाधारणभेदात् स्त्रियश्चतुर्विधा भवन्ति इति ॥ १२४ ॥

तत्र सर्वोत्तमसतीलक्षणमभिधत्ते—

पतिमात्र-पुरुषं मन्यमाना ॥ १२५ ॥

सा हि प्रथमा सर्वमान्या सर्वोत्तमाख्या सतीह गण्यते, यस्या बुद्धौ स्वपत्यतिरिक्तं सर्वमेव जगत् स्त्रीमयं भाति । तस्या हि योगिदुर्लभेयं स्वपतितत्परा धारणा प्रबलतरा सदैवोदिता तिष्ठति, यतः पतितन्मयतापन्न मन्तःकरणमन्यथा परिणामानर्हमेव भवतीत्यतो देवदुर्लभेयमवस्था सर्वैरपि वन्दनीया ॥ १२५ ॥

उत्तमसतीलक्षणमाह—

पुरुषान्तरं पित्रादिवज्जानती ॥ १२६ ॥

द्वितीयेयमुत्तमोच्यते या स्वावस्थयाऽभ्यर्हितान् पुंसः पितृवत् स्वसमवयस्कान् भ्रातृवत् स्वतो न्यून.वस्थान् पुत्रवत् जानती अनुद्बुद्धमेव स्वमनोविकारं परिहरन्ती स्वपतिव्रतं संरक्षति । सत्या इयमप्यवस्था प्रशस्यैव । यतो हि धारणायामस्यां प्रकृतिजयः सर्वदैव तिष्ठति ।

प्रथमायां हि सर्वोत्तमावस्थायां सती स्त्री स्वात्मानं वशीकृत्य पत्या सहाद्वैतभावं समश्नुत इति सर्वात्मना तादात्म्यं तत्र । अत्रापि द्वितीयायामुत्तमश्रेण्यां नारी स्वप्रकृतेर्जयं कुर्वती स्वमनोविकारमनुद्गतमेव निगृह्णती पित्रादिस्वरूपेण जगन्निभालयन्ती सतीमहिमानमेव प्रख्यापयते ।

स्त्रियं निरीक्षमाणः पुरुषः स्वात्मानं पुरुषमभिमन्यमानः स्त्रीष्वासज्यते । नारी च पुरुषं निभालयन्ती स्वं नारीमभिमत्य पुमांसमाकर्षतीति प्राकृतिकः सांसारिको भावो द्वितीयश्रेणिस्थयाऽनया सत्या सर्वथा पराजीयत इत्यतः प्रकृतिजयरूपा निःश्रेयसप्रदेयमवस्थाऽपि संस्तुत्यैव ॥ १२६ ॥

मध्यमां तां निर्वक्ति—

मनसा ॥ १२७ ॥

तृतीयेयं मध्यमा सती निगद्यते या दूषितं मनोविकारमुद्बुद्धमपि स्वविवेकतो निगृह्णती सतीधर्मं प्रयत्नेन गोपायति । अस्यां हि श्रेण्यां नार्याः पुरुषान्तरभानमवश्यं तिष्ठति । आकर्षणविकर्षणात्मकः प्राकृतिको भावोऽपि वर्तत एव । किन्तु तस्या आत्मसंयम एतावत् दृढत्वमुपगतो भवति, यत्सा स्वापवित्रान् कामसंकल्पान् प्रतिक्षणमुद्भवमानान् प्रबलेन मनोनिग्रहबलेन विलापयन्ती तेभ्यो मूलितुमवसरमेव न ददातीत्यत इयमप्यवस्थाऽभ्युदयप्रदेति न शङ्कनीयम् ॥ १२७ ॥

अन्तिमां साधारणीं लक्षयति—

वपुषा स्थूलेन ॥ १२८ ॥

चतुर्थीयमन्तिमा सती निरुच्यते या दूषितं स्वमनोविकारं निरोद्धुमसमर्था स्थूलेन शरीरेण तं निगृह्य कायं वाचं वा पवित्रे रक्षति इति । अस्यामप्यवस्थायां सती स्त्री स्वतपोधर्मप्रभावेण सहज-लज्जादिना स्वाधीतशास्त्रबलेन च सतीत्वरक्षार्थं सर्वथा यतमाना सतीस्वसदाचारान् शास्त्रानुमोदितान् प्रतिपालयत्येव ॥ १२८ ॥

प्रसङ्गतो नार्य्याः स्वधर्मत्यागस्य दुरुदर्कं प्रख्यापयति ।

पुरुषभावापन्नाया नार्य्यास्त्रिविधः पातोऽनधिकारिब्रह्मविद्यादानवत् ॥१२९

यथा अनधिकारिभ्योऽपात्रेभ्यो दत्तं ब्रह्मज्ञानं तस्य ग्रहीतुरेव कदाचारित्वादाधिभौतिकीमपवित्रतां नास्तिकयाधाधिदैविकीमपवित्रतां यथार्थज्ञानधारणाक्षमत्वाच्चाध्यात्मिकीमवनतिं चेति त्रिविधामप्यवनतिं कृत्वा तमनधिकारिणं गर्ते निपातयति । तथैव यदि नारी स्वीयं पारतन्त्र्यं सतीत्वं तपःशीलत्वं पावित्र्यं सन्ततिसंरक्षणादिकं शास्त्रविहितं स्वाभाविकं धर्मं विहाय निरङ्कुशत्वं स्वाधीनत्वमपावनत्वं तपोराहित्यमितरच्च दोषजातं गृह्णती निर्लज्जा पुरुषभावापन्ना स्यात्तदा तस्या आधिभौतिकाधिदैविकाध्यात्मिकपतितत्वाऽपवनतयोऽवश्यं भाविन्य इति नारीणां पुरुषायितं विगर्हिततरम् ।

यतो हि पुरुषभावापन्नतया सदाचारविलोपतः शारीरिकापवित्रताया अवश्यम्भावात् नार्य्या आधिभौतिक्यवनतिः स्यात् । पतितन्मयतामूलकस्य सतीत्वसंस्कारस्य च विलोपेन मनोदौर्बल्यस्यावश्यम्भावात् आधिदैविकी हानिर्भवेत् । सृष्टिक्रमं परित्यज्य प्राकृतिक-नियमविरुद्धं नारीधारायामेव पुरुषधारासाङ्कर्य्यकरणेन तत्र पुरुषभावमधिगताया नार्य्या आध्यात्मिक्यवनतिरपि सुनिश्चितैव । इत्येवं स्फुटं पुरुषायिताया नार्य्या अवनतित्रितयं परिदृश्यते ।

यदि कश्चन जिज्ञासुरिह शङ्केत यत् स्वधर्म-विनाश-काले राजविप्लवतश्च धर्मविध्वंसावस्थोपस्थितौ अन्यस्यामपीदृश्यां धर्मबाधोपस्थितायां तथातिशयगुरुतर-दुःखावस्थायां वा सुकुमारमतीनान्नारीणां वीरोचितानां पौरुषाचाराणां पुरुषवृत्तीनां चाश्रयणं किन्न समुचितमित्यस्योत्तरमाह—

असाधारणधर्माधिकारिणी आहोस्विदापद्धर्माधिकारवती वा सती स्वधर्मगुप्त्यै स्वदेशजातिधर्म-समभ्युदयपरिचायकानाचारानाचरन्ती ईदृशीनां सात्त्विकाहङ्कारमूलानां वृत्तीनां परिचयप्रदानेनापि न नारीधर्मव्यत्ययःसमा-

चरति । नापि तदीयमीदृगनुष्ठानं धर्म्मविरुद्धम् । प्रत्युत धर्म्मबाधाव्यतिकरे नारीणां पुरुषायितम् श्रुत्यादिभिरपि समर्थितम्—तथा हि

"आरोहेममश्मानमश्मेव त्वं स्थिरा भव ।
अभितिष्ठ पृतन्यतोऽववाधस्व पृतनायतः" इति ।

परन्तु अधिकारोऽयं तस्या असाधारण—धर्म्ममूलक आपद्धर्म्ममूलको वा गण्येत, न विशेष–धर्मान्तर्गतः स्यान्नारीजाते स्तादृशधर्म्मस्यास्वाभाविकत्वात् इति संक्षेपः ॥ १२९ ॥

दुरुदर्कत्रयं दर्शयित्वा निश्चितोन्नति–सम्पादकमादर्शत्रयं दर्शयति—

तदादर्शो दुर्गा गौरी महामाया च ॥ १३० ॥

तासां नारीणामादर्शः आदर्शस्वरूपा इमास्तिस्रो दुर्गा, गौरी, महामाया चेति क्रमश उत्तरोत्तरमभ्यर्हिता देव्यस्सन्ति इति सूत्रार्थः ।

सृष्टेः प्रसवित्र्याः पालयित्र्याश्च नारीजातेस्त्रयो देवीभावा आदर्शस्थानीयाः स्मृतिषूपपादिताः । श्रीमहामायोवाच—

नारीधर्मार्थमप्येवं मत्स्वरूपत्रयं सुराः ।
ग्राह्यमादर्शरूपेण विश्वकल्याणसम्पदे ॥
अहमेव महामाया प्रोच्ये भेदविवर्जिता ।
गौरी भेदप्रधानाऽहं दुर्गा शक्तिप्रधानतः ॥
एतद्रूपत्रयं नूनं सती नारी बिभर्त्यहो ।
पुण्ये भारतवर्षेऽस्मिन्नार्य्यजातौ प्रजायते ॥ इति ॥

संक्षेपतोऽस्य स्वारस्यमिदं यत्—

प्रेम्णः प्रथमावस्था 'स ममेति' तत्र यदि स मम तर्हि तदीया विभूतयोऽपि ममैवेति दुर्गा देवीत्यस्य भावस्यादर्शः । प्रेम्णो द्वितीयावस्था "अहं तदीयेति" तत्र पतिनिन्दाश्रवणमात्रेणैव स्वशरीरं जहती गौरी तदादर्शः । "अहं स चाभिन्नः" इति प्रेम्णोऽन्तिमः सीमा । तत्राद्वैतभावापन्ना महामाया सर्वोत्तमश्चरम आदर्शः ॥ १३० ॥

वर्णधर्म-नारीधर्मयोः स्वरूपं विस्तरशो निरूप्य सम्प्रति प्रसङ्गसङ्गतमाश्रमधर्मं निर्वक्ति—

प्रवृत्तिनिवृत्तिभेदाद्द्विविधं वर्त्म ॥ १३१ ॥

द्विविधेह सृतिर्जीवानाम्,एका प्रवृत्तिरूपाऽन्या निवृत्तिरूपेति । बहिर्मुखः प्रवृत्तिमार्गोऽन्तर्मुखीनो निवृत्तिमार्गः ।

अथवा प्रवृत्तिमार्गो जीवान् वैषयिकसुखं प्रयच्छन्नग्रे नयति निवृत्तिपथश्च तदपनयन्नग्रेसरान्करोति ।

एवमपि कथ्यते यत्प्रवृत्तिपथः परोक्षरूपेण निवृत्तिसृतिश्च साक्षाद्रूपेणोभावपि जीवानात्मज्ञानसम्मुखीनान् कुर्वाते इति ॥ १३१ ॥

तत्र प्रथममाश्रमं निर्वक्ति—

प्रवृत्त्यर्हत्वं ब्रह्मचर्य्ये ॥ १३२ ॥

ब्रह्मचर्य्ये प्रथममाश्रमे प्रवृत्तेः प्रवृत्तिमार्गस्य अर्हत्वं योग्यता सम्पाद्यत इति शेषः ।

वर्णनारीधर्माभ्यां प्रवृत्तिमार्गस्य साक्षात्सम्बन्धः, निवृत्तिमार्गस्य परोक्ष-सम्बन्धः । एवमाश्रमधर्मौ हि निवृत्तिप्रधानः या हि आद्ययोराश्रमयोः प्रवृत्ति प्राधान्यस्तुतिः, सापि निवृत्तिशिक्षार्थमेव । चतुर्ष्वाश्रमेषु ब्रह्मचर्य्यस्य प्राथम्यात्तत्र शास्त्रोक्त—प्रवृत्तिपथगमनस्यैवाभ्यासः शिक्ष्यते ।

यतो हि श्रुतिस्मृतिषु ब्रह्मचर्य्यस्य ये ये नियमा नीरूपितास्तैः सर्वैरपि शश्वशः प्रवृत्तिपथशिक्षणात्मकमेव विज्ञानं समर्थ्यते । निष्कर्षतो विना ब्रह्मचर्य्याश्रमीयाम्पूर्णां शिक्षां न कोऽपि पुमान् गृहस्थाश्रमस्यादर्शं जीवनं यापयितुं समर्थः स्यादिति ॥ १३२ ॥

तस्य प्रधानं कर्तव्यमाह—

तत्र प्राधान्यं विद्या-ब्रह्मचर्य्य-गुरुसेवानाम् ॥ १३३ ॥

यद्यपि वेदशास्त्रादिषु ब्रह्मचर्य्याश्रमस्य धर्मा विस्तरशो निर्दिष्टाः तथापि पूर्वोक्तविज्ञानपुष्ट्येऽत्र महर्षिणा तस्य मौलिकान् सिद्धान्तान् प्रधानकर्तव्याणि च निर्दिशता विद्या,ब्रह्मचर्य्यं, गुरुसेवेति सर्वप्रधानं कर्तव्यं तस्मिन्निति परामृश्यते ।

तत्र विद्याभ्यासेन सदसद्विचारशक्तिनैपुण्यं, लोकयात्राकर्तव्यनिर्णयज्ञानं, धर्मार्थकाममोक्षाणां यथार्थस्वरूपावगतिः सम्पाद्यते । ब्रह्मचर्य्येण च शारीरिकमानसिकात्मिकबलोपलब्धिः, इन्द्रियसंयमाभ्यासपाटवञ्चासाद्यते । गुरुसेवया च भगवत्प्रसादोपलब्ध्याऽऽत्मोन्नतिमार्गः परिष्क्रियते । इत्येवं ब्रह्मचर्य्याश्रमेऽभ्यस्तप्रवृत्तिमार्गक्रमो मानवो गार्हस्थ्याश्रमे प्रवेश-योग्यतामासादयति ॥१३३॥

तत्र द्वितीयमाश्रममभिधत्ते—

तच्चारितार्थ्यं द्वितीये ॥ १३४ ॥

ब्रह्मचर्य्याश्रमे प्रवृत्तिमार्गोपयोगिनीं शिक्षामधिगत्य गार्हस्थ्ये तच्चारितार्थ्यमाचरद्भिरात्मोन्नतिरासाद्यत इति स्मृतावप्युक्तम्—

प्रवृत्तिं शास्त्रविहितां ब्रह्मचर्य्ये तु शिक्षते ।
समाचरति गार्हस्थ्ये तां प्रवृत्तिं पुमान् भुवि ॥ १३४ ॥

प्रसङ्गतस्तन्माहात्म्यमाख्याति—

ज्यैष्ठ्यं द्वितीयस्य सर्वाश्रयत्वात् ॥ १३५ ॥

गृहस्थाश्रमोऽयं सर्वेषामप्याश्रमाणामाश्रयास्पदमिति सर्वसम्मतम् स्वल्पधियामपि हृदयगम्यम् । यथा क्षेत्रस्वरूपत्वात् वर्णधर्म-शुद्धेर्निदानभूतत्वात् नारीधर्मस्तदाधारस्थलम्, तथैव त्रयाणामप्याश्रमाणां जीवनाधायकत्वात् स्वसत्ताऽभावे तेषान्त्रयाणामप्युच्छित्तिप्रसञ्जकत्वाद्ध गृहस्थाश्रमस्तेषां त्रयाणामप्याश्रयस्थलम् ।

तथा हि ब्रह्मचर्य्याश्रमस्य सर्वमप्याचारादिप्रतिपालननिदानं गृहस्थाश्रम एव । वानप्रस्थसन्यासाश्रमयोर्योगक्षेमनिर्वाहकः स एव । अत एवाऽयमाश्रमः सर्वाभ्यर्हितो ज्येष्ठश्चाभिधीयते ।

स्मृतिष्वप्युदीरितम्—

ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।
एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः ॥
सर्वेषामपि चैतेषां वेदस्मृतिविधानतः ।
गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान् विभर्ति हि ॥
यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम् ।
तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् ॥
यथा वायुं समाश्रित्य वर्तन्ते सर्वजन्तवः ।
तथा गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः ॥
यस्मात् त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम् ।
गृहस्थेनैव धार्य्यन्ते तस्माज्ज्येष्ठाश्रमो गृही ॥
स सन्धार्य्यः प्रयत्नेन स्वर्गमक्षयमिच्छता ।
सुखञ्चेहेच्छता नूनं यो ऽधार्यो दुर्बलेन्द्रियैः ॥ इति ॥ १३५ ॥

अन्यच्च—

तत् सुलभं करवीरवत् ॥ १३६ ॥

यथा करवीरवृक्षः पार्वत्यप्रदेशेऽनूपप्रदेशे मरुस्थले सर्वत्रैव शर्करावहुलेऽपि प्रदेशे समुपलभ्यते तथैव गार्हस्थ्याश्रमोऽपि सर्वजातिषु आर्य्यानार्य्यादिषु सर्वत्रैव समानतया तिष्ठतीति द्वितीयमिदं माहात्म्यमस्य यन्नास्य ब्रह्मचर्य्या-

दिवद्दार्य्य-जातावेव वर्णाश्रमधर्मप्रधानायां स्थितिः, किन्तु सर्वत्रैव सर्वविधास्वपि जातिष्वेतस्य समाना स्थितिरिति । १३६ ॥

सम्प्रति तृतीयमाख्याति—

निवृत्तेरर्हत्वं तृतीये ॥ १३७ ॥

पूर्वयोराश्रमयोः प्रवृत्तिमुखीनामन्तःकरणवृत्तिमभ्यासभोगाभ्यां क्षपयित्वा निवृत्तिद्वारोद्घाटनञ्च विधायास्मिन् शान्तिद्वारात्मके तृतीये वानप्रस्थाश्रमे निवृत्त्यधिकारप्राप्तये पुमान् प्रविशति । तत्र कथं निवृत्तिमार्गनिर्वाहः स्यादित्यादिशिक्षणमभ्यस्यते ।

इह पत्नी सहचरी भूत्वा यदि स्थातुमीहते तर्ह्यपि दम्पत्योः कृतेऽत्र निवृत्तिप्रधानैव शिक्षोपदिश्यते । अस्मिन्नाश्रमे निवृत्तिमार्गोपयोगिनीं सम्पूर्णां शिक्षामभिगत्याग्रिमाश्रमे साधको निवृत्तिमार्गस्योत्तमोऽधिकारी भूत्वा कृतकृत्यतामाश्रित्य नन्दति । यथा गार्हस्थ्यस्याधारभूमिर्ब्रह्मचर्य्याश्रमस्तथैव सन्यासाश्रमस्य तुरीयस्यायमाश्रमो मूलभित्तिः ।

स्मृतिष्वप्येवमेवोक्तम्—

एवं गृहाश्रमे स्थित्वा विधिवत्स्नातको द्विजः ।
वने वसेत्तु नियतो यथावद्विजितेन्द्रियः ।
गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः ।
अपत्यस्यैव चापत्यं तदाऽरण्यं समाश्रयेत् ॥
सन्त्यज्य ग्राम्यमाहारं सर्वञ्चैव परिच्छदम् ।
पुत्रेषु भार्य्यां निक्षिप्य वनं गच्छेत्सहैव वा ॥

अन्यच्च—

उत्पाद्य पुत्राननृणांश्च कृत्वा वृत्तीश्च तेभ्यो विनिवेद्य काश्चित् ।
स्थाने कुमारीः प्रतिपाद्य सर्वा अरण्यसंस्थोऽथ मुनिर्बुभूषेत् ॥ १३७ ॥

साम्प्रतं तुरीयाश्रमं वर्णयति—

ततसिद्धिस्तुरीये ॥ १३८ ॥

निःश्रेयसमूलस्य निवृत्तिमार्गस्य पूर्णोऽधिकारोऽस्मिंस्तुरीये सन्यासाश्रमे श्रद्धालुना साधकेनासाद्यते ।

स्मृतिष्वप्यभिहितम्—

वानप्रस्थे निवृत्तेस्तु शिक्षा पुंसु प्रजायते ।
निवृत्तिः पूर्णतां याति सन्यासाश्रममेत्य वै ॥

यथा ब्रह्मचर्य्याश्रमे सर्वास्वपि नारीषु मातृभावकल्पनया, विद्याप्राप्तौ-

पूर्णविधानादिना स्वजीवनप्रधानलक्ष्यकल्पनया, सर्वफलप्रदाया गुरुसेवायाः साधुसम्पादनेन च गृहस्थाश्रमसञ्चालनयोग्यतामासादयति तथैव वानप्रस्थाश्रमतो निवृत्तिमार्गोपयोगिनीं सम्पूर्णां शक्तिमासाद्येह तुरीयाश्रमे साधकः पूर्णतया निवृत्तिपथगो भवति । ततश्च यथाक्रमं कुटीचर-बहूदक-हंस-परमहंसाधिकारं यथाकालमधिगत्य जीवन्मुक्तपदमाश्रित्य सायुज्यमुक्तिमुपगच्छतीत्ययमेव सर्वसंस्काराणां चरमः संस्कारः, सर्वसाधनानामन्तिमं साधनं सर्वाधिकाराणामन्त्योऽधिकारः ॥ १३८ ॥

पुनराश्रमधर्मं स्पष्टयितुं प्रथमाश्रमस्य मौलिकं सिद्धान्तं ब्रूते—

नियमप्रधानं ब्रह्मचर्य्यम् ॥ १३९ ॥

विस्तरशो नियमलक्षणमभिहितं प्राक् तमेव नियममभिलक्ष्य महर्षिभिर्ब्रह्मचर्य्याश्रमस्य सदाचारा निर्दिष्टाः । जगज्जननीनां नारीणां सकाशात् तासु मातृभावनया गुरुनिमित्तं भिक्षोपार्जनम्, तेन च कामाहङ्कारयोः प्रबलप्रतापयोरप्यर्य्योर्जयकरणं गुरुशुश्रूषया च स्वान्तःशुद्धिसम्पादनमिति नियमस्य जागरूकं साधनम् । नियमधर्माभ्यासतः प्रथमाश्रम एव द्विजेभ्योऽध्यात्मपथारोहणक्षमशक्ति-प्रदानमिति वर्णाश्रमधर्मस्य मुख्यं लक्ष्यम् ।

इत्येवं ब्रह्मचर्य्याश्रमाचारा यथा यथा सूक्ष्मदृष्ट्या पर्य्यालोचिता भवन्ति तथा तथा नियमधर्मभित्तिं समाश्रिता एव त उपलभ्यन्ते ॥ १३९ ॥

द्वितीयस्य मूलभित्तिं विविनक्ति

संयम-प्रधानं गार्हस्थ्यम् ॥१४०॥

नियमधर्मसंस्कारेण संस्कृता एव द्विजा अस्मिन्नाश्रमे प्रविशन्ति । तेन हि नियमधर्माभ्यासेन गृहस्थाश्रमे कामिनीकाञ्चनादिप्रलोभस्तान् एकपद एव विलोभितुन्नैव शक्नोति ।

किन्तु तत्राश्रमे प्रविश्य तस्य च प्रवृत्तिमूलकैश्वर्य्य-पूर्णतया तासु प्रवृत्तिष्वेवासक्तः तत्संस्कारानेवाधिकाधिकान्न समुपार्जयेदिति संयममूलकानां सदाचाराणामप्यभ्यासोऽस्मिन्नाश्रमे आवश्यक इत्यत एवेह संयमस्य प्राधान्यम् । संयमाभ्यासेन हि गृहाश्रमी प्रवृत्तिसंग्रामे विजयी भूत्वाऽध्यात्मिकोन्नतिद्वारमुद्घाटयितुं समर्थो भवति ।

बहिरिन्द्रियान्तरिन्द्रिययोरुद्दामगतिनिरोध एवात्र संयमो न तु योगशास्त्रसंज्ञितः । अतोऽत्र संयमे नियमस्याऽप्यन्तर्भावः । गृहस्थाश्रमीयविस्तृताचाराणां पर्य्यालोचनेन संयमभित्तिस्थितिरेव तेषां सिध्यति ॥ १४० ॥

तृतीयस्य मौलिकं सिद्धान्तम्ब्रूते—

तपःप्रधानं वानप्रस्थम् ॥ १४१ ॥

तपोधर्मस्वरूपं विस्तरशो वर्णितं प्राक् वानप्रस्थाश्रमेऽतिकठिनानां साधनसङ्घानामभ्यासो विधीयते । यतो हि—प्रवृत्तिमार्गं परित्यज्य सद्य एव निवृत्तिमार्गार्थी बद्धपरिकरेण वानप्रस्थाश्रमिणा भूयते । वानप्रस्थाश्रमीयो हि सदाचारः शारीरिकेण मानसिकेन वाचनिकेन त्रिविधेनापि तपसा परिपूर्णः ।

ननु नारीधर्मवानप्रस्थधर्मयोरुभयोरपि तपोमूलकत्वात्तयो र्भेदनिदानं किमित्याशङ्कायामुत्तरयति सत्यपि तयोस्तपोमूलकत्वे परस्परविभेदकहेतुबाहुल्यात्प्रकाशान्धकारवन्महदन्तरम् ।

तथा हि—नारीधर्मः प्रवृत्तिमूलको वानप्रस्थधर्मश्च निवृत्तिमूलकः, नारीधर्मः पारतन्त्र्यप्रधानो वानप्रस्थधर्मश्च स्वातन्त्र्यप्रधानः । पूर्वस्मिन्सृष्टेः प्राधान्यम् परस्मिंश्च लयस्य । पूर्वत्र नार्य्याः त्रिविधमपि शरीरं सर्वा अपि शरीरवाङ्मनसः प्रवृत्तयस्तपसा पत्युरधीनाः, अपरत्र वानप्रस्थाश्रमिणस्तु स्त्रीसहचरत्वेऽपि तस्याः स्त्रियः सर्वथा वाङ्मनसःकायादिभिः परित्यागः । इत्यादिभिर्हेतुभिस्तयोः पार्थक्यं सुस्पष्टमेव ॥१४१॥

इदानीं चरमाश्रमस्य मूलसिद्धान्तं निर्णयति ।

त्यागप्रधानं चतुर्थम् ॥ १४२ ॥

विना सर्वस्वहानान्मुक्तेर्दुर्लभत्वात् मुक्त्यर्थं जीवानां स्वसम्पत्तेरहङ्कारस्याहङ्कारजयोरैहलौकिकपारलौकिकयोरभ्युदययोस्त्याग आवश्यकः । एतदर्थमेव क्रमतः कुटीचकबहूदकहंस—परमहंसाद्यवस्थाभिः सन्यासाश्रमगैर्ब्राह्मणवंशजैस्त्यागशिक्षाऽभ्यस्ते । सर्वेष्वपि संस्कारेषु सन्याससंस्कारस्यान्तिमत्वात् तस्य सर्वेऽपि सदाचारास्त्यागनियममूलका एव निरूपिताः । स्मृतावप्युपदिष्टम्—

संयमस्तु गृहस्थानां नियमो ब्रह्मचारिणाम् ।
वानप्रस्थाश्रमस्थानां तपस्त्यागस्तु न्यासिनाम् ॥ १४२ ॥

सर्वेषामपि चरमफलमभिधत्ते—

एतान्यभ्युदयनिःश्रेयसकराणि ॥१४३ ॥

इमे चत्वारोऽप्याश्रमा अभ्युदयनिःश्रेयसप्रदाः । यद्यपि प्रथमद्वितीयौ प्रवृत्तिप्रधानौ तृतीयतुरीयौ च निवृत्तिपरायणौ तथापि क्रमेणनियम-संयमतपस्त्यागमूलकत्वात् तदनुष्ठातॄणामभ्युदयनिःश्रेयसप्रदाने चत्वारोऽपि समाना एव । यतो हि नियमादयश्चत्वारोऽपि प्रत्येकं सम्यगनुष्ठिता अभ्युदयमात्रमेव

न वितरन्ति, किन्तु निःश्रेयसमपि चितीयैव विश्रामयन्ति इति निर्णीतः पन्थाः । श्रुतिसिद्धेयं सरणिः यद्ब्रह्मचारी उत्कटविरागावस्थायाम् एकपद एव संन्यासाश्रमं ग्रहीतुमर्हति । गृहाश्रमिणो जनकादयस्तु जीवन्मुक्त एवासन् इति सर्वप्रसिद्धम् । महर्षयस्तु सर्वेऽपि प्रायो वानप्रस्थाश्रमत एव ब्रह्मसायुज्यं समाश्रिताः । सन्यासस्तु मुक्तिस्वरूप एवेत्यत्र किं वक्तव्यम् । असम्पूर्णत्वमधिगता अप्येते अभ्युदयप्रदाने तु सर्वथैव समर्था इत्यसन्दिग्धम् । अत्र यथोपलब्धाः श्रुतयः स्मृतयश्च यथा—

यदि वेतरथा ब्रह्मचर्य्यादेव प्रव्रजेद् गृहाद्वा वनाद्वा । (इतिश्रुतिः)

प्रव्रजेद् ब्रह्मचर्य्याद्वा प्रव्रजेद्वा गृहादपि ।
वनाद्वा प्रव्रजेद्धीमानातुरोवाऽथ दुःखितः । (स्मृतिः)

आचार्य्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधदात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिंसन्सर्वभूतान्यन्यत्र तीर्थेभ्यः, स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तते न च पुनरावर्तते” । इति श्रुतिः—

न चैष धर्मो वन एव सिद्धः पुरेऽपि सिद्धिर्नियता यतीनाम् ।
बुद्धिश्च यत्नश्च निमित्तमत्र वनं च लिङ्गं च हि भीरुचिह्नम् ॥
मौलीधरैरंसविषक्तहारैः केयूरविष्टब्धपटैर्नरेन्द्रैः ।
लक्ष्म्यङ्कमध्ये परिवर्तमानैः प्राप्तो गृहस्थैरपि मोक्षधर्मः ॥
ध्रुवानुजौ यौ बलिवज्रबाहू वैभ्राजमाषाढमथान्तिदेवम् ।
विदेहराजं जनकं प्रतीमः पाकद्रुमं सेनजितश्च राज्ञः ॥
एतान् गृहस्थान्नृपतीनवेहि नैःश्रेयसे धर्मविधौ विनीतान् ।
उभेऽपि तस्माद्युगपद्भजस्व चित्ताधिपत्यञ्च नृपश्रियञ्च ॥इति स्मृतिः॥१४३॥

निराश्रमित्वे का हानिरित्याख्याति—

अनाश्रमित्वादधर्मो लक्ष्याभावात् ॥ १४४ ॥

आश्रममहत्वमभिधायाऽधुना महर्षिः सूत्रकृत्तद्भ्रष्टानां दोषमभिधत्ते चत्वारोऽप्याश्रमा मानवजीवनोद्देश्यं स्थिरयन्ति । तेषां यथाक्रमं सुकौशल-व्यवस्थान विज्ञानञ्च पूर्णतया पूर्वं प्रतिपादितम् । अनाश्रमिणस्तु जीवनोद्देश्याभावाद्धर्ममार्गोऽवरुद्धो भवति ।

यथा गन्तव्यपथपरिभ्रष्टा नौ महापोतोऽपि वा कूर्पदण्डाभावाद्दिङ्निर्णायकगतेरभावाच्च जलमग्नावेव भवतः ।

यथा वा च्युताध्वा पथिकः स्वात्मानं विपथगामिनं कृत्वा कान्तारे व्याघ्र-

दिभिर्व्यापादयति तथैवानाश्रमी पुमान् प्रवृत्तिनिवृत्तिभ्यामुभाभ्यामपि पथिभ्यां च्युतोऽभ्युदयनिःश्रेयसप्रदधर्मपरिभ्रष्टः सांसारिकगर्ते परिपतनाज्ञात्मानमुत्थापयितुं प्रभवति । तस्मिंश्च न धर्मानुसारिणी प्रवृत्तिर्भवति नापि तस्य निवृत्त्यध्वैव विवृतो भवति, तस्मात् स धर्मसाधनशृङ्खलातो विच्युतोऽधर्मगर्ते पततितरामिति सुनिश्चितम् ॥ १४४ ॥

सिंहावलोकनन्यायतो वर्णधर्ममहिमानमाख्याति—

वर्णधर्मः प्रवृत्तिरोधकः ॥ १४५ ॥

वर्णधर्मो हि कामार्थधर्ममोक्षमूलकानामाचारनियमसङ्घानामनुष्ठानतो मानवानां निरर्गलाः प्रवृत्तीर्निरुध्यात्मज्ञानमुखीना विदधाति ।

तथा हि शूद्रधर्मः कामजन्यां प्रवृत्तिं सेवया निरुणद्धि । वैश्यधर्मश्च अर्थसंग्रहणेच्छां कृषिगोरक्षवाणिज्यादिभिः सफलां विधाय प्रवृत्तिनिरोधे समर्थो भवति ।

अन्यथापीदं विज्ञानं विवरीतुं शक्यते—तथा हि—जीवो जन्मजन्मान्तरतोऽनेकयोनिं परिभ्रमन् यदा मनुष्ययोनिमासाद्य शक्तिसम्पन्नो भवति तदा तस्य स्वपिण्डाधीश्वरत्वात् प्रथमतः कामप्रवृत्तय एव प्रबला भवन्ति । तदानीं स तपस्यामूलैस्सेवाधर्मैस्ताः सर्वा अपि निरर्गलाः प्रवृत्तीर्निरोध्य स्वक्रमोन्नत्यै सोपानपरम्परामारचयति । स एव यदा जन्मान्तरे वैश्यकुले स्वजनिमासादयति तदा स्वधर्मैर्गोरक्षकृषिवाणिज्यादिभिरर्थान्समुपार्ज्य तांश्च क्रमशो वर्द्धयन् धर्ममार्गे च व्ययीकृत्य प्रवृद्धां तामुद्दामामर्थप्रवृत्तिं नियमयति । ततश्च जन्मान्तरे स पुण्यात्मिकां क्षत्रियब्राह्मणयोनिमासाद्य पूर्वजन्मनोस्ते कामार्थप्रवृत्ती क्रमेण धर्ममोक्षयोः कृते विसर्ज्य एक एव स्वोद्दामप्रवृत्तीर्निरोद्धुं समर्थो भवति ।

आदिसृष्टितः क्रमशः परिशुद्धिमधिगते चतुर्णामपि वर्णानां रजोवीर्ये एभिः कामार्थधर्ममोक्षसंस्कारैर्युक्ते भूत्वाऽर्य्यजातीनामेषु प्रवृत्तिरोधकेषु साधनेषु सहायके भवतः । इत्येव वर्णधर्मस्यासाधारणं महत्वम् ॥ १४५ ॥

सम्प्रति क्रमप्राप्त्याऽऽश्रमधर्मस्य विशेषमहिमानमातनुते—

निवृत्तिपोषकस्त्वपरः ॥ १४६ ॥

यथा वर्णधर्मोऽसौ प्रवृत्तिरोधकस्तथैवाश्रमधर्मोऽप्ययं निवृत्तिपोषक इत्यभिहितं धर्मसूत्रकारैः

तथा हि—वर्णधर्मं यतो विज्ञाः प्रवृत्ते रोधकं जगुः ।

निवृत्तेः पोषकश्चैव धर्मसाश्रमगोचरम् ॥

प्रथमो हि ब्रह्मचर्य्याश्रमो मानवान् धर्मानुकूलप्रकृत्यधिकारसमर्पणेन गृहस्थाश्रमे प्रवेशयति तत्र च वेदशास्त्रीयप्रवृत्तिं सर्वथा पूरयित्वा तेषां कृते निवृत्तिमार्गद्वारं साधु समुद्घाटयति । ततश्चाग्रेतनौ वानप्रस्थसंन्यासौ तु निवृत्तिस्वरूपावेव । तस्मादाश्रमधर्मस्य निवृत्तिपोषकत्वे न कस्यचनापि विमतिः ॥ १४६ ॥

सर्वान्तिमफलमिदानीमाह—

निवृत्त्या कैवल्यम् ॥ १४७ ॥

वर्णधर्मेण प्रवृत्तिन्निरोधयन्त आश्रमधर्मेण च निवृत्तिं सम्वर्द्धयन्तो जीवा जीवन्मुक्तदशामाश्रित्य कैवल्यभाजो भवन्ति । वर्णाश्रमधर्मस्येदमन्तिमं लक्ष्यं विद्यते-यद् जीवा निर्बाधम् नियमतोऽभ्युदयोपलब्ध्या प्रवृत्तिं शोधयन्तो निवृत्तिञ्च वर्द्धयन्तोऽभयस्थानं मुक्तिपदमधिगच्छेयुरिति ।

वर्णाश्रमधर्माणामाचार-शृङ्खला ईदृशी सुदृढ़ा सुबद्धा विद्यते यत् सा स्वमार्गाश्रितान् जीवाञ्जन्मजन्मान्तरसमर्जितसंस्कारसाहाय्येन निर्बाधम् मुक्तिपदमेव प्रापयति न मध्ये क्वचन पातयति ॥ १४७ ॥

निवृत्त्युत्पत्तौ मतान्तराण्याह—

भोग-पौरोभाग्यात्तदुत्पत्तिरिति केचित् ॥ १४८ ॥

सूत्रकृन्महर्षिः स्वमतानुसृत्या वर्णाश्रमशृङ्खलाप्रणाल्या आर्य्यमर्य्यादाश्रितानाञ्जीवानां निवृत्तिमार्गोन्नत्या मुक्तिपदप्राप्तिविज्ञानमभिधाय सम्प्रति महर्ष्यन्तरमतान्यप्युदीरयति—

भोगेषु विषयेषु पौरोभाग्याद् दोषदर्शनात् "दोषैकदृक् पुरोभागी" इत्यमरः । तस्या निवृत्तेरुत्पत्तिरिति केषाञ्चन महर्षिप्रवराणां मतं विज्ञानम् इति सूत्रार्थः ।

वर्णाश्रमधर्मावलम्बिनी प्रजा विनापि विशेषप्रयासं केवलं वर्णाश्रमसदाचारपालनत एव निवृत्तिमार्गाधिकारिणी भूत्वा मुक्तिपदमारोहतीति सूत्रकारस्य स्वमतम् ।

महर्षीणां प्राप्यमाणेषु मतान्तरेषु चैकस्य मतमिदम् यद्—भोग्यपदार्थानां दोषानभ्यस्यन्त एव जीवा निवृत्तिमुपलभ्य मुक्तिभाजो भवन्तीति ।

विज्ञानस्यैतस्येदमेव स्वारस्यम् यत् विषयसङ्गा एव जीवान् अधो नयन्तो बध्नन्ति । विषयभोगवासनैव जीवानां गमनागमनचक्रं सञ्चालयति, सैव जीवानीश्वरतो विमुखांश्च करोति, यदा साधको वैराग्याभ्यासेन विषयतोऽरुचिमधि-

गत्या ताञ्जहाति तदा खल एव तस्मिन् भाग्यशालिनि साधके विषयत्याः प्रवृत्तेर्नाशान्निवृत्तेरुदयो भवति, ततश्च स क्रमशो मुक्तिमप्याश्रयतीति ॥ १४८ ॥

अन्यन्मतान्तरमाह—

गुणदर्शनादित्यन्ये ॥ १४९ ॥

केचन महर्षयः प्रकृतेः सत्त्वरजस्तमसां यथावत्सर्वथा सर्वदा दर्शनेनैव निवृत्तेरुपलब्धिर्भवति। ततश्च क्रमशो विमुक्तिरपि भवति इति। विषयविमुग्धः साधको यदि विषयस्वरूपतो मनोऽपहृत्य प्रवृत्तिगुणपर्य्यालोचन एवासक्तो भवति तदा न तं विषया विषिन्वन्ति। स च विषयेभ्यो विनिवृत्तो मुक्तिभूमानुत्तिष्ठते ॥ १४९ ॥

तृतीयं मतान्तरमभिधत्ते—

कर्मदर्शनादित्यपरे ॥ १५० ॥

केचिन् महर्षयः पापमुपेक्ष्य पुण्यकर्मणः पर्य्यालोचनया तथाऽसत्कर्मापहाय सत्कर्मप्रवृत्त्या प्रतिक्षणञ्च सत्कर्मानुष्ठानेनैव निवृत्तिमार्गोपलब्ध्या जीवन्मुक्तिपथगा भवन्तीति सम्मन्वते।

तात्पर्य्यतः कर्मवीरः साधकः सततं सत्कर्मानुष्ठानपर एवास्तेऽतस्तेन, कर्मवीरपरायणया दृष्ट्याऽसत्कर्मावलोकितुमेव न पार्य्यते। किन्तु सदा सत्कर्मानुष्ठानजन्यसंस्कारसञ्चयपरेण तेन निवृत्तिमासादयता मुक्तिपदमाश्रियते॥१५०॥

चतुर्थं मतान्तरमाख्याति।

धर्मप्रवृत्तेरितीतरे ॥ १५१ ॥

केषाञ्चन महर्षीणां मते निरन्तरधर्मप्रवृत्त्या मनुष्यो निवृत्तिपथाग्रेसरो भवन्मुक्तिमधिगच्छति। साधको यदाऽधर्मप्रवृत्तिमुन्मूल्य धर्मप्रवृत्तिमेव सततं वर्द्धयिष्यति तदा क्रमशः तदीया बुद्धिः शुद्धस्वरूपा सती विषयवैराग्यात्मिकां निवृत्तिमवश्यमासादयन्ती तं मुक्तिपथपथिकं कृत्वैव विश्रमिष्यति, इत्यस्य विज्ञानस्य तात्पर्य्यम् ॥ १५१ ॥

सम्प्रति स्वसिद्धान्तं द्रढयितुम्ब्रूते—

उभे देशकालापेक्षे ॥ १५२ ॥

सूत्रकृतोऽयमाशयो यद्—प्रवृत्त्यवस्थायाः क्रमोन्नतिर्यथाऽभ्यासेन वर्द्धमानापि देशकालमपेक्षते तथैव निवृत्तिसिद्धिरपि देशकालमपेक्षते। यथा प्रवृत्तिमार्गीयाः साधनसङ्घा देशकालमपेक्ष्यैव साधकमग्रेसरं कुर्वन्ति, तथैव निवृत्तिसाधनान्यपि देशकालापेक्षाण्येव स्वसाधकमग्रे वर्द्धयन्ति।

अपरञ्च देशकालभेदेन धर्माऽधर्मनिर्णये महत्काठिन्यमापततीत्यादि कारणकलापतः प्रवृत्तिनिवृत्ती उभे अपि देशकालमपेक्षेते इति स्वीकर्तव्यमेव ।

अपरतश्च वर्णाश्रमधर्मव्यवस्थातिरिक्तानि यान्यपि मुक्तिदानि निवृत्तिसाधनानि मतान्तरपक्षतः प्रतिपादितानि तत्साधनेषु समापतन्तीनामापत्तीनां निवृत्तेरुपायाभावात् प्रवृत्तिनिवृत्तिसम्बन्धिन्याः क्रमोन्नतेश्च देशकालापेक्ष्यत्वात् तत्र सर्वत्रैव सत्यामपि सर्वाभ्युदयनिःश्रेयसप्रदायिन्यां शक्तौ विघ्नबाधोपस्थितेरावश्यकत्वम्, न तन्निरोधव्यवस्था तत्र काचनोपलभ्यते ।

इह वर्णाश्रमधर्मे तु सर्वत आध्यात्मिकाधिदैविकाधिभौतिकशुद्धिव्यवस्थाया विद्यमानत्वात् विघ्नबाधाप्रभृतयः स्वत एव दूरी भवन्ति, जन्मान्तरसम्बन्धेन चोन्नतिपथोऽपि विशदो भवति । पूर्वोपात्तमतान्तरेषु नेदृक् सारल्यं सौकर्यं वोपलभ्यते । इत्यतो वर्णाश्रमधर्मव्यवस्थैवाबाध्यक्रमोन्नतौ निरापदश्चेति सर्वथा स्वीकर्तव्यम् ।

अन्यच्च प्रवृत्तिनिवृत्तिधर्मयोर्देशकालापेक्षणीयत्वात् तयोर्यथोचिताधिकारनिर्णयकाठिन्यानुभवस्यावश्यं पातादित्यभिहितं प्रागपि ॥ १५२ ॥

धर्माधर्मनिर्णये काठिन्यपरिहारेच्छया प्रमाणं निर्दिशति—

वेदाः प्रमाणं धर्माऽधर्मनिर्णये ॥ १५३ ॥

पूर्वोक्तरीत्या देशकालसम्बन्धस्य पात्रापात्राधिकार्य्यनधिकारिविचारस्यावश्यकत्वाद् धर्माधर्मनिर्णयस्य दुरूहतां सम्भाव्य तत्र वेदस्याविहतप्रामाण्यमुद्घोषयति भगवान् सूत्रकारः ।

देशकालविमर्शतो धर्माधर्मनिर्णये पात्रापात्रविचारेणाधिकारानधिकारविमर्शेन च धर्माधर्मनिर्णयः इत्येवं सर्वथापि कर्तव्याकर्तव्यनिश्चयोपस्थितौ वेदाश्चैव प्रमाणमित्यसन्दिग्धम् ॥ १५३ ॥

तद्धेतुमभिदधाति—

अपौरुषेयत्वाज्ज्ञानमयत्वाच्च ॥ १५४ ॥

ब्रह्मसंलग्नमनसो मुनयो नित्यर्षावतारस्वरूपा ऋषिकल्पा महापुरुषाश्चेत्यत एव जटिलसमस्योपस्थितौ धर्माधर्मनिर्णयसमर्था भवितुमर्हन्ति नान्ये । तत्रापि तेषां महात्मनामपि मतेषु तस्या अघटनघटनापटीयस्या मायायाः प्रभाववैचित्र्यात्परस्परविरोध उपलक्ष्यत एव । इत्येवं विषमसमस्योपस्थित्या धर्माधर्मनिर्णयो बहुधा सङ्कटापन्नो भवति । तत्रैवं किंकर्तव्यविमूढतावस्थायां वेद एवापौरुषेयत्वात् भ्रमप्रमादालस्य-विप्रलिप्सादिपुरुषगतदोषराहित्यादविलङ्घ्यं प्रमाणमङ्गीक्रियते ।

अत्र यदि दार्शनिकः कश्चिदाशङ्केत यत् सर्वथापि विषमसमस्योपस्थितौ सर्वैरप्याश्रयणीयस्य वेदस्य किं स्वरूपं कथञ्च तत्रैतादृशी श्रद्धा करणीया स्याद् इत्यादि, तन्नोत्तरार्थमेवास्य सूत्रस्योपन्यासः सूत्रकृतोपात्तः। तथा हि—वेदस्य प्रामाण्यसिद्धौ दार्शनिकी युक्तिरेव प्रबला। यतो हि वैदिकं शास्त्रीयग्रन्थोभयमपि प्रमाणं वेदमूलकमेव। तत्रापि वेदस्यालौकिकं महत्वमृतम्भराप्रज्ञासम्पन्नैरात्मदर्शिभि र्महापुरुषैरेव ज्ञातुं शक्यते,नेतरैः साधारणप्रज्ञावद्भिः। इत्यतः सिद्धमिदं यद्वेदप्रामाण्यसमर्थने दार्शनिकविज्ञानस्य प्रयोजनमावश्यकमिति—

प्रथमं तावद् वेदस्याऽपौरुषेयत्वज्ञानमयत्वाभ्यामेव सर्वाभ्यर्हितं प्रामाण्यं सिध्यति। अपरञ्च ब्रह्मणि ब्रह्मशक्तेरभिव्यक्तिलयौ स्वभावसिद्धौ स्तः। यथा कस्मिंश्चित्पुरुषपिण्डे तस्य व्याहरणशक्ति र्ज्ञापनशक्ति र्वाऽभिव्यज्य शब्दमयीं स्वरमयीं वा सृष्टिमाविर्भावयति, ततो द्वितीयक्षणे तस्य वर्णात्मकस्य ध्वन्यात्मकस्य वा शब्दस्य लयेन सहैव स्वयमपि सा विलीयते। तथैव शब्दमय्याः शक्तेः पौनःपुन्येनाविर्भावतिरोभावाभ्यां सह तन्मय्याः सृष्टेरप्याविर्भावतिरोभावौ सम्पद्येते। इत्युदाहरणानुरूपमेव ब्रह्मणः शक्ते र्महामाया आविर्भावतिरोभावाभ्यां ब्रह्माण्डस्याप्युदयलयौ सर्वदैव सम्पद्येते। ब्रह्मशक्ति र्हि नित्या यस्या व्यक्तत्वे दृश्यप्रपञ्चस्य स्थितिस्तस्या अव्यक्तादशायाञ्च तस्य लयो भवतीत्येतावतैव ब्रह्मशक्तेर्नित्यत्वेऽपि जगतोऽनित्यत्वे न काप्यनुपपत्तिः।

ब्रह्मशक्ति र्हि यथा "अहं ममेतिवत्" नित्या,ज्ञानमपि तथैव नित्यम्। यतो हि सच्चिदानन्दरूपं ब्रह्म सर्वत्रैवास्तिभातिप्रियरूपेण विराजते। इत्यतो ज्ञानस्य चिन्मयभावरूपस्य नित्यत्वे का त्रुटिः। जगतोऽभिव्यक्त्या सार्द्धमेवास्तिभातिप्रियादिरूपस्याप्यभिव्यक्तिरुदेतीत्यस्मादेव कार्य्यरूपे जगत्यपि सर्वेषामेवैषामस्तिभाति-प्रियादीनां पूर्णतया सत्तोपलभ्यते। ब्रह्मणो हि स्वरूपं ज्ञानं प्रथमसृष्टिविकाशे ज्ञानमये शब्दे तटस्थज्ञानस्य बीजत्वं दधदेवाविर्भवति। तदेव तटस्थस्य बीजरूपं शाब्दिकं ब्रह्म प्रणवः कथ्यते। तेनैव प्रणवेन तत्कल्पोपयोगी सर्वोऽपि ज्ञानराशि र्वेदर्चास्वरूपतो महर्षीणामन्तःकरणे समुद्भवति। एतदेवालौकिकमद्भुतञ्च वेदाविर्भावरहस्यम्।

मध्यमीमांसा-ब्रह्ममीमांसादर्शने वेदस्यालौकिकमिदं स्वरूपमनेकधा विवृणुतः। अतो वेदस्याऽपौरुषेयत्वं ज्ञानमयत्वञ्च पूर्वविज्ञानतः सिद्धमेव।

वेदो हि सद्रूपेण ब्रह्मणि तिष्ठति स च सृष्टेरादौ "अहं ममेति"ब्रह्मशक्तिवत् क्रियाज्ञानात्मना परिणतया तया सहैव ब्रह्मणः सकाशाद् प्रणववेदरूपेण महर्षीणां

समाधिस्थेष्वन्तःकरणेष्वाविर्भवति । न तु केनापि प्रणीयते वेदः, किन्तु आविर्भावतिरोभावरूपतयैवादृश्यतां प्रकाशताञ्चागच्छतीति तस्याऽपौरुषेयत्वम् नित्यत्वम् । एकस्मिन् कल्पे प्राकट्यमाश्रितवति वेदे प्रतिकल्पान्तरमाविर्भविष्यतस्तटस्थज्ञानस्य सूक्ष्मबीजसमुदयोऽन्तर्निहितस्तिष्ठतीति तस्य ज्ञानमयत्वम् इत्येवमपौरुषेयत्वज्ञानमयत्वे वेदस्य सिद्धे धर्माऽधर्मनिर्णये काठिन्योपस्थितौ तस्य सर्वतोऽभ्यर्हितमविहतञ्च प्रामाण्यमप्रतिहतमेव ॥ १५४ ॥

स्वपक्षपुष्टये वेदमहिमानमभिधत्ते—

पूर्णज्ञानस्य वेदस्य भाषाऽष्टभावप्रकाशिका ॥ १५५ ॥

"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा"

इति श्रीमद्भगवद्गीतोक्तवचसा यथा ब्रह्मप्रकृतिरष्टधा विभक्ता दृश्यते तथैव ज्ञानात्मिका वेदसृष्टिरपि स्वात्मनाऽष्टधा विभिन्नोपलभ्यते ।

विज्ञानसिद्धमिदं यत् कार्य्यब्रह्मणो यथा मूलकारणमष्टधा प्रकृतिस्तथैव ज्ञानात्मनोऽस्य शब्दब्रह्मणोऽपि सृष्टेरष्टधात्वे नाऽनुपपत्तिः प्रत्युतेदमेव वेदस्यासाधारणं महत्त्वं पूर्णत्वञ्च यदस्याष्टधोपकल्प्यते प्रकृतिः ।

वेदस्य सर्वोऽपि मन्त्रः प्रत्येकमाध्यात्माधिदैवाधिभौतिकभावपूर्णः, कर्मोपासना ज्ञानात्मक-काण्डत्रयक्रियासम्वलितः, वाह्यान्तःप्रकाशक-ज्योतिर्द्वयोपेतश्च विद्यते । समाधिस्थप्रज्ञया पर्य्यालोचिताः सर्व एव मन्त्राः प्रत्येकमध्यात्माधिदैवाधिभौतिक-भावपूर्णतामपि प्रख्यापयन्ति । तथा कर्मोपासनाज्ञानात्मक-काण्डत्रयाणामुपयोगितामपि प्रकाशयन्ति । ज्ञानसम्बन्धेन च वाह्यान्तर्जगतोः, प्रकाशनात्मिकां सम्पूर्णां शक्तिमपि दधतीत्येवमष्टाङ्गस्वरूपं सर्वथा तेषूपलभ्यते । यद्यपि चापाततः काचन श्रुतिः ज्ञानप्रधाना कापि चोपासनामुख्या काचिच्च कर्मभिरभ्यर्हिता प्रतीयते । परन्तु सूक्ष्मबुद्ध्या विमर्शनेनेमा अष्टावपि शक्तयः सर्वत्रैव प्रतिमन्त्रं तासु न्यूनाधिकतयोपलभ्यन्त एव ।

एवमेव याहि ऋक् प्रत्यक्षतोऽन्तर्जगज्ज्ञानं प्रकाशयति तत्रैव समाधिस्थबुद्ध्या संयमतः पर्य्यालोचनया वाह्यस्थूलजगत्प्रकाशिकोपयोगितोपलभ्यत एव । तयैवर्चा कस्यापि जगतः कस्यापि सत्यपदार्थस्य निर्णयोऽपि सम्भाव्यते । इत्थं प्रतिश्रुति वेदप्रकृतिरष्टधोपलभ्यते । इत्ययमेव तस्याष्टभावप्रकाशकम् लौकिकं महत्वम्पूर्णत्वञ्च । इत्यस्मादेव कारणात् वेदा धर्माधर्मनिर्णये सर्वाभ्यर्हितं प्रमाणं परिकीर्त्यन्ते ॥ १५५ ॥

अपरञ्च—

न सर्ववेदवक्तृत्वं सर्वेषां तदानन्त्यात् ॥ १५६ ॥

वेदस्यानन्त्ये, सर्वाभ्यर्हितमाहात्म्ये, पूर्णतायाञ्च वैज्ञानिकं रहस्यं प्रतिपादयति । कारणब्रह्मणः श्रीभगवतो वाङ्मयस्य शब्दब्रह्मणो वेदस्याऽपि ज्ञानानन्त्यप्रतिपादकत्वादानन्त्यमप्रतिहतमेव । अत एव न सर्वे ऋषयः सर्वेषां वेदानां वक्तारो भवितुमर्हन्ति । योगदर्शने प्रोक्तं महर्षिणा पतञ्जलिनाऽपि—

'स एव पूर्वेषामपि गुरुः कालेनानवच्छेदात्'

इत्यनेनेदं सिध्यति—यत् कोऽपि महर्षिः, कोऽपि देवः, कोऽपि महापुरुषः स्यात्, किन्तु सर्व एव देशकालपरिच्छिन्नतयाऽल्पज्ञानस्यैवाधिकारिणो भवितुमर्हन्ति न तु पूर्णज्ञानस्य । ज्ञानानन्तराशिस्थितिस्तु केवलं तस्मिञ्जगदाधारे जगदात्मनि परमेश्वर एव भवितुमर्हति । अतो देशकालपरिच्छिन्नत्वात् आपेक्षिकत्वाच्च सर्वेऽपि देवा ऋषयस्तदवतारा वा अपूर्णज्ञानवन्त एव भवन्ति, केवलमीश्वर एव पूर्णज्ञानवान् भवतीति संक्षेपः ।

एतद्विज्ञानानुरूपं जगतोऽस्य सर्वेऽपि मन्त्रद्रष्टार ऋषयः सर्वेषां वेद-मन्त्राणां वक्तारो नैव भवितुमर्हन्ति । यो हि महर्षिर्यं मन्त्रं स्वसमाधिस्थे हृदि समुपलभते स तस्य द्रष्टेत्यवश्यं निगद्यते । एवमेको महर्षिरनेकेषां मन्त्राणां वक्ता भवितुमर्हति तथैकस्यैव मन्त्रस्य कालभेदेनानेकेऽपि ऋषयो द्रष्टारः सम्भवितुमर्हन्ति ।

शब्दब्रह्ममयो वेदो हि विशेषतोऽनन्तब्रह्माण्डे व्याप्तोऽनन्तकालस्थायी च गीयते । एकस्मिन् ब्रह्माण्डेऽथवैकत्र कल्पे यावन्तो वेदा आविर्भवन्ति ते सर्वेऽपि तस्य भगवतोऽनन्तस्वरूपस्य वेदस्यैकस्मादंशत एव भवन्ति । इत्यतोऽपि सिद्ध्यतीदम् यद् वेदानामानन्त्यादनन्तज्ञानाकरत्वाच्च नहि सर्वे महर्षयः सर्वेषां वेदानां वक्तारो भवितुमर्हन्ति ॥ १५६ ॥

इदानीमन्यप्रकारेणापि वेदमहिमानमालोचयति—

नैके देवताविनियोगाः शक्तेरानन्त्यात् ॥ १५७ ॥

शक्तेरानन्त्याद् अपरिमेयत्वात् देवताश्च विनियोगाश्च ते, न एके नैके अनेके इत्यर्थः, असंख्याता इति यावत् 'सुप्सुपेति पाणिनिसूत्रेणाऽत्र समासोऽतो न "न लोपो नञ्" इति न लोपः ।

ज्ञानसम्बन्धेन यथा वेदा अनन्तास्तथा शक्तिसम्बन्धतोऽपि तेऽनन्ता एव । यतो हि वेदानां परमेश्वरवाच्यत्वेन "अहं ममेतिवत्" ब्रह्मशक्तिस्वरूपत्वमेव । उक्तञ्च दैवीमीमांसादर्शने—

"अपौरुषेयत्वाद् भगवद्वाक्यं वेदः ।"
"स्वतः पूर्णोऽभ्रान्तो नित्यश्च" इति ॥

वेदस्य भगवच्छक्तिरूपत्वादनन्तशक्तिशालित्वं सुनिश्चितम्, अनन्तशक्तिशालित्वाच्च तस्यर्चामधिष्ठातृदेवतानां तद्विनियोगानाञ्चानेकत्वं सुतरां सुसम्पन्नम् ।

वेदमन्त्राश्चालौकिकशक्तिसम्पन्ना इत्यतः सर्वा अपि ऋचो मन्त्ररूपा एव। यतो ह्यलौकिकदैवसाम्राज्येन सम्बन्धभाजः शब्दसमूहा एव मन्त्रास्तेषामधिष्ठात्रीणां देवतानां विनियोगानाञ्चानेकत्वमपूर्वमुक्तमेव ।

ये देवा यस्य मन्त्रस्य शक्तिं क्रियान्विताङ्कुर्वन्ति, ते हि तस्याधिष्ठातृदेवता निगद्यन्ते । ये च मन्त्रा यस्मिन्नर्थे विनियुज्यन्ते सोऽर्थविनियोग एव तेषां विनियोगशब्दार्थः । अघटनघटनापटीयस्या ब्रह्मणः शक्त्या वाङ्मनोऽतीतापारशक्तिशालित्वं सुनिश्चितमेवेति तस्यैव शब्दशक्तिरूपस्य वेदस्यर्चामप्यनन्तशक्तिशालित्वे को विरोधः ।

यथाऽनलस्यैकस्मिन्नपि स्फुलिङ्गे तस्य पूर्णा शक्तिर्निहिता तिष्ठति तथैव सर्वास्वपि वेदर्क्षु पूर्णैव वेदशक्तिरन्तर्निगूढा विद्यते ।

अपरञ्च वेदर्चां पूर्णशालित्वेनाधिदैवसम्बन्धतोऽधिष्ठातृदेवतानामनेकत्वं क्रियासम्बन्धतश्च विनियोगानामप्यनेकत्वं स्वभावसिद्धम् ॥ १५७ ॥

तत्र द्वितीयं प्रमाणमाह—

तथा सर्वस्मृतिकर्तृत्वम् ॥ १५८ ॥

सर्वासां स्मृतीनां कर्तारस्तेषां भावस्तत्त्वम्, तथा वेदवदेव ज्ञेयमित्यर्थः—स्मृतयोऽपि वेदवदेव प्रमाणम् कर्तृसामान्यात् इति यावत् । धर्माधर्मनिर्णये वेदस्य प्राधान्यं संसाध्येदानीं स्मृतीनामपि तथात्वं संसाधयति सूत्रकारः ।

देवलोकनिवासिनां नित्यर्षीणामवतारस्वरूपा हि महर्षयः यानपौरुषेयान् मन्त्रराशीन् समाधिसम्पन्ने स्वान्तःकरणे पश्यन्ति, त एव वेदशब्देनोच्यन्ते कियत् समयानन्तरं तेषामेव वेदमन्त्राणां भावार्थमनुस्मृत्य स्वभाषया जगदुपकृतये यानि धर्मवाक्यानि निबध्नन्ति तान्येव स्मृतयोऽभिधीयन्ते । इत्यत इदमङ्गीकरणीयमापतति यद्यथावेदं स्मृतीनामपि कर्तृमत्त्वम्, तदनन्तरञ्च तासामेव प्रामाण्यमपीति ॥ १५८ ॥

अधुना श्रुतिस्मृतिविरोधे कर्तव्यमादिशति—

श्रुति र्गरीयसी स्मृत्या विरोधे ॥ १५९ ॥

श्रुतयो विभिन्नाः स्मृतयोऽपि बहुशो विभक्ताः अतो धर्माऽधर्मनिर्णये उभयोर्विरुद्धवचनोपलब्धिः सम्भाव्यते—

यथा—कस्यचन सिद्धान्तस्य निर्णये श्रुतिरन्यथा ब्रूते स्मृतिश्च श्रुतिविरुद्धमिव सिद्धान्तं समर्थयति, ईदृशि व्यतिक्रमे पूर्वस्याः प्रबलायाः श्रुतेरेव निर्णयोऽभ्युपेतव्यो भवति न स्मृतेर्दुर्बलायाः।

श्रुतिर्हि साक्षाद्भगवद्वाक्यस्वरूपा योगयुक्तानां महर्षीणामन्तःकरणे तद्रूपैव प्रतिफलिता, स्मृतयश्च तदर्थानुसारिण्यो महर्षिभिः स्वशब्दैर्निर्मिता इत्येवं निश्चये सति विरोधावस्थायां भगवतः साक्षाद्वाक्यस्य प्राधान्यप्रदानं सर्वथोचितम्, न्याय्यं, विज्ञानानुकूलमेव । श्रुतिस्मृतिषु बहुशोऽयम्भावः प्रपञ्चितोऽस्ति । तथा हि—"तस्य ब्रह्मणो निःश्वसितमेतदृग्वेदो यजुर्वेदः सामवेदोऽथर्वा इतिहासः पुराणमिति" श्रुतिः।

"विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम्"

श्रुति-स्मृति-पुराणेषु विरोधो यत्र दृश्यते ।

तत्र श्रौतं प्रमाणन्तु तयार्द्वैधे स्मृतिर्वरा ॥ १५९ ॥ इति स्मृतिः।

सम्प्रति धर्मशास्त्रार्थशास्त्रयोर्द्वैधे कस्याऽभ्यर्हितत्वमित्याह—

धर्मशासनमर्थशासनेन ॥ १६० ॥

क्वचन धर्माधर्मयोः कर्तव्याऽकर्तव्ययोर्वा निर्णयवेलायां स्मृतिरूपधर्मशास्त्रेण तदतिरिक्तेन च महर्षिप्रणीतेनचार्थशास्त्रेण विरोध आपतेच्चेत्तर्हि स्मृतिरूपस्य धर्मशास्त्रस्यैवाभ्यर्हितत्वमूहनीयम् । न तु तदतिरिक्तस्य महर्षिप्रणीतस्याप्यर्थशास्त्रस्येति निश्चप्रचम् ।

यतो हि स्मृतिप्रभृतयो धर्मग्रन्था वेदस्य साक्षात्सम्बन्धवन्तः तदर्थानुसन्धानपुरःसरा एव महर्षिभिर्निर्मीयन्ते । अर्थशास्त्राणि तु लौकिकाभ्युदयनिमित्तानि लौकिकदृष्ट्यैव तैरपि प्रणीयन्ते । इत्थतो धर्म्माधर्मकर्तव्यादिनिर्णयावसरे धर्मशास्त्रार्थशास्त्रयोः परस्परसिद्धान्तभेदेन तयोर्विरोधे प्रतीयमाने धर्मशास्त्रस्य प्राबल्यात्तदनुसारतः कर्तव्यनिर्णय एव स्वभावसिद्धः साधीयांश्च । उक्तञ्च स्मृतिशास्त्रे—

"अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्मृतिः ॥ १६० ॥

अन्यथाप्याप्तप्रमाणं निर्णयति—

सर्वविदेकोऽपि पूर्णज्ञानवत्त्वे ॥ १६१ ॥

सन्तीह त्रिविधानि खलु प्रमाणानि प्रत्यक्षानुमानाप्तवचनानि। यथा तत्र वारिवाहा दूरविलम्बिनो वर्षन्ति साम्प्रतमिति चक्षुरिन्द्रियगोचरत्वात्प्रत्यक्षम्। जलप्लावितायां धरायां व्योम्नश्च निर्मलत्वे पूर्वं वृष्टिरिहाभूदिति यदनुमीयते तदनुमानम्। आकाशोऽपि स्वच्छः स्यात्पृथिव्यामपि वृष्टिचिह्नं न किमपि समुपलभ्येत, तत्र यदि कश्चनाप्तोऽभिदध्याद्यदमुत्र देशे पूर्वं सुवृष्टिरभूदिति तदाप्तवचः प्रमाणमभिधीयते। इत्येवं त्रिविधेष्वप्येतेषु परस्परभेदभिन्नत्वात्सर्वेषामप्यनेकत्वं सिध्यति। किन्तु विस्तारशङ्कयाप्तवचस एव द्वैविध्यं दर्शयित्वा विरम्यते प्रकरणात्। तथा हि वेदशास्त्ररूपमेकमाप्तप्रमाणं द्वितीयञ्चाप्तपुरुषस्य वचनरूपम्। आप्तलक्षणञ्च—

'अनुभवेन वस्तुतत्त्वस्य कार्त्स्न्यतो यथार्थज्ञानवान् रागादिवशादपि नान्यथावादी यः स आप्त इति पतञ्जलिः।

धर्मस्वरूपस्य वैचित्र्यात्तदुदर्कस्य चादृश्यत्वाद्धर्मनिर्णये प्रत्यक्षानुमाने न प्रभवत इत्यत एवोक्तम् शास्त्रे—

"धर्मस्य तत्त्वं निहितं गुहायाम्"

"अर्थकामेष्वसक्तानां धर्मज्ञानं विशिष्यते।

धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः।

इत्यनेन धर्माधर्मनिर्णये तृतीयस्याप्तवचस एव प्रामाण्यं सुतरामवलम्बनीयमिति सिध्यति।

सूत्रकृद्धि द्वयोराप्तवचसोर्मध्ये प्रथमस्याभिधानं पूर्वसूत्रैर्विधायेदानीं द्वितीयश्रेणीगस्याप्तवचसः प्रामाण्यनिर्णयार्थमिदं सूत्रमवतारयति—

एकोऽपि सप्तदर्शनज्ञानाम्बुधिसमुत्तीर्णो ज्ञानस्य सप्तमीं भूमिमारुह्य तत्त्वज्ञानस्य पूर्णतामधिगतो महापुरुषो धर्माधर्मनिर्णायकानां सर्वेषामेव रहस्यानामवगन्ता भवितुमर्हति।

समष्टिव्यष्टिस्वरूपेण एकस्य ब्रह्माण्डस्य तदन्तर्गतानां पिण्डानाञ्चैकत्वं सुसिद्धमेव। इत्यत एकस्मिन् ब्रह्माण्डे यदि कश्चन महापुरुषः सप्तानामपि ज्ञानभूमीनामधिकारं यथाक्रमं पूर्णतयाऽधिकृत्य स्वस्वरूपोपलब्धिसम्पन्नः स्यात्तदा स स्वब्रह्माण्डस्य सर्वमपि ज्ञानराशिमवगाहितुं समर्थः। तत्त्वज्ञानपूर्णतया च मलविक्षेपावरणादीन् समूलकाषं कषित्वा स्वान्तःकरणीयस्वच्छज्ञानापवारकान्

सर्वानेवान्तरायानपहन्ति । तदनन्तरम् स्वप्रज्ञायाः पूर्णज्ञानसम्पन्नतया स स्वेच्छासंयमाख्यां सर्वमपि सामान्यतो ज्ञातुम् विशेषतो वेत्तुञ्च समर्थो भवतीति निर्विवादम् ॥ १६१ ॥

अधुनाप्तपुरुषमाहात्म्यमभिधत्ते—

तज्ज्ञोऽपि तद्वत्प्रमाणम् ॥ १६२ ॥

स्वस्थितिकाले प्राकृत्यमधिगतानां वेदानां ज्ञातारो महापुरुषा ऋतम्भराप्रज्ञामधिगतवन्तो भवन्तीति तेषां तत्त्वज्ञानिनां जीवन्मुक्तानां महात्मनां सिद्धान्ता अपि वेदवदेवावश्यमादरणीया भवन्तीति किं चित्रम् ।

अस्मादेव हेतोः स्मृतयोऽपि वेदतुल्या एव गण्यन्ते । यतो हि ता अपि तु तेषामेव महर्षीणां वचनस्वरूपा इति ।

तत्त्वज्ञानपूर्णहृदयानां जीवन्मुक्तानां महर्षीणामन्तःकरणानि चित्ताकाशेन चिदाकाशेन महाकाशेन च त्रिभिरपि साम्यमेत्य स्फारतामुपेत्य नन्दन्ति मलविक्षेपावरणाद्यभावादित्युक्तं प्रागेव ।

एतस्यामसाधारण्यामलौकिकस्थितौ देवपितृषीणां का कथा, ब्रह्माण्डनायकानां ब्रह्म-विष्णुमहेशानां त्रयाणामप्यन्तःकरणैः सह तेषामन्तःकरणानि सङ्गत्यैक्यमधिगत्य सर्वज्ञानाववोधक्षमाण्युद्घाटितसर्वदिग्द्वाराणि जायन्ते इत्यसन्दिग्धम् । अत ईदृशानां महामहिमशालिनां पुरुषाणां वचनानि वेदकल्पानि प्रमाणान्येवेति नाणीयानपि सन्देहः ॥ १६२ ॥

प्रसङ्गतो वैदिकविज्ञानस्य सर्वाभ्यर्हितं माहात्म्यं ब्रूते—

वैदिकविज्ञानमलौकिकम् ॥१६३॥

वेदातिरिक्तस्याप्तप्रमाणस्य वर्णनं यत्पूर्वमुपक्रान्तम्, तद्धि सर्वमेव लौकिकशब्दसम्बन्धभाक् । स्मृतिप्रभृतिशास्त्राणि सर्वाण्यपि लौकिकशब्दमयान्येवाविर्भवन्ति। यतो हि महर्षयः तेषां धर्मशास्त्राणामलौकिकभावमधिगत्यापि स्वलौकिकशब्दैरेव तानि जगति प्रकटयन्ति ।

अपरञ्च—आप्ता महात्मानः स्वान्तःकरणानि सर्वदैवालौकिकभगवद्राज्येन सम्बन्धभाञ्जि स्थापयन्ति, परन्तु उपदेशदानक्षणे च स्वालौकिकशब्दानेव प्रयुञ्जन्ति । वेदे तु नेयं व्यवस्था । तस्य तु सर्वोपरि माहात्म्यमिदमस्ति यत् भगवद्वाक्यमयो हि सोऽपौरुषेय इति तच्छब्दरूपेणैव महर्षीणां समाधिस्थेऽन्तःकरणे प्रकाशते । तत्र वेदर्चां शब्देषु मन्त्रद्रष्टॄणाम् ऋषीणां स्वशब्दोपन्यासस्यावसरः सम्बन्धो वा नैवोपलभ्यते । एतावता सन्दर्भेणेदं साधु समर्थितं भवति यद्वेदशब्दा अलौकिका अलौकिकत्वाच्च तेषामलौकिकभावमयत्वमपि स्वभावसिद्धमेव ।

वैदिकं विज्ञानञ्चाष्टप्रकृतिपूर्णमिति पूर्वमेवोदीरितम् । इत्थं वैदिकविज्ञानस्याऽलौकिकत्वे नास्ति कियानपि सन्देहावसरः ॥ १६३ ॥

तन्महिमानमेव द्रढयति—

तदनुशासनम्प्रभुसम्मितं प्रभुसम्मितम् ॥ १६४ ॥

धर्माऽधर्मनिर्णये वेदाज्ञाया गौरवं सर्वाभ्यर्हितं महत्त्वञ्च प्रतिपादयितुं सूत्रकृन्महर्षिः प्रतिपादयति-यत् वेदानुशासनं वेदाज्ञा प्रभो राज्ञ आज्ञावदवश्यं स्वीकरणीयं भवति । स्मृतिप्रभृतिशास्त्रीयवाक्येषु दार्शनिकयुक्तिप्रत्युक्तीनामप्यवसरो वरीवर्ति । महाजनानामाज्ञावाक्यैः सह शङ्कासमाधानानामप्यवकाशो भवति परन्तु वेदवाक्यानामपौरुषेयत्वान्नित्यत्वाद्भ्रमप्रमादालस्यविप्रलिप्सादिपुरुषदोषशून्यत्वात्तदीयाज्ञाविषये नास्ति शङ्कासमाधानावसर इत्यवश्यमभ्युपेतव्यम् । प्राक् प्रतिपादितविज्ञानमेवास्य सिद्धान्तस्य सुदृढं परिपोषकम् ।

इत्येवमष्टशक्तिसम्पन्नस्याभ्रान्तस्य सिद्धान्त-स्वरूप-साक्षाद्भगवद्वाक्यमयस्य वेदस्य धर्म्माधर्मविषयिणी निर्णायिका आज्ञा प्रभुसम्मितैव भविष्यतीत्यत्र न कोऽपि विचिकित्साऽवसरः । अत्र प्रभुसम्मितशब्दस्य पुनरुक्तिः पादसमाप्त्या सह विषयदाढ्र्य प्रतिपत्तये विज्ञेया ।

सूत्रस्यास्य विषयो बहुधा श्रुतिस्मृतिभिः समर्थितः समुपलभ्यते—
तथा हि—

अनादि निधना नित्या वागुत्सृष्टा स्वयम्भुवा ।
आदौ वेदमयी नित्या यतः सर्वाः प्रवृत्तयः ।
स्वयम्भुरेष भगवान् वेदो गीतस्त्वया पुरा,
शिवादिऋषिपर्य्यन्ता द्रष्टारो नात्र कारकाः ।
अस्य वेदस्य सर्वज्ञः कल्पादौ परमेश्वरः,
व्यञ्जकः केवलं विप्रा नैव कर्ता न संशयः ॥
युगान्तेऽन्तर्हितान् वेदान् सेतिहासान्महर्षयः,
लेभिरे तपसा पूर्वमनुज्ञाता स्वयम्भुवा ॥
पुराणं मानवो धर्मो वेदाश्चत्वार एव च,
आज्ञासिद्धानि चैतानि न हन्तव्यानि हेतुभिः, ॥१६४॥

इति श्रीकर्ममीमांसादर्शनभाष्ये धर्मासिधः प्रथमः पादः समाप्तः ।

कर्ममीमांसादर्शनम् ।

संस्कार-पादः ।

आद्ये पादे साङ्गोपाङ्गस्य धर्मस्य विवेचनं विहितवान्महर्षिः सूत्रकारः । इदानीञ्च धर्मस्य सर्वथा कर्माधीनत्वात् कर्मणश्च बीजवृक्षसम्बन्धवत् संस्कारेण सह सम्बन्धभागित्वात् कर्मणो बीजात्मकस्य संस्कारस्य विस्तृतवर्णनं चिकीर्षुर्द्वितीयं पादमारभते—

कर्मबीजं संस्कारः ॥ १ ॥

कर्मणो बीजं संस्कार उच्यत इति सूत्रार्थः । बीजाङ्कुरन्यायानुकूलकर्मणो बीजं संस्कार इति स्मृतयोऽपि प्रतिपादयन्ति—

"बीजञ्च कर्मणो ज्ञेयं संस्कारो नात्र संशयः" इति ।

यथा हि बीजाद्वृक्षो वृक्षाद्बीजमिति बीजवृक्षपरम्परया सृष्टिचक्रं प्रचलति, तथैव सृष्टिक्रियायां कर्मणा सह संस्कारस्य सम्बन्धः ।

यथा च कृषिसम्पत्त्यनन्तरं भविष्यत्कृषिसमृद्धये तत्कृषिसमुत्पन्नबीजानि सञ्चीयन्ते । एवमेव जीवानां स्वोपार्जितकर्मणो बीजात्मकः संस्कारसमूहः कर्माशयापरपर्य्यायः चिदाकाशे सञ्चितस्तिष्ठति । ततश्च यथा कृषिव्यापारे बीजेभ्योऽङ्कुरोत्पत्तये धान्यादीनां परिष्कृतायां भूमौ वपनं क्रियते, ततश्चाङ्कुरोत्पत्तिरपि सञ्जायते, तथैव सोऽपि प्रारब्धोत्पादकः संस्कारसमूहः परिणामकालेऽङ्कुरोद्भेदाय जीवानां चित्ताकाशे संगृह्यते, स च बीजवदेवाङ्कुरितः सन् क्रियाशीलतामासादयति ॥ १ ॥

अधुना तस्य प्रादुर्भावभूमिं विविनक्ति—

ग्रन्थौ तत्प्रादुर्भावः पिण्डवत् ॥ २ ॥

प्रकृतिर्हि स्वभावत एव परिणामिनीति तस्यास्तरङ्गशालित्वं सर्वदैव सुसम्पन्नम् । एवञ्च तरङ्गायमानायास्तस्यास्तरङ्गो यदा तमोगुणात् सत्त्वाभिमुखः प्रसर्पति तदैव तमसि सत्त्वोद्रेकवेलायामेव चिज्जडग्रन्थिरुत्पद्यते । इयमेव

जीवसृष्टेः पिण्डसृष्टेर्वोत्पत्तिनिदानम् । अस्यामेव चिज्जडग्रन्थौ साहाय्यकतयैव भवति संस्कारोद्गमः।

स्मृतावप्युद्दीरितोऽयं विषयः—

मम प्रभावतो देवाः ! व्यष्टिसृष्टिसमुद्भवे,
चिज्जडग्रन्थि सम्बन्धाज्जीवभावः प्रकाशते ।
स्थानं तदेव संस्कारसमुत्पत्तेर्विदुर्बुधाः ॥

संसारोऽयं चिज्जडस्वरूपाभ्यां द्वाभ्यामेव वस्तुभ्यां परिव्याप्तः । तत्र हि प्रकृति जंडात्मिका पुरुषश्चेतनात्मकः, तौ हि परस्परं संपरिष्वक्तौ । तत्र चिन्मये पुरुषे परिणामाभावः, जड़ात्मिकायां हि प्रकृतौ त्रिगुणात्मिकतया स्वभावत एव परिणामो दृश्यते—

स च परिणामो जाड्याच्चैतन्याभिमुखश्चैतन्याच्च जाड्याभिमुखो भवति। अन्यथापीदं वैज्ञानिकं रहस्यं विव्रियते—

तथाहि—संसारमहासागरस्यैकं तटं पूर्णजडात्मकं परमाण्वादिसत्तात्मकं, द्वितीयं तटञ्च चिन्मयं स्वस्वरूपमिति । यदा हि परिणतितरङ्गश्चिन्मयतटात्परिवर्तमानो जाड्याभिमुखो भवति, तदा जीवा इन्द्रियपरायणा भूत्वा बन्धनपाशे पतिता गमनागमनचक्रे वम्भ्रम्यन्ते । अयमेव परिणामो मनुष्यादि-जीवानां जीवत्वस्थितिनिदानम् ।

अयं प्रकृतेः परिणामः पूर्णजडमयपरमाण्वादेः परावर्तते; अर्थात् स्वभावादेव परिणामिनी प्रकृतिः किल तमःसंश्लिष्टपूर्णजडावस्थातः सत्त्वगुणाभिमुख्यं प्रवहति । यतो हि रजोगुणेन हेतुना परतः अन्यत्र, अन्यत परत्र प्रकृतेः परिणामो वोभूयते । तत्रानयोः परिणामयोर्जाड्याच्चैतन्याभिमुखः परिणाम एव स्वाभाविको जीवसृष्टेर्निदानम् ।

तथाहि—घोरतमे तमोरूपे जाड्ये रजोगुणसाहाय्येन यदा प्रथमः परिणामो भवति, तदैव सत्त्वगुणमयचित्सत्ताविकासस्य अणीयस्यप्यवसरे प्राप्ते चिज्जडात्मिका या ग्रन्थि र्वध्यते, सैव जीवानां जीवत्व-सम्पादिका ।

जीवपिण्डेऽपि चेतनो जीवात्मा स्वात्मानं जडशरीररूपं मन्यते, वस्तुतस्तत्रापि शरीरशरीरिणो र्ग्रन्थिर्भवति। कारणे यथा चिज्जडयोर्ग्रन्थिर्भवति तथैव पिण्डात्मके कार्य्येऽपि चिज्जडात्मिका ग्रन्थिरावध्यते ।

विज्ञानेनानेनेदं सिध्यति यत् पिण्डवत् कारणावस्थायां जीवभावोद्भवकरी या प्राथमिकी चिज्जडात्मिका ग्रन्थिराविर्भवति, तत्रैव संस्कारस्यापि प्राथमिकी सृष्टिर्भवति । प्रथमचिज्जडग्रन्थिबन्धनवेलायामेवावश्यकीयानां

समपेक्षितानां तत्त्वानां सृष्ट्या सहैव कारणात्मकं जीवानामन्तःकरणमपि सृज्यते। विनाऽन्तःकरणं संस्कारस्थितेरसम्भवात् तत्रैव स्वतन्त्रसत्तात्मकः प्राथमिको यो हि संस्कार उद्देति स एव सर्वेषां संस्काराणामादिमः ।

यथा चिज्जड़भावापन्नं पिण्डमेकैकं स्वात्मानं ब्रह्माण्डतः पृथक् मन्यत इति प्रत्यक्षसिद्धम्। तद्वदेव कारणशरीरं प्राप्तवत् प्राथमिकजीवान्तःकरणं स्वात्मानं जड-चेतन-राज्याभ्यामुभाभ्यामपि पृथगेव विविनक्ति। एतत्पृथग् ज्ञानमेव प्रारम्भिकस्य संस्कारस्योदर्कः। अथवा पृथगवभासः प्राथमिक-संस्कारोत्पत्ति र्वा युगपदेव जायत इत्यपि वक्तुं शक्यते ॥ २ ॥

प्रसङ्गसङ्गतिसंप्राप्तं सृष्टिनिदानं निर्वक्ति—

तन्निमित्ता सृष्टिः ॥ ३ ॥

स संस्कारो निमित्तं यस्या स्तथोक्ता सृष्टिर्भवतीत्यर्थः। पूर्वसूत्रोक्त-विज्ञानतः सिद्धमिदं यत् जीवसृष्ट्या सार्धमेव प्राथमिकः संस्कारोऽपि प्रादुर्भवति तथा कर्मणोऽपि बीजं संस्कार एव, यतो हि संस्कारत एव कर्माणि समुत्पद्यन्ते। श्रुतिरपि—"यथापूर्वमकल्पयदिति पूर्वसंस्कारेणैव सृष्टेरुद्भवं समर्थयति। स्मृतिरप्यत्र—

"सृष्टेः संस्कार एवास्ति कारणं मूलमुत्तमम्"।

इति संस्कारमूलिकामेव सृष्टिमुद्घोषयति। प्रकृतेः साहजिकस्पन्दनतः स्वत एव जीवपिण्डानां प्रादुर्भावपरम्परा प्रचलति। ततश्च जीवपिण्डानि स्वाभाविकक्रमाभिव्यक्तिनियमत उद्भिज्जतः स्वेदजाण्डजजरायुजादि–क्रमेण मनुष्यदेवपिण्डादिभावमासादयन्ति सृष्टिप्रवाहं प्रवाहयन्ति।

प्रथमतः सृष्टिप्रादुर्भावसमय एव समुत्पन्नः साहजिकः संस्कारः क्रमशो नानारूपतो विपरिणमन् यावद्विलयनमक्षुण्णस्तिष्ठति। समष्टि-ब्रह्माण्डसृष्टिश्च व्यष्टिपिण्डसृष्ट्यैव सम्बन्धमादधाति। तथा व्यष्टिसंस्कारेण-पिण्डानां समष्टिसंस्कारेण च ब्रह्माण्डानां सृष्टिचक्रं प्रचलतीति निर्विवाद सिद्धम्। इत्यतः संस्काराणां सर्वसृष्टिनिदानत्वं सुसम्पन्नमेव ॥ ३ ॥

तद्भेदानाह—

स द्विविधः ॥ ४ ॥

स संस्कारो द्वे विधे यस्य तथोक्तोऽस्तीति सूत्रार्थः। जीवानां गते द्वैविध्यं प्रसिद्धम्। एका जीवान् ब्रह्मतो विमुखयन्ती अस्वाभाविकीत्युच्यते अपरा

ब्रह्माभिमुखं नयन्ती स्वाभाविकीत्युच्यते, इत्येवं द्वैविध्यमनयोः । इत्थमनयोरेव जीवगत्योः पोषकस्य सृष्टिकारणात्मक-संस्कारस्यापि द्वैविध्य मव्याहतमेव ।

स्मृतावप्युक्तम्—

ब्रह्मवैमुख्यनेतैकः संस्कारो जीवबन्धकः ।
स्वस्वरूपप्रदोऽप्यन्यः संस्कारो द्विविधो मतः ॥ ४ ॥

सम्प्रति प्रथम-संस्कार-स्वरूपं निर्वक्ति—

स्वाभाविकान्मुक्तिः ॥ ५ ॥

संस्कारस्य द्वयोर्भेदयो र्मध्ये स्वाभाविकादेकस्मात् संस्कारान्मुक्तिरपवर्गो भवतीति सूत्रार्थः ।

स्मृतिशास्त्रेऽप्यभिहितम्—

प्राकृतोऽप्राकृतश्चैव संस्कारो द्विविधो मतः ।
स्वाभाविको हि भो देवाः ! प्राकृतो बोध्यते बुधैः ॥
अस्वाभाविक-संस्कारस्तथाऽप्राकृत उच्यते ।
स्वाभाविकोऽस्ति संस्कारः स हि मोक्षस्य कारणम् ॥

जीवसृष्टेः स्वाभाविकत्वात् तत्सहचरस्य संस्कारस्यापि स्वाभाविकत्वं सुतरां सिद्धमिति पूर्वसूत्रविज्ञानेनैव साधितम् ।

ब्रह्मप्रकृतेः स्वाभाविक्यास्त्रिगुणात्मिकाया श्रेष्ठाया अनुरूपमेव सृष्टिस्थितिलयात्मिकाः क्रियाः स्वत एव प्रचलन्ति। एतस्मादेव स्वाभाविकान्नियमात् स एव साहजिकः संस्कारो जीवान् अभ्युदयपथं प्रापयन्नुद्भिज्जात् स्वेदजाण्डजजरायुजादियोनि क्रमेण च अनार्य्यादार्य्यं शूद्राद्वैश्य-क्षत्रिय ब्राह्मणान् ब्रह्मचर्य्यतो गार्हस्थ्य-वानप्रस्थ-सन्न्यासाश्रमं, तत्रापि कुटीचक-बहूदक-हंस-परमहंसादिगतिं प्रापयन्नन्ते जीवन्मुक्तपदमप्यर्पयति । इत्येवं यः संस्कारः क्रमशो जीवान् ज्ञानश्रेण्यामग्रेसरान् कुर्वन् आत्मज्ञानं प्रापय्य मुक्तान् विदधाति स एव स्वाभाविकः संस्कारो निगद्यते ।

बीजाङ्कुरवत् संस्कारकर्मणोः सम्बन्ध इति पूर्वमेव प्रमाणितम् । इत्यतः संस्कार-बलेनैव कर्माणि संवर्द्धमानानि जीवान् स्वानुरूपोद्भवां योनिम्प्रापयन्ति। अन्ततः सिद्धमिदं यद् एकस्वरूपेण वर्तमानो जीवान् निर्बाधमग्रे संवर्द्धयन्स्वस्वरूपप्रापको निर्विकारः शुद्धो यो हि संस्कारः स एव स्वाभाविको मुक्तिप्रदश्चेत्यत्र न कोऽपि सन्देहावसरः ।

स्मृतिशास्त्रेष्वप्युपवर्णितोऽयं विषयः—

धर्मस्य धारिका शक्तिस्तस्य चाभ्युदयप्रदः।
क्रमः कैवल्यदश्चैव सहजे प्राकृते शुभे॥
नित्यं जागर्ति संस्कारे प्राणिनां हितसाधके।
विश्वकल्याणदे नित्ये सर्वश्रेष्ठे मनोरमे॥ ५॥

इदानीं द्वितीय-संस्कारस्वरूपमाह—

अस्वाभाविकाद्बन्धनम् ॥ ६ ॥

यो हि अस्वाभाविकः संस्कारः स हि न जीवैः सह जन्यते। अत एव सोऽस्वाभाविक इत्युच्यते। स एव जीवानां गमनागमनचक्रस्य सञ्चालको बन्धनदृढीकारकश्चेति स्मृतिशास्त्रेऽप्युक्तम्—

अस्वाभाविकसंस्कारो निदानं बन्धनस्य हि।
स एव सततं जीवान्संबध्नाति सुनिश्चितम्॥

स्वाभाविकाऽस्वाभाविकयोः संस्कारयोर्भेदं विवेक्तुकामः स्पष्टतो विशदयति यत्—जगज्जनयित्र्या ब्रह्मशक्तेः प्रकृतेः स्वाभाविकस्य गुणत्रयस्य परिणाम आवश्यकः। तत्परिणामानुकूलश्च कर्मणां जीवानां स्वाभाविकानां च संस्काराणां सृष्टिसमुद्भवोऽपि साहजिको निःसन्दिग्धश्च।

अस्वाभाविकस्तु संस्कारः सर्वथा विपरीतोऽस्मात्। यदा जीवो मनुष्यपिण्डे समागत्य स्वाधीनो भूत्वा स्वेच्छया स्वप्रकृतिं नियोजयन् हठात्प्रकृतिविरुद्धां क्रियामाचरितुं प्रारभते तदा तस्य संस्कारस्योत्पत्तिः। तदानीं हि पञ्चकोषपरिपूर्णो जीवो मनुष्यपिण्डप्रविष्टः स्वेच्छाशक्तिं सुदृढां प्रबलां विदधदस्वाभाविकतया प्रबलेन वेगेन स्वेन्द्रियाणि विषयेषु प्रसञ्जयन्नुद्दामप्रवृत्तिर्भवति। तदा हि नवीनैः कर्मभि र्जायमानास्ते नवाः संस्कारा अस्वाभाविकाः कथ्यन्ते। तैर्हि प्रकृतिविरुद्धैर्मानवप्रकृत्या हठात्समुपार्जितैरस्वाभाविकैः संस्कारैरपूर्वाः विविधा जात्यायुर्भोगाः परिणामस्वरूपाः परिपच्यन्ते। अयमेव हेतुर्जीवानां गमनागमनचक्रपरिभ्रमणे तद्बन्धनदृढतायाञ्चेति संक्षेपः॥ ६॥

तत्र समयसम्प्राप्तं स्वाभाविकसंस्कारस्य विशेषमाहात्म्यं निर्वक्ति—

त्रिविधशुद्धिराद्यात् ॥ ७ ॥

एतद्दार्शनिकविज्ञानं परिलिलक्षयिषुर्महर्षिः सूत्रकारोऽभिदधाति-यत् स हि आद्यः स्वाभाविकः संस्कारोऽद्वैतभावापन्नोऽविचलश्चैकस्वरूपोऽपि

अध्यात्माधिदैवाधिभौतिकस्वरूपां त्रिविधामपि शुद्धिं प्रयच्छति । तैश्च शुद्धित्रयैः स्वस्वरूपाधिगत्या जीवो मुक्तिमार्गमाश्रित्य नन्दति शुद्धित्रयापादकानां तत्त्वानां मुक्तिप्रदस्वभावात् । विज्ञानमिदमन्यथाऽपि विवरीतुं शक्यते यथा—

स्वाभाविकेषु संस्कारेषु क्रमोन्नतेरन्ततश्च मुक्तितत्त्वस्यापि विद्यमानत्वाद् अध्यात्माधिदैवाधिभौतिकात्मिकायास्त्रिविधाया अपि शुद्धेरवश्यम्भावित्वं स्वभावसिद्धत्वञ्चेति । स्मर्य्यते चात्र--

स्वाभाविको हि संस्कारस्त्रिधां शुद्धिं प्रयच्छति
आध्यात्मिकाधिदैवाधिभौतिकीं क्रमशः सुराः ॥ ७ ॥

त्रिविधशुद्धिप्रसङ्गेन तद्विशेषमप्याह--

एकस्यापि षोडशकलाप्रकाशः ॥ ८ ॥

यथा चन्द्रः प्रतिदिनं कलयैकया वर्द्धमानः प्रतिपदमारभ्य पूर्णिमां यावत् क्रमशः षोडशभिः कलाभिः परिपूर्णो भवति, तथैव स्वाभाविकः संस्कारः स्वाभ्युदयनिःश्रेयसकरीं सम्पूर्णामपि शक्तिं क्रमविकाशत एवासादयति ।

अयञ्च पूर्णविकाशः स्वभावतः साधनसाहाय्येन चोभयथापि भवति । तत्र स्वभावतः क्रमविकाशो यथा—स्वेदजत्वादण्डजत्वादि—जरायुजान्त-योनि-क्रमेण, अनार्य्यमनुष्यत्वादार्य्यमनुष्यत्वादिभिः, तेष्वपि शूद्रत्व-वैश्यत्व-क्षत्रियत्व-ब्राह्मणत्वादिभिः, ब्रह्मचर्यादिसन्यासान्ताश्रमैस्तत्रापि कुटीचकबहूदकहंसपरमहंसादिभिरवस्थाक्रमैरित्येवं षोड़शभिः सन्धिभिः परिस्फुटतामासादयन्नद्वितीयः स्वाभाविकः संस्कारः परिपूर्णत्वमासादयति ।

यद्यपि मनुष्ययोनौ साधनबलेनैव पूर्णकलासादनं सम्भवति । तथाप्यत्रोदाहरणक्रमेण षोड़शकलासादृश्यतया षोडशसोपानानि निदर्शितानि । एतदुदाहरणानुसृत्या मनुष्ययोनितो देवयोनिं यावदन्यविधान्यपीदृशानि सोपानानि भवितुमर्हन्ति । तत्रापि पूर्णकलाविकाशः साधनाधीन एव भविष्यति । तानि च साधनानि तपोयोगज्ञानमूलकान्येवोहनीयानि ।

वैदिककर्मपद्धत्या सम्बद्धस्य स्वाभाविकस्य संस्कारस्य यः क्रमविकाशो वैदिकैः षोडशभिः संस्कारै र्भवति, अर्थात् साधनसाहाय्येन पुरुषार्थमाश्रित्य वेदोक्तपद्धत्या अस्वाभाविकानां संस्काराणां वेगं निरोध्य स्वाभाविक—संस्कारसम्बन्धिनीनां षोडशीनामपि कलानां विकाशो भवतीत्येतदपि पुरतो विस्तरेण स्फुटीभविष्यति ।

स्मृतिशास्त्रेषु विस्तरशो विषयोऽयमुपवर्णितो यथा—

स्वाभाविकी यदा भूमिः संस्कारस्य प्रकाशते ।
यच्छन्त्यभ्युदयं नृभ्यो दद्यान्मुक्तिमसौ क्रमात् ॥
एतावच्छ्रौत-संस्काररहस्यमवधार्य्यताम् ।
वेद्या भवद्भिरप्येषा श्रुति र्देवाः ! सनातनी ॥
संस्कारेष्वहमेवाऽस्मि वैदिकेष्वखिलेष्वहो ।
स्वसम्पूर्णकलारूपैस्तन्नॄन् स्वाभिमुखं नये ॥
गर्भाधानं पुंसवनं सीमन्तोन्नयनं तथा ।
जातकर्म तथा नामकरणञ्चान्नप्राशनम् ।
चूड़ोपनयने ब्रह्म-व्रतं देवव्रतं तथा ।
समावर्तनमुद्वाहोऽग्न्याधानं विबुधर्षभाः ॥
दीक्षामहाव्रतञ्चान्त्यः सन्यासः षोडशो मतः ।
संस्कारा वैदिका ज्ञेया उक्तषोडशनामकाः ॥
अन्ये च वैदिकाः स्मार्ताः पौराणास्तान्त्रिकाश्च ये ।
एषु षोडशसंस्कारेष्वन्तर्भुक्ता भवन्ति ते ॥

संक्षेपेणेदं विज्ञेयं यद् स्वाभाविकानां संस्काराणां क्रमाभिव्यक्तिश्चन्द्रवदेव भवति। स्वतो वा स्यात् साधनबलेन वा स्यात्। क्रमाभिव्यक्तिमतस्तस्य संस्कारस्य स्वरूपे नाणुरपि विभेदः । यतो हि तत्रान्तरायोत्पादकस्य न कस्यापि जैवस्य कर्मणः सम्पर्कः सम्भवति । स तु प्रकृतिसहजात एकरसो-ऽद्वितीयः क्रमशोऽभिव्यक्तिमासादयन् पूर्णतामासादयति ।

यथा यथा च तस्य विकाशो भवति तथा तथा त्रिविधापि शुद्धिस्तद्वि-काशानुरूपैव समधिगम्यते। अवसाने च शुद्धित्रयस्य पूर्णतया मुक्तिपथं परिष्कृत्य च परमानन्दोपलब्धिरासाद्यत इति संक्षेपः ॥ ८ ॥

इदानीमस्वाभाविक-संस्कार-स्वरूपमभिधत्ते—

द्वितीयस्यानन्त्यं सृष्टि-वैचित्र्यात् ॥ ९ ॥

जीवो यदा प्रकृतितरङ्ग-वशादान्दोलायमानेन स्वाभाविकेन क्रमशो विका-शमासादयता संस्कारेण मनुष्ययोनिमासादयति तदा पञ्चकोषपरिपूर्णः स्वयं पूर्णशक्तिविशिष्टो नवीनसंस्कारार्जनक्षमोऽप्रतिहतया स्वेच्छया स्वोद्दाम-क्रियाशक्त्या नानाविधान् यान् नूतनान् संस्कारान् समर्जयति, त एव नवाः संस्कारचया अस्वाभाविका अभिधीयन्ते । वासनानां वैचित्र्याच्च तेऽनन्ता अनेकधा भिद्यन्ते ।

स्मृतावप्युक्तम्—

अस्वाभाविकसंस्काराः पुंभिः स्वयमुपार्जिताः ।
अनन्तास्तत्प्रभेदाः स्युर्जीवबन्धन–हेतवः ॥

प्रकृतिप्रवाह-वशादुत्पन्नो हि स्वाभाविकः संस्कार एक एव । अस्वाभाविकस्तु मानवेच्छाया अपरिमेयत्वात्तदुत्पन्नतया अनन्तः ।

यतो हि—मानवानां प्रकृतिवैचित्र्याद्वासनावैचित्र्यम् । इच्छाऽपरपर्य्यायाया स्तस्या अपरिमेयत्वात्तज्जन्यानां संस्काराणामानन्त्यं स्वभावसिद्धमेव ।

स्वीयगुणत्रयस्य परस्परं घातप्रतिघाताभिभवाद्याश्रयतया वैषम्यमुपगता प्रकृतिरानन्त्यं वैचित्र्याणामासदयतीत्यतोः मनुष्यप्रकृतिरपि नानावैचित्र्यं समश्नुते । अस्मादेव हेतोरस्वाभाविकानां संस्काराणामप्यानन्त्यं स्वभावसिद्धम् ॥ ९ ॥

तस्य प्रारब्धिस्थानमाह—

मानवे तदारम्भः ॥ १० ॥

स्वाभाविकस्य संस्कारस्य प्रारब्धिर्यथा प्रकृते र्लीलासाम्राज्यपयोऽब्धेश्चिज्जड़ग्रन्थिरूपे बुद्बुदे भवति तथैवास्वाभाविकस्यापि तस्य मनुष्ययोनाविह प्रारम्भो भवति । चिज्जडग्रन्थिसन्धौ उद्भिज्जस्वेदजसन्धौ स्वेदजाण्डजादिसन्ध्योरित्येवं मनुष्ययोनितः प्राक्तनेषु चतुर्ष्वपि सन्धिषु जीवः प्रकृतिवशगः सन् पराधीन एव तिष्ठति । तदनन्तरमिह मानवयोनिश्रेणिमुपेत्य स्वाधीनताधिकारमासादयति, ततश्चात्र मानवयोनिमुपेत्य इच्छाशक्तिक्रियाशक्तिबलेन स्वाधीनो भूत्वा विचरति ।

अनया स्वाधीनतयैव सार्धं तस्य जीवस्याऽभ्यन्तरीणाः सर्वा अपि वैचित्र्यगर्भा वासनाः सञ्चिता उद्बुद्धा भवन्ति । तदनुसारिणश्चास्वाभाविकाः संस्काराः संगृह्यन्ते । फलतो यदा मानवदेहे जीवः पूर्णप्रकृति र्भूत्वा कर्माणि सञ्चिनोति तदैव तत्राऽस्वाभाविकानां संस्काराणामपि प्रवाहः प्रादुर्भवति ॥ १० ॥

तदवयवान् संख्याति—

स तु त्र्यवयवः ॥ ११ ॥

सोऽस्वाभाविकः संस्कारस्त्रयोऽवयवा यस्य तथाविध इति सूत्रार्थः ।

त्रिगुणात्मिकायाः सृष्टेः स्वाभाविकभेदत्रयानुकूलतया मानवानामस्वाभाविकः संस्कारोऽपि भेदत्रयेणैव विभक्तो भवति ।

ते च त्रयो भेदाः सञ्चित-क्रियमाण-प्रारब्धाभिधानो ज्ञेयाः। तत्र च मनुष्यैः स्वेच्छाशक्त्या स्वक्रियाशक्त्या च ये संस्कारा नवीना असंख्याताः प्रतिमुहूर्तं सञ्चीयमानाः स्वीयचिदाकाशे संगृह्यन्ते त एव संस्काराः सञ्चितशब्देनाभिधीयन्ते। यतो हि ते तत्रानङ्कुरिता धान्याढके धान्यवीजसंग्रहवत् संगृहीता एव तिष्ठन्ति। तेभ्य एव संस्कारसमूहेभ्यः कियन्तः पृथग्भूय जीवस्यैकजन्मनो निदानीभूता स्तज्जन्मोपयोगिनो जात्यायुर्भोगान् निर्मातुमङ्कुरिता भवन्ति त एव संस्कारसंघाः प्रारब्धशब्दवाच्या भवन्ति। ये च मानवैः प्रारब्धं भुञ्जानै र्नूतनाः संस्काराः समुपार्ज्यन्ते त एव क्रियमाण इत्यभिधीयन्ते। अत्र विषये स्मृति-शास्त्रेष्वेवमुपलभ्यते तद्यथा—

दुर्दमा कर्मणः शक्तिस्त्रिधाऽवध्नाति प्राणिनः।
तत्प्रकारत्रयं देवाः! नूनं वेदेषु विद्यते॥
ख्यातं सञ्चित-प्रारब्ध-क्रियमाणाभिधैर्ननु।
यल्लाणात् संसृतावादौ जीवैर्जीवत्वमाप्यते॥
तावन्तं कालमारभ्य संस्कारा जैवकर्मणः।
यावन्तः सम्प्रगृह्यन्ते सञ्चितं कर्म ताञ्जगुः॥
ये फलोन्मुखसंस्कारा जात्यायुर्भोगरूपकम्।
तथा जीवप्रकृत्यादिफलं दातुं मुहुर्मुहुः॥
जनयन्ते वपुः स्थूलं तान् प्रारब्धं प्रचक्षते।
स्थूलदेहान्विताः जीवा नैजीं जैवीं हि वासनाम्॥
सन्तृप्त्या सफलां कर्तुं नूतनं कर्म कुर्वते।
तत्त्वज्ञानविनिष्णातैः क्रियमाणं तदुच्यते॥ ११॥

तदीयं प्रधानं कार्य्यं वर्णयति—

तस्मादाविर्भाव आवागमनचक्रस्य॥ १२॥

चिज्जडग्रन्थिनिबद्धो जीवः स्वप्रारब्धावस्थात आरभ्योद्भिज्जस्वेदजाण्डजजरायुजादियोनिषु परिभ्रमन्निर्बाधं क्रमोन्नतिमासादयन् अवसाने मनुष्ययोनिमासाद्याऽस्वाभाविकसंस्कारग्रहपरो भूत्वा स्वक्रमोन्नतौ स्वात्मनैवान्तरायं समुपस्थापयति। स एवान्तरायः तस्य गमनागमनचक्रस्य निदानम्। नवीना अस्वाभाविका एव संस्कारास्तस्य जीवस्य कृते नवाञ्जात्यायुर्भोगाञ्जनयन्तः स्वाभाविक-संस्कारसमुपार्जननिरोधेन क्रमोन्नतौ विघ्नमाचरन्ति। इत्येवं स जीवः

संसारचक्रे परिभ्रमन्ननन्तकालं यापयन्दैवात् कदाचिद् गुरुदेवत्सङ्गप्रसादतः सुमार्गमासादयन्नग्रे समेधते।

स्मृतिषु बहुधोपलभ्यते,

तद्यथा—

सृष्टेः संस्कार एवास्ति कारणं मूलमुत्तमम्।
प्राकृतोऽप्राकृतश्चैव संस्कारो द्विविधो मतः॥
स्वाभाविको हि भो देवाः! प्राकृतः कथ्यते बुधैः।
अस्वाभाविकसंस्कारस्तथाऽप्राकृत उच्यते॥
स्वाभाविकोऽस्ति संस्कारस्तत्र मोक्षस्य कारणम्।
अस्वाभाविकसंस्कारो निदानं बन्धनस्य वै॥
स्वाभाविको हि संस्कारस्त्रिधा शुद्धिं प्रयच्छति।
देवाः षोडशभिः सम्यक् कलाभि र्मे प्रकाश्यते॥
मुक्तिप्रदोऽद्वितीयोऽपि स ंस्कारः प्राकृतो ध्रुवम्।
साहाय्यात् षोडशानां मे कलानां कर्म-पारगाः॥
ऋषयः श्रौतसंस्कारैः शुद्धिं षोडश-संख्यकैः।
आर्य्यजाते विशुद्धाया रक्षुर्यत्नतः खलु॥
अस्वाभाविक-संस्कारा जीवान् बध्नन्ति निश्चितम्।
अनन्ता स्तस्य विज्ञेया भेदा बन्धन-हेतवः॥
स्वाभाविकी यदा भूमिः संस्कारस्य प्रकाशते।
यच्छन्त्यभ्युदयं नृभ्यो दद्यान्मुक्तिमसौ क्रमात्॥ १२॥

गमागमचक्रविस्तृतिस्वरूपं वर्णयति—

तच्चङ्क्रमणं मृत्युतः प्रेतावधि॥ १३॥

तस्याऽस्वाभाविक-संस्कार-सस्वलितजीवस्य मृत्युतो मृत्युलोकात् प्रेतावधि प्रेतलोकान्तमेव चङ्क्रमणं भवतीति सूत्रार्थः।

इह मानवयोनावागत्य पञ्चकोषपरिपूर्णः पूर्णावयवसम्पन्नो जीवो यदोद्दामप्रवृत्त्या स्वतःश्रेच्छाशक्तिक्रियाशक्तिभ्यामस्वाभाविकान् संस्कारान् स ंगृह्य अस्वाभाविकेषु भोगेष्वासक्तो भवति, तदा सोऽनार्य्योऽसभ्यो मृत्युतः स्थूल-शरीरं विहाय प्रथमं प्रेतलोक एव गमागममारभते।

यतो हि—स इन्द्रियाणामस्वाभाविक्या प्रवृत्त्या तेष्वस्वाभाविक्या आसक्त्या च यां तीव्रातितीव्रां वासनां सञ्चिनोति तद्बलेनास्मिन् मृत्युलोक एव

मोह-पाशनिगडितो मरणानन्तरं एतत्संश्लिष्टप्रेतलोकमुपेत्य तत्रैव निरुध्यते, नाग्रे भवति तस्य गतिः। तत्र च स्ववासनानुकूलान् भोगान् क्षपयित्वा पुनर्मृत्युलोकमुपैति। इत्येवमस्यां प्राथमिकयामवस्थायां तथाभूतस्य जीवस्य गमागमचक्रप्रसारः प्रेतलोकावध्येव भवति ॥ १३ ॥

इदानीं चक्रक्रमगतिं ब्रूते—

तत्प्रसरति नरकतः पितृलोकम् ॥ १४ ॥

तद् गमागमचक्रं नरकलोकतः पितृलोकं यावत् प्रसरति गमनं करोतीति सूत्रार्थः।

मानवो यदात्र कर्मभूमौ मृत्युलोके पौनःपुन्येन जन्ममृत्यू गृह्णन् कर्मभूमेरस्याः प्रतापेन स्वत एवोपलब्धकर्मकर्तृत्वमुयोगेन अनार्य्यभावत उन्नतामवस्थामधिगच्छति, तदा स सुखदुःखनिदानयोः सदसदात्मकयोः कर्मणोः सम्यज्ज्ञानमधिगत्य पूर्वतो भूयस्या मात्रया सुकृतदुष्कृते समुपार्जयितुं समर्थतया लब्धाधिकारो मरणानन्तरं प्रेतलोकसीमानमतिक्रम्य तदग्रिमलोकमप्युपैति। तथा हि—स स्वकृतकर्मानुसारं पापभोगाय नरकलोकं पुण्यभोगाय च पितृलोकं यावदुपैति।

स्मृतिशास्त्रेऽभिहितम्—

परिधिस्तस्य चक्रस्य द्विधा भिन्नोऽस्त्यसंशयम्।
तत्रैकः प्रेतलोकोऽस्ति मृत्युलोकोऽपरस्तथा ॥
असौ चक्रस्य परिधिः पितृलोकावधि क्रमात्।
विस्तीर्य्य प्रथमं पश्चान्नरके स्वरपि ध्रुवम् ॥

तस्य जीवस्य ज्ञानक्रियाशक्तिवृद्ध्या प्रातिभाव्यमपि समेधतेऽतः स पुण्यपापयोः पूर्णाधिकारवान् स्वगमागमचक्रपरिधिमपि पूर्वतोऽधिकतरं विस्तारयति। बाल्यकालेऽज्ञानासामर्थ्यतो यथा मानवः पापपुण्ययोर्न विशेषाधिकारमावहति तथैव पूर्वसूत्रोक्तावस्थायामपि स्वभोगचक्रपरिधेः सङ्कोचेन पुण्यपापयोर्न पूर्णाधिकारवान्। अत्र तु स्वोन्नतावस्थायां स्वोच्चाधिकारप्राप्त्या स्वभोगचक्रपरिधेरपि विस्तीर्णतामेवासादयति।

चतुर्दशसु भुवनेषु भूर्लोको भुवनमेकं गण्यते। स च ब्रह्माण्डस्य चतुर्दशांशानामेकोऽशः। पुनश्च स मृत्युलोक-नरकलोक-प्रेतलोक-पितृलोकेतिनाम्ना चतुर्धा विभक्तः। तत्र चायमस्माकं लोक एव प्रथमो मृत्युलोकशब्दभाक्, यतो हि जीवा अत्र लोके मातृगर्भतो जनिमासाद्य पञ्चत्वमपि यान्ति। अस्मा-

नमित एतल्लोकसंश्लिष्ट एव प्रेतलोको द्वितीयः। मृत्युलोकावशिष्टदुःखभोगाश्रयो लोको नरकलोकस्तृतीयः। एतल्लोकसन्निहितः सामान्यसुखभोगभूमिः पितृलोकश्चतुर्थः। इमामवस्थामुपेतो जीवश्चतुर्ष्वप्येषु लोकेषु गमनागमनचक्रद्वारा प्राप्ताधिकारः स्वगतागतं वितनुते ॥ १४ ॥

अधुना क्रमप्राप्तां सर्वाभ्यर्हितां गतिं वर्णयति—

विस्तृतिश्चतुर्दशभुवने ॥ १५ ॥

विस्तृतज्ञानक्रियाशक्तीनां जीवानां चतुर्दशभुवनेऽपि गतिविस्तारो भवतीत्यर्थः।

मानवो यदा स्व-क्रिया-ज्ञानशक्त्यधिकारमधिकं विस्तारयति, तदा चतुर्दशभुवनेषूपरि षट्स्ववशिष्टेषु भुवः स्वर्महर्जनस्तपःसत्यमित्येतेषु लोकेषु तथाऽधस्तनेष्वपि सप्तसु तल-अतल-वितल-सुतल-रसातल-तलातल-पातालेषु लोकेषु सुखभोगपरिसमाप्तये गमागमचक्रपद्धत्या यातायातमातनोति, पुनश्चावसानेऽत्र मृत्युलोके विश्राममासादयति। पितृलोकोऽन्ये च ये षड्लोका उपरिस्थितास्ते सप्तापि दैवसुखभोगाश्रया लोकाः। अधस्तनाश्च तलादयः सप्तलोका आसुरभोगयोग्या इति विभावनीयम्।

एतत्सूत्रोक्तविज्ञानतात्पर्य्यमिदम्, यदस्यामुन्नतावस्थायां समागतो जीवोऽस्वाभाविकसंस्काराणामसाधारणेन बलेन स्वगमनागमनचक्रमेवं विस्तारयति यत् स्वभोगाभिलाषं समापयितुं चतुर्दशस्वपि भुवनेषु गतागतमाचरति।

अत्र विषये स्मृतिशास्त्रेऽप्यभिहितम्—

तमः प्रधानं प्रथमं चक्रमेतदनन्तरम्।
तमोरजःप्रधानञ्च रजःसत्त्वप्रधानकम् ॥
शुद्धसत्त्वप्रधानं हि जायते तदनन्तरम्।
ऊर्ध्वलोकं ततो मृत्युलोकं व्याप्नोति केवलम् ॥
परिधिस्तस्य चक्रस्य ततोऽन्ते मयि लीयते।
मृत्युलोके गतिस्तस्य स्वतो हि सहजा सती ॥
अथवाऽसाद्य शुक्लत्वं सत्यलोकावधि ध्रुवम्।
गत्वा तत्र तदैवाशु सर्वथैव प्रशाम्यति ॥ १५ ॥

द्वितीयस्यापूर्णतामुपपादयति—

द्वितीयो नाऽलं चक्रभेदाय ॥ १६ ॥

यो हि संस्कारश्चक्रं निर्माति सोऽसमर्थस्तद्भेदाय "यद्येन जन्यते न

तत्तेन विनाश्यते" इति नियमात् । अतोऽस्वाभाविकः संस्कारो गमागमचक्रभेदाय सर्वथैवासमर्थः ।

धर्मस्य द्विविधो हि विहितोऽधिकारः । एकश्चैहलौकिकपारलौकिकाभ्युदयप्रदायकरूपो द्वितीयश्च निःश्रेयससमर्पकस्वरूपः । तत्रास्वाभाविक संस्कारसमुपार्जितेन सुकृतेनाभ्युदयस्तूपलब्धुं शक्यते, निःश्रेयसाधिगतिर्हि तदधिकारबाह्यैव सम्मतेति न तेन निःश्रेयसो लब्धुं शक्यः ।

जीवसमष्टिवासनापुञ्जत एव ब्रह्माण्डोत्पत्तिस्तत्र च ब्रह्माण्डोत्पत्तिनिदानस्वरूपाणां वासनानामस्वाभाविका एव संस्कारा हेतवः । तैश्चास्वाभाविकैः संस्कारैः सर्वत्र चतुर्दशस्वपि भुवनेषु यथेच्छमभ्युदयमधिगच्छन् परिभ्रम्य जीवो गमागमचक्रप्रवाहतः पुनरपि मृत्युलोकमेव समुपैति । यतो हि गमागमचक्रमस्वाभाविकसंस्कारमूलकम्, अस्वाभाविकश्च संस्कारो जैववासनामूलकः । अतश्च यावज्जीववर्गः स्ववासनां प्रविलाप्य प्राकृतिके स्वाभाविके संस्कारप्रवाहे स्वात्मसमर्पणन्न करोति, तावन्न स गमागमचक्रभेदं विधाय मुक्तिपथपथिको भवितुमर्हति ।

श्रीगीतोपनिषद्यप्यभिहितम्—

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन !
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ॥

इत्युदाहृत्यावसीयते यद् या व्यवसायात्मिका बुद्धिरेकाऽद्वितीयेति, सा मुक्तिप्रदा । अव्यवसायात्मिका या च बहुशाखावती अनन्ताऽपरिमितेति, सा बन्धननिदानम् । तथैवैकतत्त्वपरः स्वाभाविको हि संस्कारो जीवान् यथाधिकारं यथानियममग्रेसरानुन्नतिपथपथिकान् विदधन्मुक्तिभूमिमपि प्रापयति । अस्वाभाविकस्तु संस्कारोऽनन्तशाखासंश्रयणतो बहुत्वादनन्तत्वादपरिमेयत्वाच्च जीवाञ्नितरां गमागमचक्र एव पातयति, न ततोऽपसर्तुमवसरमप्युपयच्छतीति ॥ १६ ॥

चक्रभेदने कः समर्थ इत्याह—

तत्सामर्थ्यमाद्यस्याऽबाधितत्वात् ॥ १७ ॥

आद्यस्य स्वाभाविकस्य संस्कारस्य अबाधितत्वाद् अविहतगतित्वात् तस्मिन् चक्रभेदने सामर्थ्यं तत्सामर्थ्यम् इति सूत्रार्थः ।

स्वाभाविको हि संस्कारो जीवान् प्रथमसृष्टिदशात एवारभ्य क्रमशो नियमेन समुन्नयन् चतुरशीतिलक्षात्मिकासु जीवयोनिषु संसारयन् निर्बाधं

मनुष्ययोनावानयति । तत्र च मानवयोनौ जीवोऽस्वाभाविकसंस्कारसमुपार्जनया यद्यपि गमागमचक्रावर्तैं पतितः पुनः पुनस्तत्रैव पतितो बम्भ्रम्यते । तथापि तत्र शुद्धित्रयस्यापि पूर्णसत्तायास्सत्त्वात् तदग्रिमतया तत्त्वज्ञानावस्थायां महापुरुषत्वदशायां निष्कामभावनोदयेन वासनाराहित्येन च जीवन्मुक्तिदशामुपेत्य पुनरपि स्वस्मिन् स्वाभाविकस्य संस्कारस्योदयेन तेन स्वपदमासाद्यत एव ।

यद्यपि चतुरशीतिलक्षात्मकोद्भिज्जादियोनिगैर्जीवैस्सह जीवन्मुक्तस्यान्धकारप्रकाशवद् रात्रिन्दिनवदान्तर्य्यं, तथापि जीवन्मुक्ते पुरुषे जैववासनाराहित्येनान्यत्र च प्रकृतिपारवश्येनोभयत्रापि सादृश्यातिशय एव स्फुरति ।

तथा हि मानवयोनितोऽधोयोनिगा जीवा यथा प्रकृतिपरवशाः प्रकृतिचेष्टयैव परिचाल्यन्ते, स्वीयेच्छाक्रियाशक्त्युपयोगन्नैव कर्तुमर्हन्ति, तथैव जीवन्मुक्तावस्थामुपेतास्तत्त्वज्ञानिनो महापुरुषाः प्राकृतिकनियमानुकूलमेव शारीरिकं मानसञ्च व्यापारं प्रयुञ्जते । यतो हि ते तदानीं वासनानाशेन तत्त्वज्ञानोदयेन च स्वेच्छाक्रियाशक्तिविरहिता एव भवन्ति । एवमत्रोभयत्रापि एकोऽद्वितीयः स्वाभाविक एव संस्कारः सर्वं व्यापारं परिचालयतीति सुनिश्चितम् ।

विज्ञानमिदमन्यथापि विव्रियते । तथा हि—अस्वाभाविको हि संस्कारो जीवानां वासनया समुत्पद्यते । यतस्तत्राऽस्वाभाविकी नवीनता जटिलता च निगूढा, अतश्च तेन बन्धनमेव सूयते न मुक्तिपथ आविष्क्रियते ।

दृष्टान्ततो यथा—किञ्चन सूत्रं परस्परं संसक्ततया जटिलितं स्यात्तदनन्तरञ्च तस्य ग्रन्थिविमोचनं त्यक्त्वा पुनस्तज्जटिलितमेवोत्तरोत्तरं क्रियेत चेत् तर्हि तद्ग्रन्थिविमोकः कदापि न स्यात् ।

स्वाभाविकस्य संस्कारस्य या क्रिया भवति सा तु सरलैकरसा सुगमेति यतो हि कर्मणो बीजभूतः संस्कार इति पूर्वमेवाभिहितम् । अतः स संस्कारः कर्म अङ्कुरोन्मुखं कृत्वा तदग्रे प्रवृत्त्यै प्रेरयतीति तदीयं स्वाभाविकं कर्तव्यम् ।

परिणामतोऽस्वाभाविको हि संस्कारः कर्मगतिं जटिलां विदधज्जीवं गमागमचक्रे पातयति । स्वाभाविकस्तु स कर्मगतिं सरलयन् तद्ग्रन्थिञ्च विमोचयन् गमनागमनचक्रतो जीवान् विमोचयतीति मुक्तिहेतुः केवलं स्वाभाविकः संस्कार एव सिध्यति ॥ १७ ॥

तद्गतिपरिणामं विवेचयति—

तत्कलाभिरभ्युदयनिःश्रेयसे ॥ १८ ॥

स्वाभाविको हि संस्कारः क्रमशो विकाशमासादयन् षोडशभिः कलाभिः परिपूर्णः पूर्णमेव फलं प्रयच्छतीति विस्तरतः प्रतिपादितं पूर्वम् ।

धर्मशक्तिसंवर्धितो जीव उद्भिज्जयोनितः क्रमशो विकाशमासादयन् परमहंसदशानुपेतः पुनः स्वस्वरूपमेवोपलभते। धर्मशक्तिरेव स्वाभाविकं संस्कारं क्रमविकाशाय प्रोत्साहयति। यथा धर्मेऽभ्युदयनिःश्रेयसशक्तिरस्ति तथैव स्वाभाविकसंस्कारेऽपि सास्तीति नाणुरपि तत्र सन्देहावसरः। स्वाभाविकस्य संस्कारस्यक्रमविकाशः प्रथममभ्युदयं चरमे च स्वपूर्णतया निःश्रेयसं प्रयच्छतीति ॥ १८ ॥

विज्ञानमिदमधिकं विशदयितुकामः पुनराह—

ऊर्ध्वगस्थास्ताः ॥ १९ ॥

ता अभ्युदयनिःश्रेयसप्रदाः कला ऊर्ध्वगामिसंस्कारस्था इति सूत्रार्थः। स्वाभाविकसंस्कारस्वरूपं स्फुटं लक्षयितुकामो ब्रूते–यद् यो हि संस्कारो जीवसृष्टिसहचरः, प्रकृतिस्वभावसम्बद्धः, प्रकृतिश्च प्रोद्यत्तरङ्गां विदधत्, तत्तरङ्गान् स्वस्वरूपे नयति, स एव स्वाभाविकः संस्कारोऽभिधीयते। अथवा यश्च कर्मबीजात्मकः संस्कारो जडचेतनात्मकेऽस्मिन् जगति स्वीयत्रिगुणात्मकस्वभावतएवोद्यत्तरङ्गाया जडायाः प्रकृतेस्तरङ्गान् नियमतः स्वस्वरूपं प्रापयति, स एव स्वाभाविक इति यावत्। यश्च तांस्तरङ्गान् स्वस्वरूपमप्रापय्य प्रकृतिमर्यादाभ्यन्तर एव तत्प्रवाहे पौनःपुन्येनावर्तयति स एवास्वाभाविको निगद्यते।

अन्यथापीदं बोद्धुं शक्यते—तथाहि—यः संस्कारो नियमतो जीवान् स्वस्वरूपत्वाधिगमाय प्रेरयति, स एव स्वाभाविकः। यश्च मुहुर्मुहुर्जीवानिन्द्रियाभिमुखानेवाकृषति स एवास्वाभाविक उच्यते। यो हि संस्कारो यथार्थतो धर्मगतिमृज्वीं प्रबलां च करोति स स्वाभाविकः। स हि जीवावस्थया सहैव प्रकृतितरङ्गे स्वत एवोत्पद्यते। तस्मिंश्च धर्मस्य जगद्धृतिमत्त्वशक्ति र्जीवानामभ्युदयनिःश्रेयसदा च शक्तिरव्यक्ते तिष्ठतः।

अतो मानवसंस्कारराशिषु यत्रेदं लक्षणमुपलक्ष्यते स हि सर्वोऽपि स्वाभाविकसंस्कारसजातीय एव इत्यसन्दिग्धम्। विज्ञानमिदमित्थमपि बोद्धुं शक्यते—

तथाहि—प्रकृतिप्रवाहतो यथा जीवोत्पत्तिः स्वाभाविकी तथैव, तत्स्वरूपोपलब्धिरपि स्वाभाविकीत्यतो जीवान् मुक्तिपदं प्रापयन्त्याः क्रियाया बीजात्मकं कारणमेव स्वाभाविकः संस्कारः। स च सर्वोऽपि तत्रोर्ध्वगामिषु संस्कारराशिषु विद्यत इति ॥ १९ ॥

प्रसङ्गतो वैदिकान् संस्कारान् साधयति ।

वैदिकनिष्ठाश्च ॥ २० ॥

स्वाभाविकसंस्कारस्य साधारणीमवस्थामभिधायेदानीमसाधारणीमवस्थामभिधत्ते—वैदिकेति—वेदे भवा वैदिकाः संस्कारास्तेषु निष्ठा स्थितिर्यासां कलानां ता अपि अभ्युदयनिःश्रेयसप्रदा इत्यर्थः ।

मनुष्ययोनितोऽधःस्थयोनिषु केवलं प्राकृतिकी एव कर्मधारा प्रचलति । न तत्र जीवानां स्वसंकल्पो हेतुः कर्मोत्पत्तौ । यतस्तासु योनिषु स्वाभाविकानां संस्काराणां क्रियानिर्बाधं प्रचलतीत्यत एव तासु योनिषु स्वाभाविकानां संस्काराणां साधारणावस्थैव तिष्ठति ।

मनुष्ययोनावपि वर्णाश्रममर्य्यादाशालिन्यामार्य्यजातौ स्यादाहो तद्विरहितायामनार्य्यजातौ वा स्यादुभयत्रापि प्रकृतेः स्वाभाविकेनैव नियमेन या क्रमोन्नतिः सततं प्रवर्तमाना समेधते तत्रापि स्वाभाविकानां संस्काराणां साधारण्येव स्थितिरित्यभ्युपगन्तुं शक्यते ।

परन्तु श्रुत्यनुसारेण श्रुतिसम्मतस्मृतिपुराणानुसारतोऽपि ये क्रमोन्नतिसोपानस्वरूपा विशेषसंस्कारा आर्य्यजातौ निर्धारिताः सन्ति, यैश्च संस्कारैः सुसंस्कृताऽऽर्य्यजाति र्ध्रुवां सिद्धिं विन्दन्ती एकस्मिन्नेव जन्मनि मुक्तिपथमध्यारोढुं समर्था भवति,—तेषां शास्त्रीयसंस्काराणां क्रियाभिर्ये स्वाभाविकाः संस्काराः सम्बन्धभाजः सन्ति त एवासाधारणाः संस्कारा निगद्यन्ते । ते च श्रौतस्मार्तपद्धतिप्रचालितेषु अष्टचत्वारिंशत्सु संस्कारेषु षोडश प्रधाना गण्यन्ते । ते चाभ्युदय-निःश्रेयसप्रदानक्षमा अवसीयन्ते । तत्र गर्भाधान-संस्कारतोऽभ्युदयप्रारब्धिः क्रमशः समेधमाना चरमे संन्यासे निःश्रेयसाधिगत्या विश्राम्यति ।

स्मृतिषु विस्तरशो वर्णितः प्रभावः संस्काराणाम्, तथा हि—

वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम् ।
कार्य्यः शरीरसंस्कारः पावनः प्रेत्य चेह च ॥
गार्भैर्होमैर्जातकर्मचौलमौञ्जीनिबन्धनैः ।
बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते ॥ इति ॥ २० ॥

तद्धेतुमाह—

नित्यज्ञानमयत्वाद्वेदानाम् ॥ २१ ॥

वेदानां नित्यज्ञानमयत्वन्तु प्रथमे पादे विस्तरशो वर्णितमेव । तादृशानां

नित्यज्ञानमयानां भगवदाज्ञास्वरूपाणां वेदानां यदपि शासनं स्यात्तत् सर्वमपि सत्यं नित्यं अवेदित्यत्र नाणीयानपि सन्देहः । एताहशैर्वेदशासनैर्याः क्रियाः प्रवर्तिताः स्युस्ता अपि सिद्धा एवेत्यपि निर्विवादमेव ।

अपरञ्च यथा बीजानां वृक्षैः सह वृक्षाणाञ्च बीजैः सह नित्यः सम्बन्ध ऐक्यञ्च, तथैव कर्मणां संस्कारैः सह संस्काराणाञ्च कर्मभिः सार्द्धं नित्यः सम्बन्ध ऐक्यञ्च ।

यथा विषमायामपि भूमौ वृक्षमूले आलवालरचनया जलधाराया नियमनं सारल्यञ्च सम्पाद्यते तथैव नित्यज्ञानमयै वेदैर्निर्णीतानां षोडशसंस्काराणां क्रियासमुदायेन मूलाधारनिर्माणेन स्वाभाविकसंस्काराणां गतिर्नियमिता सरला च सम्पाद्यते ।

वेदो हि नित्यज्ञानमयत्वात् कर्मरहस्यानां कर्मगतीनाञ्च पूर्णज्ञानवान् । अतो हि वैदिकसंस्काराणां क्रियापद्धतिरेव सर्वाङ्गसम्पूर्णा दिव्यशक्तिसम्पन्ना च विद्यते । यथा वैदिकसंस्काराधिकारिणो जीवा निर्बाधमभ्युदयनिःश्रेयसावधिगच्छन्ति यथा साधारणा अपि मानवाः सोपानसाहाय्येन पृथ्वीतो हर्म्यतलं समारुह्य स्वच्छवायुप्रकाशौ विन्दन्त इति ॥ २१ ॥

इदानीं गर्भाधानात्मकं प्रथमं वैदिक-संस्कारं निरूपयति—

आधानम् ॥ २२ ॥

षोडशसु वैदिकसंस्कारेषु प्रथमस्य संस्कारस्य आधानम् गर्भाधानमित्याख्या । अस्मिन् मृत्युलोके नरनारीसङ्गमेन मातृगर्भे मानवजन्म जायते । तत्रैव मातृपितृसम्बन्धतो जायमानायां क्रियायां गर्भाधान-संस्कारस्य सम्बन्धः ।

सन्तानोत्पत्तेः पूर्वक्रियाया आदिमत्वात् संस्कारस्यास्य प्राथम्यम् । गर्भाधान-संस्कारस्य पीठविज्ञानमूलकत्वात् प्रथमं पीठविज्ञानरहस्यज्ञातमावश्यकम् । प्राणमयकोशे आवर्तचक्रोत्पत्त्या देवताधिष्ठानक्षमं यत् स्थानमाविर्भवति तदेव पीठमित्युच्यते । पीठविज्ञानञ्च मध्यमीमांसापरपर्य्याये दैवीमीमांसादर्शने विस्तरशः साधु विवृतम् । पीठविज्ञानस्य भेदास्तस्य गर्भाधानेन सह सम्बन्धश्च स्मृतिशास्त्रे निम्नाङ्कितविधया विवृतमुपलभ्यते ।

तथाहि--

द्वितीयं सहजं पीठं दम्पत्योः सङ्गमे भवेत् ।
गर्भाधानस्वरूपस्य तस्य पीठस्य दम्पती ॥
यौ मर्य्यादाञ्च पावित्र्यं पितरः ! स्मरतः सदा ।

तथा दैवे च जगति श्रद्धालू यौ निरन्तरम् ॥
यौ स्वस्मिन् शततं सत्त्वगुणलक्षणमीप्सितम् ।
आधातुं यत्नमाधत्तः सन्ततौ हि तयोर्ध्रुवम् ॥
उच्चाधिकार एतादृग् ध्रुवमायाति येन सा ।
ज्ञातुमिष्टे सदा पुण्यां पूर्णधर्माधिकारिताम् ।

गर्भाधान-संस्कारो हि स्वपत्न्यां शुद्धे प्रथमे रजसि समाधीयते, यतो हि तदानीमेव स्त्री मन्त्रपूता सती सुसन्तानप्रसवयोग्या भवति ।

अत्र प्रथमे रजस्येव गर्भाधानसंस्कारस्यानुष्ठाने विहितेऽपि योग्यसन्तानोत्पादन कालविधौ महर्षीणां परस्परमतवैषम्यमुपलभ्यते। तथा हि—अस्मिन् विषये शरीरविज्ञानविदां प्रथमाचार्य्यस्य सुश्रुतमहर्षे र्निर्देशोऽयम् यत्—

ऊनषोडशवर्षायामप्राप्तः पञ्चविंशतिम् ।
यद्याधत्ते पुमान् गर्भं कुक्षिस्थः स विपद्यते ॥
जातो वा न चिरं जीवेज्जीवेद्वा दुर्बलेन्द्रियः ।
तस्मादत्यन्तबालायां गर्भाधानं न कारयेत् ॥

तात्पर्य्यंत आर्य्याणां विवाहसंस्कारो हि न कामवासनाचरितार्थतायै भवति ते हि पत्नीसंयोगं पवित्रतमं पीठोत्पत्तिनिदानञ्चामनन्ति । कालनियमविषये तु तदाचार्य्याणां स्वारस्यमिदं यत् पत्न्याः प्रथमरजस उद्गमे एव गर्भाधानसंस्कारस्य धार्मिको विधिरनुष्ठेयः । ततश्चोपयुक्तवयस्कायां तस्यां गर्भाधानसंस्कारसिद्धान्तमाश्रित्य धार्मिकसन्ततिसमुत्पादनाय सङ्गमो विधेयः । स च पूर्वानुष्ठितसंस्कारानुरूप एवानुष्ठेयः । तत्रापि ज्यौतिषसिद्धान्तमाश्रित्य शुभे मुहूर्ते शुभानुष्ठानमिदं प्रयोज्यम् ।

तदानीञ्च दम्पती उभावपि धर्मं दैवसाहाय्यञ्चापेक्षमाणौ योगयुक्तौ समाहितमानसौ भूत्वा प्रथममभ्यर्हितमिमं संस्कारं सम्पादयेतामिति महर्षीणामादेशः । प्रत्येकं सृष्टिक्रियायामेव दम्पत्योः शास्त्रीयविज्ञानानुसरणमावश्यकमित्येव वैदिक-प्रथम-संस्कार-रहस्यमवगन्तव्यम् ॥ २२ ॥

अधुना द्वितीयं संस्कारं पुंसवनं निरूपयति—

पुंसवनम् ॥ २३ ॥

द्वितीयस्य वैदिकसंस्कारस्य पुंसवनसंज्ञा । दम्पत्योः सङ्गमनवेलायां यदा सहजपीठोत्पत्तिर्भवति तदा शास्त्रोक्तगर्भाधानसंस्कारेण संस्कृते दम्पतिशुद्धान्तःकरणे सुदृढ-सुन्दर-वज्रसंहनन-तेजस्वि-प्रतापि-विद्वदग्रणी-शतायुरस-

र्वसल्लक्षणोपेतनिर्मोकस्थानीय-सन्तानोपयोगि रजोवीर्यात्मकं सूक्ष्मं शरीरोपादानं नारीगर्भे सन्धीयते। ततः प्रभृत्येव पितृगणाः यथावसरं यथोपादानं यथासंस्कारं यथायोग्यं स्थूलशरीरं निर्मातुं प्रयतमानाः कतिभिर्मासै र्जीववासक्षमं तत् मनुष्यवासयोग्यं गृहमिव शनैः शनैः सर्वेन्द्रियविकाशपरिपूर्णं विरचयन्ति।

तत्र चतुर्थे मासि स्थूलशरीरस्याङ्गप्रत्यङ्गकल्पना भवतीत्यतः पूर्वमेव देवपितृप्रसादतो गर्भस्थजीवस्य पुरुषशरीरस्यैवोपलब्धिः स्यादिति संकल्पेन पुंसवन-संस्कारोऽनुष्ठीयते। तस्मिंश्च संस्कारे मातापितरौ मन्त्रशक्त्या स्वसंकल्पशक्त्या देवपितृप्रसादेन च गर्भस्थजीवस्य पुंस्त्वे सर्वथा सर्वतः तदवयवोपचयाय यतमानौ तद्रक्षामातन्वाते। प्रबलकर्मवेगेन च कन्यात्वभावेऽपि तस्मिन् तदीयावयवसौन्दर्य्य–सौभाग्यादिगुणसञ्चयमाधातुं प्रयतेते।

अध्यात्माधिदैवाधिभौतरूपाणां त्रयाणामपि दैवजगतां सञ्चालकानां महर्षि-देव-पितृगणानां सर्वेषामपि साहाय्यमस्मिन् संस्कारे समासादयितुमवसरो लभ्यते। अत्र प्रयुज्यमानो मन्त्रो यथा—

पुमान्सौ मित्रावरुणौ पुमान्सावश्विनावुभौ।
पुमानग्निश्च वायुश्च पुमान् गर्भस्तवोदरे॥

कर्मभूमावत्र सर्वोत्तमादृष्टसंग्रहनिमित्तं सर्वोत्तमस्य कर्मणः संग्रह आवश्यक इति तदर्थं योग्यस्थूलशरीरोपलब्धिरप्यपेक्ष्यत एव। एवञ्च येन संस्कारेण तादृशं सर्वोन्नतं सुदृढसुन्दरं वज्रसंहननं तेजस्वि सर्वसल्लक्षणोपेतं स्थूलशरीरमुपलभ्येत किं वाच्यं तस्योपयोगित्वे। स्मृतिरपि समर्थयति संस्कारस्यास्यानुष्ठानम्।

गर्भे पुंसवनान्याशु पूर्वं व्यक्तेः प्रयोजयेत्।
बली पुरुषकारो हि दैवमप्यतिवर्तते॥
पुष्ये पुरुषकं हैमं राजतं वाऽथवाऽसम्।
कृत्वाग्निवर्णं निर्वाप्य क्षीरे तस्याञ्जलिं पिबेत्॥ २३॥

तृतीय-संस्कारं सीमन्तोन्नयनमुपदिशति—

सीमन्तोन्नयनम्॥ २४॥

गर्भावस्थायाश्चरमोऽयं तृतीयः संस्कारः। गर्भस्थजीवस्य पूर्णविकाससम्पत्त्यै संस्कारोऽयमनुष्ठीयते। पतिः स्वपत्नीप्रसादाय स्वयं तस्याः

सीमन्तस्योन्नयनं करोतीत्यत एवास्य सीमन्तोन्नयनं नाम । संस्कारेऽस्मिन् यादृशी प्रार्थना देवताभ्यः क्रियते यादृशश्च संकल्पो मातृचित्ते समुद्भाव्यते, स्वयञ्च पित्रा स्वचित्ते यादृशो भाव आधीयते सर्वस्यास्य सूचका मन्त्रा अत्रोनिर्दिश्यन्ते ।

मूर्द्धानं दिवऽअरतिं पृथिव्या वैश्वानर मृतऽआ जातमग्निम् ।
कविं सम्राजमतिथिं जननामासन्ना पात्रं जनयन्त देवाः ।
ॐ अयमूर्ज्जावतो वृक्ष उर्ज्जीव फलिनी भव ।
पर्णं वनस्पते नुत्वा नुत्वा सूयतां रयिः ।
ॐ येनादितेः सीमानं नयति प्रजापति र्महते सौभगाय ।
तेनामस्यै सीमानं नयामि प्रजामस्यै जरदष्टिं कृणोमि ।
ॐ यास्तेराके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ।
ताभिर्नो अद्य सुमनाश्यसि प्रजां पशून् सौभाग्यं मह्यं दीर्घायुष्ट्वं पत्युः ।

गर्भाधानात्मकेनाद्येन संस्कारेण तु सहजपिण्डरूपायां स्त्रीपुरुषसंयोगात्मिकायां सृष्ट्युत्पादिकायां क्रियायाम् आध्यात्माधिदैवाधिभौतशुद्धिसंपादनतो रजोवीर्य्योपादानकस्य गर्भस्य शुद्धिः सम्पाद्यते । द्वितीयेन च पुंसवनेन योग्यस्थूलशरीरसम्पत्तिरासाद्यते । अनेन च तृतीयेन संस्कारेण पतिः स्वसंकल्पबलेन वैदिकविधिना मन्त्रबलेन च देवपितृप्रसादमुपलभ्य स्त्रियाः चित्तप्रसादेन तत्संकल्पशुद्ध्या च गर्भस्य पूर्णतासम्पादनेन तत्स्थजीवस्य च स्थूलावरणरूपस्य शरीरस्य च शुद्धिविधानेन तत्कल्याणाय सर्वथोद्योगस्ततिपित्रा समनुष्ठीयत इत्येवास्य संस्कारस्य सूक्ष्मं गूढञ्च विज्ञानमूहनीयमिति ॥ २४ ॥

सम्प्रति चतुर्थं संस्कारं संसूचयति—

जातकर्म्म ॥ २५ ॥

इतः पूर्वं स्थूलशरीरसम्बन्धिनां त्रयाणां संस्काराणां वर्णनमभिधाय सम्प्रति सूक्ष्मशरीरान्तःकरणाद्युन्नतिसाधकानां संस्काराणां मध्यतः प्रथमं जातकर्मसंस्कारमुपपादयति । ततश्चान्यान्यं संस्कारमुपपादयिष्यति यथावसरं सूत्रकृत् ।

गर्भे यावज्जीवस्तिष्ठति तावत् पूर्वजन्म-स्मृतिस्तस्मिन् विद्यते । येन तत्र तस्यान्तःकरणीयसंस्काराणामवसरो नोपतिष्ठते । तत्र तु केवलस्य स्थूलशरीरस्य संसिद्ध्यै दैवं साहाय्यमासाद्यते । गर्भविनिर्गमनवेलायां सङ्कुचितगर्भद्वारनिष्पेषणेन मातृकायतः पृथग्भूत्वा भूमौ पातेन च विगतपूर्वस्मृतिरेव जायते । येनेत

आरभ्य तस्यान्तःकरणस्य संस्कारोऽपेक्ष्यते। अत्र मृत्युलोके भूमिष्ठस्य तस्यान्तःकरणे मानसिकबलवृद्धिः स्यादिति तदानीं जातकर्मसंस्कारोऽनुष्ठीयते। तत्र मन्त्राः—

मेधान्ते मित्रावरुणौ मेधामग्निर्दधातु ते।
मेधान्ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥
ॐ सदस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्।
सनिं मेधामयासिषं स्वाहा।

इह मृत्युलोके मातृगर्भतो भूमिष्ठे जायमान एव शिशौ संस्कारोऽयमनुष्ठीयते, येन तस्य जातकर्मेति संज्ञा भवति। भूमाविहागमनात्पूर्वं जीवः स्थूलशरीरेण सह पूर्णसम्बन्धभाग् न भवति। तत्र पूर्वस्मृतिबलेन जीवो गर्भावासं स्थूलकायसम्बन्धञ्च स्वात्मनः कृते कारागारनिवासकल्पमामनुते। ततोऽपसरणवेलायामेव सर्वामपि पूर्वस्मृतिमेकपद एव विस्मृत्य तेनैव स्वस्थूलशरीरेण सम्बन्धभाग्भूत्वा अपूर्वलोके समागतमात्मानमुपलभ्यापवाहितानर्घरत्न इव रोदिति। अतस्तदानीमन्तःकरणबलमेव तस्य धर्ममार्गनिदर्शकमध्यात्मदृष्टिप्रसारणक्षमञ्च स्यादिति तद्दार्ढ्याय तस्य संस्कारस्य सुतरामपेक्षास्ति ॥ २५ ॥

साम्प्रतं पञ्चमं संस्कारमाह—

नामकरणम् ॥ २६ ॥

जीवान्तःकरणे बलसञ्चारो यथा स्यादित्यत एवाऽयं संस्कारोऽनुष्ठीयते। नामरूपात्मकत्वादस्य जगतो नाम्ना सह जातजीवस्य बलीयान् सम्बन्ध इति साधु परामृश्य पूर्वापरं पर्यालोच्य वर्णविभागक्रमेण नामकरणं तेन च तस्य जीवस्यान्तःकरणे विशेषबलेन सहाध्यात्माधिदैवबलप्रयोग इत्यस्य संस्कारस्य मुख्यं प्रयोजनम्।

मानवजातावाध्यात्माधिदैवबलसञ्चाराय तथान्तःकरणसंस्कार-शुद्ध्यै च नाम बहूपकारि भवतीति संन्यासाश्रमेऽपि नामान्तरं क्रियते। ब्रह्माण्डस्य समष्टिसत्ताया व्यष्टिसत्तायाः पार्थक्यसम्पादनाय नामैवैकं साधनमिति तदुपयोग इह जगति परमावश्यकः। अपरं च सर्वथा नामार्थप्रभावानुसारी जीवोऽस्मिन् लोके बहुधा विचेष्टते। यादृशगुणशक्तिसम्भूतन्नाम निर्धारितं स्यात् तादृशमेव संस्कारं तादृशमेवाध्यात्माधिदैवात्मिकमान्तःकरणिकं प्रभावं सुदृढं तस्मिञ्जीवे तदासञ्जयेदिति सर्वसम्मतः सिद्धान्तः। अतो नामकरणात्म-

कोऽयं संस्कारो हितकरः परमावश्यकश्च सम्मत आर्यजातिषु वेदमार्गानुगासु । स च संस्कारो देवर्षिपितृसाहाय्यबलमालम्ब्य ज्योतिष-धर्मशास्त्रानुसारतो देशकालपात्रविचारमाश्रित्य ज्ञानशिशं रैहलौकिक-पारलौकिकाभ्युदयमनुसन्धाय शुद्धार्थभाव-समृद्धिमत्नाम निर्धारणेन सम्पादनीय इति संक्षेपः ॥ २६ ॥

सम्प्रति षष्ठं संस्कारं समादिशति—

अन्नप्राशनम् ॥ २७ ॥

स्थूलसूक्ष्मयोरुभयोरपि शरीरयोः पोषकमन्नमेव । अन्नेनान्नमयकोशस्य पुष्टी रक्षणञ्च जायते । अन्नेन प्राणा एङ्गन्ते । अन्नं हि मनसः प्रकृतेर्निदानम् । इदं हि दार्शनिकविज्ञानसिद्धम् यदन्नमयकोशप्रथ नमेव प्राणिनां प्राणधारणम् इत्यत एव मातृदुग्धपानानन्तरम् अन्नप्राशन-वेलायामयं संस्कारोऽनुष्ठीयते । संस्कारोऽयं दैवसाहाय्येन शिशोरन्तःकरणं भविष्यत्काले सुदृढं योग्यञ्च विदध्यादिति वेदविधिना विधीयते । अपरञ्च वेदमन्त्राभिमन्त्रितान्नसम्बन्धेन शिशोरन्तःकरणे शुद्धसंस्कारमङ्कयित्वा दैवेन बलेन तत्राध्यात्मिकबलसञ्चारणायास्य संस्कारस्यानुष्ठानं परमावश्यकमिति निष्क्रमणादयः संस्कारा अपि एतदन्तर्गता एव ज्ञेयाः ।

श्रुतिरप्यन्नप्राशन-संस्कारमहिमानं स्तौति—

"अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत् पुरीषं भवति यो मध्यस्तन्मांसं योऽणिष्ठस्तन्मनः । अन्नमयं हि सौम्य मनः । आपोमयः प्राणस्तेजोमयी वागिति ।" "आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रंथीनां विप्रमोक्षः" । इति ॥ २७ ॥

साम्प्रतं सप्तमं संस्कारमाख्याति--

चौलम् ॥ २८ ॥

चूडायां निमित्तो भवम् चौलम् डलयोरभेदात्, डकारस्य स्थाने लकारोच्चारणं ज्ञेयम् । आर्य्यजातेः स्वस्वरूपस्थितौ संस्कारोऽयं प्राधान्यं विन्दते । आर्यजातेः स्वजातीय-जीवनपर्य्यालोचनया यावन्ति तल्लक्षणानि सन्ति तत्र सर्वत्रैवाध्यात्ममर्यादायाः परिपालनं प्रधानप्रयोजनमवलोक्यते तस्यैवाध्यात्मप्रयोजनस्य बीजवापाय दैवसाहाय्यबलेन संस्कारोऽयमनुष्ठीयते ।

गर्भस्थकचकर्तनानन्तरशिखास्थापनमेवास्य प्रधानं प्रयोजनम् । तच्च सहस्रदल-पद्मस्थित-ब्रह्मलिलक्षयिषया क्रियते । संस्कारस्यास्यानुष्ठानानन्तरं

बालस्य चेतसि सर्वदोषरहितमाध्यात्मिकमेव लक्ष्यं स्यादिति भावपरिपुष्ट्यै विधानमस्य संस्काररूपेणानुष्ठीयते । शिखाकरणस्येदमेवाध्यात्मिकं रहस्यमवसेयम् ।

योगशास्त्रानुसारं मूलाधारे आधारपद्मे ब्रह्मप्रकृत्याः कुलकुण्डलिन्याः स्थानं सप्तमे चक्रे सहस्रदलपद्मे ब्रह्मणःस्थितिः । एवञ्च संस्कारशुद्ध्या यावदेव मानवान्तःकरणं बलीयो भवत्तदभिमुखं प्रसर्पति तावदेवाध्यात्मपथस्तस्य परिष्कृतो भवति ।

शिखायाः स्थापनेन तन्मार्जनेन नित्यनैमित्तिककाम्यात्मके सर्वस्मिन्नेव कर्मणि च तस्या उपयोगेनास्य संस्कारस्य सुदृढं प्रयोजनमुपलक्ष्यते । अतश्चार्य्यभावसुरक्षायै तत्परिपोषाय चास्य संस्कारस्यानुष्ठानं परमावश्यकमिति न कस्यचनापि विमतिरस्योपयोगित्वे ।

स्मृतिरपि—

चूडाकर्म द्विजातीनां यथागोत्रं विधीयते
तृतीये गर्भतो वर्षे जन्मतो वा शुभेऽहनि
केचिद्वामशिखाः प्रोक्ताः केचित् पञ्चशिखास्तथा
ऊर्ध्वचूडा मताः केचिद्यथागोत्रं यथाकुलम् ॥ २८ ॥

अधुनाष्टमं संस्कारमभिधत्ते—

उपनयनम् ॥२७॥

उप समीपे (गुरोः, वेदस्याथवा स्वान्तर्निलीन महाशक्तेः) नीयते (द्विजो) येन तदुपनयनम्, उपनयन संस्कारः । प्रवृत्तिमार्गस्यान्तिमो निवृत्तिमार्गाश्रिताध्यात्मोन्नतेश्च द्वारस्वरूपोऽयं संस्कारः । इतः परं येऽष्टौ संस्कारास्ते सर्वेऽपि निवृत्तिमार्गसंस्कारा अग्रिमसूत्रैरभिधास्यन्ते ।

अयमुपनयन-संस्कारः चतुर्ष्वपि वर्णेषु केवलं द्विजातिष्वेव भवति । कामपरायणेषु शूद्रेषु नास्य संस्कारस्योपयोगः सम्भाव्यत इति न तेषां कृतेऽयं संस्कार उपदिश्यते । यतो हि कामेन सार्धमिन्द्रियाणां साक्षात्सम्बन्ध इतीन्द्रियविलासपरेषु शूद्रेषु संयमाभावो निश्चितः ।

यद्यपि कामसाहाय्याचरणात् अर्थोऽप्यधोगामी तथापि धर्मसाहाय्यानुष्ठानेनोर्ध्वगाम्यपि स भवतीति माध्यस्थ्यं तस्य । अतो धर्ममोक्षसहायकस्यार्थस्याधिकारमाश्रितेषु वैश्येषु धर्माधिकारवत्सु क्षत्रियेषु मोक्षाधिकारभाक्षु विप्रेषु चास्य संस्कारस्य विधानं सङ्गच्छते ।

अस्य संस्कारस्य स्वस्मिन् विद्यमानतयैवेमे द्विजशब्दवाच्या भवन्ति। यतो हि संस्कारेणानेनाधिभौतिकमधोगतं लक्ष्यं निरुध्यते। ऊर्ध्वगामिन अध्यात्मलक्ष्यस्य द्वारं विवृतं भवति। अस्मात्संस्कारात् तेषां द्वितीयं जन्म जायते। अत एव ते द्विजन्मान इति निगद्यन्ते। संस्कारेणानेन शुद्धो द्विजो गायत्रीमन्त्रस्य ब्रह्मसाक्षात्कारकारणस्याधिकारी भूत्वा वेदाध्ययनक्षमं पात्रत्वमासादयति।

यथा चौलकर्मणि तेन वैदिकसंस्कारेण संस्कृतः पुमान् शिखामधिकरोति तथैवास्मिन् संस्कारे वेदविधिसंस्कृतः शुद्धो वटुः परमपवित्रं ब्रह्मोपासनानिदर्शनस्वरूपं यज्ञोपवीतमासाद्य नन्दति। चौलसंस्कारे देवसाहाय्येनाध्यात्मलक्ष्योपयोगमाश्रयति एतस्मिंस्तु तस्याध्यात्म-लक्ष्यस्य स्थैर्य्यसम्पादनाय ब्रह्मोपासनाया याथार्थ्येनाधिकारमासादयतीति विवेकः ॥ २६ ॥

अधुना नवमं संस्कारं निर्वक्ति—

ब्रह्मव्रतम् ॥ ३० ॥

मनोबुद्धिचित्ताहङ्कारात्मकेऽन्तःकरणचतुष्टये मनश्चित्ते जडत्वप्रधाने बुद्ध्यहङ्कारौ च चेतनत्वप्रधानौ, तत्रान्तःकरणमेव जीवानां बन्धनमुक्तिनिदानम्। तत्र जडत्वप्रधानमन्तःकरणं बन्धनकारणं चेतनत्वप्रधानन्तु मुक्तिनिदानमिति विवेचनीयम्। संक्षेपादितः पूर्वं येऽष्टौ संस्कारा गर्भाधानादयोऽभिहितास्तत्र जडांशस्यैवाभ्यर्हितत्वमासीदितोऽग्रे येऽष्टौ ब्रह्मव्रतादयो वक्ष्यन्ते तत्र चेतनांशस्यैव प्राधान्यमूहनीयम्।

अन्यथापीदमवगन्तुं शक्यते यद् व्यतीतेष्वष्टसु संस्कारेषु दैवसाहाय्येन मानवस्य मनोबलं सञ्चीयते। आगामिष्वष्टसु तु तस्य बुद्धिबलं समुपार्ज्यत इत्यनयोर्द्विधा विभिन्ना पद्धतिरष्टकयोः परस्परविभिन्नयोर्द्वयोः।

ब्रह्मव्रतसंस्कारोऽयं प्रथमाश्रमस्य ब्रह्मचर्य्यस्य मूलाधारो निगद्यते। आचार्य्यसान्निध्यमुपेत्य दीक्षितोऽधिगतद्विजत्वलक्षणो बालो गृहीतप्रतिज्ञो भूत्वा श्रद्धयामुं संस्कारं स्वीकरोति। गुरुसेवाशुक्रसंरक्षण-तपोव्रत–मातृपूजनात्मकेन व्यूहचतुष्टयेन संस्कारोऽयं सुदृढं संदब्धः।

इह जगति लौकिकं वा पारलौकिकं वा किमपि ज्ञानं स्याद् गुरुशुश्रूषणं विना न तस्य सिद्धिर्भवतीति निश्चयम्।

ययोराकर्षणविकर्षणयोः शक्त्योरभिधानं पूर्वपादे कृतम्। ते हि शक्ती जीवात्मनोऽन्तःकरणे सदा कार्य्यसम्पादिके भवतः। तत्र विकर्षणशक्तेरि-

न्द्रियगणः केन्द्रम् । आकर्षणशक्तेश्च श्रीगुरुदेवः केन्द्रस्थानन्निगद्यते । यतो हि उद्दामा इन्द्रियप्रवृत्तयो जीवान् सततमधः पातयन्ति । ज्ञानाश्रयो जगद्गुरुरीश्वरोऽन्तःकरणे विधुत्य तानूर्ध्वं नेतुं साहाय्यमाचरतीति प्रतिक्षणमन्तःकरणे संग्रामः प्रचलति । इत्यत एव लघुशक्तिसम्पन्नं शिष्यं गुरुशक्तिविशिष्टस्य ज्ञानदातुरीश्वरस्य जगद्गुरोः प्रतिनिधिस्वरूपः श्रीगुरुदेव ऊर्ध्वमुन्नेतुं यतते । यतो हि श्रीगुरुप्रसादमन्तरा जीवानां ज्ञानोन्नतिरसम्भाविनी ।

स्मर्यते च—

यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः । इति ।

लौकिकज्ञानोपलब्धयेऽपि गुरुप्रसादोऽपेक्ष्यतेऽलौकिकस्यातीन्द्रियस्य ज्ञानस्य प्राप्तिस्तु विना गुरुकृपामशक्यैव । सा तु सर्वथा श्रीगुरुदेवाश्रयैव तिष्ठति । इत्थंभूतस्य श्रीगुरुदेवस्य शुश्रूषायोग्यतोपलब्धिरस्य ब्रह्मव्रतस्य प्रथमं व्यूहम् । मनो वायुः वीर्य्यमिति त्रयोऽप्येकमेव तत्त्वम् । इत्यतस्त्रयाणामेकस्यापि स्ववशीकारेण त्रयोऽपि स्वायत्ता भवन्तीति योगदर्शनसमर्थितमिदं विज्ञानम् । तत्रापि तेषु वीर्य्यसंयमनस्य इतरापेक्षया सारल्यादाधिभौतिकसम्बन्धसम्बलितत्वात्सर्वश्रेष्ठो महिमा । मनस आधिपत्याधिगतिमन्तरा बुद्धेर्विकाशोऽसम्भवः बुद्धिदार्ढ्यं विना इन्द्रियातीतस्य परमपुरुषस्योपलब्धिर्जीवस्य कृतेऽसम्भाविन्येवेति कारणतः ऊर्ध्वरेतस्त्वसिद्ध्या मनस आधिपत्यं सम्पाद्य बुद्धितत्त्वविकाशद्वारा ब्रह्मप्राप्तिनिदानं भवतीति संस्कारोऽयं ब्रह्मव्रतमिति शब्देनोच्यते इति हि द्वितीयव्यूहविज्ञानम् ।

केवलं गुरुशुश्रूषामूलकेनाचारेणैव ब्रह्मचर्य्याश्रमस्य धर्मः परिपूर्णो भवति । ब्रह्मचर्य्याश्रमाचाराणां परिशीलनेनास्य संस्कारस्य तपोमूलकत्वं स्फुटं प्रतीयते इति तृतीयं व्यूहविज्ञानम् । ब्रह्मचर्य्याश्रमस्य यथावत् परिपालनन्तु तदैव सम्भवति यदा ब्रह्मचारी जगतीतलस्थासु सर्वास्वपि नारीषु मातृभावनया व्यवहरेत् । प्रथमतः पृथिवीतलस्थासु सर्वास्वपि स्त्रीषु मातृभावकल्पनामन्तरा ब्रह्मचर्य्यपरिपालनमेव पूर्णतो न सम्भवति, द्वितीयतश्च भिक्षादियाचनामाचारो मातृपूजनविधानार्थमेवास्मिन्नाश्रमे विहितो विद्यते । एतदेव चतुर्व्यूहरहस्यम् । एवञ्च तुर्व्यूहात्मकधर्मानुष्ठानेन ब्रह्मव्रताधिकारी आश्रमः धर्मभित्तिं द्रढयति ॥ ३० ॥

इदानीं दशमं संस्कारं निर्वक्ति—

वेदव्रतम् ॥ ३१ ॥

सर्वाश्रमाधारस्वरूपेऽस्मिन्प्रथमे ब्रह्मचर्याश्रमे प्रवेश-वेलायामेवास्य संस्कारस्य प्रारब्धिः। ब्रह्मचारी हि सावित्री-समाराधनतत्पर आचार्य्यसेवापरायणो ज्ञानप्राप्तयेऽमुं संस्कारं स्वीकरोति। अनेन संस्कारेण संस्कृतो हि ब्रह्मचारी वेदानां वेदानुकूलानाञ्च शास्त्राणां चाध्ययनेन कृतकृत्यो भूत्वा नन्दति।

एतत्संस्कारसाहाय्येनैव ब्रह्मचारी गुरुकृपामधिगत्य कुशाग्रशेमुषीसम्पन्नो भूत्वा सुमेधया समेधितः पवित्रस्य ज्ञानस्योपार्जने प्रवृत्तो भवति। कुतर्करूपं मूषकं वाहनीकृत्य यथा गणपतिर्देवो बुद्धिसम्राट् भूत्वा बुद्ध्यधिष्ठाता सन् सर्वदेवाभ्यर्हितः सर्वप्रथमपूज्यतामाश्रयति। तथैव वेदव्रतसंस्कारसंस्कृतो द्विजातिः कुतर्कबहुलजल्पवितण्डाप्रयोगविरहितः वेदशास्त्रानुकूलज्ञानपद्धत्या प्रचलन् अन्ते ऋतम्भरायाः प्रज्ञाया अपि अधिकारी भवतीति सुस्पष्टं विज्ञानमेतस्य ॥ ३१ ॥

अधुनैकादशं संस्कारं स्मरति—

समावर्तनम् ॥ ३२ ॥

सम्यक् (वेदान् वेदौ वेदं वा) अधीत्य गृहे आवर्तनम् पुनरुपस्थितिः समावर्तनम् इति सूत्रार्थः। ब्राह्मणसन्ततीनां कृते संस्कारोऽयं महतः सन्धेराश्रयः। यतो हि पञ्चविंशतिवार्षिको ब्राह्मणबटुरधीत-चतुर्दशविद्योऽतः परं दारग्रहणं कुर्वन् गृहस्थाश्रमं प्रविश्य सृष्टिक्रमं चालयितुमर्हति। आहोस्विदित एव निर्विद्य संसारासारतां विभावयन् संन्यासाश्रमं प्रवेष्टुं क्षमते। इत्थञ्च उभयसन्धिसम्बन्धतः संस्कारेऽस्मिन्नयं विशेषोऽन्येभ्यः संस्कारेभ्यः।

अत्र यदि द्विजो ब्रह्मचारी गृहस्थाश्रमं प्रविविक्षुः स्यात्तर्हि तस्य संस्कारपद्धतिरन्यथा भविष्यति। यदि स संन्यासाश्रमम् जिगमिषुः स्यात्तर्हि तस्यान्यथैव स्यात् संस्कारव्यवस्थितिः।

तथा हि प्रथमे पितुरभ्यर्हितत्वम् द्वितीयस्मिंस्तु श्रीगुरुदेवस्य प्राधान्यमिति विभेदः। गृहस्थाश्रमे कर्मणां समारम्भेण प्रवृत्तिमार्गसंशोधनम्। चरमे च वैराग्यज्ञानप्रधानतया निवृत्तिमार्गस्यापि चरमा कोटिराश्रीयत इति महदान्तर्य्यम् ॥ ३२ ॥

द्वादशं संस्कारं लक्षयति—

उद्वाहः ॥ ३३ ॥

उदुह्यते (वरेण पत्नी) यस्मिन् संस्कारे स उद्वाहो विवाह इत्यर्थः ।

अस्योद्वाहसंस्कारस्य प्रभावेणैव आर्य्यैः द्वितीयाश्रमे सर्वाभ्यर्हिते प्रवेशाधिकारोऽधिगम्यते । ते हि देवसाहाय्यमुपलभ्य शास्त्रोक्तविधिना अन्योन्याव्यभिचाररूपप्रतिज्ञाबद्धा भूत्वा सहधर्मिणीसमेता गृहस्थाश्रमेऽत्र प्रविशन्ति ।

यद्यपि बाह्यदृष्ट्याऽऽर्य्याणां दारसमादानरूपः संस्कारोऽयं प्रवृत्तिमार्गसमेधकः प्रतिभाति; तथापि वर्णाश्रमधर्ममर्य्यादाविज्ञानपरिशीलनेन आर्य्याणां स्त्रीपरिणयात्मकोऽयं संस्कारो निवृत्तिसमर्थक एव प्रतीयते । यतो हि वर्णाश्रमधर्मविज्ञानतः पुमान् नारीदुर्गाश्रयेणात्मानं गोपाययन् दुर्दम्यानामिन्द्रियाणामाधिपत्यमाचरन् शास्त्रीयस्वीयप्रवृत्तिबलेन निवृत्तिमार्गमेव पुष्णाति । आर्य्याणां प्रवृत्तिपद्धतिर्यथा यथा पर्य्यालोच्येत तथा तथा सोत्तरोत्तरं निवृत्तिपोषिकैवोपलभ्येत ।

ननु सृष्टिक्रियायाः प्रवृत्तिमूलकत्वात् कथं सृष्टिवर्द्धकस्यापि विवाहसंस्कारस्य निवृत्तिमूलकत्वमिति चेदुच्यते—वर्णाश्रममर्य्यादामाश्रितानामार्य्याणां सृष्टिक्रिया न कामार्थमूलिका । किन्तु धर्ममोक्षमूलकतया तस्या निवृत्तिपोषकत्वे न काप्यनुपपत्तिः। आर्या हि योग्यसन्तत्युत्पादनेन तद्रक्षया च पितृदेवर्षीणामृणानि ऐहलौकिकं भूतर्णं मानवर्णञ्चापाकृत्य स्वनिवृत्तिमार्गं परिष्कुर्वन्ति ।

दैवसूक्ष्मजगतां देवर्षिपितर इति त्रयः सञ्चालकाः सन्ति । तेषां नियमतः सम्वर्द्धनायेह मृत्युलोके योग्यसन्ततिसमुत्पादनस्य तद्रक्षणस्य चावश्यकताऽपेक्षिता । अपरञ्च भूतानां मनुष्यमात्राणाञ्च कर्तव्येन प्राप्तानामुपकाराणां प्रत्युपकारस्याप्यावश्यकतेत्येवं पञ्चानामप्येषामृणानामुद्धाराय धार्मिक्या योग्यायाः सन्ततेः समुत्पादनं तद्रक्षणञ्च न कदापि प्रवृत्तिमूलकं सम्भवति भावप्राधान्यान्निवृत्तिप्रवृत्तिमार्गयोः ।

ननु प्रजातन्तुविच्छेदस्य पापाधायकत्वात् सर्वेषां गृहस्थाश्रमे प्रवेशस्यावश्यकत्वात् ब्रह्मचारिणो गार्हस्थ्यं विहाय संन्यासाश्रम-प्रवेशः कथन्न विगर्हित इति शङ्काया उत्तरमाह यावदेषु पञ्चस्वपि ऋणेषु ब्रह्मचारिणः कर्तव्यबुद्ध्याऽऽसक्ति र्विद्यते तावत्त ब्रह्मचर्य्यतः समावृत्य गार्हस्थ्यप्रवेश एव साधीयान् । एवं सति दारग्रहणात्मकस्योद्वाहसंस्कारस्यानु नं दोषावहमेव । यदि च

पूर्वजनिसमुपार्जितसुकृतां बलेन योग्याधिकारी ब्रह्मचारी विषयवैराग्यमात्मज्ञानञ्च समधिगम्यानादिवासनाक्षयेन प्रसन्नचेता ब्रह्मविचारक्षमः सञ्जातस्तस्य तु नास्त्येवेहाश्रमे प्रवेशप्रयोजनम्, स तु तस्मादेव ब्रह्मचर्य्यात्सन्यासाश्रमाश्रयणाधिकारीति सर्वतन्त्रसिद्धान्तः । श्रुतिरपि—

"ब्रह्मचारी भूत्वा गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत् यदि वेतरथा ब्रह्मचर्य्यादेव प्रव्रजेद् गृहाद्वा वनाद्वा" इति अपरञ्च "यदहरेव विरज्येत्तदहरेव प्रव्रजेद्" इति ।

स्मृतिश्चात्र—

प्रव्रजेद्ब्रह्मचर्य्याद्वा प्रव्रजेद्वा गृहादपि ।
वनाद्वा प्रव्रजेद्धीमानातुरो वाऽथ दुःखितः ॥ ३३ ॥

साम्प्रतं त्रयोदशं ब्रूते—

अग्न्याधानम् ॥ ३४ ॥

कर्म्मकाण्डसाहाय्येन दैवेन जगता विशेषसम्बन्धबन्ध एवास्य संस्कारस्य मुख्यं प्रयोजनम् । वैदिक-कर्म्मकाण्डानुष्ठानेन मलावरणान्यपाकृत्य मानवो मुक्तिभूमावुत्तिष्ठत इत्यभिहितं प्राग् । कर्मकाण्डस्य प्राधान्यतः सर्वोत्तमा चैषैव सिद्धिः । मृत्युलोके च स्थूलशरीरस्यैव प्राधान्यादस्याः सिद्धेर्विशेषो विद्यते समुपयोग इत्यप्यवधारणीयम् । अनेन संस्कारेण प्रत्यहं दैवसाहाय्यबलाश्रयेण मानवः सिद्धिमिमामुपलब्धुमग्रेसरो भवति । गृहस्थाश्रमगो हि पुमान् विविध-प्रवृत्तिसमासक्तोऽपि संस्कारादस्मात्स्वीयमलापसारमालादयन्निवृतिरूपमूर्ध्वमार्गं निष्कण्टकं करोति ॥३४॥

इदानीं चतुर्दशं संस्कारं वर्णयति—

दीक्षा ॥ ३५ ॥

उपासना-काण्डसाहाय्येन दैवस्य जगत आनुकूल्यं विशेषतः सम्पादयतो मुक्तिमार्गपरिष्कार एवास्य संस्कारस्य प्रधानं विधेयम् ।

इदञ्च पूर्वमभिहितं यदुपासनाकाण्डस्य प्रधानाङ्गयोगानुष्ठानेन भक्तिसाधनेन च साधकः सूक्ष्मशरीरसम्बन्धिनो विक्षेपान् विनाश्य मुक्तिभूमावग्रेसरो भवति । मलविक्षेपापसरणावसर एव ध्रुवमात्मावरणमति ज्ञानप्रकाशेन स्वत एवापगच्छति, दूरमपसरतीति यावद् । मुक्तिभूमिसमुपस्थितो सुतरां विक्षेपनाशकोऽयं संस्कारः परमोपयोगी भवतीति स्फुटम् ।

अनेन च चतुर्दशेन संस्कारेण साधकः स्वगुरुदेवेन सह साक्षात् सम्बन्ध-

भाग् भवति। वेदाध्यापको हि आचार्य्यशब्देनोच्यते, दीक्षादाता गुरुरित्य-पदेशः। वेदव्रतसंस्कारे आचार्य्येण सम्बन्धोऽत्र तु श्रीगुरुदेवेनैव सम्बन्धः।

दीक्षासंस्कारानन्तरमेव साधक उपासनाधिकारमुपलभ्य देवसंघसाहाय्यमाश्रित्यान्तःकरण-विक्षेपं विनाशयन्मुक्तिमार्गमनुसरति। अस्मिन्संस्कारे विना सिद्ध्युपलब्धिं साधको निवृत्तिपोषकस्य वानप्रस्थाश्रमस्याधिकारितां नैवोपादत्ते। यतोऽयं हि गार्हस्थ्यस्यान्तिमः संस्कारोऽभिधीयते। अन्ये तु यावन्तो गृहस्थाश्रमीयाः संस्काराः सन्ति। ते सर्वेऽपि द्वयोरग्न्याधान-दीक्षयोः संस्कारयोर्मध्यवर्तिनः सन्तोऽन्तरङ्गत्वेनैव निगद्यन्ते ॥ ३५ ॥

सम्प्रति पञ्चदशं संस्कारं वर्णयति—

महाव्रतम् ॥ ३६ ॥

अस्मादेव संस्काराद् वानप्रस्थाश्रमारम्भो भवति। यद्यपि चत्वारोऽप्याश्रमा निवृत्तिमार्गप्रापकास्तथापि प्रथमयोर्द्वयोः प्रवृत्ति-संयमनेन निवृत्ति-मार्गारोहणं प्रधानं कर्तव्यम्। ताभ्यां हि प्रवृत्ति प्रसूतां बहुमुखीनां सन्नियम्य पुरुषः स्वनिवृत्तिमार्गं सरलं विदधाति। अत्र च वानप्रस्थाश्रमेऽनेन संस्कारेण सुसंस्कृतस्तां निवृत्तिं सुदृढां विधाय कृतकार्य्यो नन्दति। वानप्रस्थाश्रमस्य सर्वेऽपि विषयो दीक्षासाधनादयोऽमुमेव महाव्रतं संस्कारो माश्रित्य प्रतितिष्ठन्ति ॥ ३६ ॥

इदानीमन्तिमं षोडशं संस्कारमभिधत्ते—

संन्यासः ॥ ३७ ॥

यो हि संस्कारः संन्यासाश्रमाधिगमाय भवति स हि संन्यासशब्देनोच्यते। अस्य बहुषु भेदेषु चत्वार एवोत्तरोत्तरमभ्यर्हिताः प्रधानत्वेन परिगणिताः। ते च यथा—कुटीचक-बहूदक-हंस-परमहंसाख्याः प्रथमे पादे विस्तरेण विवेचिताः।

बुद्धितत्त्वसमेधनाय यो हि संस्कारः साधनानि च प्रथमे ब्रह्मचर्य्याश्रमे प्रारभ्यन्ते, तेषां हि सर्वेषां साधनानां क्रमशः संस्कारशुद्धि-साहाय्येनेहाश्रमे सम्पूर्णता सम्पद्यते। अपरञ्च निवृत्तिपूर्णविकासश्चास्मिन्नेवाश्रमे संजायत इत्यपि ज्ञेयम्। यथा हि सर्वे संस्कार-यज्ञा द्रव्यशुद्धि-क्रियाशुद्धि-मन्त्रशुद्धि-प्रतिज्ञाचारमहाकृपा-दैवानुकम्पारूपेषु सप्तस्वङ्गेषु विभक्ताः तथैवायमपि चरमः संस्कारोऽवगमनीयः।

प्रत्येक-यज्ञानुष्ठानावसरे पूर्वोक्तशुद्धित्रयस्य त्वैकान्तिकी समुपस्थितिरपेक्ष्यते । सप्तसु संस्कारेषु च संकल्पमन्त्रो हि प्रतिज्ञास्वरूप उपनयनत आरभ्य संन्यासं यावदाचार्य्यस्य गुरोर्वा सान्निध्ये प्रतिज्ञापुरःसरं यद्व्रतग्रहणं क्रियते तस्य महत्वमनिर्वचनीयं प्रख्याप्यते पूर्वाचार्य्यैः । तत्र हि ज्ञानवृद्ध्या सार्धमाचारा अपि परिपुष्टा दृढ़ाश्च क्रियन्ते । विशेषेण च चतुर्वर्णाश्रमाणामाचाराः परस्परं पार्थक्येन प्रतिपादिताः श्रुतिस्मृतिषूपलभ्यन्ते । तत्र सर्वत्रैव महाकृपासम्बन्धोऽनुस्यूतः समुपलभ्यते ।

प्रथमेषु संस्कारेषु पुरोधसः, द्वितीयश्रेणिस्थेषु आचार्य्यस्यान्तिमेषु च तेषु गुरोरनुकम्पा परमावश्यकी । दैवानुकूल्यन्तु सर्वत्रैव मूलमिति सुदृढ़म् । अस्यैवान्तिमस्य संन्यास-संस्कारस्य सिद्धौ ब्राह्मणोऽवश्यं कैवल्यमाश्रयतीति सर्वविदितो मार्गः ॥ ३७ ॥

इह प्रसङ्गसङ्गतां शङ्कामपनयन्नाह—

एष्वन्तर्भाव इतरेषाम् ॥ ३८ ॥

इतरेषाम् अन्येषां संस्काराणाम् एषु एव षोडशसु संस्कारेषु अन्तर्भावः अन्तर्गतत्वमिति सूत्रार्थः । ननु कथं षोडशानामेव संस्काराणामत्र कीर्तनं यतो हि अष्टाचत्वारिंशतः संस्काराणामुपादानं श्रुतिस्मृतिषूपलभ्यते ? इति पूर्वपक्षस्य उत्तराभिधानबुद्ध्या सूत्रकृत्सूचयति—यद्यावन्तः श्रुतिस्मृति-प्रतिपादिताः संस्काराः समुपलभ्यन्ते ते सर्वेऽपि प्रतिपादितेष्वेतेष्वेव षोडशसु संस्कारेषु प्रकारान्तरेणान्तर्भूता ऊहनीयाः । उदाहरणतो यथा निष्क्रमणसंस्कारो हि नामकरणान्तर्गत एव गण्यते । यतो हि नामकरणमेव निष्क्रमणस्यापि फलं सूते । नाम्न आह्वानेनैव निष्क्रमणं सिद्ध्यति तच्च नामकरणसंस्कारेणैव सम्पादितमिति नास्ति प्रयोजनं निष्क्रमणस्य पृथगनुष्ठानेन । सामर्थ्योत्साहाभ्यामनुष्ठितं चेदधिकमेव फलं लम्भयतीत्यन्यदेतत् ।

एवमेव समावर्तनान्तर्गत एव केशान्तसंस्कारोऽपीति स्वल्पविचारेणैव प्रतिभाति। यतो हि सोऽपि गृहस्थाश्रम-प्रवेशायैव भवति, इति पञ्चमहायज्ञानाम् अष्टकापार्वणादिश्राद्धानां श्रावणीकर्मणश्चेत्यादीनामुद्वाह एवान्तर्भावः । यतो हि गृहस्थाश्रमप्रवेशकालत एवैषां प्रारब्धिर्भवतीति ।

एवञ्च दर्शपौर्णमास-चातुर्मास्याग्निष्टोमसौत्रामणीयागादिसंस्कारा अपि अग्न्याधान—संस्कारान्तर्गता एव । यतो हि अग्न्याधानमेवैषां मूलमिति ।

इत्थञ्च महाभिषेक-तीर्थ-सन्यासादिसंस्कारा महाव्रतसंस्कारान्तर्गताः ।

कुटीचक-बहूदकादयश्च संन्यास संस्कारान्तर्भूता-इति सुविज्ञेयम्। किम्बहुना वेद-स्मृति-पुराण-तन्त्रादि-प्रतिपादिता यावन्तः संस्काराः स्युस्ते सर्वेऽपि षोडशस्वेतेष्वेवान्तर्भवन्ति इति प्रधानानामेषां षोडशानामेव संग्रहः ॥३८॥

प्रवृत्ति-निवृत्ति-सम्बन्धतस्तद्विभागमाह—

पूर्वे प्रवृत्तिरोधका निवृत्ति-पोषकाः परे ॥३९॥

एषु षोडशसु संस्कारेषु पूर्वे प्रथमेऽष्टौ संस्काराः प्रवृत्ति-रोधकाः, परे चरमे चाष्टौ निवृत्तिपोषका निवृत्तिसमर्थका इति सूत्रार्थः।

प्राथमिकानामष्टानां संस्काराणां प्रभावः प्राधान्येन मनसि समासज्यते अन्तिमानाञ्चाष्टानां बुद्धाविति प्रागेवोक्तम्। मनसः सम्बन्धः साधारणतये-न्द्रियैः सह बुद्धेश्चात्मनेति मनसः कार्यमासक्तिमूलकं बुद्धिकार्यञ्च भाव-प्रधानम्। मनसः प्रवृत्तिपोषकत्वाद् बुद्धेश्च निवृत्तिसहायकत्वाद्धेतोः यथा मनश्चित्तसंयोगेनासक्तिरुत्पद्यत इति संस्कृतस्यैव मनसः प्रवृत्तिरोधे सामर्थ्यम्। तथैवाहङ्कारबुद्धिसंयोगतो भावोद्गमप्रसङ्गात् सद्भावस्य च निवृत्तिजनकत्वात् संस्कृता बुद्धिरेव निवृत्तिं जनयिष्यतीत्यत्र कः सन्देहावसरः।

गर्भाधानत उपनयनं यावदष्टस्वपि संस्कारेषु दैवकृपया मनसो बला-धानम्। अन्तिमेषु चाष्टसु दैवानुकम्पया बुद्धेर्बलसञ्चार इति सर्ववादिसम्मत्या प्रथमेऽष्टौ संस्काराः प्रवृत्तिरोधकाश्चरमाश्च निवृत्तिपोषका इति सिद्धम् ॥३९॥

सर्वेषामेव संस्काराणां विशेषफलम्ब्रूते—

ततो दैवाधिष्ठानम् ॥४०॥

मनुष्याणां गमागमचक्रीयक्रमोन्नतेरभावे देवानां साहाय्याभावो हेतुः। दैवसाहाय्यबलेनैव क्रमोन्नतिर्भवतीति सुनिश्चितम्। यतो हि देवा एव कर्म-फलदातारस्तत्सहायकाश्च निगद्यन्ते। तेषां कृपोपलब्धिश्च संस्कारशुद्धि-मूलकक्रिया-शुद्धि-जन्यपुण्यसञ्चयेनैव भवति। एभिः सम्पादितैः संस्कारैर्दैव-जगतां सम्बन्ध उपस्थाप्यते देवानां सहायकत्वबलञ्चोपलभ्यत इति पूर्वमेवा-भिहितम् ॥ ४० ॥

नारीकृते तत्र वैशेष्यमभिधत्ते—

नारीणामुद्वाहो विशेषः ॥४१॥

आर्य्यपुरुषेषु तु षोडशानां संस्काराणामेव प्राधान्यम्। किन्तु तत्रार्य्य-महिलासु विवाहसंस्कारस्यैवाभ्यर्हितत्वम्। तपः-प्रधानस्य पातिव्रत्यमूलकस्य

नारीधर्म्मस्य बीजरूप-विवाहसंस्कारस्य प्राधान्यं स्वभावसिद्धमिति तस्य संस्कारस्य पूर्णतयैव नारीजातेः दैवबलोपलब्धिरिति सुनिश्चितम् । यद्यपि तेषु संस्कारेषु कियन्तो नारीणामपि अभ्युदयाधायकत्वात् कन्यावस्थायामनुष्ठीयन्त एव । तथापि नारीणां विशेषहिताधायकत्वाद्विवाहस्यैव प्राधान्यमुक्तम् ।

यदि काऽपि कन्या पूर्वार्जितसंस्कारवशात् ब्रह्मवादिनीलक्षणोपेता भवति, तर्हि तस्याः कृते उपनयनसंस्कारस्यापि विधानं शास्त्रादिषूपलभ्यत एव । प्रधानतस्तु नारीधर्म्माणां तपोमूलकत्वान्नारीसदाचाराणाञ्च सतीत्व-समर्थकत्वाच्चोद्वाहस्यैव सर्वाभ्यर्हितत्वमिति सर्वशास्त्ररहस्यम् ॥४१॥

प्रसङ्गसंगत्या दैवसाहाय्योपलब्धिसमयं सूचयति ।

प्रागृतु-प्रवृत्तेः सन्धिभावात् ॥४२॥

प्राकृतिकोऽयं नियमो यन्नारी-शरीरे रजोधर्म-प्रवृत्तिकाल एव तच्छरीरपूर्णतया तस्यां स्त्रीपुरुष-सम्बन्धीयाकर्षणविकर्षणशक्त्यनुभवोद्गमः सम्पद्यते । इन्द्रियभाव-विरहितस्य, बाल्यस्य तद्भावयुक्तस्य च यौवनस्य सन्धिदशायां महत्यां परिवर्तनावस्थायामस्यां संस्कारशुद्धेर्नितान्तमावश्यकत्वम् । अतो रजःप्रवृत्तेः प्रागेव नार्य्युद्वाहसंस्कारसम्पादनेन तत्र दैव्याः कृपाया अवसरो मुक्तद्वारस्तिष्ठति ।

सर्वेषां वैदिक-संस्कारात्मकानां यज्ञानां मौलिकोऽयं सिद्धान्तो यत् तदनुष्ठातृभिर्दैवसाहाय्यमाश्रित्य मनोबुद्धिबलसञ्चयनं तथा करणीयं यथाऽभ्युदयनिःश्रेयसयोः पन्थाः सुगमः समासाद्येत । नारीजातीनामस्मिन् संस्कारे दैवबलप्राप्तिपूर्वक-स्वलक्ष्यसिद्धये च रजःप्रवृत्तेः प्राक्तन एव कालः श्रेयान् । यद्यपि देवाः सर्वथा सर्वदा साहाय्यमाचरितुं समर्था एव तथापि रजःप्रवृत्तित ऊर्ध्वं विघ्नबाधोपस्थितेरावश्यकत्वात्तदनन्तरं नार्य्युद्वाहसंस्कारसम्पत्तौ तेषां साहाय्यप्राप्तावसौकर्य्यं सुनिश्चितमेव ।

इत्यत इदं सिद्ध्यति यत् नारी-विवाहसंस्कार-शुद्धेर्दार्ढ्याय साफल्योपगमाय च रजःप्रवृत्तितः पूर्वसमय एव साधीयोऽस्य संस्कारस्य सम्पादनम् ।

शङ्का-समाधानमाह—

पुरुषाणान्तु सर्वे ॥ ४३ ॥

ननु षोडशसु संस्कारेषु नारीणां यथोद्वाहस्य प्राधान्यम् तथा पुरुषाणां कस्य संस्कारस्य प्राधान्यम् ? इति प्रश्ने उत्तरयति—यन्नहि पुरुषाणां कृते

संस्कारतारतम्यं विद्यते, तेषां कृते तु षोडशानामपि संस्काराणां समानमेव प्रयोजनमिति सूचयति—पुरुषाणां पुंसां कृते तु सर्वेऽपि संस्काराः समाना एव तेषु तारतम्य-विचारो न विद्यत इति ।

पुरुषेषु षोडशानामपि संस्काराणां तुल्योपादेयत्वे मुख्यो हेतुरयमस्ति यद् अखिलेषु संस्कारेषु अभ्युदय-निःश्रेयसयो र्यथाक्रमं नियमव्यवस्थिति र्विद्यते । अस्य रहस्यस्य विस्तृतं विवेचनं पूर्वप्रस्तावे समुपवर्णितमेवेति नात्र विविच्यते । विशेषेण च पुरुषधर्म्मस्य यज्ञप्राधान्यात्पुरुषापवर्गेण चाभ्युदयस्य साक्षात्सम्बन्धान्नियमेनैव तदीयसंस्काराणां यथाक्रममेकस्यानन्तरमन्यस्य सम्पादनमावश्यकमिति ॥ ४३ ॥

संस्कार शुद्धेर्वैचित्र्यं विशदयति—

संस्कारशुद्धि-वैचित्र्यं प्रकृति-वैचित्र्यात् ॥ ४४ ॥

पुरुषाणां संस्कारशुद्धेः स्त्रीसंस्कारशुद्धेश्च साधनयोः पार्थक्यं पर्य्यालोच्य संस्कार-शुद्धौ कश्चित्क्रमोऽस्ति न वेति शङ्कायां अवसर उदेति, तत्राह—जीवप्रकृते र्वैचित्र्य-बाहुल्यात्संस्कारशुद्धेः साधनानामपि वैचित्र्य-सम्भूतत्वे नाणुरपि सन्देहः । त्रिगुणभेद-बुद्धिभेदाधिकारभेदादिकारणकलापात् कर्म-बीजात्मकसंस्कारस्यापि बलतारतम्यं सुतरां सम्पद्यते ।

उदाहृत्या यथा—समतलभूतले समारोपितमाम्रबीजं परिणामे सुधाव-त्सुस्वादु फलति । पार्वत्यप्रदेशे उप्तं तु तदेवाम्लतामाश्रित्य विरसतया परिण-मतीति महद् वैचित्र्यम् । करमर्दक-(आम्लातक) बीजञ्च समतलायां क्षिताव-त्याम्लतामाश्रितोऽपि पार्वत्यप्रान्तेऽतिसुस्वादु मधुरं च फलतीति जडेष्वपि प्रकृति-विशेषवैचित्र्योपलम्भाज्जीव-प्रकृति-वैचित्र्याद्विभिन्नाधिकारिभेदेन संस्कार वैचित्र्यपार्थक्यमपि स्वभावसिद्धमिति न शङ्कनीयम् ॥ ४४ ॥

पुनरुदाहृत्या विज्ञानमिदं समर्थयति--

अतो दोषो नाततायिबधे ॥ ४५ ॥

जीववधे पापो मनुष्यबधे पापातिशयः, परन्तु मनुष्येष्वेवाततायि-मानववधे नाणुरपि पापसम्पर्कः । प्रत्युत पुण्योद्गमो भवति हन्तुराततायिनामिति विवेकः ।

के आततायिनः कथञ्च तेषां वधे पापाभाव इति स्मृत्यन्तरं यथा--

अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः ।
क्षेत्रदारहरश्चैव षडेते ह्याततायिनः ॥
आततायिनमायान्तं हन्यादेवाऽविचारयन् ।
नाततायिवधे दोषो हन्तुर्भवति कश्चन ॥ इति ॥

अत्र कर्मणां जडत्वात्तेषां दैवायत्तफलसमर्पकत्वं स्वभावसिद्धम् । इत्यतः कर्मणां बीजभूतात्संस्कारात् फलोत्पत्तौ देवा एव निदानम् । अपरञ्च कर्तुश्चेतसि यथा भावोद्गमो भवति तथैव संस्कारस्तस्य चेतसि निधाप्यते ।

यदि कर्तुश्चेतसि गर्हितोऽशुद्धो भावः सम्भृतश्चेत् तदा संस्कारोऽपि तादृगेवाशुद्धो गर्हितस्तस्य चेतसि सञ्चीयते । यदि च कर्तुर्मानसे भावशुद्धिः स्यात् तदा तदीयः संस्कारः पुण्यसमेधकः शुद्धो भवेदिति निर्विवादम् ।

एवञ्चाततायिनां प्रकृतिविरुद्धकार्य्यैकर्तृत्वेन ईशसृष्टि-विघाताधायकत्वात्तेषां वधो देवानामानुकूल्यसम्पादक इति पुण्यजनकत्वं तस्य । अपरञ्च हन्तुर्मानसस्य भावशुद्धिपरिपूर्णत्वात्पापोद्गमस्य तु सम्भावनैव नोदेतीत्युभयथाऽप्याततायिवधः श्रेयान्पापाऽजनकत्वात् पुण्याऽधायकत्वाच्च ॥ ४५ ॥

प्रसङ्गतो राज्याभिषेक-संस्कार-प्रयोजनं निरूपयति—

तदर्थं राज्ञामभिषेकोऽपेक्ष्यः ॥ ४६ ॥

नरपतेरष्टानां लोकपानामंशप्रकाशेनैव योग्यत्वमिति स्मृतावुदीरितम्—

इन्द्रानिलयमार्काणामग्नेश्च वरुणस्य च
चन्द्रवित्तेशयोश्चैव मात्रा निर्हृत्य शाश्वतीः ।
जङ्गम-स्थावराणां च भूपः स्वतपसा भवेत् ॥
यस्मादेषां सुरेन्द्राणां मात्राभ्यो निर्मितो नृपः
तस्मादभिभवत्येष सर्वभूतानि तेजसा
यो हि धर्मपरो राजा देवांशोऽन्यश्च रक्षसाम् ।
अंशभूतो धर्मलोपी प्रजापीडाकरो भवेत् ।

याथार्थ्यतोऽस्मिञ्जगति सदैव देवासुरसंग्रामः प्रचलति । येन पवित्रात्मनः सदाचारसम्पन्नस्य धार्मिकस्य राज्ञः शरीरं देवानां पीठस्थानं भवति । कदाचारवतोऽपवित्रात्मनोऽधार्मिकस्य नरपतेः कायस्तु असुराणां पीठस्थानं सम्पद्यते ।

योग्यस्य भूपतेः शरीरे कियतामेव देवानाम् पीठस्थितिर्भवतीति पूर्वोक्तपद्यैर्विज्ञायत एव । इत्यतो राजा यदि पूर्वोक्तदेवानामंशसम्भृतः स्यात्तर्ह्येव स सर्वकलासम्पूर्णः कथ्यते । दैव-शक्तिसम्पादनेनैव नरपतिः स्वपदार्ह-योग्यतामासादयितुमर्हतीति सुनिश्चितम् । एतद्योग्यतोपलब्धये नरपतेे राज्याभिषेकसंस्कार आवश्यकः ।

यथा पूर्वोक्तयज्ञेषु दैवानुकम्पोपलब्धिर्भवति, तथैवेहाऽपि राज्याभिषेके वेदमन्त्राणां वैदिक-क्रियानुष्ठानादीनां च साहाय्येनास्य संस्कारस्य साफल्याबा-प्तावश्यं नरपतिरासां दैवशक्तीनां विकाशमासादयति। संस्कारयागेषु शक्ति-वैचित्र्यस्यैतदपि प्रदीप्तमुदाहरणं ज्ञेयम्। एतत्तु न कदापि विस्मरणीयम्, यद्यथा षोडशसु संस्कारेषु अभ्युदयस्य तदनन्तरं निःश्रेयसस्य चाधिगतये क्रमो विद्यतेऽ-परतश्च प्रवृत्तिनिरोधस्यानन्तरं निवृत्तिपोषणस्य च तत्र यथा शक्तिप्रश्रयोऽस्ति नैवैषु संस्कारेषु तस्य क्रमस्य तस्याः शक्तेर्वोपलब्धिरित्यवश्यमभ्युपगन्तव्यम्। तत्रापि राज्याभिषेककल्पाः संस्कारास्तु केवलमभ्युदयमात्रं समर्पयन्ति, नैवास्ति एषामन्यत्राणीयानपि शक्तिप्ररोहः।

नरपतिर्यदि योग्यतरः स्यात्तर्हि तु स स्वप्रजासमष्टिसमभ्युदयमपि साधु संसाधयेदित्यन्यदेतत्। यतो हि योग्ये राजनि प्रजासमष्टिसमभ्युदयोऽपि समेधते। तस्य राज्ञः समभ्युदयस्य तु कथैव का। भगवतः श्रीकृष्णस्य "नराणाञ्च नराधिप" इत्यभिधानस्याप्येतदेव प्रयोजनम् यद्—

"राज्ञि धर्मिणि धर्मिष्ठाः पापे पापाः समे समाः।
राजानमनुवर्तन्ते यथा राजा तथा प्रजा" इति ॥ ४६ ॥

सम्प्रति तद्धेतुं निरूपयति—

धर्मरक्षकत्वात् ॥ ४७ ॥

संस्कारशुद्धधैर्यैश्चित्रपादाततायिवधात्पुण्योत्पत्तिरित्युदाहृतं प्राक्। तदनन्तरश्च दैवशक्तिसम्पादनक्षमस्य राज्याभिषेकसंस्कारस्यापि प्रयोजनं परिलक्षितमिदानीमत्रोद्भूतायाः कथं नररूपेऽपि राज्ञि देवानामधिवासः? इति शङ्कायाः समाहितिरुच्यते—

धर्मरक्षाया अनन्यसाधारणात्मिकायाः शक्तेस्तत्र राज्ञि विद्यमानत्वात् तस्य राज्ञो दैवपीठाधिष्ठानत्वमावश्यकम्। प्रजानां तामसिक-राजसिक-सात्त्विकभेदेन तद्बुद्धेरपि त्रैविध्ये न कोऽपि विवादः। उक्तश्च भगवद्गीतायाम्—

प्रवृत्तिञ्च निवृत्तिञ्च कार्य्याकार्ये भयाभये ॥
बन्धं मोक्षञ्च या वेत्ति बुद्धिः सा पार्थ ! सात्त्विकी ॥
यया धर्ममधर्मञ्च कार्य्यञ्चाकार्य्यमेव च।
अयथावत्प्रजानाति बुद्धिः सा पार्थ ! राजसी।
अधर्मं धर्ममिति या मन्यते तमसाऽऽवृता।
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ ! तामसी ॥

१८

इत्येवं त्रिविधास्वप्येतासु प्रजासु सात्त्विक्याः प्रजायाः कृते योगानुशासनम्, राजसिक्यास्तस्याः कृते शास्त्रैस्तत्तदाचार्य्यैश्च कृतं पवित्रं शब्दानुशासनम्। तामसिक्याः प्रजायाः कृते तु राजानुशासनमेव केवलं परमं हितं साधनं नान्यदिति सर्वसम्मतम् ।

इह जगति तामसिकीनामेव प्रजानां सर्वत्र भूयस्त्वात्तच्छासनाय तासां निरङ्कुशत्वनिरोधाय च धार्मिकस्य राजगुणसम्पन्नस्य राज्ञ आवश्यकत्वन्तु सर्वैरपि स्वीकरणीयम् । यतो हि तामसीनां प्रजानां दुर्दान्तायाः शक्तेर्निरोधेनैव राज्यच्छत्रभङ्गाभावो धर्माधर्मव्यवस्थितिश्च यथार्थतः प्रचलति । तथा च सात्त्विक्यः प्रजा मोक्षसाधने राजसिक्यश्च ता धर्मसाधने सुशान्त्या निर्बाधं प्रवृत्ताः समर्थाश्च भवन्ति ।

एवञ्च राजानुशासनं धर्मानुकूलं स्थिरीकृत्य धर्ममार्गस्य वर्णाश्रमव्यवस्थानस्य च यथायथं प्रवर्तनं, तत्र सौकर्य्य-सम्पादनञ्च राज्ञः प्रधानं कर्तव्यमिति तत्र राज्ञि देवपीठस्थित्यैवेदं दैवं कर्तव्यं साधु सम्पन्नं स्यात् । अन्यथा राजमदमोहितेऽपवित्रे आसुरसम्पत्तिसम्पन्ने राज्ञि राजधर्मोऽपि कलङ्कितो भवति । मोक्षमार्गोऽपि भ्रष्टो भवति । प्रजा अपि दुःखपयोधिमग्ना उद्विजन्ते राजदुःशासनादिति ध्रुवम् । अतश्च दैवशक्ति-सम्पत्त्यै राज्ञो राज्याभिषेकसंस्कार आवश्यक इति सर्वत्रैव संघुष्यते । तद्यथा—

यथा राजन् हस्तिपदे पदानि संलीयन्ते सर्वसत्त्वोद्भवानि ।
एवं धर्मान् राजधर्मेषु सर्वान् सर्वावस्थान् संप्रलीनान्निबोध ॥

व्यवस्थितार्य्यमर्य्यादः कृतवर्णाश्रमस्थितिः ।
त्रय्या हि रक्षितो देशः प्रसीदति न सीदति ॥
राज्याभिषेकसम्पन्नो दैवशक्तिसमन्वितः ।
कर्मभि र्लोकपालानां प्रजापालनतत्परः ॥
यत्र स्याद्भूपतिः शास्ता क्षात्रभावसमेधितः ।
ब्रह्मानुयायी सततं तत्र स्वः पृथिवीतले, इति ॥ ४७ ॥

द्वितीयं हेतुमाह—

दण्डयितृत्वाच्च ॥ ४८ ॥

तामसीनां पापस्वभावानां प्रजानां पापतो विरत्यै धर्म्ममार्गपरिष्कृत्यै साधुपरित्राणाय दुष्ट-निग्रहाय धर्मार्थकाममोक्षव्यवस्थित्यै च दण्डविधानमेवैकं साधनं, तच्च राज्ञ एव भुजाश्रयमवलम्बते । स्मृतिशास्त्रे बहुश उद्गीतोऽस्यास्य दण्डस्य महिमा—

तस्यार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम् ।
ब्रह्मतेजोमयं दण्डमसृजत्पूर्वमीश्वरः ॥
तस्य सर्वाणि भूतानि स्थावराणि चराणि च ।
भयाद्भोगाय कल्पन्ते स्वधर्मान्न च्यवन्ति च ॥
स राजा पुरुषो दण्डः स नेता शासिता च सः ।
चतुर्णामाश्रमाणाञ्च धर्मस्य प्रतिभूः स्मृतः ॥
सर्वो दण्डजितो लोको दुर्लभो हि शुचि र्नरः ।
दण्डस्य हि भयात्सर्वं जगद् भोगाय कल्पते ॥
देवदानवगन्धर्वा रक्षांसि पतगोरगाः ।
तेऽपि भोगाय कल्पन्ते दण्डेनैव निपीड़िताः ॥
दण्डः शास्ति प्रजाः सर्वा दण्ड एवाभिरक्षति ।
दण्डः सुप्तेषु जागर्ति दण्डं धर्मं विदु र्बुधाः ॥

तात्पर्यतो राज्ञो दण्डनेतृत्वात्तस्मिन्निन्द्रस्य यमस्य च पीठाधिवासः समुचित एव । नो चेदेतेषामधिष्ठानाभावात् प्रमादग्रस्तो नरपतिः स्वस्य प्रजानाञ्चोभयेषामेवाहितं कर्तुमुद्यतो भवेत् । असत्कर्मणः सत्कर्मसु प्रवर्तकत्वाद् अधर्मनाशकत्वाच्च गन्धप्रेरकस्य वायोस्तमोनाशकस्य रवेरधिष्ठानं राज्ञि समपेक्षितमेव । अन्यथाऽनयोरधिष्ठानाभावाद्राज्ञः स्वस्य परेषाञ्चासत्कर्मप्रसक्त्याऽज्ञानान्धकारमग्नतया चामङ्गलाधानमव्याहतं स्यात् । प्रजारक्षार्थमग्नेरिव सर्वभागभक्षित्वं रसै र्वरुणस्येव धनैः प्रजापोषणकर्तृत्वमप्यावश्यकं राज्ञोऽन्यथा प्रजानां महती विनष्टिः स्यात् ।

करैश्चन्द्रस्येव स्वगुणकर्मभिः प्रजाह्लादकत्वं कुवेरस्येव प्रजासु धनवितरणाय राज्ञो धनाधिपत्वम् । तदभावे राज्ञा कियती प्रजानां हानिरज्ञानत एव विहिता भवति इति विवेचनीयम् । इत्यतो नरपते राज्याभिषेकसंस्कारसम्पादनमत्यावश्यकम् । यतो हि तस्मिन्ननुष्ठिते हि शरीरमानसे देवबलाधिष्ठानतामाश्रयतः । तदनन्तरञ्च सदाचाराणां स्वधर्मस्य संरक्षणेन च तस्याः शक्तेः परिपालन मवश्यप्राप्तम् ।

स्मृतिषु विषयोऽयं यथावद्विवर्णितः । तथाहि—

भागभाग् रक्षणे दक्षो यथेन्द्रो नृपतिस्तथा ।
वायुर्गन्धस्य सदसत्कर्मणः प्रेरको नृपः ॥
धर्मप्रवर्तकोऽधर्मनाशकस्तमसो रविः ।
दुष्कर्मदण्डको राजा यमः स्याद्दण्डकृद्यमः ॥

अग्निः शुचिस्तथा राजा रक्षार्थं सर्वभागभृत् ।
पुष्यत्यपां रसैः सर्वं वरुणः स्वधनै र्नृपः ॥
करैश्चन्द्रो ह्लादयति राजा स्वगुणकर्मभिः ।
कोशानां रक्षणे दक्षः स्यान्निधीनां धनाधिपः ॥
चन्द्रो यथा विना सर्वैरंशैर्नो भाति भूपतिः ॥ ४८ ॥

प्रसङ्गतः पुनः संस्कारशुद्धिमाह—

अतः सफलमाशौचम् ॥ ४९ ॥

प्रकृति-वैचित्र्य-वशाद्विविधास्ववस्थासु विविधा हि संस्कारशुद्धि-प्रकारा भवन्ति। इत्यत एव कर्मरहस्य-मर्मज्ञैर्महर्षिभिरनेकधा संस्कारशुद्धिसरणि र्निदर्शिता धर्म्मशास्त्रेषु तेषु। तत्र वैचित्र्यस्यैकस्योपन्यासमुदाहरणमुखेनेह निर्दिशति—शास्त्रेषु यदाशौचप्रकरणमुपनिबध्यते तस्य पूर्वोक्त-प्रकृतिवैचित्र्येण दैवकारणतश्च सिद्धिरिति।

धर्म्म-शास्त्रेषु जननाशौचमरणाशौचभेदेन हि द्विविधमाशौचमुपन्यस्तम्। तत्र प्रकरणे कालक्रिययोः साहाय्यव्यवस्थानमपि शुद्धिप्रकाराय यत्स्वीकृतं तदप्येतद्विज्ञानमूलकमेव। अस्मिन् मृत्युलोके प्राणिनां जीविताऽवस्थायामेवात्मीयैर्बन्धुवर्गैः सह पारस्परिकः सम्बन्धो निर्णीयते। पूर्वजन्मोपार्जितानामनेकविधानां कर्मणां प्रवाहवेगतो विविधप्रकाराणि कर्माणि संगृह्य जीवानां स्वोपसञ्चितकर्मानुसारं विशेषजातौ विशेषकुले विशेषप्राणिभिः सह विशेषात्मीयसम्बन्धनिर्णयेन सार्धमेव जन्म भवति। स च सर्वविधोऽपि सम्बन्धः स्थूलशरीरसम्बन्धनिदानक एव जन्मकालादारभ्य मरणकालावधिकस्तिष्ठति, मरणानन्तरमेव विच्छिद्यते। इत्यत एव हेतो र्जन्म-मरणयोरुभयोरेव सन्ध्योराशौचपातस्यावश्यकत्वमापतति।

समष्टिव्यष्टिसम्बन्धो यथा सर्वथाऽनुस्यूतोऽस्ति तथैव कुलेन सह तत्कुलोत्पन्नप्राणिनः सम्बन्धो मणिसूत्रवदनुस्यूतस्तिष्ठति।

वर्णाश्रमधर्ममर्य्यादया विशेषतः सुरक्षितपावित्र्याया आर्य्यजाते र्विस्तरशो वर्णनं पूर्वस्मिन् धर्मपादे विवेचितमेव। इत्थम्भूताया आर्य्यजाते र्दैवराज्येन सह सम्पृक्तसर्वसम्बन्धायाः पितृभिः सुरक्षित-कुलविशेष-मर्य्यादापरम्पराया स्तस्याः सम्बन्धिनः कस्मादपि कुलात् कस्यचनार्य्यजातिगतस्य प्राणिनो विच्युतिः तस्मिन्नन्यस्य कस्यचन प्रवेशो वा नाल्पप्रयाससंसाध्यः। यतो हि दैवेन साम्राज्येन सम्बन्धभाजां कुलविशेषाणां ह्रासवृद्धि-संकलनव्यवकलनादिसंख्यागणनादिव्यवस्था दैवे जगत्येव तिष्ठति। अपरतश्च कस्यचन वैश्यवर्य्यस्या-

वस्थाविशेषे, धनायवृद्ध्या आनन्दावाप्तिः तद्ध्रासक्रमेण च निरानन्दानुभवः क्रमशोऽनुभूयत इति सर्वप्राणिप्रत्यक्षः पन्थाः । तथैव कुलसम्बन्धजुषः प्राणिनः परलोकगतस्य इहैव स्थितस्य वा स्वकुलवृद्धिह्रासदर्शनेनावश्यं सुखदुःखानुभव इति स्वभावसिद्धो मार्गः ।

अन्यतश्च संस्कारराज्ये कर्मजगति चैवम्भूतस्य परिवर्तनस्य कुलनिर्गमन-कुलान्तरप्रवेशरूपस्य सन्धिद्वयस्य महान् आघातप्रत्याघातो जरीजृम्भ्यते । यद्यपि सर्वत्र न समानरूपतयैवात्राघातप्रत्याघातोद्गमो भवति, तथापि पितृलोके मृत्युलोके तु महतः परिवर्तनस्यावसर उपतिष्ठत्येवेति सर्वैरप्यन्तर्जगदभिज्ञैः परिज्ञायत एव । सत्येतादृशे परिवर्तनसमये संस्कारशुद्धि-क्रिया शुद्धि-सम्पादकं संयमानुष्ठानं कर्मविज्ञानानुमोदितमिति सर्ववादिसिद्धम् ।

इत्यतोऽनयोजर्ननमरणसन्ध्योः शास्त्रोक्ताशौचविधानाङ्गीकारेणानेके उपकाराः सफलिता भवन्ति,तद्यथा—

कुलात्मकसमष्टिकाये रागाभिनिवेशजन्यस्यान्तःकरणावरणस्यापक्षयेण-ततो विमुक्तिः । कुलदेवस्य कुलपितृवर्गस्य च सम्बर्द्धनम् । उभयोरपि सन्ध्योः संयमानुष्ठित्याऽऽत्मसंशुद्धिः, कुलसमष्टिसम्बन्धस्य च दाढ्यमित्याद्यनेके लाभोद्गमा भवन्तीत्यतः सन्ध्यो र्द्वयो राशौचानुष्ठानमावश्यकम् ।

ननु जीवन्मुक्तस्य शत्रुत्वमुपगतस्य प्रियतमस्य चात्मसम्बन्धिनो मृत्युज-वियोगे कथमेकविधमेवाशौचानुष्ठानम् ? समानकुलयोरेव बालवृद्धयो र्मरणाशौचे कथम्पार्थक्यम्, विवाहितायाः पतिगृहस्थितायाः कन्यायाः कथमाशौचाभावः ? इति प्रश्ने समाधत्ते—

संस्कारमूलकस्याशौचविज्ञानस्यान्तर्जगत्सम्बद्धस्य संस्कारस्य विमुक्त्यैव तस्याशौचस्य विमुक्ति र्नितरां सम्बद्धा इत्यतस्तस्य जीवन्मुक्तस्य शत्रुतामाश्रितस्य आहो प्रेमपात्रतातिशयमधिगतस्य वा आत्मीयस्य मरणाशौचे कुलजन्यसंस्कारनियमसाम्यान्न तारतम्यम्, बालवृद्धयोश्च समानकुलयोरपि संस्कारसम्बन्धपार्थक्यादाशौचपार्थक्यं तदीयविज्ञानमूलन्न विजहाति । विवाहितायाश्च कन्यायाः स्वसत्वनिवृत्तिपूर्वकपरसत्वोत्पादनात्मकस्य दानविधेरनुष्ठानात् सर्वथा गोत्रसम्बन्धादिभेदतः कुलसम्बन्धविच्छेदो जायते । यद्येतन्न स्यात्तर्हि दानविधिरेवासफलितो भूत्वा विवाहसंस्कारमेव न साधयेत् ।

स्वगोत्राद् भ्रश्यते नारी-विवाहात्सप्तमे पदे ।
पतिगोत्रेण कर्तव्यस्तस्या ऊर्ध्वविधिस्ततः ॥

इत्यादि-स्मृतयोऽपि कन्यायाः स्वपितृकुलात्सम्बन्धत्यागमेवोद्गिरन्ति । इत्यादि प्रश्नसमाधानविमर्शेऽत्रेतरत आशौचविज्ञानप्रकरणं सिध्यति ॥ ४६ ॥

विज्ञानमिदं स्पष्टयितुमाह—

तत्तारतम्यं चातुर्वर्ण्ये ॥ ५० ॥

तस्य आशौचस्य तारतम्यं विभागशो ह्रासवृद्धिव्यवस्थानं चातुर्वर्ण्ये चतुर्णां वर्णानां भावश्चातुर्वर्ण्यं तस्मिन् ब्राह्मण-क्षत्रिय-वैश्य-शूद्रेषु इति सूत्रार्थः ।

स्मृतिशास्त्रेषूपलभ्यमानो ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणामाशौचकालविभेदोऽपि आशौचविज्ञानस्य संस्कारमूलकतां साधयति, ब्राह्मण-क्षत्रिय-वैश्य-शूद्रा श्चत्वारोऽपि वर्णाः चतसृणां श्रेणीनां संस्कारैर्निर्धारिताः । एषु वर्णेषु समधिगतजन्मसु जीवेषु यादृक् कुलसंस्कार-प्रभावस्तादृगेव जातिसंस्कारप्रभावः समुद्भवति । अतस्तेषां वर्णानां स्वाध्यात्मिकाधिकारानुरूप एवायमाशौचशुद्धौ कालविभागः । कुत्रचनाशौचकालनिर्णये समुपलभ्यमानोऽप्याचार्याणां परस्परमतभेद आशौचस्य मौलिकविज्ञानविषये न कमपि विभेदमातनुते । वस्तुतो वर्णधर्मानुसारतो यः शास्त्रेषु आशौचभेद उपलभ्यते । तत्र प्रकृतिवैषम्यमाध्यात्मिकस्थितिवैषम्यञ्च हेतुरित्यवश्यमभ्युपेयम् ॥ ५० ॥

अन्यथाऽपि विज्ञानमिदं सुस्पष्टयति—

तत्र विशेषतोऽपि वैषम्यम् ॥ ५१ ॥

तत्राशौचे विशेषतोऽपि विशेषकारणादपि वैषम्यं विभेदो भवति इति सूत्रार्थः । केवलं वर्णानुसारत एव नाशौचकालनिर्णये वैषम्यम्, किन्तु अन्यप्रकारेणापि आशौचकालावधौ वैषम्यं विद्यते । विविधास्ववस्थासु आशौचकालनिर्णये धर्म्माचार्य्याः स्व-स्वमतानि विभिन्नानि निदर्शयन्ति । अत्रापि पूर्वोल्लिखितं विज्ञानमेव हेतुः ।

कुलसम्बन्धविचारेण कुलपर्य्यायसम्बन्धविवेकेन, आयुर्वर्षसम्बन्धविवेकेन, संस्कार-सम्बन्धोत्पत्तिकालविचारेण, आशौचनिमित्तीभूतानां तत्प्रभावान्वित शरीराणां च शक्तितारतम्य-पर्य्यालोचनया, देशकालपात्रनिमित्तादि पर्य्यालोचनेन च धर्म्माचार्य्या आशौचकालनिर्णयं व्यवस्थापयन्ति ।

दूरदेशस्थस्य मृतस्य ब्राह्मणजातीयस्य पञ्चत्वं दशरात्रदिवसादूर्ध्वं श्रुतं चेत्तद्दिनमेवाशौचान्तम्, एवं बालकानां कृतेऽन्य-मरणाशौचमल्पीयस्तन्मरणाशौचमन्येषां कृतेऽपि लघीय एव मृतव्यक्तेः शरीरालाभेऽन्यविधैवाशौचव्यवस्था-

इत्यादीनि यावन्त्याशौचव्यवस्थानानि शास्त्रेषूपलभ्यन्ते तावन्ति सर्वाण्येवोभयोः पक्षयोः पर्य्यालोचनया, कर्म्मगतिविचारेण, पूर्वोक्तविज्ञानानुसारमेव विधीयन्ते।

प्रकृत्यधिकारावस्थाया वैचित्र्याद्बुद्धेर्मनोः संस्कारशुद्ध्यै, तथा च धर्म्मोन्नतिसम्पादनाय च विविधानि साधनानि धर्मशास्त्रादिषु वर्णितान्युपलभ्यन्ते तेषां सम्मिलितानान्तु मूलसिद्धान्तपर्यालोचनं कथमपि कर्तुं न पार्य्यते। परन्तु पृथग्विभिन्नानां क्रियाणां सिद्धान्तमीमांसा तु न कथमपि सुशक्येति सर्वज्ञो महर्षिः सूत्रकारस्त्रिगुणभेदभिन्नानां त्रिविधानामेव धर्मसाधनसंस्काराणां मीमांसयाऽस्य गहनस्य विषयस्य दिग्मात्रनिदर्शनमुपक्षिप्तवान्। यथा—आततायिवधे हिंसाजन्यः संस्कारस्तामसिकः। राज्याभिषेकजस्तु राजसिकः आशौचशुद्धिजन्यश्च संस्कारः सात्त्विक इत्युदाहरणान्यूहनीयानि ॥ ५१ ॥

पुनरपि विज्ञानमिदं समर्थयति—

अन्येऽपि तथा ॥ ५२ ॥

इदानीं संस्कार-यज्ञानामन्यविधानाञ्च संस्कारशुद्धीनां मीमांसां विधाय वेदशास्त्रान्तरविहितान्यसंस्काराणामपि मीमांसामारभते। तथा हि वैदिक तान्त्रिकमिश्रभेदेन त्रिधा विभिन्नः संस्कार-समूहः। यथा—

वैदिकी तान्त्रिकी मिश्रा त्रिविधा कर्मचोदना
स्मार्तं पौराणिकं तान्त्रं त्रिधा कर्मैव तान्त्रिकम् ॥

वेदविहिताः कर्मसंघा वैदिकाः। स्मार्त-पौराणिक-तान्त्रिकाणि च कर्माणि तान्त्रिकाणि, वैदिकानि तान्त्रिकाणि च सम्मिलितानि मिश्रशब्दवाच्यानि भवन्ति। वेद-सम्मताः संस्कारयज्ञा वैदिका वा स्युस्तान्त्रिका वा स्युरसर्वेऽपि देवानुकम्पाप्रदाः। यतो हि ते सर्वेऽपि वेदविहितविज्ञानमूलकाः शास्त्रीयविज्ञानमूलका श्चेति। मिश्रस्तान्त्रिकश्च संस्कारसंघो वैदिक-संस्कारयज्ञवदीतिवत् द्रव्यशुद्धिक्रियाशुद्धिप्रभृतिसप्ताङ्गपरिपूर्णौ भवतः। प्रवृत्तिरोधकौ निवृत्तिपोषकावपि तौ ज्ञेयौ ॥ ५२ ॥

प्रकृतं विज्ञानं द्रढयन्नाह—

त्रिविधशुद्धिमत्वात् ॥ ५३ ॥

वैदिकाः संस्कारा यथा बुद्धिमनःशरीरेषु त्रिष्वपि स्वप्रभावमासञ्जयन्ति, तथैव तान्त्रिका मिश्रा अपीति सुनिश्चितम्। वैदिकाः संस्कारा यथाध्यात्माधिदैवाधिभौतशुद्धिसम्पादका स्तथैव तान्त्रिका मिश्रा अपि संस्कारा स्त्रिविधशुद्धिविधायका इति न विस्मरणीयम् ॥ ५३ ॥

प्रसङ्ग-संप्राप्तां शङ्कासमाधत्ते—

अवैदिकोऽप्यपूर्णो न निष्फलः संकल्पवत्त्वात् ॥५४॥

नन्वेकतो वैदिकमार्गावलम्बिषु बहव ईदृशाः संस्कारा उपलभ्यन्ते ये पूर्वोक्त-सप्ताङ्गपरिपूर्णा न सन्ति । स्मार्त्ताश्चाचारा अप्यनेकशस्तादृशाः प्राप्यन्ते अन्यतश्च अवैदिकेऽपि विभिन्नमतोपधर्मावलम्बिषु विविधास्तादृशाः संस्कारा विधीयमानाः समवलोक्यन्ते येषु पूर्वोक्त-सप्ताङ्गपूर्णता कथमपि नासाद्यते । तत् किं ते सर्वेऽपि लौकिकाः स्मार्त्तादयोऽवैदिकाः संस्काराः सर्वथा निष्फला एव ? उताहो तत्रास्ति कियदपि फलतारतम्यमिति शङ्कायाः समाधानमाह—

अवैदिको वेदभिन्नोऽपूर्णः पूर्णफलाभाववानपि संकल्पवत्त्वात् संकल्पशालित्वात् न (सर्वथा) निष्फलः फलशून्यो ज्ञेय इति सूत्रार्थः ।

यद्यपि वेदानां तत्सम्मतशास्त्राणाञ्च कर्मविज्ञानेन विहीनासु संस्कारक्रियासु पूर्वोक्तानि सप्ताङ्गानि नोपलभ्यन्ते, नापि तत्र त्रिविधानां शुद्धीनामस्ति क्रमः; तथापि तत्र सर्वास्वपि संस्कारक्रियासु संकल्पस्यावश्यं विद्यमानत्वात् तज्जन्यफलावश्यम्भावः स्वतः सिद्ध एव, यतो हि संस्काराणां संकल्पमूलकत्वात् संकल्पेनान्तःकरणेऽवश्यं संस्काराः संगृह्यन्ते । इत्यतोऽवैदिकाः संस्कारराशयोऽपूर्णाः पूर्णफलप्रदत्वशक्तिविरहिता अपि नैकान्ततो निष्फलाः फलशून्याः ॥ ५४ ॥

संस्कारभेदानाह—

स द्विविधः स्थूल-सूक्ष्म-जन्यत्वात् ॥५५॥

संसारोऽयं सूक्ष्मस्थूलभेदेन द्विधा विभक्तस्तत्र सूक्ष्मं दैवराज्यं स्थूलंरूपो मृत्युलोकश्च तयोरुदाहरणं ज्ञेयम् । उभयोरनयोः परस्परसम्बन्धस्यातिघनिष्ठतयैव स्थूलाभ्यामन्नजलाभ्यां सम्पादिते श्राद्धातर्पणे सूक्ष्मजगदधिष्ठितानात्मनोऽन्यत्र वा क्वचन जगत्यां गृहीतजन्मन आत्मनस्तर्पयतः ।

अन्यतश्च मानसिकसपर्य्यया तत्फलमिह लोके समुपलभ्यते । ततश्चोपासनाकार्य्य-सिद्धिरपि सत्वरं सञ्जायते इत्यत एव संस्कारसृती द्विविधे स्मृते ययो र्विशेषेण वर्णनमग्रे वक्ष्यते ॥ ५५ ॥

तत्र प्रथमं सूक्ष्मसम्बन्धं विशदयति—

दीक्षा-सन्यासादयः सूक्ष्मसम्बद्धाः ॥ ५६ ॥

प्रथमसृतौ दीक्षा-संन्यासादय उदाहर्तव्याः । यतो हि दीक्षायां प्रवृत्तिमार्गीयस्त्यागजः संकल्पः, इष्टदेवेन सहातिशयितः सम्बन्धस्तस्मिन्नात्मसमर्पणञ्च एतानि सूक्ष्मराज्यसहायतया संसिध्यन्ति ।

तथा संन्यासे संकल्पबलेन ऊर्ध्वाधोमध्यलोकत्यागः शारीरिकधारणात्यागश्चाप्यन्तःकरणसाहाय्यतः संसाध्येते । इत्येवमेनावृशस्थितिगाः संस्काराः साक्षात्सूक्ष्मजगतैव सम्बन्धजुषो भवन्ति ।

विज्ञानद्वयास्य स्पष्ट-प्रतिपत्तये इत्थमूह्यम् यत्-दीक्षाया गुरुप्रविष्टो मन्त्रः संन्यासस्य प्रेषमन्त्रश्च—गुरुमुखोच्चारितो भूत्वा साक्षादेव कर्णविवरेण शिष्यान्तःकरणे प्रविश्य तत्र पूर्णतया फलं प्रसूते । उक्तयोरनयोः संस्कारयोः सिद्धिलब्ध्यै कस्यापि स्थूलपदार्थस्य स्थूलाया बहिष्क्रियाया वा नापेक्षते सत्ताम् । दीक्षायां गुरुमन्त्रस्य कर्णकुहरेणान्तःकरणे प्रवेश आवश्यकः प्रेषमन्त्रस्य च संन्याससंस्कारे श्रवणमेव मुख्यमिति न विस्मर्तव्यम् ॥ ५६ ॥

सम्प्रति द्वितीयस्य वर्णनमारभते—

अन्त्येष्टि-प्रभृतयोऽन्य-सम्बद्धाः ॥ ५७ ॥

द्वितीयश्रेणिस्थोदाहरणाय अन्त्येष्टिक्रियाप्रभृतयः संस्कारा ऊहनीयाः । अन्त्येष्टिक्रियायामन्तर्जलावासेन प्राणवायव ऊर्ध्वमेव गच्छन्ति । पवित्रतमेषु गङ्गातटादिषु च यथाविधि मृतदेहस्यान्त्येष्टिक्रियासम्पादनेन परलोकगतस्यात्मनः स्थूलशरीरे पावित्र्याधानेन शान्तिलाभो भवति ।

अन्त्येष्टिक्रियायाः पूर्वाङ्गक्रियासम्पादनतः स्थूलशरीरप्रभावः सूक्ष्मशरीरे तथाऽसज्यते यथा परलोकवासिना जीवेनोर्ध्वगति ध्रुवमासाद्यते । विज्ञानसिद्धमिदं यत्प्राणमयः कोशस्त्रिभिरन्यैः कोशैः सह जीवात्मानमूर्ध्वमुन्निनीषन्नन्नमयकोशात्मकं स्थूलशरीरं परित्यज्य लोकान्तरं गच्छति ।

अन्यतश्च प्रत्यक्षसिद्धमेतत् यत् स्थूलतरं तत्त्वं सूक्ष्मक्रियां बाधितुमर्हतीति नियमानुरूपं नाभिं यावत् अर्धकायं जलमग्नश्चेत् प्राणमयकोशात्मकमातिवाहिकं सूक्ष्मं शरीरं नाभितो नाभेरधोमार्गेण वा कदापि न निर्गच्छति । अपि तु तत उपरितनेभ्य एव मार्गेभ्यो निःसरतीति जीवात्मन ऊर्ध्वगतिरावश्यकी ।

अन्त्येष्टिक्रियाया द्वितीयाऽवस्था केवलं स्थूलशरीरेणैव सम्बध्नाति । तथा हि यदि परलोकान्तरितस्य जीवात्मनः स्थूलशरीरं शीघ्रमेव गङ्गाजलेनानलेनान्येन वा पवित्रवस्तुना सम्पर्कमासाद्य स्वयमपि पूततामासादयेत्, अथवा तस्य स्थूलदेहस्य परमाणवो रूपान्तरमासादयन्तो दैवबलेनापि पावनत्वजुषः स्युस्तर्हि संस्कारेणानेन तत्सम्बन्धिनः परलोकमधिगतस्य जीवात्मन आध्यात्मिकोन्नतावश्यं कियत्यपि बलवृद्धिरुपैतीति ध्रुवमङ्गीकरणीयम् ।

विज्ञानस्यास्य सुस्पष्ट-प्रतिपत्तये पुनर्विशदयति यत्-स्थूलदेहेन सहाति-घनिष्ठसम्बन्धभाजित्वात् परलोकान्तरितो मृतात्मा स्व-सूक्ष्मस्थूलशरीरत्यागा-नन्तरमपि तत्रैवात्मदृष्टिमासज्जयति । तदा च तस्य स्थूलदेहस्तदीयाः परमाणवो वा यदि पावनत्वमासादयन्ति तदा तज्जन्यः संस्कारस्तत्रात्मन्यपि च श्रममासज्ज-तीति विज्ञानसिद्धम् । यतो हि यादृशं पदार्थमन्तःकरणं गृह्णाति, तादृगेव संस्कारस्तस्मिन्नुदेति । इत्यतोऽस्य द्वितीयश्रेणिस्थस्य संस्कारस्य प्रभावः स्थूलशरीरसाहाय्येन सूक्ष्मशरीरेऽपि संलक्तो भवति । एतदेव पूर्वश्रेणिग-संस्कारेण सहास्य संस्कारस्यान्तर्य्यम् ॥ ५७ ॥

शरीरद्वैविध्यप्रसङ्गेन कोशविकाशरहस्यं निर्वक्ति—

उद्भिज्जादाजरायुजं चतुष्कोशक्रमोन्मेषः ॥ ५८ ॥

चतुर्णां कोशानां क्रमेण उन्मेषो विकास उद्भिज्जाद् उद्भिद्योनितो जरायुजं जरायुजयोनिं यावत् भवतीति सूत्रार्थः ।

स्थूलसूक्ष्मात्मकशरीरद्वयक्रिया-सम्बन्धशालिभ्यां स्वाभाविकास्वाभावि-काभ्यां संस्काराभ्यां युक्तस्यास्वाभाविकस्य संस्कारस्य विस्तृतं वर्णनं कृत्वाऽ-धुना स्वाभाविकसंस्कार-सम्बन्धिषु विविधेषु पिण्डेषु कोशानां क्रमविकाश-रहस्यवर्णनं कर्तुमारभते—

पूर्वस्मिन् येषां संस्काराणां वर्णनं जातं ते सर्वेऽपि अस्वाभाविक संस्का-रमध्यगा एवोहनीयाः । यद्यपि वैदिकेषु षोडशसु संस्कारेषु सुकौशलिन्यः कियत्यः क्रिया ईदृश्यः प्रतिविहिताः सन्ति, याभिः स्वाभाविकानामेव संस्का-राणां गतिः समेधिता भवति । अस्वाभाविकानान्तु स्रुतिर्मूलतो हि निरुद्धा जायते । परन्तु पूर्वोक्तास्तु सर्वेऽपि संस्कारसंघा मनुष्यसंकल्पाधीनत्वात् अस्वाभाविककोटावेवान्तर्भवितुमर्हन्ति ।

ननु पूर्वं स्वाभाविकसंस्कारकोटौ परिगणितानां षोडशानां संस्काराणां कथमिहास्वाभाविक–संस्कारकोटौ परिगणनेति प्रादुर्भूतां शङ्कां समादधाति–मानवसंकल्पजानामस्वाभाविकानां संस्काराणां द्विविधा स्थितिः । एका तु मानव-वासना-जन्या, यत्र स्वाभाविकानां संस्काराणां विकासस्यावसर एव नायाति । द्वितीया च वैदिकप्रेरणया वैधसंकल्पजन्यानां संस्काराणां स्थितिः । यत्र मनुष्यसंकल्पसम्बन्धसत्तायां विद्यमानायामपि च यथाकथञ्चिदस्वाभाविक-त्वसत्त्वेऽपि तैरेकतोऽस्वाभाविकानां संस्कारजालानां क्रमशो विनाशोऽपरतश्च मानव-निरङ्कुशसंकल्पतो निस्तेजस्कानां तदीयशक्तीनां क्रमविकासश्चेति ।

विज्ञानमिदमन्यथापि ज्ञातुं शक्यते—यथा स्वाभाविक-संस्काराणां
क्रमविकास-धारापरम्परा क्रमश उद्भिज्जयोनितो मानवयोनिं यावन्नियमतो विका-
समासादयन्ती मनुष्ययोनाविहागत्य अस्वाभाविकानां संस्काराणां प्रादुर्भावेन
स्वत एव निरुद्धा मानवानां जीवन्मुक्तावस्थायां पुनः स्वत एव पूर्णतामासाद-
यति । तथैव अस्वाभाविका अपि संस्कारा इतः पूर्णतया वैपरीत्यमाश्रिता मान-
वानां स्वाभाविकदशायां स्वपूर्णां शक्तिं प्रकाशयन्ति । वैदिकसंस्कारपुञ्जैश्च हीन-
बला जायन्ते ।

इत्यतो हेतोरेतदभिधातुं शक्यते यत् वाह्यरूपेण वैदिकसंस्कारसंघा मानव
संकल्पसम्बन्धभागस्वाभाविकसंस्कारसदृशा अपि स्वभावतस्ते स्वाभा-
विक-संस्कारमूलका एवेति न सन्देहलेशः, इत्यत एव ते मुक्तिप्रदानक्षमा इति
पूर्वमप्युक्तम् ।

इहास्मिन् सूत्रे आदिसर्गतः सम्बन्धजुषः क्रमाभिव्यक्ते वर्णनं यदुपक्रान्तं
तत्सर्वमपि स्वाभाविकसंस्कारबलापेक्षमेवोहनीयम् । स्वाभाविको हि संस्का-
रश्चिज्जडग्रन्थिसमुत्पत्तिसमकालमेवोत्पद्यते । तद्बलेनैव प्रकृतेर्मातुः स्वाभा-
विकायाः क्रियायाः स्वाभाविकस्पन्दनगतेश्चानुरूपं दैवसाहाय्यमाश्रित्य जीवः
स्वत उद्भिज्जयोनितः स्वेदजयोनिं ततोऽपि जरायुजयोनिं तद्वदग्रेऽपि क्रमशो
विवर्द्धमानः समेधते ।

अस्या एव क्रमोन्नतेः स्वाभाविकनियमानुसारतो दैवबलमासाद्य जीवः
क्रमेण स्वस्थूलशरीरे पञ्चकोशानां क्रमाभिव्यक्तिं विदधद् अग्रेसरो भवति ।
एवञ्चोद्भिज्जयोनौ सत्स्वपि पञ्चसु कोशेषु केवलमन्नमयकोशस्यैवाभिव्यक्ति-
र्दृश्यते । स्वेदजयोनौ चान्नमयस्य प्राणमयस्येत्युभयोरेव विकासः । अण्डज-
योनौ तु त्रयाणामपि अन्नमय-प्राणमय-मनोमयानामभिव्यक्तिः स्फुटं प्रतीयते ।
जरायुजयोनौ चान्नमय-प्राणमय-मनोमयविज्ञानमयानां चतुर्णां कोशानां पूर्णा-
भिव्यक्तिर्भवति ॥ ५८ ॥

सर्वेषां कोशानां कुत्र विकास इत्युपदिशति—

सर्वविकासोऽन्तिमे ॥ ५९ ॥

स्वाभाविकसंस्कारबलेन
क्रमाभिव्यक्त अरमोऽवधिर्मनुष्ययोनिरस्ति ।
क्रमशोऽग्रे संसरञ्जीवो यदास्यां मानवयोनौ समुपतिष्ठते । तदा स पूर्णो भूत्वा
पञ्चानामपि कोशानां पूर्णतामासाद्यान्नमय-प्राणमय-मनोमय-विज्ञानमयानन्द-
मयानां पञ्चानामेव कोशानां पूर्णाभिव्यक्त्या सम्पन्नो नितरां नन्दति । तदानीं

पूर्णतामधिगतः स जीवः पूर्णावयवसम्पन्नतया धर्माधर्मविवेकाधिकारवान् भवति । स्मृतिश्च—

पितरः ! पञ्चकोशा वै सर्वपिण्डप्रतिष्ठिताः ।
आवृण्वन्तो विराजन्ते मत्स्वरूपं न संशयः ॥
मध्यमासु निकृष्टासु तथोच्चैर्देवयोनिषु ।
सर्वास्वप्यवतिष्ठन्ते पञ्च कोशा न संशयः ॥
एतावांस्तत्र भेदोऽस्ति नूनं निम्नासु योनिषु ।
पञ्चकोशा विकाशन्ते नैव सामान्यतोऽखिलाः ॥
निखिलानान्तु कोशानां मर्त्यपिण्डेषु निश्चितम् ।
विकासः सर्वतः सम्यग् जायते नाऽत्र संशयः ॥ ५९ ॥

प्रसङ्गतः प्रथमाया योनेराधारं निर्दिशति—

क्षित्येकाश्रयत्वमुद्भिदः ॥ ६० ॥

उद्भिद उद्भिज्जयोनेः क्षितिरेव एकः केवल आश्रय आधारो यस्य तस्य भावः तत्त्वम् इति सूत्रार्थः । स्वाभाविकसंस्कारबलेन समुत्पन्नायाः पिण्डसृष्टेः साहाय्येन जीवानां क्रमाभिव्यक्ते विज्ञानं विस्पष्टयितुं, स्थावरत्वमधिगतानां जीवानामाश्रयं विवरीतुं च सूत्रयामासेदम् महर्षिः ।

चिज्जडग्रन्थिसमुत्पन्नो जीवः प्रथमश्रेणिगतं पिण्डमुपलभ्य तादृग् जडभावापन्नो भवति । यथा तत्र सत्स्वपि पञ्चसु कोशेषु चतुर्णामेवमप्रकाशस्तिष्ठति यथा नाणुरपि तेषां तत्राभिव्यक्तिप्रभावो भासते । केवलमेकस्यान्नमयकोषस्यैव सर्वथा तत्र विकासप्रभाव उपलभ्यते । तत्र जडत्वप्राधान्यात्स्थावर्य्याच्च स केवल–क्षितितत्त्वाश्रय एव तिष्ठति । यतो हि अन्नमयकोशे पृथिवीतत्त्वस्यैव प्राधान्यम् । अत्र प्रत्यक्षमेवेदं यत् मृत्योः पश्चात् परलोकगतस्यात्मनः शरीरमस्यामेव पृथिव्याम् विलीयते ॥ ६० ॥

उदाहरणतो विज्ञानमिदं समर्थयति—

ब्रह्माण्डपिण्डयोस्तथादर्शनात् ॥ ६१ ॥

प्रथमाभिव्यक्तिरूपा उद्भिज्जा जीवा विविधा भवन्ति । तत्र कियन्तः पिण्डाश्रयाः कियन्तश्च ब्रह्माण्डाश्रया भवन्ति । वृक्षा लतागुल्मा ओषधयश्चेमे उद्भिज्जा जीवा ब्रह्माण्डमाश्रित्य तिष्ठन्ति । यतो हीमे समष्टिमृत्तिकामुपभुञ्जते । अत्र ब्रह्माण्डशब्देन मृत्युलोको ज्ञेयः । यतो हि मृत्युलोक एव पृथिवीतत्त्वप्रधानो भवति ।

पिण्डेनापि सम्बन्ध उद्भिज्जानां जीवानामभिहितस्तत्रान्य-जीवशरीरे-ष्वपि विविधानामुद्भिज्जानामुत्पत्तिर्भवतीति हेतुरूहनीयः । यथा पृथिवीतलस्थ-वृक्षादिबीजैः पृथिवीतलं विभिद्याङ्कुरत्वमधिगम्यते, तथैव मनुष्यादिजीवपिण्डानां चर्मादि भित्त्वा विविधा उद्भिज्जा जीवा उत्पद्यन्ते इति प्रत्यक्षसिद्धम् । सर्व-मिदमघटनघटनापटीयस्या मायाया विलासवैचित्र्यानन्यमूलकमेवाऽवगन्त-व्यम् ॥ ६१ ॥

स्वाभाविकसंस्कारज-द्वितीयकोटिगानां जीवानामाश्रयमाख्याति—

स्वेदजो जलाग्निवाय्वाकाशाश्रयः ॥ ६२ ॥

यदा स्वाभाविक-संस्कारबलेन जीव उद्भिज्जकोटितोऽग्रे वर्द्धते तदा दैवं साहाय्यमाश्रित्य स्वेदजकोटिमारोहति । तत्र च तस्मिन् प्राणमयकोशस्यावि-र्भावः पूर्णतामासादयति । तदा तस्य कृते साक्षात् पृथ्वीतत्त्वस्य सहायता नापेक्षणीया भवति । सोऽन्येषां जलादि-चतुर्णां तत्त्वानामाश्रयेणात्मानं गोपायति । प्राणमयकोशस्याभिव्यक्त्या तत्कोटिगजीवेषु सामर्थ्यातिशयादेवंविधस्वरक्षा-शक्तिरेवोदेति । येन ते सर्वत्र स्वात्मानं गोपितुं समर्था भवन्ति । सर्वत्रैव च त उपलभ्यन्तेऽपि ॥ ६२ ॥

स्वेदजानां जीवानां वैलक्षण्यं साधयति—

गुणभेदादनेकधा ॥ ६३ ॥

प्राणमय-कोशानां विकासेन त्रिगुणानां पृथक् पृथक् प्रकाशस्तत्र दृष्टि-गोचरतामेति । स च सृष्टि-स्थिति-लय-कार्य्याणां सहायको भवतीत्येतदेवास्य वैचित्र्यम् । अन्येषु पिण्डेषु सृष्टि-स्थितिलयात्मकेषु कार्य्येषु एतेषां साक्षाद्रूपतः साहाय्यम् । अतस्ते त्रैगुण्यभेदादनेकधा भिद्यन्ते । स्वेदजा जीवा व्योमादिसर्व-भूतेषु विचरन्तोऽपि विविधश्रेणिस्थपिण्डेषु विद्यमानाः सन्तः स्वालौकिक्या शक्त्या तेषां पिण्डानां सृष्टि-स्थिति-लयेषु साहाय्यमाचरन्तीति तेषामपि पिण्डश्रेणिभेदादनेकत्वम् ॥ ६३ ॥

विज्ञानमिदं पुनर्द्रढयति—

ब्रह्माण्डपिण्डयोरोगारोग्यप्रदाः ॥ ६४ ॥

ते हि स्वेदजा जीवाः पिण्डानामन्तर्बहिश्च स्थित्वा समष्टिव्यष्टिरूपतो रोगाणामुत्पत्तिविनाशयोर्निदानतामाश्रयन्ति ।

जीवानां स्थूलशरीरविनाशाय समष्टिव्यष्टिविषोत्पादकास्ते स्वेदजा विशेषजातिगा निर्धारिताः सन्ति । ते हि सततं समष्टिवायौ विचरन्तो जीवानां समष्टिस्वास्थ्यं गोपायन्ति । महामारीप्रभृतिषु समष्टिरोगोत्पत्तये च त एव समष्ट्या निदानत्वमुपेत्य सर्वत्र रोगविस्तारमाचरन्ति । एवञ्च जीवानां स्थूलशरीरेषु तिष्ठन्तो विशेषश्रेणिगाः स्वेदजाः स्वप्राणसमर्पणेन तेषां स्वास्थ्यरक्षणं विदधति । सर्वरोगत आरोग्योपलब्धौ त एव सहायका भवन्ति । किम्बहुना रोगाणामुत्पत्त्या यच्छरीरविनाशो भवति तदपगत्या च यच्छरीरपुष्टिर्भवति तत्रोभयत्रैव ते निदानतामावहन्तीति तेषां विचित्रेयं प्राणशक्तिरलौकिकोऽयं तस्या महिमेति किं वक्तव्यमिति ॥ ६४ ॥

तत्रापि विशेषं ब्रूते—

अतीन्द्रिया अपि ॥ ६५ ॥

सर्वश्रेणिस्थेभ्यो जीवेभ्यस्तेषां वैचित्र्यमिदमन्यद् यत्ते अतीन्द्रिया इन्द्रियगोचरतामतीता अपि बहवो भवन्ति । तेषु विविधश्रेणिगेषु स्वेदजेषु बहव एवंविधाः सूक्ष्मा भवन्ति ये दर्शनेन्द्रियगोचरतां नैवाश्रयन्ति । ते च यथाक्रमं कियन्तो निर्दिश्यन्ते—वायुमण्डले भ्रमन्तः स्वेदजाः प्राणवायुमार्गमाश्रित्य नासिकारन्ध्राभ्यामन्तः प्रविशन्तः स्वास्थ्यं रक्षन्ति । जङ्गकणिकासु संस्थिताः कियन्तस्ते प्राणपोषणमाचरन्ति । शारीरकत्वग्रक्तमांसरजोवीर्य्यप्रभृतिषु धातुषु विद्यमानास्ते नित्यं सृष्टिस्थितिलयात्मकं कार्य्यं सम्पादयन्ति । ते सर्वेऽपि अतीन्द्रिया एवेति स्मृतिसिद्धम् तथा हि—

सूक्ष्मयोनीनि भूतानि तर्कगम्यानि कानिचित् ।
पक्ष्मणोऽपि निपातेन येषां स्यात् स्कन्धपर्य्ययः ॥
जलेषु वायुधारासु रक्तमांसत्वगस्थिषु ।
विद्यन्ते बहवो जीवाः स्वेदजाः सूक्ष्मकारणाः ।
ये स्वप्राणोपयोगेन प्राणान् रक्षन्ति शाश्वतम् ।
प्राणिनां रोगनाशेन रोगोत्पत्त्या निरन्तरम् ॥
हेतुतां यन्ति जीवानां शरीरविलये तथा ।
इत्यादि महाभारतप्रभृति स्मृत्यन्तरतो ज्ञेयम् ॥ ६५ ॥

सम्प्रति योनिभेदानभिधत्ते--

योनेरानन्त्येऽपि पञ्चधा ॥ ६६ ॥

जीवानां योनिषु यत्रानेकधा शङ्काः समुद्यन्ति । तयोरुद्भिज्जस्वेदजयो वर्णनं पूर्वमेव विस्तरशोऽभिहितम् । तथा हि उद्भिज्जानां स्थावरतया तत्र जीवस्थितावेव सन्देहः । स्वेदजानान्तु अतीन्द्रियतया तद्योनिसत्तायामेव सन्देहः । सन्दिग्धस्थितिकयोरुद्भिज्ज-स्वेदजयो र्जीवयो र्विशेषवर्णनमभिधायेदानीं सर्वश्रेणिगानां जीवयोनीनां विशिष्टवर्णनमभिधत्ते ।

स्वाभाविकस्य संस्कारस्य क्रमाभिव्यक्तिकारिणा परिणामेन पूर्वमुद्भिज्जासु विविधयोनिषु तदनन्तरञ्च स्वेदजास्वनेकासु योनिषु संसरञ्जीवः कथमन्ते पूर्णपरिणाममासादयति ?

कथञ्च जीवानामियं क्रमाभिव्यक्तिः ? कतिधा स्वाभाविकसंस्कारधारया विभिद्यते इति सर्वस्यापि ज्ञातव्यस्य स्फुटं प्रतिपत्तये सूत्रमिदमाविश्चकार ।

जीवाभिव्यक्तिमार्गाश्रितानां योनीनाम् अनन्तविस्तारसत्त्वेऽपि पञ्चधात्वमेव उद्भिज्ज-स्वेदजाण्डज-जरायुज-मनुष्ययोनिभेदाद्भवितुमर्हतीति सूत्रार्थसंक्षेपः ॥ ६६ ॥

चित्कलाविकासविवेचनः प्रथमामुद्भिज्जयोनिं वर्णयति—

उद्भिदेककलः ॥ ६७ ॥

चिज्जड़ग्रन्थिपर्य्यालोचनया ततः समुत्पन्नस्य जीवस्य पञ्चस्वप्यासु योनिषु कथं चित्कलाया विकासो भवतीति निदर्शयति ।

षोडशसु कलासु विभक्तायाश्चिच्छक्ते स्त्रोद्भिज्जयोनावेककलाया एव विकासः । पञ्चकोशपरिपूर्णाया अप्यस्या योने र्जडांशप्राधान्यादेककलयैव स्थितिश्चिच्छक्तेर्भवतीति सुनिश्चितम् । परन्तु कलयैकया स्थितापि चिच्छक्तिरत्रोद्भिज्जयोनौ कीदृशी कार्यकारिणीति स्मृतिः परिशीलनीया ।

तथा हि—

उष्मतो म्लायते वर्णं त्वक् फलं पुष्पमेव च ।
उद्भिदः शीर्य्यते चापि स्पर्शस्तेनाऽत्र विद्यते ॥
वाय्वग्न्यशनिनिर्घोषैः फलं पुष्पं विशीर्य्यते ।
श्रोत्रेण गृह्यते शब्दस्तस्माच्छृण्वन्ति पादपाः ॥
वल्ली वेष्टयते वृक्षं सर्वतश्चैव गच्छति ।

नह्यदृष्टेश्च मार्गोऽस्ति तस्मात्पश्यन्ति पादपाः ॥
पुण्यापुण्यैस्तथा गन्धैर्धूपैश्च विविधैरपि ।
अरोगाः पुष्पिताः सन्ति तस्माज्जिघ्रन्ति पादपाः ॥
पादैः सलिलपानाच्च व्याधीनाञ्चापि दर्शनात् ।
व्याधिप्रतिक्रियत्वाच्च विद्यते रसनं द्रुमे ।
वक्त्रेणोत्पलनालेन यथोर्ध्वं जलमृच्छति ।
तथा पवनसंयुक्तः पादैः पिबति पादपः ।
सुखदुःखस्य ग्रहणाच्छिन्नस्य च विरोहणात् ।
जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते । इति ॥ ६७ ॥

इदानीं द्वितीयमाह—

स्वेदजो द्विकलः ॥ ६८ ॥

स्वेदजेषु जीवेषु भगवतश्चित्कलाया अंशद्वयेन विकासो भवति । अस्य कलाद्वयस्य विकासनैतेषु जीवेषु यादृशीनां शक्तिनां सञ्चारो भवति स्व-स्वप्रकृतिवशगास्ते कलाद्वयसंयोग-बलेन यादृशं विलक्षणमाश्चर्य्यकरं कार्य्यं संसाधयितुं समर्था भवन्तीत्यादिविस्तरशो वर्णितं प्राक् ॥ ६८ ॥

साम्प्रतं तृतीयं निरूपयति—

अण्डजस्त्रिकलः ॥ ६९ ॥

अण्डजेषु जीवेषु अन्नमय-प्राणमय-मनोमयानां कोशानां प्रकाशेन सह चित्सत्तायाः कलात्रयस्यापि विकासो भवति । तत्र कोशत्रयविकासत एवाण्डजेषु जीवेषु मानसिकस्य सर्वस्यापि कार्य्यजातस्य विलक्षणं लक्षणं परिदृश्यते ।

मनोवृत्तीनामाकर्षणविकर्षणजन्ययो रागद्वेषयोर्विलक्षणं चिह्नमेषु स्पष्टमेवोपलभ्यते । अत्युन्नतानां प्राणिनां याः पवित्रतमा मनोवृत्तयो भवन्ति, ता अण्वण्डजेषु प्राणिषूपलभ्यन्त एव ॥ ६९ ॥

अधुना चतुर्थं निर्वक्ति—

चतुष्कलो जरायुजः ॥ ७० ॥

जरायुजेषु प्राणिषु स्वाभाविकस्य संस्कारस्य प्रभावतः प्राथमिकानां चतुर्णां कोशानां विकासेन सह चित्कला अपि अंशचतुष्टयेनैव विकाशन्ते । इत्यत एवैतादृशेषु प्राणिषु विज्ञानमयकोशविकाशाद्धेतो र्बुद्धितत्त्वस्य सर्वाण्यपि चिह्नानि स्फुटं पर्य्यालोच्यन्ते । स्मृतिश्च—

मनुष्येका कला शक्तेरुद्भिज्जेषु विकाशते ।
स्वेदजेषु कला द्वैत मण्डजेषु कलात्रयम् ।
चतस्रश्च कला भान्ति जरायुजगणेऽखिले ।
पञ्चकोशप्रपूर्णत्वान्मर्त्येषु प्रायशोऽमराः ।
आकला-पञ्चकादष्ट कला नूनं चकाशति ।
नवभ्यः षोडशीं यावत् कलाः सर्वा यथायथम् ।
संविकास्यावतारेषु नानाकेन्द्रोद्भवेष्वपि ।
कुत्रचिन्मे प्रपूर्यन्तेऽवतारे पूर्णसंज्ञके ॥ ७० ॥

इदानीं पञ्चम्यां प्रवेशप्रकारमाह—

तत्र गोसिंहमर्कटतो मानवो गुणभेदात् ॥ ७१ ॥

प्राक्तनीनां चतसृणां योनीनामभिव्यक्तिप्रकारं निरूप्य सम्प्रति जरायुजानां जीवानां पूर्णविकाशात्मिकायां मानव्यां योनौ प्रवेशप्रकारं सूत्रेणानेन निर्दिशति । स्वाभाविकस्य संस्कारस्य प्रभावतः प्रकृतिदेव्याः साहजिकनियमानुकूल्यतः स्वेदजाण्डजजरायुजासु योनिषु यथानियमं यथाक्रमञ्च संवर्द्धमाना जीवाश्चरमायां जरायुजयोनौ गुणत्रयस्य स्वाभाविकपरिणामवशाद् वानर-सिंह-गोजातिषु समागत्य विश्राम्यन्ति । इदञ्च भेदत्रयं तमोरजःसत्त्वात्मकस्य गुणत्रयस्य यथाक्रमपरिणामतो ज्ञेयम् । जीवानामस्याः स्वाभाविक्या गते र्हेतुः स्वाभाविकः संस्कारः स्वाभाविको गुणत्रयस्य परिणामोऽवसेयः । देवानां साहाय्येन चेयं गति र्नियोजिता भवतीत्यवधेयम् ।

कर्मणो जड़त्वात् स्वाभाविकस्य संस्कारस्य जीवसंकल्पजन्यत्वाभावात् प्रत्येकयोनिरक्षकाः तत्सञ्चालकाश्च पृथक् विभिन्ना देवा विद्यन्ते । यथा चैकयोनितो द्वितीय-योनिप्रापणाय प्रत्येक-योनिश्रेणिस्थानां जीवानां संरक्षणाय च प्रत्येक-ब्रह्माण्डसंरक्षकस्य मूर्तित्रयात्मकस्येश्वरस्याज्ञयाऽन्ये देवाः सदा व्यापृता इति दैवीमीमांसादर्शने विस्तरशो वर्णितम् ।

यद्यपि मर्कट सिंह-गावो जरायुजा एव जीवा मानवोऽपि जरायुज एव जीवस्तथापि तेषु केवलं कोशचतुष्टयस्य कलाचतुष्टयस्यैव च विद्यमानत्वात् मानवयोनौ च कोशपञ्चकस्यापि पूर्णविकाश-सत्वात् तस्या योनेश्च पूर्णावयवसम्पन्नत्वात् तस्यां योनौ प्रापणतः पूर्वं तदधिकारनियुक्ता देवाः पूर्वोक्त-मर्कटसिंहगोयोनिगानां जीवानां शरीरावसाने जाते विशेषव्यवस्थया मानवयोनौ तान् प्रापयन्तीति हेतो रनार्य्यमानवजातावपि गुणत्रयस्य श्रेणिविभागो दृश्यते ॥७१॥

अधुना पञ्चमं विवेचयति—

पञ्चकलः सः ॥ ७२ ॥

प्रकृतितरङ्गाणां स्वाभाविकनियमतोऽग्रे समेधमानो जीवोऽस्यां मानवयोनौ समेत्य स्वत एव पञ्चकोशविकाशमासाद्य चित्कलायाः पञ्चभि रंशैः परिपूर्णो भवतीत्यत्र स्वाभाविकस्य संस्कारस्य प्रभावः प्रकृतिदेव्याश्च स्वाभाविकः परिणामो हेतु रवसेयः । अत्र च योनौ समेत्य जीवः स्वाधीनो भूत्वा स्वपिण्डाधीश्वरो भवन् पूर्वोक्त-प्रकृतिपराधीनतां विजहाति ॥ ७२ ॥

इदानीं प्रसङ्गसङ्गत्याऽस्वाभाविकानां संस्काराणामुत्पत्तिं गतिञ्चाभिदधाति—

तद्धर्म्मसम्बद्धत्वात् पूर्णकलत्वमस्य ॥ ७३ ॥

तत् तस्माद् हेतोः धर्मेण सम्बद्धः तस्य भावस्तस्माद् अस्य स्वाभाविकस्य संस्कारस्य पूर्णा कला यस्य तस्य भावस्तत्त्वमित्यर्थः । अर्थात् स्वाभाविको हि संस्कारः धर्मसम्बद्धश्चेत् पूर्णाभिः कलाभिः समन्वितो भवतीति सूत्रार्थः ।

स्वाभाविकस्य संस्कारस्य प्रभावेणैव जीव उद्भिज्ज-योनितः संसरन् मानवयोनिमुपैति । इह मानवयोनौ समागत्य जीवः स्वपिण्डेश्वरो भूत्वा स्वसंकल्प-सम्बन्धादिना स्वाधीनतामधिगत्य स्वतन्त्रः सन् धर्माधर्मोपार्जनाधिकारवान् अस्वाभाविकानपि संस्कारान् समुपार्जयति ।

विज्ञानमिदमन्यथापि बोद्धुमुपार्य्यते । यथा—मानवयोनितः पूर्वयोनिषु सर्वास्वपि यां क्रमोन्नतिमासादयन् जीवः समेधमान आसीत्, सा सर्वाऽपि क्रमोन्नतिरिह मानवयोनावागत्य निरुध्यते । तत्रेदं प्रधानं कारणमवगन्तव्यम् यत् प्रकृतिपराधीनोद्भिज्जादि-श्रेणिगो जीवः केवलं स्वाभाविकसंस्कार-प्रभावेनैव यां नियमितां क्रमोन्नतिमासादयन् समेधते सा क्रमोन्नतिरिह मनुष्ययोनौ निरुध्यते । यतो हि इह मानवयोनौ समेत्य जीवः पूर्णत्वमधिगत्य नूतनान् संकल्पान् विदधद् यान् अस्वाभाविकान् संस्कारान् समुपार्जयति, ते हि पापपुण्यात्मका धर्माधर्ममूलकाः संस्कारा जीवान् गमागमचक्रे पातयित्वा भ्रामयन्ति । इत्यत एवोद्भिज्जादियोनिषु निर्बाधं प्रसरन्ती क्रमोन्नतिरत्र विहन्यते । अतश्चेश्वरकृपया मानवो यदाऽधर्म्मं विहाय धर्म्ममाचरति तदा चित्कलायाः पूर्णत्वमधिगत्य निःश्रेयसमप्याश्रयितुं समर्थो भवति ॥ ७३ ॥

कथं सम्यक् विकासो भवतीत्याह—

तद्विकासो विशेषतः ॥ ७४ ॥

यद्यपि मानवधर्म्माणां साधारणविशेषासाधारणापद्धर्मभेदेन चत्वारो

वाभ्युदयनिःश्रेयसाधं प्रवर्त्त-

भेदाः प्रथममभिहितास्तथापि तेषु विशेषधर्मप्रभावेणैवाभ्युदयनिःश्रेयसाधं प्रवर्त्त-
तेऽत एवान्यत्रापि स्मृतिशास्त्रे विशेषग्रमं तुष्टुवु महर्षयः ।

यं पृथग् धर्मचरणाः पृथग्धर्मफलैषिणः ।
पृथग्धर्मैः समर्चन्ति तस्मै धर्मात्मने नमः ॥

अस्य विशेषधर्म्मस्य स्तुतावयमभिसन्धिर्यत्-पुरुषो नारी वा स्यात् यस्य
कस्यापि वर्णस्याश्रमस्य वान्तर्गतः स्यात्, प्रवृत्तिमार्गाश्रितो निवृत्तिपथप्रवृत्तो
वा स्यात् । यस्मिन्कस्मिन् वाऽधिकारे संसक्तो जीवः स्वाधिकारप्राप्तधर्मा-
नुष्ठानपरायणश्चेत्तदोर्ध्वगतिस्तस्यावश्यकी । अग्रे चित्कलायाः क्रमशो विकास-
मासादयन् सोऽवसाने पूर्णकलासमधिगत्या निःश्रेयसमप्यधिगच्छति ॥ ७४ ॥

प्रसङ्गसङ्गत्या योनीनां विशेषविवेचनां करोति—

उद्भिदन्नमयविकाशः ।

योनीनां विशेषविवेचनां दित्सुः प्रथममुद्भिज्जयोनिमेव परिचाययति ।
पञ्चीकृतपञ्चमहाभूताश्रयेण पूर्णतमोगुणावस्थायां प्रथमं परिणाममासाद्य या
प्रकृतिस्तरङ्गान्विता सती प्रवाहसम्पन्ना भवति तस्यामेव प्रकृति-विवर्तनदशायां
चिज्जडग्रन्थिरुदेति । एतद्विषयकं विस्तृतं विवेचनं पूर्वमेव विवृतम् ।

प्रकृति-परिणामश्च स्थूलताश्रयेण सूक्ष्मताभिमुखं प्रवर्तत इति जीवोत्प-
त्त्या सार्द्धं पञ्चकोशोत्पत्तौ सत्यामपि प्रथममन्नमयकोशस्यैव विकाशो भवती-
त्यतः कारणाद् उद्भिज्जश्रेणिगा जीवाः स्थावरतामेवाश्रितास्तिष्ठन्ति ॥ ७५ ॥

तत्रोद्भिज्ज-वैशेष्यमाह—

तस्य जलमन्नम् ॥ ७६ ॥

अन्नमयकोशस्य प्राधान्यमाश्रिता उद्भिज्जयोनिगा जीवा जलेनैव परिपुष्टा
भवन्तीति तदन्नास्ते । "यद्येन पुष्यते जन्तुस्तदन्नः स हि सम्मतः" इति निय-
मात् जलपुष्टानामुद्भिदां जलमेवान्नम् इत्यत्र न कोऽपि सन्देहः । पृथिवीतत्त्वीय-
स्थूलशरीरस्य जलतत्त्वेन सान्निध्यात्तदनन्तरं तस्यैव द्वितीयतया सत्वात् स्थूल-
शरीरवतामुद्भिज्जानामन्नं जलमेवेति निश्चयः ।

ननु पार्थिवमेव स्थूलशरीरं सर्वेषामेव पार्थिवानामिति कथञ्च तेषा-
मपि जलमेवान्नम्, इति प्रश्ने उत्तरयति, मनुष्यादिपार्थिवशरीरधारिणां
जीवानां प्राणरक्षायै किञ्चित्साहाय्यं जलमवश्यमाचरति यथोद्भिज्जानां वृक्षा-
दीनामवकरमृत्तिकादि । परन्तु मनुष्याणां प्रधानतया यथा दुग्धगोधू-
माद्यन्नादीनामपेक्षा तथैव वृक्षाद्युद्भिज्जानां जलस्यापेक्षेति तस्यैव जलमन्नं
नान्येषाम् ।

मानवशरीरस्य पञ्चकोश-परिपूर्णतया तत्र तदुपयोगिनामन्नानां प्रभावस्तदीयविज्ञानमयानन्दमयकोशौ यावदुपैतीति शुद्धान्नै मानवाना मन्तःकरणमपि पुष्यतितरामिति शास्त्रादिषु प्रसिद्धमेव । एवमन्यास्तु योनिष्वपि तत्तदुपयोगिकोशानां विकाशेन सह जलातिरिक्तानामन्यविधानामन्नानामपेक्षा भवति तैरेवान्नैस्तेषां पुष्टिरपि जायते । अत्रोद्भिज्जयोनिषु तु अन्नमयकोशस्यैव प्राधान्येन सत्त्वात् तस्यैव पोषणाय जलमात्रस्यैवान्नतयापेक्षोदेति इति संक्षेपः ॥ ७६ ॥

अन्यदपि—

एकस्मादन्यत् ॥ ७७ ॥

पूर्वविज्ञानपरिपुष्टये प्रमाणयति यदुद्भिज्जयोनिषु केवलमन्नमयकोशस्यैव विकाशो भवति नान्यस्य । प्रत्यक्षमुपलभ्यते प्रमाणमप्यत्र यदेकस्यैवोद्भिज्जयोनिग-जीवशरीरस्य खण्डशो विभागेनानेकशस्तदीयशरीरधारिणो जीवा उत्पद्यन्ते । यथा—कस्यचन वृक्षस्य शाखावपनेनैवान्यस्तत्सदृशो वृक्ष उदेति कस्याश्चिल्लतायाः खण्डं विधाय यावत्यो लता भूमावारोपिताः स्युस्तावत्य एव तत्र तादृशा लताः समुदिताः स्युरिति । एवं कस्यचन वृक्षस्य कन्दत एव पुनर्वृक्षान्तरमारोहतीति ध्रुवं तेषामन्नमयकोशविकाशे प्रमाणम् ॥ ७७ ॥

एतन्निदानमाह—

तत्र व्यापकत्वादात्मनः ॥७८॥

उद्भिज्जयोनेर्वैशिष्ट्यमिदं यत् तत्र केवलमन्नमयकोशस्यैव विकाशो भवति, येनोद्भिज्जयोनिकमात्मतत्त्वं तदीयस्थूलशरीरेणैव सम्बध्नाति । इत्यत एवोद्भिज्जशरीरस्यैकस्यैव च्छेदेनानेकशरीरनिर्मित्या बहूनां जीवानां पृथक् स्थितिस्तत्र योनौ सुलभा इति निर्णीतं प्राक्तनेन सूत्रेण । नेयं स्थितिर्मानवादि-शरीराणाम् ।

पञ्चकोशात्मक-शरीरविलीनस्य जीवस्येदं रहस्यम्-यद् सच्चिदानन्दमयस्य ब्रह्मणः सर्वव्यापित्वात्पूर्णत्वाच्च परमात्मनो विभो र्निर्लिप्ता चित्सत्ताऽपि सर्वव्यापिनीति । केवलं पञ्चकोशात्मकदेहोपाधिपरिच्छिन्नो हि जीवो मठाकाशे घटाकाशवत्तत्र सर्वव्यापिन्यां चित्सत्तायां परिच्छिन्नः प्रतीयते । तस्याः सर्वव्यापिन्या निर्लिप्तायाः ब्रह्मणश्चित्सत्तायाः प्रतिबिम्बग्राहि जीवान्तःकरणम् । अन्यजीवेषु पञ्चानां कोशानां विकाशेन सह यदहंतत्त्वस्य व्यापकतोदेति ततश्चान्तःकरणस्य व्यापकता ह्रसति । उद्भिज्जयौनौ तु केवलस्यान्नमयस्य कोशस्यैव विकाशाद्धेतोः तदीयमन्तःकरणं सर्वत्रैव स्थूलशरीरे व्याप्तं

तिष्ठति । इत्यत एव यदा तस्य प्रसूतान्तःकरणस्योद्भिज्जस्थूलदेहस्य कोऽप्यंशः स्वमूलांशतः पृथग्भूत्वा यथाकथमपि प्राणरक्षोपयोगिनमाश्रयमासादयति तदेव तत्तज्जीवरक्षकदेव-साहाय्येन स्वतन्त्राणां जीवानामुत्पत्त्याश्रयतामधिगच्छति ।

दैवीमीमांसादर्शनस्य सर्वमान्यसिद्धान्तादिदं विज्ञायते यन्मनुष्येतरेषां सर्वेषामपि उद्भिज्ज स्वेदजादियोनिगजीवानां पृथक् विभिन्ना देवाः संरक्षकाः सन्ति ।

यथा च स्वाभाविकसंस्कारमूलक-प्राकृतिकक्रियया प्रथमा चिज्जडग्रन्थिरुदेति तथैव तेनैव स्वाभाविकक्रमेणास्या मभिव्यक्तिदशायामपि एकस्माज्जीवादनेकस्य जीवस्याविर्भवनं विज्ञानसिद्धमिति ॥ ७८ ॥

शङ्कासमाहितिभ्यां विज्ञानमिदं द्रढयति ।

तथा दृश्यते योगिषु ॥ ७९ ॥

तथा अनेक-जीवाविर्भावो योगिषु योगसिद्धिमुपेतेषु मानवेषु दृश्यते उपलभ्यते इति सूत्रार्थः ।

नन्वेकतः सर्वेषु जीवकेन्द्रेषु विभिन्नानामेवात्मनां सत्त्वात्कथमेकस्माज्जीवादनेकस्य जीवस्याविर्भाव इति प्रबला शङ्कोदेति । अपरतश्चैकस्मादेव वृक्षाल्लताया वा तच्छाखाकाण्ड-प्रकाण्डादिप्ररोहतो वृक्षान्तरलतान्तराणां बहूनामुत्पत्तिदर्शनेनैकस्माज्जीवाद्बहूनां जीवान्तराणामाविर्भूतिः प्रत्यक्षत एवावलोक्यत इत्यादि जिज्ञासासामञ्जस्यविधानार्थमेवास्य सूत्रस्यावतारः। तथाहि—

योगदर्शनसिद्धान्तानुसारं योगी यदा समाधिसिद्धो भूत्वा पूर्णसिद्धिमुपेत्य स्वान्तःकरणं स्वायत्तीकृत्य स्वीयास्मितताया अपि आधिपत्यं समश्नुते तदा स स्वप्रभावात्कायव्यूहरचनया स्वपूर्वार्जित-सञ्चितकर्मफलं भुङ्क्ते। एतस्यालौलिकाद्भुतस्य कर्मणः सम्पादनाय योगिभिः स्वान्तःकरणं स्वसंकल्पायत्तं स्वस्मितायाश्च जीवत्वनिदानीभूताया आधिपत्यं स्ववशे विधीयते। स्थूलशरीरस्य सूक्ष्मशरीराधीनत्वात् देवतोपदेवताप्रेतादिभिश्च यथाकार्यं यथेच्छं स्थूलशरीरधारणं क्रियते। तदा हि दैवशक्ति-सम्पन्नेन जीवेन स्वान्तःकरणसंकल्पबलेनैव नानादेहव्यूहो निर्मातुं शक्यते ।

योगिनस्तु इतोऽपि विलक्षणं महत्त्वम् यतो हि स्वसूक्ष्मशरीरस्य स्वान्तःकरणस्य चाधिपत्यमाश्रित्य योगी स्वचिदाकाशे समेतान् संस्कारराशीन् स्वेच्छया विभेद्य बहून् जीवाधारदेहान्निर्माति । अस्मितताया उपरि स्वाधिकारप्रभावेण च जीवानां केन्द्रस्वरूपमन्तःकरणमपि यथेच्छं यथाकार्य्यं निर्माति ।

ब्रह्मणश्चित्सत्ताया विभुत्वात् सर्वेषु नूतनेष्वन्तःकरणेषु स्वतन्त्रतया-चिज्जडग्रन्थिरूपस्यानेकस्यापेक्षितस्य तावतो जीवकेन्द्रस्य स्वत एव निर्मिति-र्जायते। इत्थमेकोऽपि योगी स्वयोगसमृद्ध्या विविधान् जीवान् सृजति विलापयति तदावासक्षमाणि विचित्रकर्मभोगनिदानीभूतानि शरीराणि चाने-कानि विरचय्य पुनस्तिरस्करोतीति तन्महिम्नो वैशिष्ट्यम् ।

उक्तेषूद्भिज्जजीवेषु नैवं शक्तिवैशिष्ट्यमलौकिकत्वं वा तिष्ठति। परन्तु तेषामस्मिताया अन्तःकरणस्य च स्थूलशरीरेषु सर्वत्रैवोतप्रोतत्वम्। यतो हि उद्भिज्जयोनिषु केवलस्यान्नमयकोशात्मकस्यैव स्थूलशरीरस्य प्राधान्यं विराजते अन्ये कोशास्तु तस्मिन् काये गौणतयाऽन्तर्भूतास्तिष्ठन्ति। इत्यतो यदा तस्यो-द्भिज्ज-जीवस्य स्थूलशरीरीयः कोऽप्यंशो विच्छिद्यान्यत्र मृत्तिकासु रोप्यते जलादिना च सिच्यते तदा तत्स्थान्तःकरणानुस्यूतस्थूलशरीरव्याप्तचिदाकाश-साहाय्येन तत्रैव चिज्जडग्रन्थिमयं जीवकेन्द्रं निर्मीयते। इत्येतदेवास्य विधा-नस्य माहात्म्यं वैचित्र्यञ्चेति संक्षेपः ॥ ७९ ॥

स्वेदजेषु कियतां कोशानां विकाश इत्याह—

स्वेदजे विकाश उभयोः ॥ ८० ॥

स्वेदजे जीवशरीरे उभयोरन्नमयप्राणमयकोशयोः विकाश उपलभ्यते। जीवो यदोद्भिज्जयोनेरनेकश्रेणिषु पर्य्यटन् क्रमशोऽभिवर्द्धमानः स्वेद-जयोनिमुपैति। तदा तस्मिन् जीवे क्रमाभिव्यक्तेः प्रभावतः प्राणमयकोशस्यापि पूर्णतया विकाशः सम्पद्यते। उद्भिज्जयोनिजे तस्मिन्नेकस्यान्नमयकोशस्यैव वि-काशस्तिष्ठति। इहतु स्वेदजे तस्मिन् अन्नमयप्राणमययो रुभयो रपि कोशयो र्विकाशो भवति। अत एव तस्य जीवस्याधुना स्थावरत्वमपगच्छति तस्मिंश्च जङ्गमता समुपैति। यतस्स सर्वत्र गतागताधिकारितामासाद्य विकाशपथानुगो भवति ॥ ८० ॥

तस्य वैशिष्ट्यमाह—

तस्माद् दृश्यते द्विविधम् ॥ ८१ ॥

स्थावरतया प्रत्यग्रजङ्गमताश्रयेण बहवः स्वेदजाः स्थावरताविशिष्टा एव दृश्यन्ते। तथाहि बहुत्रैवमुपलभ्यते यत् कियतां स्वेदजानां शरीरादूर्ध्वं स्था-वरतोपेतं स्थितिशीलमक्रियं शरीरादूर्ध्वञ्च स्वेदजत्वगुणविशिष्टं गतिमद् भवतीति।

तात्पर्य्यतः स्थावरत्वात्यागेन प्रथमतः स्वेदजत्वोपलब्धौ यदा जीवोऽग्रे-
सरति तदा तस्य प्राथमिकावस्थायां यः प्राणमयकोशविकाशो भवति । तत्र स
स्थावरत्वजङ्गमत्वोभयस्वरूपशाली एव तिष्ठति क्रमशश्च प्राणक्रियाभिवृद्ध्या
क्रमशोऽभिव्यक्ति-विवृद्ध्या तदनुसारं पूर्णजङ्गमतामधिगच्छति ॥ ८१ ॥

तत्स्वरूप-पूर्णतादिदृक्षया तस्याधिकारं विवेचयति—

ब्रह्माण्डपिण्डयोरधिकारः प्राणशक्तिमत्वात् ॥ ८२ ॥

उद्भिज्जयोने मृत्तिकासम्बन्धसम्बलितत्वेन स्थावरत्वाधिक्येन च सर्वत्र
तस्याः स्थितेरसम्भवः । स्वेदजयोनेस्तु प्राणमय-कोशविकाशेन तत्स्थजीवानां
गतिः स्थितिश्चान्य-जीवकायाभ्यन्तरे बहिः, पृथिव्या माकाशे सर्वत्रैव, ब्रह्माण्ड-
पिण्डयो र्दरीदृश्यते । ते च स्वेदजा जीवा मानवादिजीवदेहे पिण्डात्मके
स्थितिजुषस्तदीय-स्वास्थ्यरक्षां कुर्वन्ति केचन तज्जातीयास्तत्रस्थितिभृतस्तत्रैव
पीडामुत्पादयन्ति । केचन तु तत्स्थ-रोगाणु-कीटान् विनाशयन्तस्तस्य सर्वतो
रक्षां विदधति ।

ब्रह्माण्डे चैवं तेषु केऽपि स्वेदजा जीवाः पृथिवी-जलाकाशादिषु स्वेच्छया
भ्रमन्तो जनसङ्घादृष्टतो महामारीप्रभृति-जनपदविध्वंसकान्रोगानुत्पादयन्ति !
तेष्वेव केचन जनपदशुभादृष्टतः प्रेर्य्यमाणास्तान्रोगोत्पादकान् कीटाणून् निहत्य
जगति स्वास्थ्यं शान्तिञ्च विस्तारयन्तीत्येतदेव स्वेदजजीवानामलौकि-
कत्वम् ॥ ८२ ॥

इदानीमण्डजयोनिषु कोशविकाशस्थितिमाह—

कोशत्रय-विकाशोऽण्डजे ॥ ८३ ॥

स्वाभाविकसंस्कार-बलेन जीवो यदा क्रमाभिव्यक्तिसाहाय्येनाग्रेसरो-
भूत्वाऽण्डजयोनिश्रेणि मुपैति तदा मनोमयकोशविकाश-पूर्णतया कोशत्रयस्य
विकाशः स्फुटं परिलक्ष्यते । तद्योनिगजीवक्रियापर्य्यवेक्षणतः कोशत्रयस्य विकाश-
चिह्नं प्रत्यक्षत एवोपलभ्यते ॥ ८३ ॥

एतत्प्रमाणं लक्षयति—

तस्मादुपलभ्यते मनः ॥ ८४ ॥

अण्डज श्रेणिगेषु जीवेषु अन्नमय-प्राणमय-मनोमय-कोशानां विकाशो-
पलब्धेस्तत्र मनसः कार्य्यकर्तृत्वं सुतरां दृष्टिगोचरीक्रियते ।
यथोद्भिज्जयोनिगतेषु जीवेषु पञ्चकोशस्थितावपि केवलस्यान्नमय-कोश-
स्यैव विकाशः पूर्णतया भवति । तस्यैव च स्पष्टतो लक्षणमप्युपलभ्यते । स्वेदजे-

त्रपि सत्यामपि पञ्चकोशबीजसत्तायां स्थूलस्यान्नमयकोशस्य विकाशेन सह तदन्यस्य प्राणमयस्यापि विकाशः पूर्णतयोपलभ्यत इत्यभिहितमेव पूर्वम् तथैवेहापि अण्डजश्रेणिगेषु जीवेषु पञ्चानामपि कोशानामस्तित्वसत्वेऽपि प्राथमिकानां त्रयाणामेव कोशानां पूर्णविकाशो भवति । इत्यत एव तत्र मनोमयकोशस्याभिव्यक्त्या तदीयविकाशस्य सुस्पष्टं पूर्णलक्षणं प्रतीयते ।

यथा च स्वेदजश्रेणिगता जीवाः स्वप्रकृतिपरवशा विचित्रालौकिकप्राणक्रियासमूहं प्रकाशन्तीत्यभिहितं प्राक् । तथैवेमेऽपि अण्डजश्रेणिगा जीवा निजप्रकृतिपरतन्त्रा मानसिकीनां क्रियाणा मलौकिक मसाधारणं चमत्कारं दर्शयन्ति । तथाहि—रथाङ्गनाम्नोरद्वितीया प्रेम-प्रवृत्तिः । सर्पजातेरतुलनीयं स्वपुत्रादनात्मकं खलत्वं, प्रतिहिंसाप्रवृत्तिश्च । कपोतानां स्ववासस्थानात्यासक्तिरित्यादीनि मनोमयकोशाभिव्यक्ते र्जागरूकतराण्युदाहरणानि निभालनीयानि ॥८४॥

अधुना जरायुजयोनिषु कोशसंख्याविकाशमाह—

चतुष्कोशविकाशो जरायुजे ॥ ८५ ॥

सहजाद्वितीय-स्वाभाविक-संस्कार-बलेन क्रमशः क्रमाभिव्यक्तिमासाद्यज्जीवो यदाऽण्डजयोनिकोटितो जरायुजश्रेण्यां प्रविशति । तदा तत्रान्नमय-प्राणमय-मनोमय-विज्ञानमयानां चतुर्णामपि कोशानां विकाशो भवति ॥८५॥

तदेव प्रमाणयति—

तत्राल्प-विकाशो बुद्धेः ॥ ८६ ॥

यथाऽण्डजश्रेणिगेषु जीवेषु मनोधर्म्मप्रोद्भूत्या त्रयाणां कोशानां विकाशस्य प्रमाणमुपलभ्यते, तथैवेहापि जरायुज-श्रेणिगेषु जीवेषु बुद्धि-धर्मोपलब्ध्या चतुर्णां कोशानां विकाश-प्रमाणमासाद्यते । तत्राश्वहस्तिप्रभृतिजरायुजजीवेषु बुद्धिकृत्यं स्पष्टत एव प्रकाशत इति नास्ति बहुविवृतेरावश्यकत्वम् ॥ ८६ ॥

इदानीं पूर्णावयवात्मिकाम्मनुष्ययोनिं वर्णयति—

हास्यलक्षणः पञ्चकोशविकाशो मानवे ॥ ८७ ॥

मानवे मनुष्ययोनिगे जीवे हास्यं लक्षणं चिह्नं यस्य सः तथोक्तः पञ्चानां कोशानां विकाशो ज्ञेयः । मानवे कोशपञ्चकस्यापि विकाशो भवति । यतस्तत्र अन्तिमस्यानन्दमयकोशस्य कार्य्यं हास्यात्मकं समुपलभ्यत इति सूत्रार्थः ।

दैवराज्यसञ्चालका देवगणाः क्रमशो जीवान् योनितो योन्यन्तरं प्रापयन्तः स्वाभाविक-संस्कारवशतोऽग्रे सम्बर्द्धयन्तो मानवयोनिं प्रापयन्ति । तत्र च मनुष्ययोनावुपेत्य जीवः पञ्चभिरपि कोशैः परिपूर्णो भूत्वा स्वाधीनो भवति ।

यतो हि मानवयोनाविह अन्नमय-प्राणमय-मनोमय-विज्ञानमयानन्दमयानां पञ्चानामपि कोशानां विकाशो भवति । आनन्दस्य हास्यं लक्षणं तच्च मनुष्ययोनावेव-स्फुटं परिलक्ष्यते । इत्यत आनन्दमयान्तकोशानां मानवयोनौ विकाशो भवतीति-सिध्यति । यद्यपि मनुष्येतरप्राणिनामप्यानन्दानुभवो भवत्येव । ते च स्वलाङ्गूलचालनोत्प्लवनादिभिः स्वानन्दानुभवं प्रकाशयन्त्यपि । तथापि तेषु प्राणिषु केषुचिदपि हास्यस्य लक्षणञ्च परिलक्ष्यते, इति मानवयोनावेव पञ्चानामपि कोशानां पूर्णविकाशो भवतीति सर्वसम्मतो मार्गः ॥ ८७ ॥

प्रसङ्गत आनन्दमयकोशस्य पूर्णतारहस्यं प्रतिपादयति—

आनन्दमयस्य पूर्णकलौपयिकत्वं चन्द्रवत् ॥ ८८ ॥

मानवयोनितः प्राक्तनावस्थायां जीवोऽस्वाधीनः प्रकृतिपराधीनोऽग्रे संसरन् क्रमाभिव्यक्त्या नियमत एवेह मानवयोनौ समुपतिष्ठते, इति पूर्वमेव विस्तरशो विवृतम् । चरमस्याऽऽनन्दमयस्य कोशस्याभिव्यक्ति रिह मानवयोनौ स्वत एव भवति । परन्तु आनन्दमयकोशेन सहात्मनः साक्षात्सम्बन्धभागित्वात् तस्य क्रमशः सम्यग् विकाशो जन्मजन्मान्तरेण कलाविकाशसाहाय्येन चन्द्रवज्ज्ञेयः । यथा चन्द्रः प्रतिपदाया आरभ्य क्रमशोऽभिवर्द्धमानः पूर्णिमायां पूर्णकलो भवति । तथैव जीवो मानवयोनौ शुभानां जैवसंस्काराणां साहाय्येन उत्तरोत्तरमाध्यात्मिकभूमावग्रे समेधमानो जन्म-जन्मान्तरेण क्रमश आनन्दमय-कोशं परिष्कुर्वन् आनन्दकलां संवर्द्धय्य मोक्षपद मासादयतीति ॥ ८८ ॥

तस्य चरम मुदर्कमभिधत्ते—

कलाविकाशतः कैवल्यम् ॥ ८९ ॥

जीवानामानन्दमयकोशो यावतीम्पूर्णता मासादयति तावदेव स पुष्पवद् विकाशमासादयति । यावन्तमेव स पोषमासादति तावत्येव तस्मिन् ब्रह्मानन्दसत्ता प्रकाशते । ब्रह्मानन्दस्य पूर्णसत्तानुभव एव तु कैवल्यं मुक्तिर्वोच्यते ।

जीवेषु पूर्वोक्तसंस्कारशुद्धिसाहाय्यतः यावदेव चिद्विलासरूपं ज्ञानं क्रमशः समेधते तावदेव ते बाहुल्येन ब्रह्मानन्दानुभूतिमश्नुवते । विषयानन्दानुभवोऽपि ज्ञानिनोऽज्ञानिकृतानुभवतो विलक्षण एव भवतीति स्वीकरणीयमेव । एवमेव ज्ञानवृद्ध्या सह विषयानुभवेऽपि वैलक्षण्यं समेधते । इत्येवमन्ते स्वाभाविकस्याऽद्वितीयस्य संस्कारस्य क्रमविकाशेन सार्धमानन्दमयकोशः पूर्णतामधिगच्छति । तस्मिंश्च पूर्णताञ्जुषि स्फुटं विकासमुपगते सति जीवः सच्चिदानन्दमयस्य स्वस्वरूपस्योपलब्ध्या मुक्तो भूत्वा नन्दति ॥८९॥

कलाविकाशसभेदानाह—

द्विविधस्तद्विकाशो गुणवत्वात् ॥ ९० ॥

सत्त्व-रजस्तमस्सु त्रिष्वपि गुणेषु केवलं रज एव सञ्चालकम् । यदा सत्त्वगुणापेक्षि रजो भवति तदा सात्त्विकी क्रिया प्रवर्तते । यदा च तमोगुणापेक्षि रजो भवति तदा तामसी क्रिया प्रचलति । इत्यत एव जीवदेहे मुक्तिप्रदस्य सहजस्य स्वाभाविकस्य संस्कारस्य गति द्विविधा प्रवहति । तत्त्वतस्तस्य संस्कारस्य विकाशो द्विधा विभिन्नः सत्त्वगुणमूलकस्तमोगुणमूलश्च भवति । विज्ञानमिदमन्यथापि बोद्धुं सुशकम् तथाहि—मुक्तिप्रदायी संस्कारो जीवानां सात्त्विकदशायां तामसिकदशायाञ्च साहाय्यमाचरन् जीवांश्चाग्रे सञ्चालयन् कैवल्यपथम्प्रापयति इति ॥ ९० ॥

विज्ञानमिदमन्यथापि स्पष्टयति—

मिथो द्वन्द्वता ॥ ९१ ॥

स्थूल-सूक्ष्मात्मिका सर्वाऽपि सृष्टिर्द्वन्द्वमूलिकैवेति सुनिश्चितम् । यथा बहिर्जगति अहोरात्रद्वन्द्वोऽन्तर्जगति रागद्वेषद्वन्द्व इति सर्वेषामेव प्राकृतिकानां पदार्थानां द्वन्द्वमूलकत्वम् । तत्र द्वन्द्वप्रयोजनमपि सुस्पष्टमेव । तथा हि यदि रात्रिर्न स्यात्तर्हि दिवसस्योपयोगफलञ्च प्रतीयेत । दिवसाभावे रात्रिरपि सुतरामनुपयुक्ता स्यात् । एतद्विज्ञानानुरूपं जगतो यावन्तः पदार्थाः सन्ति ते सर्वेऽपि द्वन्द्व-मूलकाः । तदनुसारेण च गुणमूलकानां संस्काराणामपि द्वैविध्यम् सुस्पष्टमेव सिध्यति । तथा चानयोर्द्वयोरपि पारस्पर्य्यं सापेक्ष्यं साहचर्य्यञ्च सुसिद्धम् । वस्तुतस्तु इमौ द्वावपि परस्परं साहाय्यमाश्रितौ प्राकृतिक-गुणपरिणामतो जीवानामभ्युदयकरौ सम्पद्येते इति ॥ ९१ ॥

पुनर्विभागमाख्याति—

त्रिभावतस्त्रैविध्यम् ॥ ९२ ॥

यथा गुणानुसारेण स द्विधा विभक्तस्तथैव भावानुसारेण स त्रिविधः प्रख्यातः । भावाश्चाध्यात्माधिदैवाधिभौतभेदेन त्रिविधाः परिसंख्याताः । प्रकृतिमवलम्ब्य यथा गुणपरिणामो भवति तथैवात्मावलम्बेन त्रिभावात्मिकास्तिस्रोऽवस्था अपि प्रकाशीभवन्ति । ताश्च संस्कारजन्या इति नात्र सन्देहः । यतो हि—संस्काराः कर्ममूलानि । संस्कारमूलमन्तरा कापि क्रिया न संभवतीति पूर्वमेव प्रतिपादितम् ।

यथा च बीजवापमन्तरा न कस्यापि वृक्षस्य प्ररोहः। तथैव संस्कार-मन्तरा न कस्या अपि क्रियायाः समुत्पत्तिः। इत्यतः सिद्धमिदं यद् गुणा-श्रयेण यथा भेदद्वयन्तथा भावाश्रयेणापि भेदत्रयं भवति ।

विकाशमूलकाः संस्कारा गुणसम्बन्धेन द्विविधा भावसम्बन्धेन च त्रिविधा भवन्ति । एतत्स्वरूपपरिज्ञानायेदं पर्य्याप्तमस्ति यत्—

स्वाभाविकः संस्कारो य एकोऽद्वितीयोऽस्ति, तस्य विकाशकारणस्वरूपा एवेमे भवन्तीति । स्वाभाविकाऽस्वाभाविकयोः संस्कारयोरयं मौलिको भेदोऽवसेयो यद्—अस्वाभाविकः संस्कारो जीवसंकल्पतः समुद्भवात् प्राकृतिकीं स्वाभाविकीं गतिं निरुणद्धि जटिलां वा विदधाति । स्वाभाविकश्च संस्कारः प्रकृति-प्रवाह-गतिमधिकतया सरलयति । यतश्च स्वाभाविकसंस्कारबलेनैव जीवः क्रमशोऽग्रे प्रवर्द्धमानो यथोद्भिज्जयोनितो मानवयोनिं यावदायाति तथैवेहापि मनुष्ययोनौ शनैः प्रवर्द्धमानो मुक्तिभूमिमुपतिष्ठति ।

सर्वमपीदमद्वितीयस्य स्वाभाविकस्य संस्कारस्य कार्य्यरूपाया पूर्वोक्ता-वस्थाया भेदमात्रम् । पूर्णावयवसम्पन्नमानवयोनिगजीवे तु उभयसंस्कारानु-सारिण्येव क्रिया प्रचलति । जीवन्मुक्तदशायाञ्च केवलः स्वाभाविक एव संस्कारः कार्य्यकृत् प्रकीर्तित इति विभेदः ।

उदाहरणतो यथा मनुष्यजातौ जात्यायुर्भोगा अस्वाभाविक-संस्कार-बलेनैवोत्पद्यन्ते । वैदिकाश्च षोडशसंस्कारयज्ञाः स्वाभाविकसंस्कारगतिं प्रका-शयन्तीति पूर्वमेव प्रमाणितम् । स एव मुक्तिप्रदः स्वाभाविकः संस्कार एवं गुणभावसाहाय्यमासाद्य प्रवर्द्धमानो मुक्तिपथं निष्कण्टकं सरलञ्च करोति ॥ ६२ ॥

त्रयाणामपि स्वरूपं स्पष्टयितुमाह—

त्रिषु वैलक्षण्यम् ॥ ६३ ॥

एषां त्रयाणां स्वरूपे किमप्यन्यदेव वैलक्षण्यम् । यतो हि—एकं ज्ञानमूल-कम् द्वितीयं कर्ममूलकं, तृतीयं स्थूलशरीरमूलकमिति । स्वाभाविकस्य संस्का-रस्यानुरूपो य आध्यात्मिकः परिणामः प्रकाशते, स च सर्वभूतानामैक्य-सम्पादकत्वान्मुक्तिप्रदानक्षमत्वाच्च ज्ञानमूलको भवति । आधिदैविको यो हि परिणामः प्रकाशते, तेन क्रमशः कर्तव्यपरायणता-सकामराहित्ययोरधिकार आसाद्यते । आधिभौतिकेन च परिणामेन मलराहित्यं सत्वगुणवर्द्धिकाऽवस्था चाधिगम्येते ।

एवञ्च आसां तिसृणामवस्थानां मध्ये एका ज्ञानमूलिका, द्वितीया कर्ममूलिका, तृतीया च स्थूलशरीरमूलिकेति परस्परमतिवैलक्षण्यम् ॥ ६३ ॥

उभयोराकर्षणोपकरणमाह—

रजोवीर्य्याभ्यामुभयाकृष्टिः ॥ ६४ ॥

उभयोः स्वाभाविकाऽस्वाभाविकयोराकृष्टिः आकर्षणं रजश्च वीर्य्यञ्च ताभ्यां भवतीति सूत्रार्थः। मातापित्रो रजोवीर्य्यसाहाय्येनोभयश्रेणिगाविमौ संस्कारौ समाकृष्येते। तत्र शरीरस्थेषु सप्तसु धातुषु वीर्य्यं हि सर्वोत्तमः सप्तमो धातुः। ते च सप्तापि धातवो मानवदेहे यथाक्रमं समुपलभ्यन्ते। स्त्रीकाये तु तेषां रूपान्तरं भवतीत्यतस्तत्र सप्तमस्य भेदद्वयं समासाद्यते तत्र द्वितीयस्य भेदस्य रज इत्याख्या। एवञ्च स्त्रीकायभेदात् सप्तमस्यापि धातो वीर्य्य-रजोभेदेन भेदद्वयं भवति। अस्मादेव हेतोरायुर्वेदाचार्य्यैः स्त्रीकायेऽष्टानां धातूनां स्थितिरङ्गीक्रियते।

मानवानां हि भोगायतनं कर्मार्जननिदानं स्थूलशरीरं मातापित्रो रजोवीर्य्याभ्यां पितॄणां साहाय्येनैव सम्पाद्यते। योगशास्त्रसिद्धान्ततो वायुमनोवीर्य्याणामेकतत्त्वात्मनानेन अन्तःकरणस्य वीर्य्येण सह साक्षात्सम्बन्धभागित्वात् पुरुषाणां नारीणाञ्च वीर्य्यस्य रजसश्च यथाक्रमं सर्वधातुसारतया पूर्वोक्तौ द्वावपि संस्कारौ जीवशरीरे स्वत एव रजोवीर्य्याभ्यामाकृष्येते।

गुणानां स्थूलशरीरमाधारो भावानाञ्चान्तःकरणमाश्रयइति मातापित्रोर्गर्भाधानसंस्कारकालिक-शरीरान्तःकरणस्थिति-साहाय्यवशेन सन्ताने ते संस्कारसमूहाः समाकृष्यन्ते।

कथमस्वाभाविके संस्कारे स्वाभाविकस्य तस्य समावेश ? इत्यादि विविधायाः शङ्कायाः समाधानमाह—बन्धनगमागमचक्रयोरस्वाभाविकसंस्कार एव हेतुः। मुक्तिनिदानञ्च स्वाभाविकः संस्कारः। वैदिकाश्च संस्कारयागाः स्वाभाविक-संस्कारपोषका इति प्रागेवाभिहितम्। इदानीञ्च गुणभावसम्बन्धिनः संस्कारसमूहा अपि स्वाभाविकस्यैव संस्कारस्याङ्गभूता निगद्यन्ते। अपरञ्च स्वाभाविकस्य संस्कारस्य एकत्वमद्वितीयत्वम् अस्वाभाविकस्य चानन्तत्वम्, अपि प्रागेव प्रमाणितम्।

स्वाभाविकस्य संस्कारस्यैकतयाऽद्वितीयतयाऽच तस्य गतिः स्थितिश्च जीवस्योत्पत्तित आरभ्य मुक्तिं यावत्तिष्ठति इत्यङ्गीकरणीयमेव। स्वाभाविको हि संस्कारः चिज्जडग्रन्थिसमुत्पत्त्या सहैव समुत्पद्यते। उद्भिज्ज-स्वेदजाण्डज-

जरायुजात्मकचतुरशीतिलक्षयोनिषु सोऽद्वैतरूपेण तिष्ठति। तस्य गतिश्च सर्वत्रैवाप्रतिहतैव भवति। तस्य पूर्णविकाशश्च जीवन्मुक्तदशायां भवति। अस्वाभाविकस्तु संस्कारो जीवस्य मानवयोनिसमागमनकालत एवोत्पद्यते तत्र चानन्तताभाश्रित्य अनेकपथेन परिणममानो जीवाननेकधा सुखदुःखमयानन्तगमागमचक्रे भ्रामयन् तेभ्यो मोक्षुमवसरन्नार्पयति।

मनुष्ययोनाविहागतस्य स्वाभाविकास्वाभाविकयोरुभयोरपि संस्कारयोरेतदेव पार्थक्यम् यद्—बन्धनदशायामस्वाभाविकस्य संस्कारस्य प्राधान्यम् स्वाभाविकस्य चाप्राधान्यम्। जीवन्मुक्तावस्थायान्तु स्वाभाविकस्यैव संस्कारस्य प्रधान्यम् अस्वाभाविकस्य च गौणत्वं विद्यत इति।

सुखदुःखमयस्य शुभाशुभप्रवृत्तिजन्यभोगस्य भुक्तिदशायामहो विविधेषूच्चावचलोकेषु परिभ्रमणेन यद्भोगवैचित्र्यमासाद्यते तत् सर्वमनन्तरूपतामाश्रितस्यास्वाभाविकस्यैव संस्कारस्य परिणामः। गमागमचक्रे परिभ्रामिकायां गतौ ऊर्ध्वगमिप्रवाहात्मिकाया क्रियायाः कारणं तु स्वाभाविकस्य संस्कारस्य शक्तिरेव। इत एव जीवन्मुक्तदशायां महापुरुषा अस्वाभाविकसंस्कारसमुत्पन्नफलं समश्नुवते। स्वाभाविकसंस्काराधीनाः सन्तः सुखदुःखात्मकद्वन्द्वं समानतयैवानुभवन्तः स्वान्तःकरणप्रवाहं ब्रह्मानन्दात्मकानन्तार्णवे विलापयितुं समर्था भवन्ति।

ननु कथं रजोवीर्य्याभ्यामेवोभयोः संस्कारयोराकर्षणं भवतीति पुनराशङ्कते—यतो हि-रजो वीर्य्यञ्च सप्तानामपि धातूनां साररूपतया जीवानां स्थूलशरीरस्य वीजात्मकमुपादानकारणं भवतु नाम, परन्तु भाव-गुण-मूलकस्य स्वाभाविकस्य संस्कारस्याकर्षणनिदानं कथं भवितुमर्हतीति शङ्कितुरभिसन्धिः। तत्रोत्तरयति, यदेवं भूतायाः शङ्कायाः समाहितिः सरला स्फुटतरैव तथा हि—चिज्जडग्रन्थिरूपात्मकस्य जीवस्य प्रथमाविर्भावावस्थायामेव स्वाभाविकः संस्कार उत्पद्यते। यस्य प्रधानं कार्य्यमेतदेवास्ति यत् जीवानुत्तरोत्तरं उन्नतावस्थायां प्रापयन्नभ्युदयप्रदानेन निःश्रेयसमार्गे समारोहयन्नधः पतितुमवसरं न लम्भयेदिति। उदाहरणतो यथा-जीवो यदा आम्राद्युद्भिद्-योनितः चलदलयोनिं व्रजति। हस्तियोनितो वा गोयोनिमभ्येति। तदा तस्य क्रमोन्नतिरियं उक्तोन्नतयोनिसम्बन्धिस्थूलशरीरसाहाय्येनैव समेधते। स्थूलशरीरं हि न केवलं भोगायतनमेव, किन्तु जीवानां क्रमोन्नतेरवलम्बनीयं क्षेत्रमपि तदेवाङ्गीक्रियते। यतश्च मानवो यदा एकशरीरतः शरीरान्तरं गृह्णाति। तदैव स क्रमोन्नतिपथपथिको

भवति। इत्थञ्च स्थूलशरीरमेव क्रमोन्नत्या मुक्तिपथप्रापकं क्षेत्रमिति तस्मिन्नेव स्वाभाविकस्य संस्कारस्याङ्गीभूतयोरुक्तयोः संस्कारयोराकर्षणसम्भव इति ॥६४॥

प्रसङ्गतो वर्णधर्मोपयोगितां साधयति—

अतो बलीयस्त्वं वर्णस्य ॥ ६५ ॥

अतो रजोवीर्य्यशुद्धिप्रतिपालनात् वर्णस्य वर्णधर्म्मस्य बलीयस्त्वम् दृढ़त्वमिति सूत्रार्थः।

वर्णधर्म्मे रजोवीर्य्यशुद्धिविवेकः सर्वाभ्यर्हित इति पूर्वमेवोक्तम्। एतदपि पूर्वप्रकरणे सप्रमाणं संसाधितम् यत् यस्मिन्मानवसमाजे वर्णाश्रम-धर्मो विद्यते तस्य न कदापि महाकालगर्तनिपातः। नापि तदीयनियमपालनतोऽस्य समाजस्याधःपातः, प्रत्युत क्रमोन्नतिरेव तदीया समेधते।

तस्य विज्ञानस्य पुनर्दार्ढ्याय सूत्रकृन्महर्षिराख्याति यद् रजोवीर्य्याभ्यां पूर्वोक्तस्य मुक्तिप्रदस्य स्वाभाविकस्य संस्कारस्य गुणभावसम्बन्धिनोमङ्गानामा-कर्षणं भवतीति। एवञ्च रजोवीर्य्यशुद्धिप्रयोजनात्मकस्य वर्णाश्रमधर्मस्य प्रतिपा-लनं परमावश्यकम् मनुष्यसमाजस्य कृतेऽस्य धर्मस्य प्रतिपालनममृतस्वरूप-मित्यप्यूहनीयम् ॥ ६५ ॥

प्रसङ्गप्राप्तमप्याह—

न प्रतिलोमविवाहो धर्मसम्बद्धः ॥ ६६ ॥

स्मृति-शास्त्रेषु रजोवीर्य्यशुद्धिरक्षार्थं सवर्णविवाहस्य सर्वाभ्यर्हितत्वं प्रमाणितम्। अनुलोमज-विवाहस्य कामजन्यत्वेऽपि कथञ्चिद्धर्मसङ्गतत्वमपि स्वीकृतम्। परन्तु प्रतिलोमजविवाहस्य तु सर्वथाऽधर्मजनकत्वं धर्मविरुद्धत्व-मेव प्रमाणितम्।

तथा हि वहुत्र स्मृतिषूपलभ्यते—

सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि
कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः।
शूद्रैव भार्य्या शूद्रस्य सा च स्वा च विशःस्मृते।
ते च स्वा चैव राज्ञः स्युस्ताश्च स्वा चाग्रजन्मनः।

अनुलोमविषयिणीयमाज्ञा प्रतिलोमसम्बन्धे त्वित्थमुपलभ्यते। तथा हि—

क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः
वैश्यान्मागधवैदेहौ राजविप्राङ्गनासुतौ।

शूद्रादायोगवः क्षत्ता चाण्डालश्चाधमो नृणाम् ।
वैश्यराजन्यविप्रात्तु जायन्ते वर्णसङ्कराः ।

वर्णधर्मस्य पूर्णतासंरक्षणायेदं परमं प्रधानञ्च कर्तव्यं यद् ब्राह्मण-क्षत्रिय-वैश्य-शूद्राः स्वसवर्णकन्या एवोपयच्छेयुः । यदा ते स्वसवर्णकन्यो-पयमनं कुर्वन्ति तदैव रजोवीर्य्यशुद्धिः पूर्णतया सम्भवति । जीवस्य क्रमोन्नति सम्बन्धतो मुक्तिद्वारमप्युद्घाटितं भवति । पूर्वमप्यभिहितमिदम् ।

मोहविचारं परित्यज्य कामार्थवासनापरवशो मनुष्यो यदि सवर्णां कन्यां विहायानुलोमजरीत्या स्वाधोवर्णसम्भवामन्यां परिणयति चेत् कथमपि स धर्मबहिर्मुखो न भवति । यतो हि तत्र वीर्य्याश्रयापेक्षया रजसोऽधिकर-णस्य न्यूनतया तेन सह तस्य समानताया अभावात् निकृष्टक्षेत्रोप्तवीजाङ्कुरवत् पूर्णविकाशाभावेऽपि सामान्यतो वीर्य्यशुद्धिरसन्दिग्धा । परन्तु प्रतिलोमज विवाहे तु उच्चवर्णसमुद्भवायाः कन्याया अधोवर्णभवेन पुंसा सङ्गमनाद् रजसो-वीर्य्यस्य चोभयोरपि अशुद्धिसम्पातदोषात् प्रतिलोमजविवाहस्य सर्वथा-गर्हितत्वं महर्षिभिर्निर्धारितम् ।

लौकिकोदाहरणतो विज्ञानमिदं सारल्येनैव समर्थितुं पार्य्यते । तथा हि यथेष्टजलसंयोगसम्वलितायां पूर्णायां भूम्यामङ्कुरोत्पत्तेर्नियमाद् जलहीनभूम्या-माहोस्विद् अल्पजलाप्लुतायामपि भूमौ अङ्कुरोत्पत्ति र्भवत्येव । परन्तु अत्यधिकजलाप्लुतायां भूमौ वीजमुप्तं चेद् विफलमेव तद्भवति । अङ्कुरोत्पत्तिस्तु दूरे । तथैव निम्नश्रेणिगरजसि वीर्य्यसंयोगेन कथंचित् तस्य शुद्धौ सत्यामपि प्रतिलोमजविवाहे तु रजोवीर्य्ययोरुभयोरेवाशुद्ध्या सृष्टिक्रम एव विच्छिन्नो भूत्वा नष्ट-भ्रष्टो जायते । एवञ्च सृष्टिक्रमविरोधिनः सृष्टिविनाशकस्य च व्यापारस्यावश्यमधर्मजनकत्वम् । इत्यत एव प्रतिलोमजविवाह आर्य्य संस्कृतौ विरुद्धः ॥ ६६ ॥

प्रसङ्गतोऽपरमप्यभिधत्ते—

सपिण्डा सगोत्रा वयोज्येष्ठा च कन्या परिवर्जनीया ॥ ६७ ॥

धर्मशास्त्रादिषु महर्षिभि रादिष्टम् रजोवीर्य्यशुद्धिविज्ञानानुरूपमेव यद्—सपिण्डसगोत्रवयोज्येष्ठकन्यापरिणयेऽधर्मसंसर्गः तथा हि—

असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥

अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ॥

रजोवीर्य्यशुद्धिर्हि पूर्वोक्तभूमिबीजोदाहरणत एवात्रगमनीया । येन वैज्ञानिकेन हेतुना प्रतिलोमजो विवाहो निषिद्धः स एव हेतुरेषां त्रयाणां विवाहानामपि निषेधेऽवसेयः । यतो हि रजोवीर्य्यशुद्धिस्त्रिभिरप्येतै र्धर्म्मकार्य्यैर्विनश्यत्येवेति । यथा वर्णाश्रमधर्मभ्रंसतो मनुष्यजातिः कालकवलिता भवति, तथैवैभिर धर्मकृत्यैः कुलानि नष्टभ्रष्टानि भवन्ति । सपिण्डा हि स्वकुलसन्निहिता निगद्यते तस्याः स्वगोत्रजायाश्च पाणिपीडने रजो-वीर्य्यशक्तिरेव क्रमशः क्षीयते । सपिण्ड-सगोत्रयोरेकार्थकत्वात् स्वगोत्रजैव कन्याऽतिसन्निता सती सपिण्डा कथ्यते--स्मृतिषु सपिण्डा लक्षणं यथा---

सपिण्डतातु पुरुषे सप्तमे विनिवर्तते-
लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः ।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम् ॥ इति ॥

यदि भूमेरेकस्मिन्नेव प्रदेशे बहूनि बीजान्युप्तानि स्युस्तदा तत्क्षेत्रं तानि बीजानि चोभयमपि विफलितमेव भवति इति न प्रत्युत उभयमपि अपाविद्ध्यं जुषाणं सत् सृष्टितत्त्वमेव प्रतिबध्नाति । तथैव यदि समानकुलसमुत्पन्नस्त्रीगर्भे समानकुलपुरुषस्यैव वीर्य्यनिषेकः सर्वदा स्यात्तदा तयोः क्षेत्रबीजयोरवश्यं वैफल्य मवसाने च कालान्तरेण तस्य वंशस्यैव विच्छेदोऽप्यवश्यम्भावी ।

अपरतश्च विज्ञानसिद्धो विचारणीयोऽयं विषयो यद्-स्त्रिय आकर्षण शक्तिविशिष्टत्वात् पुरुषस्य च विकर्षणशक्तिमत्वाद् उभयोर्विरुद्धभावापन्नत्वं स्वीकर्तव्यमेव एवञ्चोभे अपि यदि एकस्मादेव केन्द्रात् पौनः पुन्येन नियुक्ते स्यातां तर्हि उभे अपि क्षीणबले स्याता मित्यत्र कः सन्देहः । अन्यच्चेह आधिदैविकं कारण मतिविलक्षणमूहनीयम् तथाहि—

अर्य्यमाद्यो नित्य-पितृगणाः वर्णकुलार्य्यत्वानां त्रयाणामपि रक्षकाः तत्र त्रिष्वपि कुलस्य मध्यवर्तित्वादुभयो रादिमान्त्ययो वर्णार्य्यत्वयोः सहायकत्वं सुसिद्धम् । तत्र कुलस्य गोत्रेण सह साक्षात् सम्बन्ध इति कुलपवित्रतया मानवसमाजे आर्य्यत्वस्य पावनत्वं तस्य पावनतया च वर्णत्वस्य पावित्र्यमक्षुण्णं तिष्ठति । इत्यतश्च कुल-पावित्र्य-रक्षा तस्य प्रवाह-धारायाश्च स्थिरीकरणं उभयमपि पितृगणानां मुख्यं कर्तव्यम् ।

जलस्य प्रवाहगति स्तदैव स्थिरा भवति यदा भूमिगात निम्नगा स्यात्,

जलस्य च सदाऽनुकूल्यं स्यादिति । एवञ्च यथा जलवेगस्य विकर्षणशक्तिः निम्नगक्षितेश्चाकर्षणशक्ति रुभे अपि सम्मिलिते जलधारां स्थिरीकुरुतः । तथैव पितृगणा अपि यदा पुरुषं स्त्रियञ्च पृथग् गोत्रोद्भवं प्राप्नुन्ति तदैव आधिभौतिकसम्बन्धविशिष्टस्य कुलस्य नियतं प्रवाहं स्थिरीकर्तुमर्हन्ति । यतो हि पितृगणानां स्वकर्तव्यानुष्ठाने परस्पर-विरुद्धगोत्रोद्भवावेव दम्पती साहाय्यमाचरतः ।

अन्यतश्च वयोज्येष्ठायाः कन्यायाः परिणयनिषेधस्यापि इदमेव कारणम्, यद् आयुषा सह आधिभौतिकस्य बलस्यापि वृद्धिः परिपुष्टिश्च भवति । क्षेत्रस्य बीजाश्रयत्वात् क्षेत्रबलं यदि बीजबलादधिकं स्यात्तदा क्षेत्रात्मकस्त्रीधाराया एव प्राबल्यं भवेत् । पुरुषधारा च गौणी भूत्वा कालान्तरेण पुरुषसृष्टिव्यपेक्षया स्त्रीसृष्टिमेव वर्द्धयिष्यति । तत्कुलं पुरुष-विहीनं भूत्वा स्त्रीप्रधानमेव भविष्यति । स्त्रियाः पुरुषायितत्वेऽप्ययमेवावस्थेति पूर्वमेवोक्तम् । वयोज्येष्ठायाः कन्याया विवाहनिषेधविज्ञानमपि तद्विज्ञानत एव सिध्यति ॥ ९७ ॥

प्रसङ्गतोऽऽन्यदप्याह—

वर्णसङ्करो नेष्टः ॥ ९८ ॥

अनेन पूर्वोक्त-रजोवीर्य्यशुद्धिविज्ञानानुसारेण वर्णसङ्करः शुभप्रदो न भवितुमर्हति । यतो हि वर्णसाङ्कर्य्ये रजो वीर्य्यशुद्धिः खपुष्पकल्पैव । रजोवीर्य्यशुद्धिविरहात् पूर्वोक्तस्य गुणसम्बन्धिनो भावसम्बन्धिनश्च मुक्तिप्रदस्य स्वाभाविकस्य संस्कारस्य विकाशो निरुध्यते, पितृगणस्य साहाय्यं च नासाद्यते । यतो हि पितृगणा रजोवीर्य्यशुद्ध्या, कुलपवित्रतया संस्कारशुद्ध्या च विशेषतो मानवकुलमनुगृह्णन्ति । वर्णसङ्करी सृष्टिस्तु धर्मजसृष्टिभिन्नतयाऽपि अनिष्टकर्त्री । विशेषतश्च वर्णसङ्करीणां प्रजानां नैमित्तिक-पितृगणत एकपद एव सम्बन्धविच्छेदो भवति । उक्तञ्च श्रीगीतोपनिषत्सु—

सङ्करो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥
दोषै रेतैः कुलघ्नानां वर्णसङ्कर-कारकैः ।
उत्साद्यन्ते जातिधर्म्माः कुलधर्माश्च शाश्वताः ॥ इति ॥

वर्णधर्म्मे साङ्कर्य्यदोषापातेन कथमधर्मसंग्रह इति अन्यथाऽपि विवृणोति । वर्णधर्मसाङ्कर्य्यस्य स्वाभाविको भेदस्त्रिविधो ज्ञेयः । एकस्तु अन्यजात्या सह रजोवीर्य्यसंमिश्रणरूपः । द्वितीयो नीचवर्णताश्रयणम् । तृतीयस्तु नीचवर्णस्योच्चवर्णत्वग्रहण-प्रयत्नः, इति त्रिष्वपि भेदेषु उच्चवर्णस्य नीचवर्णा-

श्रितानामाचाराणां ग्रहणेन केवलाया आधिभौतिक्या एव क्षतेः सम्भव इति सा व्यक्तिगा क्षतिः । यतो हि शूद्राचारिणो विप्रस्य पुत्रः पुनः शुद्धतरो ब्राह्मणो भवितुमर्हतीति अनया आधिभौतिक्या अपवित्रतया केवलमेकपुरुषावधिकैव सङ्करता आपततीति लघीयानयमपराधः ।

नीचवर्णो यदोच्चवर्णत्वमात्मन आश्रयितुमिच्छति तदा आध्यात्मिकी अपवित्रता सम्वर्द्धते । यतो हि नीचवर्णगः पुमान् स्वोच्चाभिलाषोन्मादग्रस्तोऽवश्यं स्वात्मानं स्वसमाजाश्रितं समुदायं वा उच्चवर्णस्थ-पुरुषाचारान् पालयितुमागृह्णाति ।

तत्र यथाकथमपि न्यूनाधिकभावेन उच्चवर्णीयानाचारान् स्वयमाचरन् अन्यैश्चाचारयन् यदोच्चवर्णश्रेणिम्प्रविशति तदाऽनेके दोषाः समुद्भवन्ति । येन तद्व्यष्टिसमष्ट्युभयात्मनो महती मानसी क्षति र्जायते । यतो हि सर्वाभ्योऽपि हानिभ्य आध्यात्मिक्या हानेरप्रतिमत्वस्य सर्वैरभ्युपगतत्वात् । शरीरक्षति र्हि धार्मिकविवेचनया न तादृशी प्रबला संमता यथाऽध्यात्मिकी क्षतिः । बुद्धिमनोऽहङ्कारात्मकस्यान्तः करणस्यावनति र्हि गुरुतराङ्गीकृता वृद्धैः ।

अन्यच्चेदमपि विमर्शनीयम्—यद् आधिभौतिकी क्षतिशक्ति र्हि तत्पुरुषावधिकैव तिष्ठति । आध्यात्मिकक्षतिप्रभावस्तु तस्या व्यक्तेः तदीयसमाजस्य वा शाश्वतिकीमेव हानिं विदधत् सर्वथा सर्वकालिकं पातकं तद्व्यक्तौ तदीयसमाजे चासञ्जयति । आध्यात्मिकोन्नतौ च साक्षात् बाधको भवति ।

इत्येवमियं हि तस्य क्षतिः स्थिरा शाश्वतिकी गण्यते । यतो हि स आध्यात्मिक्यानयाऽपवित्रतया स्ववर्णतो विच्युतो भवति । उच्चवर्णाधिकारमपि नासादयति । उपरितश्च पितृगणानां साहाय्यबलमपि ह्रसति, येन तस्योन्नतिमार्गो निरुध्यते । इत्थञ्च वृथोच्चत्वाभिलाषी स मानवो मानवसमाजो वा स्वाचरणेन वर्णाश्रमधर्मशालिमानवसमाजे महान्तं विप्लवमुत्थापयति । ईदृश-धार्मिक-सामाजिक-विप्लव हेतु र्भूत्वा स मानवो मानवसमाजो वा स्वभावविरुद्धं वृहदाघातमधिगत्य स्वावनते रेव निदानतामेति ।

अपरतश्च रजोवीर्य्य-साङ्कर्य्यत आधिभौतिकहाने राघातस्तु दुःसहो निश्चित एव । रजोवीर्य्यशुद्ध्या कथं पितृगणानामनुकम्पा समुदेतीति विस्तृ विवेचितमेव पूर्वम् । समासतः पितृगण-साहाय्यात्मकेन दैवबलेन विरहिता साङ्करी प्रजा स्ववर्णधर्मसंरक्षण-मार्गतो विच्युता स्वोन्नतिमार्गमेव निरोधयति । तथा च वर्णाश्रमधर्मसम्बन्धिनां सर्वेषामेवोन्नतमार्गाणामधिकारावाप्तये सर्वमपि दोषजातं तस्या व्यक्तेः तस्य वा समाजस्य कृते असुकरं सम्पद्यते इति ॥ ६८ ॥

अन्यथाऽपि विज्ञानमिदं पुष्णाति—

स न धार्मिकः ॥ ९९ ॥

वर्णसङ्करी प्रजा न धर्मानुगा भवतीति प्रत्यक्षत एवोपलभ्यते । साधारणतो जगति दृश्यतेऽपीदृग् यद् वर्णसङ्करीषु प्रजासु धार्मिकानुष्ठानस्यात्यन्ताभाव एवास्तीति ।

पूर्वविज्ञानपरिपुष्टये एव सूत्रकारः सूत्रमिदमाविश्चकार । प्रथमतो हि वर्णसङ्करी प्रजा पूर्वकथितविज्ञानानुसारतो रजोवीर्य्यशुद्धिन्तु गोपायितुमेव नार्हति । साङ्कर्य्यां सृष्टौ यथायोग्याधिकारवतो वीर्य्यात्मकस्य बीजस्य यथायोग्याधिकारवतो रजोरूपस्य क्षेत्रस्य चाभावात् सृष्टिविपर्य्ययस्यावश्यकत्वात् ।

द्वितीयतश्च मुक्तिसहायकस्य स्वाभाविकस्य संस्कारस्य गुणभावात्मकप्रवाहगति र्नहि सुचारुतरा भवति । तृतीयतः कर्मबीजस्य संस्कारस्य संङ्करसृष्टौ दूषितत्वेनास्वाभाविकस्यापि संस्कारस्य तथात्वम् । यतो हि मातापित्रोरुभयोरपि स्व-स्वजात्यभिमानस्य सुस्थिरत्वेन जैवस्यास्वाभाविकस्य संस्कारस्यापि परिशुद्ध्यभावः । इत्यादिकारणसमुदयात् सङ्करसन्तानस्य धार्मिकत्व-सम्भावनाऽसम्भवः ॥ ९९ ॥

तस्य कारणमभिधत्ते—

नैसर्गिकी प्रवृत्तिरस्याधर्मे ॥ १०० ॥

संस्कारो हि कर्मणां बीजम् । यथासंस्कारमेव क्रिया समुत्पद्यते । वर्णसङ्करसन्तानस्योत्पत्तिवेलायां तदीयमातापित्रोरन्तःकरणे सदाचारभ्रष्टतायाः संस्कारस्तु अवश्यमेवान्त र्निगूढस्तिष्ठति ।

"आदित्य-चन्द्रावनिलोऽनलश्च ।
द्यौर्भूमिरापो हृदयं यमश्च ॥
अहश्च रात्रिश्च उभे च सन्ध्ये ।
धर्मश्च जानाति नरस्य वृत्तम्" ॥

इति स्मृत्युक्तदिशा हृदयस्य सर्वनरवृत्तसाक्षित्वेन अन्तःकरणस्य चित्तात्मके भागे सदाचारभ्रष्टतारूपाधर्मसंस्कारोऽङ्कितो भवति । ततश्च मनोवायुवीर्य्याणां सामानाधिकरण्य-सम्बन्धाश्रितत्वेन तेनैवाऽधर्मसंस्कारेण संवलितमेव गर्भाधानम्भवति । मातापि तेनैव संस्कारेण संवलिता गर्भभरणं करोति अतश्च ततो जायमाना सृष्टिः स्वभावत एवाऽधर्म्मे प्रवर्तते इत्यत्र कः सन्देहलेशः ॥ १०० ॥

प्रसङ्गतोऽन्यप्रकारेणापि प्रतिपादयति--

सृष्टिक्रमाननुकूलभावात् ॥ १०१ ॥

सृष्टेः सर्गस्य क्रम आरोहः तस्य, न अनुकूलम् अननुकूलम् तस्य भावः तस्मात् विपर्य्ययादित्यर्थः ।

या हि क्रिया सृष्टिस्वाभाविक-क्रमानुसारिणी तया धर्म्मोत्पत्तिर्भवति । या च सृष्टिक्रमविरोधिनी तया चाऽधर्मवृद्धि र्भवतीति धर्माधर्मयोरेतादृगेव सम्बन्धोऽभ्युपगतः पूर्वाचार्य्यैः । धर्माधर्मयोर्विस्तरशो विवेचितं लक्षणं पूर्वम् । तदनुशीलनतः स्पष्टमेव सिध्यति यत् मानवयोनितः प्राक्तनयोनिषु जीवः केवलस्वाभाविकसंस्कार-परवशो मानवाभिमानविरहितः प्रकृतेर्मातुः क्रोडे लाल्यमानः पाल्यमानः स्व-स्वयोन्युचितधर्म्ममनुतिष्ठन् निर्बाधमाध्यात्मिकयामुन्नतौ पुरःसरो भवति । तत्र तस्य जीवस्य क्रमाभिव्यक्तौ निरन्तराय मिदं कारणं यत् स स्वाहङ्कारविरहितः प्रकृतिनियमतः सृष्टिक्रमेणैव परिचाल्यते । यतो हि सृष्टिक्रमनियमतो गच्छतो व्यवहरतो वा जीवस्य क्रमोन्नतिरावश्यकी । अन्यत्र योनौ जीव स्तमोगुणावस्थातः क्रमशः सत्त्वाभिमुखो भवन् निर्बाधं तमो ह्रासयन् सत्त्वमभिवर्द्धयन् संसरति पुरः पुर उन्नतिमार्गे ।

एवञ्च स्वाभाविक-संस्कारवशतः समेधमानो यदा मानवयोनावुपैति तदा तमोगुणाभिवर्द्धकैः पापकर्मभिस्तस्योर्ध्वगति र्निरुध्यते सत्त्ववर्द्धकैश्च पुण्यकर्मभिः तदीयोर्ध्वगतिः सरला सुगमा सम्पद्यते । तमोवर्द्धकस्य कर्मण एवाधर्माभिधानात् सत्त्ववर्द्धकस्य च धर्मसंज्ञकत्वात् सृष्टेश्च क्रमशः जीवस्य तमोऽवस्थातः सत्त्वाभिमुखप्रापणैककर्मकत्वात् अवसाने च क्रमेण पूर्णसत्त्वोद्रेकात्मकमुक्तिपदप्रापणरूपान्तिमकर्तव्यत्वात् क्रमशः सत्त्वाभिव्यक्तिरेव सृष्टिनियमानुकूलेति स्वयं सिद्धः पन्थाः ।

वर्णसङ्करी प्रजा तु प्रत्यक्षत एवैतन्नियमविरुद्धा भवति । वर्णाश्रमधर्म्मश्च सृष्टिनियमसंरक्षणे साहाय्यमाचरति । तेन चेयमार्य्यजातिः सृष्टिनियमसंरक्षणप्रधाना आत्माभिमुखी क्रमशः कथमूर्ध्वगतिशालिनी समेधते इति विस्तरशो विमर्शितं पूर्वम् । इत्थञ्च सृष्टिनियमोल्लंघिनी वर्णसङ्करी प्रजा अधर्म्मप्रधानेति निःसन्दिग्धः सिद्धान्तः ॥ १०१ ॥

विज्ञानमिदमन्यथापि प्रमाणयति--

श्राद्धव्याहतेर्यवनजप्रेतवत् ॥ १०२ ॥

गर्भाधानवेलायां मातापित्रोरन्तःकरणसंस्कारेण सार्धं भाविनः सन्तानस्य कीदृक् घनिष्ठः सम्बन्ध इति निदर्शयितुं दृष्टान्तमुखेनाह--

कश्चन धर्माचार्य्यः संन्यासी कस्यचन सद्गृहस्थस्य ब्राह्मणस्य गृहे भिक्षाचर्य्यार्थमाहूतोऽतिथिरूपेण रात्रिमेकामुवास । रात्रौ च भोजनानन्तरं निद्रिते सन्यासिनि निशीथे कश्चन तद्गृहगः प्रेतो मनुष्यवेशगतः सन्यासिनं बोधयामास । सन्यासी तु तं चौरं मन्यमानो गृहस्थितान् पुरुषान् सम्बोध्य यावत् पृष्टवान्, तावत् तस्य प्रेतस्याट्टहासेन विस्मितो गृहस्थपुम्भिश्च बोधितोऽमुं तदायवंशपरम्पराप्राप्तः कश्चन सम्बन्धी मृत्वा प्रेतयोनिमाश्रितोऽस्तीति निश्चिकाय ।

ततश्च स महात्मा दयावशंवदो भूत्वा स्वप्रभावातिशयेन तं प्रेतं तस्या योनेर्मोक्तुकामः विविधान् प्रश्नान् पप्रच्छ । स च तं महात्मानं स्वोपकारपरायणं बुध्वा स्वपूर्ववृत्तान्तं सर्वमेव निवेदयामास ।

तथाहि बद्धाञ्जलिः प्रेतो मुक्तकण्ठः तं सन्यासिनं विज्ञापयामास यन्मदीया माता कदाचन मार्गे गच्छन्ती केनचन यवनतरुणेन धर्षिता गर्भं दधार। पश्चाच्च लज्जापरवशा तद्वृत्तान्तं निगूहन्ती मां जनयामास। तेन गर्भेण गृहीतजनुरहं सर्वमप्यायु र्यथाशास्त्रविधानं यापयमानोऽन्ते वार्द्धक्ये मृत्युपरवशः स्वसन्तानैः विहितान्त्येष्टिक्रियोऽपि प्रेतयोनिमुपेतोऽस्मि। न केनापि सनातनधर्मीयविधानेन प्रेतत्वं विमोक्तुमर्हामि । यदि श्रीमान्मदीयोर्ध्वगतिं चिकीर्षति चेदन्यमेव कञ्चनोपायं विरचयतु। इत्युक्त्वा तुष्णीं बभूव । स च सन्यासी श्रुततत्प्रेताखिलोदन्तोऽन्येनैव विधानेन तं प्रेतयोनिमुक्तं कृत्वा तदीयेन सकलगुप्तरहस्येन तं सद्गृहस्थं बोधयित्वा यथागतं जगाम।

इत्यनेन सूच्यते—यद् यवनजनकवीर्य्यसंस्कारतः समागतो यवनसंस्कारो न केनापि सनातनधर्मशास्त्रविधानेन विमुक्तो भवितुमर्हति यथा तस्य यवनप्रेतस्य बभूवेति मातृपितृजन्यरजोवीर्य्य-सम्बन्ध-युक्तसंस्कारप्राप्तेरयमपूर्वो दृष्टान्तः ॥ १०२ ॥

पुनः प्रसङ्गतो वर्णशुद्धिमहिमानमाख्याति—

वर्णविशुद्धया विवृद्धिर्धान्यवत् ॥ १०३ ॥

पूर्वं वर्णाश्रमधर्मस्य महिमानमभिहितवान् विस्तरेण सूत्रकृन्महर्षिः । इदानीं रजोवीर्य्यशुद्धि-विज्ञानप्रस्तावेन पुनस्तन्महत्वमुदीरयन् धान्योदाहरणमुखेन रजोवीर्य्यशुद्धिमूलकतां तस्य प्रख्यापयति ।

कदाचन कालदुर्विपाकतो धरातलस्थिते सर्वस्मिन्नपि धान्ये विनष्टे सत्येकमपि यदि शुद्धतरं धान्यमवशिष्टं स्यात्तर्हि तेनैवैकेनापि धान्येन पुनः कालक्रमेण शनैः शनैः सर्वापि मेदिनी धान्यपूर्णा भवितुमर्हति। तथैव शुद्धरजो-

वीर्य्यप्रभावशालिनी स्वल्पाऽपि ब्राह्मण-क्षत्रिय-वैश्य-शूद्र वर्णाभिमानिनी प्रजाऽवशिष्टा स्यात्तर्हि कालान्तरे तत एव पुनः वर्णाश्रमाचारवतीभिरार्य्यप्रजाभिः सम्पूर्णाऽपि मेदिनी सम्भृता स्यादित्यत्र नाणुरपि सन्देहलेशः ॥ १०३ ॥

इदानीं शुद्धित्रयस्याऽप्युपयोगं समाचष्टे—

शुद्धित्रैविध्यमपेक्ष्यं धातुत्रय-साम्यवत् ॥ १०४ ॥

आयुर्वेदानुकूल-वातपित्तकफात्मकधातुत्रयसाम्यतो यथा शरीरस्य स्थितिः साध्वी नीरुग् निगद्यते तदन्तर्गो जीवश्चोन्नतो भवति, तथैवाध्यात्मादिशुद्धित्रयेण संस्कारशुद्धिमासाद्यजीवोऽभ्युदयनिःश्रेयसावपि विन्दति ।

आयुर्वैदिकोऽयं सर्वविदितः सिद्धान्तो यद् वातपित्तकफानां त्रयाणामेकस्यापि शुद्धौ ह्रासश्चेच्छरीरे रोगाभियोग आवश्यकः । त्रयाणां समानशुद्धौ सत्यां न काऽपि शारीरिकी पीडा पुमांसं स्त्रियं वाऽक्रामति ।

आयुर्वेदशास्त्रसम्मतोऽयमपि सिद्धान्तोऽस्ति यद् वातपित्त-कफानां त्रयाणामपि समानशुद्ध्या नरो मुक्तिमप्यायासविरहितामेवाधिगच्छति । तथैव वर्णाश्रितां त्रिविधां शुद्धिमुपेत आर्य्यगणोऽभ्युदयमश्नुवानोऽन्ते निःश्रेयसमप्याश्रयति । तत्र वर्णधर्मनिर्वाहे शुद्धित्रयमध्ये एकस्या अपि ह्रासश्चेत्तदा तत्रन्यूनत्वस्यावश्यं सम्पातः । अतस्तिसृणामपि शुद्धीनां समानतयैवोपयोग आवश्यकः । स्मृतिष्वपि निर्दिष्टोऽयमुपरितनो विषयो यथा—

अभ्रकं तव बीजं तु मम वीजं तु पारदः ।
उभयोर्मेलनं देवि ! मृत्युदारिद्र्य-नाशनम् ॥
कालार्थ-कर्मणां योगो हीनमिथ्यातिमात्रकः ।
सम्यग् योगश्च विज्ञेयो रोगारोग्यैककारणम् ॥
रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता ।
तपः श्रुतं च योनिश्चेत्येतद् ब्राह्मणकारणम् ॥
तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः । इति ॥ १०४ ॥

विज्ञानमिदं पुष्यतितराम्—

तद्वर्णाश्रमरक्षकं हिमालयवदैश्वर्य्यस्य ॥ १०५ ॥

सूत्रकृद्धि महर्षिः पूर्वतनमेव विज्ञानमुदाहरणतः पोषयति । यथा हि नगाधिराजो हिमालयोऽखिलानामपि लौकिकैश्वर्य्याणां गोपायिता तथैवाध्यात्माधिदैवाधिभौतिकशुद्धित्रयमपि वर्णाश्रमिणां मानवानां सर्वस्याप्यभ्युदयकरस्य कार्य्यजातस्य रक्षितृ । हिमालय-पर्वताश्रिता एव धरातलस्थाः सर्वे उद्भिज्जाः

प्राणिनः प्राणन्ति । केऽपि पशुपक्षिणो नालोक्यन्ते ये हिमालयस्य विशाले काये नाश्रयमाश्रित्य क्रीडन्ति । यथा हि पर्वतपतिः हिमालयः सुवर्णादिसर्वप्रकाराणामपि धातूनामाश्रयः, हीरकादीनां सर्वेषामपि रत्नानामाकरः, तथैव वर्णस्य त्रिविधाभिरपि शुद्धिभिः वर्णानामाश्रमाणां चोभयेषामपि धर्माणां शुद्धिः परिरक्षिता भवति । आर्य्यजातिश्च शाश्वतं जीवन्ती यज्ञादिस्वाभ्युदयकरान्-धर्मान् अनुतिष्ठन्ती स्वार्य्यत्वं सनातनमभिरक्षति । यज्ञादिशुभकर्मानुष्ठानेन देवर्षिपितृगणानामप्यभ्युदयः समेधते । वस्तुतः शुद्धित्रयेण्वेव सर्वमप्याश्रितं वर्णाश्रमधर्मस्येति विवेकः ॥ १०५ ॥

कथं गुणसंस्कार-क्षय इति वर्णधर्मविज्ञानपरिपुष्टये प्रतिपादयति—

गुण-संस्कार-हानं परिणामात् ॥ १०६ ॥

गुण-संस्कार-विकाशस्य शरीरेण सह साक्षात् सम्बन्धः । तत्रापि गुण-विकाशस्य स्थूलशरीरमेवाधार इति गुणसंस्कारेण सह स्थूलशरीरस्यैव सन्निहितः सम्बन्धः । इत्यत एव धर्माचार्य्यै र्जन्मनैव सह वर्णधर्मस्य घनिष्ठः सम्बन्धो निरूपितः । तथा च मनुः--

अविद्वांश्चैव विद्वांश्च ब्राह्मणो दैवतं महत् ।
प्रणीतश्चाप्रणीतश्च यथाग्नि र्दैवतं महत् ॥

श्रीमता भगवतापि--

अविद्यो वा सविद्यो वा ब्राह्मणो मामकी तनुरिति । निजमुखेनैव प्रस्तुतम् ।

विज्ञानमिदमन्यथाऽपि बोद्धुं शक्यते । तथा हि-पूर्वजन्मार्जितप्रारब्ध-परिणामतो जात्यायुर्भोगप्रकृतिप्रवृत्तिरूपपञ्चानां तत्त्वानामुपलब्धिर्भवति । तत्र तत्त्वपञ्चके त्रीणि प्रधानानि द्वे चाप्रधाने सम्मते । अत एव मुख्यगौण-विचारणया प्रथमानां त्रयाणां स्थूलशरीरेणैव सन्निहितः सम्बन्ध उत्तरयो र्द्वयोस्तु सूक्ष्मशरीरेणैव नैकटिकः सम्बन्धः । अत्रापि गुणसंस्कार एव कारणम् । शरीरपरिणामेन सार्धं गुणसंस्कारस्य ह्रासः इति साधारणो नियमः ।

अपरतश्च यावत्स्थूलशरीरस्थितिस्तावत् प्रारब्धजन्यगुणसंस्कारेण सार्धं जीवो दृढवद्धस्तिष्ठति । यदा च तस्य शरीरस्य विच्युतिर्जायते तदैव तस्मात् संस्कारात् पूर्णतया तस्य विमोक्षो भवति ।

उदाहरणतो यथा-सत्त्वप्रधानत्वेन ब्राह्मणस्य, रजःसत्त्वप्रधानतया क्षत्रियस्य, रजस्तमःप्रधानत्वाद्वैश्यस्य, तमःप्राधान्येन च शूद्रस्येत्येवं चतुर्णामपि वर्णानां मध्ये क्षत्रियस्योदाहरणमाश्रित्यावगमनीयञ्चेदित्थम्--यथा क्षत्रिय-

शरीरे रजःसत्त्वस्य यत् प्राधान्यम् वर्त्तते । तस्मादेव हेतोः तत्-प्रभावो जात्या-युर्भोगप्रकृतिप्रवृत्तिषु च यदवलम्बते तस्यास्तित्वं जीवस्य सर्वास्वप्य-वस्थासु कयापि विधया तिष्ठत्येव । केवलं परिणामत एव तस्य, ज्ञानं सम्पद्यते । इत्यत एव हेतो ब्राह्मणशरीरधारिणः क्षत्रियशरीरधारिणश्चावतारस्य, तथा ब्राह्मण-क्षत्रिय-शरीरधारिणो र्ज्ञानिनोश्चाचारव्यवहारयो र्महान् भेदः प्रतीयते । सर्वेऽपीमे संस्कारा यथायोग्यं यथासमयं परिणामत एव हीयन्ते ॥ १०६ ॥

प्रसङ्गतः शङ्कासमाहितीं ब्रूते—

तल्लङ्घनमसाधारणनियमात् ॥ १०७ ॥

तस्य संस्कारस्य लङ्घनम् अतिक्रमणम् असाधारणनियमाद् भवतीति सूत्रार्थः ।

ननु संस्कार-रहस्यस्यातिदृढतयाऽपरिवर्तनशीलत्वात् कथं विश्वामि-त्रस्य क्षत्रियशरीरस्यापि सतो ब्राह्मणत्वाभिसम्पत्तिः ? कथं वा नन्दिकेश्वरो महात्मा मनुष्यशरीरस्य गुणसंस्कारेण विरहितो भूत्वा देवत्वमुपजगाम, कथञ्च परशुरामावतारो ब्राह्मणशरीरसम्पन्नोऽपि क्षत्रियत्वलक्षण-सम्पन्नो बभूव ? इत्यादि शङ्कायाः समाहितौ सूत्रकृदभिदधाति । यद्—असाधारण-तपःशक्त्या तथैव च योगशक्त्या तथाविधयैव वैदिककर्मशक्त्या चेद्दृशगुण-सम्बन्धिनः संस्कारस्य परिवर्तनं भवितुमर्हति । तपसो माहात्म्यं हि सर्वश्रेष्ठं जगीयते । सर्वोऽप्ययं संसृतिविलासस्तपःपरिणाम एवेति यजुर्वेदीय-तैत्तरी-यापनिषद्—

"सोऽकामयत वहु स्यां प्रजायेयेति ।
स तपोऽतप्यत स तपस्तप्त्वा ।
इद ँ सर्वमसृजत यदिदं किञ्च ।
तत् सृष्ट्वा तदेवानुप्राविशत् ।"

एवमेवाथर्वण-वेदीय-मुण्डकोपनिषदि प्रतिपादितम् ।

तपसा चीयते ब्रह्म ततोऽन्नमभिजायते ।
अन्नात् प्राणो मनः सत्यं लोकाः कर्मसु चाऽमृतम् ।

स्मृतावपि—

यद्दुस्तरं यद् दुरापं यद् दुर्गं यच्च दुष्करम् ।
तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमम् ।

इत्यादि तपोमहिमा केन तिरोहितः ।

एवञ्च महर्षे विश्वामित्रस्यामानवं तपश्चर्य्यं महात्मनो नन्दिकेश्वरस्यालौकिकं योगबलं, श्रीमद्भगवदवतारस्य श्रीपरशुरामस्य गर्भवासावतरणवेलायामेव दैव्या क्रियया वैदिकयज्ञीयचरौ वैशेष्याधानम्। सर्वमप्येतद् असाधारणनियमस्यैव जाज्वल्यमानो जागरूको दृष्टान्तः ॥ १०७ ॥

इदानीमन्यादृशस्य संस्कारस्य सम्बन्धेऽपीदमभिदधाति—

भावे स्वातन्त्र्यम् ॥ १०८ ।

गुण-संस्कारहाने यत्काठिन्यम् न तद्भावसंस्कारहाने आधिभौतभावस्याधिदैवभावे तस्याप्याध्यात्मभावेऽथवा परस्परं सर्वेषामप्येषामेकस्यान्यस्मिन् भावे संस्कारपरिवर्तनं सरलम्। सर्वमप्येतद्भावात्मकसंस्कार-परिवर्तनम् अभ्यासतः शनैः शनैः साधनेन सम्पद्यते। ज्ञानबलसाहाय्यमाश्रित्य तु द्रुतमेव सम्पद्यते। अशनायोदन्ये हि जीवानां प्रधानं जीवनावलम्बनम्। तच्च स्वीयं भोजनं 'ममेदं भोज्यमिति' बुद्धिं विहाय "यद्ददासि यदश्नासि यज्जुहोषि करोषि यत् यत्तपस्यसि, कौन्तेय तत्कुरुष्व मदर्पणमिति" भगवदनुशासनानुरूपं श्रीमद्भगवते समर्प्य तदीयप्रसादबुद्ध्या ग्रहीतुं भगवद्भक्ताः चिराभ्यासतः संसाधयितुमर्हन्ति। एवं हि, मदीया स्त्री मद्भोग्येति, मतिमन्तर्धाय—

'स्त्रियः समस्ताः सकला जगत्सु'।

इति शास्त्रानुशासनानुकूलं कालान्तरेणोपासकः सर्वास्वपि नारीषु ब्रह्मप्रकृतित्वधारणामेव स्थिरीकर्तुं क्षमन्ते। तद्वदेव तत्त्वज्ञानी पुमान् स्वज्ञानबलसाहाय्यमाश्रित्य स्वशरीरेऽपि दृश्यबुद्धिमधिगच्छति। फलत आधिभौतिके आध्यात्मभावपरिवर्तनं प्रतिक्रियश्च दैवसम्बन्धस्थापनया आधिभौतिकभावे आधिदैविकभावपरिवर्तनं विदधाति। एवञ्च सर्वत्रैव सर्वस्यापि विनियमनं द्रुतमेव कर्तुमर्हति। तेन च प्रकृतिचक्रगतिं निर्बाधमतिक्रामन् मुक्तिपथं परिष्करोतीति ॥१०८॥

पुरुषधर्मेण सह तेषां सम्बन्धं सूचयति—

शक्तित्रयमपेक्ष्यं पुरुषे उद्भिद्बीजवत् ॥ १६० ॥

गुण-परिणामे भावपरिणामे चाशुतरं साफल्यावाप्तये पुरुषे त्रिविधभावशक्तिप्राप्तिरावश्यकी।

यथा हि—उद्भिज्जश्रेणिगेषु जीवेषु बीजात् फलोपलब्धये पृथिवीजलकालानां त्रयाणामेव शक्तिराकाङ्क्षिता, तथैव पुरुषाणामपि निःश्रेयसोपलब्धये

त्रयाणामेवावश्यकत्वम् । स्त्रीजातेरभ्युदयनिःश्रेयसोपलब्धये या सुगमा सरला पद्धतिरपेक्ष्यते पुरुषाणां कृते तु सा दुर्गमा । इत्यत एव त्रिविधशुद्धिविचारः पुरुषधर्म्म एव गृह्यते ॥ १०९ ॥

पुरुषधर्म्मरहस्यमुक्त्वेदानीं वर्णाश्रमधर्म्मरहस्यमाह—

एकेनान्यस्य योगसमापत्तिः ॥ ११० ॥

केवलेन त्रिविधशुद्धिविवेकेन तु पुरुषवर्गस्याध्यात्मिकोन्नतिः सम्भाव्यते । परन्तु तस्यैवाभ्युदयनिःश्रेयसयो र्ध्रुवोपलब्ध्यै मानववर्गस्य चाधःपातनिरोधाय निश्चितमार्गमभिधत्ते ।

यदा जीवो भाव-संस्कारेण सह गुणसंस्कारस्य यथायोग्यं संयोगं कृत्वा उन्नतो भवति तदैवेदृशस्यालौकिकस्य सार्वजनीनस्य फलस्याधिगमो भवति । एतद्विज्ञानमूलकमेव वर्णाश्रमधर्म्मसंस्थापनमूहनीयम् ॥ ११० ॥

तदेव विज्ञानं विस्पष्टयितुमाह—

वर्णधर्मेणैकस्य ॥ १११ ॥

संस्कारसमापत्तिविचारणया वर्णधर्म्मो हि सर्वाभ्यर्हितः । यतो हि वर्णधर्मेण गुणसम्बन्धिनः संस्कारस्य सम्पादनं भवति । अदसीयं विज्ञानन्तु पूर्वमेव निर्धारितम्—यद् रजोवीर्य्याभ्यां गुणसंस्कारः समाकृष्यते । भोगेन च तद्धानं भवति, हाने सति मुक्तिमार्गः सरलः सम्पद्यते ।

वर्णधर्मस्याचारो हि एवंविधैरेव कौशलपूर्णक्रियाङ्गैः निर्णीतो विद्यते येन तदनुष्ठानतः स्वत एव गुणसंस्कारस्य भावसंस्कारसम्पर्कतोऽस्वाभाविकस्यांशस्य क्षयेण स्वाभाविकांशस्य चाभिव्यक्त्या च जीवो मुक्तिभूमिमारोहति ॥ १११ ॥

सम्प्रति द्वितीयस्य तदाह—

आश्रमधर्मेणान्यस्य ॥ ११२ ॥

वर्णधर्मस्य शक्तिरहस्यं पूर्वसूत्रे सम्यगभिधायेदानीमाश्रमधर्मस्य माहात्म्यं प्रख्यापयितुमाह । आश्रमधर्माचारसङ्घतो भावसंस्कारेण गुणसंस्कारसंम्पर्कः । वर्णधर्मः प्रवृत्तिरोधक आश्रमधर्मस्तु निवृत्तिपोषक इति पूर्वमप्यभिहितम् । वर्णधर्मतो गुणसंस्कारस्याश्रमधर्मतो भावसंस्कारस्य चाकृष्ट्या स्वत एव क्रमशो हानं भवति । ततश्च जीवः सर्वेषामेव संस्काराणां विलयनात्मकं निर्विकल्पस्वरूपमधिगन्तुं स्वत एवाग्रेसरो भवति । इत्यत एवाख्यातं जाबालश्रुतौ—

ब्रह्मचर्य्यं परिसमाप्य गृही भवेत् ॥
गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत् ॥

अतश्च यो हि मानवस्तदीयसमाजो वा वर्णाश्रमधर्मं यथार्थतः परिपालयितुं बद्धपरिकरो भवति। तस्योभयोः संस्कारयोः सहैव सम्पर्कतया क्रमश आध्यात्मिकभूमौ क्रमाभ्युदयो निश्चित इति वर्णाश्रमधर्मस्यानिर्वचनीयमनुल्लङ्घनीयञ्च महत्त्वम्॥ ११२॥

यद्येवं न स्यात्तर्हि--किं भवेदित्याह--

अन्यथाऽधःपातो निर्बन्धप्रवाहवत्॥११३॥

यदि कश्चन जिज्ञासुरित्थमाशङ्केत यद् यो हि मानवो मानवसमाजो वा वर्णाश्रमधर्मं नाङ्गीकरोति; का स्यात्तदीयाऽवस्थेति—शङ्कामिमां समाधातुमेवेदं सूत्रमसूत्रयत्सूत्रकारः।

तथा हि—यथा सेतुं बध्वा जलप्रवाह उद्गमस्थानात् गन्तव्यस्थानं यावत् प्राप्यते। परन्तु मध्ये सेतु-भग्नतायां जलप्रवाहो विचलितो भूत्वा निम्नपथप्रसृतो नष्ट-भ्रष्टो जायते, न स प्रवाहः स्वगन्तव्यस्थानं प्राप्नोति, तथैव मानवसमाजस्य क्रमोन्नतिप्रवाहकृते सेतुस्वरूपो वर्णाश्रमधर्म्मो यस्मिन् मानवसमुदाये नाङ्गीक्रियते, स हि मानवसङ्घः कालान्तरेण धरातलादुच्छिन्नो नष्टभ्रष्टो भूत्वा स्वनामशेषमेव करोति।

स्वाभाविकस्य संस्कारस्य मुक्तिजनकत्वम् अस्वाभाविकस्य च बन्धननिदानतेति पूर्वमेव संसाधितम्। प्रथमतोऽस्वाभाविकस्य संस्कारस्य हानानन्तरं स्वाभाविकस्य क्रमविकाशो भवति, ततश्च क्रमशस्तस्यापि स्वाभाविकस्य हानेन गुणातीतं भावातीतमद्वैतं कैवल्यं पदं प्राप्यते। इयं हि मानवी क्रिया वर्णाश्रमधर्म्मस्वभावत एव सुतरां सम्पाद्यते। इत्यत एव वर्णाश्रमधर्मानुगा मानवजातिर्निर्बाधमेवाभ्युदयनिःश्रेयसाभिमुखी संसारयात्रामतिवाहयति।

ननु वर्णाश्रमधर्माभिमानिनी आर्य्यजातिः कथमधःपातमध्याश्रयतीत्युत्तरयति—यथा हि सत्यत्रेताद्वापरकलियुगात्मकचतुर्युगानामभ्युदयः क्रमशः समेधते तथैव कालक्रमेणार्य्यजातिरपि रजोगुणबहुला जाग्रती सत्वाभिमुखी सम्पद्यते तदा हिं तस्यां ज्ञानोद्यमशक्तिशान्त्यादिसमुन्नतानि लक्षणानि प्रकाशीभवन्ति। यदा च सा कालक्रमेण तमोगुणाच्छन्नाऽर्य्यजाति र्निद्राभिमुखी भूत्वा प्रमादालस्याज्ञाननिरुद्यमाशक्तिद्वेषाशान्तीर्ष्यानैक्यानुदारतादितमोगुणवृत्तिमधितिष्ठति स एवाधःपातस्तदीयो निगद्यते। यथा हि मानवो दिने जागर्ति रात्रौ च निद्राति तथैवार्य्यजातिरपि कालप्रभावतश्चक्रनेमिक्रमेण कदाचिज्जागर्ति कदाचन स्वपिति। परन्तु तस्या वर्णाश्रमपक्षपातिन्या आर्य्यजाते र्न कदापि नाशो रूपान्तरं वा भवति।

यस्यां मानवजातौ त्रिलोकपावनो वर्णाश्रमधर्म्मो न विद्यते रजोवीर्य्यशुद्धेर्भावशुद्धेर्वा क्रमो नास्ति, सा हि कालस्य करालिकाया दुर्दमनीयाया वा गतेः प्रभावेण कालान्तरतोऽसभ्याऽनार्य्या भूत्वा नष्टभ्रष्टा विच्छिन्ना धरातल एव विलीयते ।

स्मृतिरपि प्रमाणयति—

यतो वर्णाश्रमैर्धर्मैर्विहीना सर्वथा ननु ।
असौ सृष्टिर्मानवानां कालिकायाः प्रभावतः ॥
प्रकृतेर्मे लयं याति कुत्रचित्समये स्वतः ।
धत्ते रूपान्तरं वासौ नात्र कार्य्या विचारणा ॥ ११३ ॥

प्रसङ्गत आर्य्यजाते र्लक्षणमभिधत्ते—

आर्य्यजातिरुभयोपेता ॥ ११४ ॥

उभाभ्यां वर्णधर्माश्रमधर्म्माभ्यामुपेता युक्ता आर्य्यजातिः ज्ञेयेतिसूत्रार्थः । सर्वेषु मानवसङ्घेषु पूर्णावयवोपेतधर्माधिकारवत्त्या मानवजातेः श्रेणिद्वयम् । एकाऽऽर्य्यजातिः द्वितीयानार्य्यजातिरिति । तत्र यस्यां जातौ वर्णधर्म आश्रमधर्मश्चेति द्वयोरपि धर्म्मयोरभ्युपगमः सा हि आर्य्यजातिः । मनुष्यजातौ जीवनमरणयोराध्यात्मिकशक्तेर्विद्यमानताभावयोर्यथा सन्निवेशस्तथैव वर्णाश्रम धर्मसम्बन्धोऽपि गुम्फितो विद्यते । एवञ्च तदनुकूलतया मानवजातेर्नामकरणौचित्यचर्चायां वर्णाश्रमधर्माचारवत्त्या जातेरार्य्यजातिरिति पूर्वाचार्यैः कृता संज्ञा ।

तथा च स्मृतौ—

"कर्त्तव्यमाचरन् काममकर्त्तव्यमनाचरन् ।
तिष्ठति प्रकृताचारे स तु आर्य्य इति स्मृतः" ॥

अपरञ्च—

यैवं सदाचारवर्णाश्रमधर्मानुगामिनी ।
सर्वस्वं मनुते वे ' सार्यजातिर्रिति स्मृतिः ॥

निरुक्तकारो यास्कमुनिरपि "आर्य्य ईश्वरपुत्र" इति सञ्जगौ ॥ ११४ ॥

इदानीं विरुद्धधर्म्मावलम्बिनीरन्यजातीर्लक्षयति—

तद्विपरीताऽनार्य्या ॥ ११५ ॥

यत्र जातौ वर्णाश्रमधर्मो नाश्रियते सा हि अनार्य्यजातिरुच्यते । धरातलस्थासु अन्यमानवजातिषु पूर्वोक्त-भयसम्भावनयैवाचार्य्यास्ता जातीरनार्या

आहुः। तादृशी अनार्य्यकोटिस्थिता मानवजातिर्बलैश्वर्य्याद्याधिभौतिकोन्नति-विचारणया कियतः कालस्य कृते महाप्रभावशालिनी स्यादपि, परन्तु कालान्तरेण तस्या रूपान्तरस्य विलयनस्य चावश्यम्भावमालोक्यैवानार्य्याख्यया तामाह्वयन्ति पुराणाचार्य्याः।

स्मृतावपि—

एतद्भिन्नानार्य्यजातिः सदाचारविवर्जिता।
अन्यदप्येवमेवोह्यं नोच्यते विस्तृतेर्भयात्॥ ११५॥

जातिभेदप्रसङ्गेन मानवभेदमाह—

मानवा देवासुरराक्षसास्त्रैगुण्यात्॥ ११६॥

मनुष्यजातेः श्रेणिविभागं विधायाधुना महर्षिः सूत्रकारो लक्ष्यनिर्णयधिया मानवश्रेणीनां विचारपद्धतिमाह—

आर्य्यास्वनार्य्यासु वा जातिषु स्वाधिकारानुरूपम् उत्तममध्यमाधमभेदेन त्रैविध्यमवश्यमूहनीयम्। आर्य्यजातौ जन्मग्रहणाभिमानेनाहङ्काराश्रयणेनोन्नति-पथो न निरुद्धः स्यादिति द्वयोरपि श्रेण्योः पुरुषो वा नारी वा स्यादुभावपि गुणत्रयभेदतस्त्रिविधां श्रेणिमाश्रयत एव। सात्विकौ देवश्रेणिगौ राजसिका-वसुरश्रेणिगौ, तामसिकौ राक्षसश्रेणिस्थाविति। श्रीमद्भागवते भगवद्वाक्यम्—

एधमाने गुणे सत्त्वे देवानां बलमेधते।
असुराणां च रजसि तमस्युद्धव! रक्षसाम्॥

अन्यत्रापि—

त्रिधा ज्ञेया नरा नार्य्यो भेदात्त्रैगुण्यगोचरात्।
भवन्ति पितरस्तेषु सात्विका गुणमोहिताः॥
राजसा रूपमुग्धाश्च तामसाः काममोहिताः।
उर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः॥ ११६॥

तेषां प्रवृत्तीराह—

परार्थ-स्वार्थ-परापकारपरतावृत्तिः॥ ११७॥

सत्वगुणावलम्बी देवकोटिगो मानवः परार्थी, रजोगुणाश्रयोऽसुरश्रे-णिस्थः स्वार्थी, तमोगुणाश्रितो राक्षसप्रकृतिकः परापकारपरायण इति त्रिधा मानवानां प्रवृत्तयो लक्ष्यन्ते। तत्र यः पुमान् या च नारी पराभ्युदयमङ्गलोन्न-त्यादिभिः स्वात्मानं कृतार्थं सम्मन्याते परकीयैहलौकिकपारलौकिकाभ्युदय-

सम्पादनैकपरा एव कालं नयतः ताविह देवदेवीशब्दवाच्यौ। यौ च केवलं स्वार्थ-परायणौ स्वात्मन एव स्वार्थं सुखमभ्युदयं वा बहुमन्यते तावेवासुरसंज्ञाभाजौ। यौ च परापकारपरायणौ परेषामपकृत्याऽनन्दमश्नुवाते तौ राक्षससंज्ञकौ गर्हितौ मानवसमाजे हेयात्मानौ निगदितौ।

प्राक्तनाः पूज्या महर्षयः कीदृशः पक्षपातशून्या विश्वजनहिताधायकाः समदर्शिन आसन्निति सूत्रस्वारस्यम्। अनयाऽऽर्यानार्य्यसंज्ञया पूर्वोक्ताकास्यवैज्ञानिक-युक्तिसिद्धया कदाचन बुद्धिभेदमाश्रित्योभयोरप्यनयोर्जात्यो रन्यतस्या वाऽपकारप्रवृत्तिः समेधेतेति द्वयोरपि याथार्थ्यलक्ष्यस्थिरीकरणाय त्रिविधमानवश्रेणिरहस्य प्राचीकशत्सूत्रकारः।

स्मृतयोऽप्यमुमर्थमनुधावन्ति—

> एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये।
> सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये।
> तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये।
> ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे॥
> त्रिधाः प्रकृतयो नृणामुत्तमाधममध्यतः।
> देवोऽसुरो राक्षसोऽथ गुणभेदेन गीयते॥
> आर्य्यानार्य्यासूभयासु सर्वत्रैवोपलभ्यते।
> वर्तितव्यं प्रयत्नेन तत्प्रकृत्यनुशीलनात्॥ ११७॥

आर्य्यजातेर्वैशिष्ट्यस्य मौलिकं सिद्धान्तं ब्रूते—

गरीयस्त्वमियदार्य्यजातेः शुद्धित्रैविध्यात्॥ ११८॥

आर्य्यजातेः प्रतिष्ठानिदानं हि शुद्धित्रैविध्यम्। तत्र ज्ञानेनाध्यात्मिकीं शुद्धिं कर्म्मणाधिदैवीं शुद्धिं रजोवीर्य्यपावित्र्येण चाधिभौतिकीं शुद्धिं सम्पादयन्ती आर्य्यजातिस्त्रिविधामपि शुद्धिं समानतयैव प्रतिष्ठापयति। आश्रमधर्मगता शिक्षापद्धतिराध्यात्मिक्याः शुद्धे जागरूको दृष्टान्तः। वर्णधर्म्मीया आचारा आश्रम-धर्मसम्बन्धिनश्च क्रियासिद्धान्तसमुच्चया आधिदैवीं शुद्धिं सम्पादयन्ति इति सर्वसम्मतो मार्गः। अपरञ्च जन्मनैव वर्णधर्मस्य दृढसम्बन्धभागित्वाद् आर्य्य-नारीषु च आदर्शसतीधर्मस्य विद्यमानत्वाद् आधिभौतिकशुद्धिस्तु आर्य्यजातेरेव पैत्रिकी सम्पत्तिरिति नतमस्तकैः सर्वैरपि स्वीकरणीयमेव। कदाचिदार्यधर्मेतरेषु अन्यमानवकुलेषु वा आध्यात्मिक्या आधिदैव्या वा शुद्धेर्लक्षणं क्रियदुपलभ्येत

नाम, किन्तु रजोवीर्य्यशुद्धिः सतीधर्मनिदानीभूताधिभौतिकी शुद्धिस्तु वर्णाश्रम-मर्य्यादापालनपरायामार्य्यजातावेवोपलभ्यत इति सर्वत्राविदितो वृत्तान्तः ।

इत्यतश्चैकस्मिन्नेवार्य्यजातिरूपाधारे त्रिविधाया अपि शुद्धेरुपलभ्यमानतया आर्य्यजातेर्महत्त्वं सर्वाभ्यर्हितमिति सत्यपरायणैरुदारैर्बुद्धिमद्भिरवश्यं स्वीकरणीयमिति ॥ ११८ ॥

आर्य्यजातेरपरं विशेषमाह—

श्लाघनीया देवानाम् ॥ ११९ ॥

चतुर्दशसु भुवनेषु मृत्युलोकोऽयं चतुर्दशानामपि विभागानां चतुर्थो विभागः । अन्ये च सर्वेऽपि लोका भोगभूमय एव । ऊर्ध्वेषु सप्तसु दैव-भोगस्य निम्नस्थेषु च सप्तसु आसुरभोगस्य नरकप्रेतलोकयोस्तु दुःख-भोगस्याधिकारपूर्णत्वात् तेषु लोकेषु कर्माधिकाराभावात् प्रधानतया तत्सम्पादने-नाभ्युदयनिःश्रेयससम्प्राप्त्यवसरानुपलब्धेः ध्रौव्यात् ते लोका न कर्मभूमय इति निश्चितम् । तत्रैवं सति मृत्युलोकस्य कर्मभूमित्वात्तत्रोत्पन्नायामार्य्यजातौ स्वभावत एव त्रिविधशुद्धेः साहाय्योपलब्धेरियमार्य्यजातिरयमार्य्यावर्तदेशश्च देवानामपि श्लाघनीयौ ।

स्मृतावप्युक्तम्—

"गायन्ति देवाः किल गीतकानि धन्यास्तु ते भारतभूमिभागे ।
स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात् ॥
कर्म्माण्यसङ्कल्पित-तत्फलानि संन्यस्य विष्णौ परमात्मभूते ।
अवाप्य तां कर्ममहीमनन्ते तमालयं ते त्वमलाः प्रयान्ति ॥
जानीम नैतत् क वयं विलीने स्वर्गप्रदे कर्मणि देहबन्धम् ।
प्राप्स्याम धन्याः खलु ते मनुष्याः, ये भारते नेन्द्रियविप्रहीनाः ॥"

अन्यतश्च देवर्षिपितृरूपत्रिविधानामपि देवानां प्रसन्नतया सह वर्णाश्रम-धर्म्मावलम्बिन्या आर्य्यजातेः कीदृशो घनिष्ठः सम्बन्ध इत्यस्य जाज्वल्यमानं प्रमाणं दैवीमीमांसादर्शनम्, श्रुतयः स्मृतयः पुराणानि चोहनीयानि ॥ ११९ ॥

अन्यच्च—

देवसम्बर्द्धिलमार्य्याणाम् ॥ १२० ॥

देवलोकसञ्चालका देवास्त्रिधा विभक्ताः सन्ति । तेषां त्रयाणामपि सम्वर्द्ध-नायोपाया अपि पृथगेव स्वातन्त्र्येण परिच्छिन्ना दैवीमीमांसादर्शने परिगणिताः । तथा हि—"ब्रह्मयज्ञादिभिः प्रोर्जिता ऋषयः"

'देवयज्ञादिभिर्देवाः ।'

'पितृयज्ञादिभिःपितरः ।'

दैवराज्यस्यावगतिस्तत्र विश्वासस्थैर्य्यम्, दैवराज्यसञ्चालनसम्वर्द्धनत्र्यनन्तरं विविधानां यज्ञमहायज्ञानामनुष्ठानम् इत्यादयोऽनेके देवप्रसादकरा गुणराशय आर्य्यजातौ विद्यन्त इति आर्य्यजातिर्देवलोकसम्वर्द्धनस्य प्रधानं निदानमिति सिद्धम् ॥ १२० ॥

अन्यमपि विशेषमभिधत्ते—

धर्म्मपोषकत्वञ्च ॥ १२१ ॥

वर्णाश्रमधर्म्मप्राणा आर्य्यजातिरेव वस्तुतो धर्मपोषिका । यद्यपि धरातलस्थिता अन्या अपि जातयो विभिन्नधर्म्मलक्षणशालिन्यो दृश्यन्ते, तथापि तासां धर्मस्वरूपस्य संकीर्णभावापन्नत्वान्न तासु साधारणधर्मस्य सर्वाण्यपि लक्षणान्युपलभ्यन्ते । नापि तासु विशेषधर्मस्यापि महत्त्वं प्रकाशितमासाद्यते । तासु चाध्यात्मिकज्ञानसंकीर्णतया आपद्धर्म्मसाधारणधर्मयोरपि विज्ञानावगतेरभावः ।

अन्यच्च विचारणीयोऽयं विषयो यद् आधारस्य पूर्णतायामेवाधेयः सर्वथा स्वस्थितिमासादयितुमर्हतीति । इत्थञ्च यस्या जातेः सामाजिकी शृङ्खला वर्णाश्रमधर्म्मात्मकदृढस्तम्भे निबद्धा, यस्यां जातौ रजोवीर्य्यशुद्धिविवेकतो जातीयाधःपातपथोऽवरुद्धः, यस्याश्च जातेः सदाचारेषु आध्यात्मिकलक्ष्यपूर्ण–विचारणया अर्थकामोपेक्षया धर्ममोक्षयोरेवादरः सदोपलभ्यते, यस्याश्च जातेः धर्म्मविज्ञानं साधारणासाधारणापद्विशेषधर्म्मादिसर्वाङ्गपरिपूर्णं तस्याः जातेर्धर्मपोषकत्वे कः सन्देहः ॥ १२१ ॥

प्रसङ्गसङ्गत्या जातिनिर्णयविज्ञानमाह—

जातिनिर्णयो गुणसम्बन्धात् ॥ १२२ ॥

वर्णाश्रमप्रसङ्गेन जातित्वस्य ततश्च आर्य्यानार्य्यभेदेन तदीयविस्तारस्य च वर्णनं निशम्य यदि कश्चन जिज्ञासेत् चेद् यदन्यत्र जातिनिर्णयः कथं स्यादिति तत्रोत्तरमाह—गुणानां सत्त्वरजस्तमसां सम्बन्धात् जातेः सर्वविधायाः निर्णयो निश्चयो भवतीति शेषः ।

यथा गुणविचारणया ब्राह्मणत्वजाते र्विज्ञानं विवृतम्, यथा च आध्यात्माधिभौतलक्ष्यात्मकभेदलक्षणगुणभेदेनैव आर्य्यानार्य्योभयविभागो विहितः । इत्थमेव गुणविचारेण सर्वेष्वपि भूतसमुदायेषु जातिविभागनिर्णयो भवितुमर्हतीति निःसन्दिग्धः पन्थाः ॥ १२२ ॥

विज्ञानं परिपुष्णाति—

विधिदर्शनाच्च ॥ १२३ ॥

सर्वत्रैवेयं नियमपद्धतिः समुपलभ्यते यद् गुणसम्बन्धानुसारमेव स्थावरजङ्गमात्मकास्वपि सृष्टिषु जातिभेदः स्वीक्रियते। ज्योतिःशास्त्रादिषु समुपलभ्यमानो नक्षत्रग्रहादीनां ब्राह्मणत्वादिजातिनिर्णयः, पुराणादिभिः क्रियमाणो देवतादीनां जातिनिश्चयः, पदार्थ-विज्ञानशास्त्रेण विधीयमानो रत्नादीन जातिनिर्णयः, आयुर्वेदशास्त्रेण निश्चीयमान उद्भिज्जौषधादीनां जातिविवेकः, इमे सर्वेऽपि जातिविभेदा गुणभेदविवेचनयैव तत्तच्छास्त्रे विवेचिताः ॥ १२३ ॥

पुरुषधर्म्म-सम्बन्धतः स्वाभाविक-संस्कारक्रमाभिव्यक्त्या पुरुषवर्गाणां मङ्गलवर्णनानन्तरम् इदानीं तत्सम्बन्धेन नारीजातेर्माङ्गल्यं विवेचयति—

नारीष्वपि माङ्गल्यं स्वाभाविकसंस्कारात् ॥ १२४ ॥

मूलप्रकृत्युदाहरणतो नारीजातीनां तदीयपूर्वप्रकृत्यनुरूपं स्वाभाविकसंस्काररूपेण पातिव्रत्यधर्म्म एव सर्वमङ्गलहेतुः। यथार्य्यपुरुषेषु वर्णाश्रमधर्मः सर्वहिताधायकस्तथैवार्य्यनारीषु पातिव्रत्यधर्मो मङ्गलकृत्।

मनुनाऽप्युक्तम्—

"नास्ति स्त्रीणां पृथग्यज्ञो नो व्रतं नाऽप्युपोषितम्।
पतिं शुश्रूषते येन तेन स्वर्गे महीयते ॥"

सर्वाण्यपि दर्शनशास्त्राणि मूलपुरुषस्य मूलप्रकृतेश्च द्वैतप्रपञ्चे कारणतां समानतयैवाभ्युपगच्छन्ति। तत्र पुरुषस्यैव कस्मिंश्चिद् दर्शनान्तरे आत्मेति नाम, कुत्रचन पुरुष इति क्वचनेश्वर इति क्वापि ब्रह्मेति गीयते। सर्वत्रापि नामभेदे सत्यपि तस्य लक्षणमेकमेव यथा सर्वत्रोपलभ्यते, तथैव मूलप्रकृतिरपि केनचन प्रकृतिरित्यभिधीयते केनचित् ब्रह्मशक्तिरिति कैश्चन मायेति संज्ञायते। परन्तु सृष्टिविज्ञाने सर्वेऽप्यैकमत्येन मूलप्रकृते र्मूलपुरुषस्य चोभयोरेव हेतुतामङ्गीकुर्वन्ति। तेनैव शाश्वतिकसत्यसिद्धान्तेन सृष्टिलीलायां सर्वत्रैव पुरुषधारा नारीधारा चेत्युभयविधापि धारा दृष्टिगोचरी भवति। यथोपलभ्यते मनुसंहितायाम्—

"द्विधा कृत्वात्मनो देहमर्धेन पुरुषोऽभवत्।
अर्धेन नारी तस्यां स विराजमसृजत् प्रभुः ॥"

उद्भिज्जेषु आहो स्वेदजेषु उताण्डजेषु अथवा जरायुजेषु एवमेव दैवीषु सृष्टिषु मानवीषु वा सर्वत्रैव दाम्पत्यभावः परस्परं स्त्रीपुरुषभावो वा विद्यत एव। एवञ्च मूलसृष्टावेव पुम्भावस्त्रीभावयोरुभयोरपि सत्ताया विद्यमानत्वात्

पुरुषेषु मूलपुरुषस्य स्त्रीषु मूलप्रकृतेः साहजिको भावः स्वत एव निगूढस्तिष्ठतीति किमत्र वक्तव्यम् । इत्यस्माद् हेतो र्मानवसृष्टौ पुरुषाः स्त्रीणामपेक्षया निःसङ्गाः स्वाधीनाः प्रतिभाव्यरहिता भवन्ति, स्त्रियश्च इतो विरुद्धलक्षणोपेता भवन्ति । इत्यनेनास्य सूत्रस्य तात्पर्य्यमिदं सिध्यति यत् स्वाभाविकसंस्कारस्य क्रमाभिव्यक्तितः पुरुषधारा क्रमशोऽभ्युदयमश्नुवती निःश्रेयसभूमिमधिगच्छति । तथैव नारीधारापि स्वभावानुकूलं स्वाभाविक संस्कारमाश्रयन्ती तत्क्रमाभिव्यक्त्याऽभ्युदयनिःश्रेयसावधिगन्तुमर्हति । पुरुष-गणाश्च यथा वर्णाश्रम-सदाचारादिना त्रिविधामपि शुद्धिं नियमतः समासादयन्तः क्रमशो मलविक्षेपाऽवरणादि-विरहिता मुक्ति-भूमिमुपतिष्ठन्ते । स्त्रियश्च तथैव वेदोक्तपातिव्रत्यादीन् स्त्रीजनोचितान् सदाचारान् प्रतिपालयन्त्यो निःश्रेयस-पथपथिकाः सरलतयैव सम्पद्यन्ते ।

मूल प्रकृतिर्हि मूलपुरुषस्यैव कृते यथा परिणमते । पुरुषस्य निःसङ्गत्वे निष्क्रियत्वेऽपि तत्संयोगादेव सा सृष्टि-क्रियां प्रवर्तयति । तस्यैव कृते सा स्वस्वरूपं स्थापयतीति सांख्यदर्शनीयं विज्ञानं प्रतिपादयति । तद्वदेव तस्यैव मौलिकस्य स्वाभाविकस्य संस्कारस्यानुरूप्येण पुरुषार्थं विदधती नारीजातिः स्वाभ्युदयमासादयितुमर्हति ॥१२४॥

नारीषु स्वाभाविकस्य संस्कारस्य कथङ्क्रमाभिव्यक्तिरिति प्रतिपादयन्नाह—

तास्वेकतत्त्वतपोभ्यां तदुपगमः ॥ १२५ ॥

पूर्वोक्त प्रकारतोऽभिव्यज्यते यत् मानवजातिषु वर्णधर्माश्रमधर्म्मयो र्विविधानाचारान् प्रतिपालयन्ती पुरुषजातिर्यथा स्वाध्यात्मिकोन्नतिपथात् पतिता नैव भवति, तथैव नार्य्योऽपि तपोमूलकैकतत्त्वमूलकान् सदाचारानवलम्ब्य स्वाभाविकान् संस्कारान् क्रमशोऽभिव्यञ्जयन्त्यो निःश्रेयसपदमपि विन्दन्ति, नैवाधःपातस्तासां कापि भवति । उक्तञ्च मनुना—

"कामन्तुः क्षपयेद्देहं पुष्पमूलफलैः शुभैः ।
न तु नामापि गृह्णीयात् पत्यौ प्रेते परस्य तु ॥
आसीदामरणात् क्षान्ता नियता ब्रह्मचारिणी ।
यो धर्म एकपत्नीनां काङ्क्षन्ती तमनुत्तमम् ॥
अनेकानि सहस्राणि कुमारब्रह्मचारिणाम् ।
दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम् ॥
मृते भर्तरि साध्वी स्त्री ब्रह्मचर्य्यव्रते स्थिता ।
स्वर्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारिणः ॥"

इत्यत एव हेतो र्नारीणां कृते यावन्तः सदाचारा वेदशास्त्रादिषु प्रतिपादिताः ते सर्वेऽपि एकतत्त्वतपोमूलका एवोहनीयाः । एकस्मिन्नेव पुंसि रतिः, संसारे भर्त्तर्य्येव पुंस्त्वज्ञानम्, अन्यत्र स्वभर्तृव्यतिरिक्तेषु पुरुषेषु स्त्रीत्वबुद्धिः, स्वस्मिन्नेव पत्यौ लक्ष्यस्थैर्य्यम्, इमे सर्वेऽपि धार्मिकाः स्त्रीनियमा एकतत्त्वमूलका एव । अन्ये च ये गतिभ्रमणोत्थानोपवेशनाशन-पान-वस्त्रपरिधान–पतिसेवाप्रभृतयः सतीधर्माः सन्ति ते सर्वेऽपि तपोमूलका ज्ञेया इत्यसन्दिग्धम्॥१२५॥

प्रसङ्गतः सतीत्वविज्ञानं विस्पष्टयति—

सतीभावप्राधान्यमतो नारीधर्मे ॥ १२६ ॥

महर्षिः सूत्रकारोऽधुना त्रिलोकीपावनस्य सतीधर्म्मस्य स्वाभाविकसंस्कारानुकूलमस्तित्वमार्य्यनारीष्वेव कथमधितिष्ठतीति विस्पष्टयन् प्रतिपादयति–यत् सतीधर्म्मे एकतत्त्वस्य तपसश्च प्राधान्याद् आर्य्यनारीषु सतीधर्म एवादर्शरूपः । सतीलक्षणस्य चातुर्विध्यं यत् पूर्वमुक्तम्, तत्र लक्षणेषु वर्णितायामुत्तमसतीधारणायां संयमकरणेन स्वत एव ज्ञायते यत् सत्या योषितोऽन्तःकरणं कीदृगेकतत्त्वधारणया परिपूर्णं भवति। तेषु लक्षणेषु शास्त्रीयसतीधर्म्माचारादिषु च संयमादेतदपि स्फुटमेव परिलक्ष्यते यत् सतीधर्मस्तपोधर्मपराकाष्ठया परिपूर्ण इति।

उक्तञ्च विष्णुसंहितायां—

"मृते भर्तरि ब्रह्मचर्य्यं तदन्वारोहणं वा"

अथर्ववेदेऽपि—

"इयं नारी पतिलोकं वृणाना ......धर्म्मं पुराणमनुपालयन्ती"

एतदपि विज्ञानसिद्धं यद् यासु जातिषु नारीणां पत्यन्तरग्रहणसंस्कारो हृदि विरूढ़स्तत्र जातिषु सतीधर्मस्यादर्शः कदापि नैव सम्भवति। आर्य्यजातिषु सतीधर्म्मस्य जाज्वल्यमानं विज्ञानमिदं सर्वैः सदानुभवनीयम् यन्नैवास्ति तत्र पत्यन्तरग्रहणस्य मानसोऽपि संकल्पः तदनुष्ठानं तु दूरेऽपास्ताम् ॥ १२६ ॥

प्रसङ्गतः शङ्कासमाधाने विवृणोति—

भ्रष्टाऽपि योगिनी श्रेयोभाक् ॥ १२७ ॥

धर्माचार्य्याः सर्वहितैषिणो विश्वजनीनहिताधायका आसन्, तैः प्रवर्तितः सनातनधर्मश्च सर्वजीवसंरक्षक इति निर्विवादम् । एवं सति यदि कश्चन धर्म्मजिज्ञासुरिदमाशङ्केत यत् स्त्रीणां कृते सतीधर्मस्यैव सर्वमङ्गलकरत्वे पूर्वजन्मार्जितकर्म्मवेगेन आहोस्विदन्येनैव केनापि विशेषकारणेन यदि काचन नारी स्वसतीधर्मादर्शतो विच्युता स्यात्तर्हि तस्या मङ्गलं किं न भविष्यति ? अघटनघटना-

पटीयस्या मायाया दुर्दमनीयेन प्रभावेण काचन योग्यतमापि नारी स्वसतीधर्मतो विच्युता स्याच्चेत्तदा तस्या अभ्युदयनिःश्रेयसयोः पन्था निरुद्धः स्यात् किम् ? इति प्रश्नस्योत्तरं ब्रूते परमकारुणिको महर्षिः सूत्रकारः ।

सर्वहिताधायकेऽस्मिन् सनातने धर्म्मे कस्यापि कदाप्यभ्युदयनिःश्रेयसौ नैव निरुद्धौ सम्भवतः । तथा हि कापि योग्या नारी दैववशात् क्वापि स्वादर्श-सतीधर्म्मतो विच्युता स्यात्तदा सा योगिनी भूत्वा स्वाभ्युदयनिःश्रेयसावधिग-न्तुमर्हति । कर्मिणोऽपि चरमे ज्ञानाश्रयेणैव मुक्तिमधिगच्छन्ति उपासका अपि तथैवावसाने ज्ञानपथपथिका भवन्त्येव । यतो हि "ऋते ज्ञानान्न मुक्तिः" इति निराकुलः पन्थाः । यदि कापि नारी सतीधर्मोचितकर्मकाण्ड-मार्गतो भक्तिमार्गतो वा विरहिता दैवात् स्वकर्तव्यभ्रष्टा भवेत्तदा योगमार्गावलम्बेन सावश्यं स्वाभ्यु-दयनिःश्रेयसौ सम्पादयितुमर्हतीति ।

अत्रैतावानेव भेदो यत् सतीनां योषितां योगसाधनस्य प्रयोजनमेव नायाति । ता हि केवलं सतीधर्म्मप्रभावेणैव उच्चतरमपि सतीलोकमधितिष्ठन्ति । ततश्च ज्ञानाधिकारप्रधानां पुरुषयोनिमधिगत्य सरलतयैव पद्धत्या निःश्रेयसभू-मिमारोहन्ति । स्त्रीणामयं नैसर्गिको भावः । अन्यथा ताः सद्गुर्वाश्रयेण योगमार्गा-वलम्बतोऽसाधारणधर्म्मसाहाय्येन निःश्रेयसमार्गाधिकारिण्यो भवन्तीति ॥१२७॥

समाधानपरिपुष्ट्यै धर्म्मस्य सर्वव्यापकतां निदर्शयति—

सा तु नैव सती रम्भावत् ॥ १२८ ॥

सर्वजीवहितकारी सनातनो धर्म्मः कमपि विमुखं नैव करोति । अत्र विषये पौराणिकमेकमुपाख्यानमुदाहरति ।

कस्मिंश्चित्काले कोऽप्यसुरराजः स्वर्गाधिपतिमिन्द्रं विजित्य नाकाधिरा-ज्यमधितिष्ठन् रम्भानाम्नीमप्सरसं ग्रहीतुकामोऽभूत् । साऽप्सराः तु तस्यां रात्रौ तस्यासुरराजस्य भ्रातृपुत्रेण वृताऽसीत् । तदानीं सा स्वर्गीया वेश्या धर्म्मपथानुग-तमसुरराजं प्रार्थितवती यदहमद्य धर्मतस्ते भ्रातृपुत्रजायाऽस्मि नाद्याहं ते भोग्या श्वस्तव योग्या भाविनी तवाज्ञां शिरसा वक्ष्ये ।

स्वर्वेश्याया अयं विचारस्तस्यै सुतरां धर्म्माधायक आसीत् । यतो हि सा नारीधर्मादर्शरूपतः सतीधर्म्मतो विच्युतापि असुरराजस्यामन्त्रणं धर्म्ममर्य्या-दयैवास्वीचकार । अयञ्च सनातनधर्म्मस्य सार्वभौमभाव-सर्वहिताधायक-गौरवयोरुपयुक्तमुदाहरणम् । अन्यतश्च सतीधर्म्मश्चैको विशेषो धर्म्म इति कापि योग्या स्त्री तेन विशेषधर्म्मेण विरहिताऽपि साधारणधर्म्म-बलेनापि स्वोन्नतिं

विधातुं समर्था भवितुमर्हति । यतः साधारणो धर्म्मः सर्वजीवहितकारीति, सनातनधर्म्मस्येदं सार्वभौमं महत्त्वं न विस्मरणीयम् ।

अन्यथापीमं प्रकृतं विषयमवगन्तुमर्हन्ति जनाः । तथा हि स्त्रीणां सतीधर्म्मो विशेषधर्म इति सुसाध्यः सर्वमान्यो भयरहितश्चेति । योगिनीभावस्तु असाधारणो धर्म्म इत्यलौकिकः । इत्यत एवानेन सूत्रेण साधारणधर्म्मस्यैव महत्त्वमुद्घोष्यते ॥ १२८ ॥

प्रसङ्गतः सती-धर्म्म-पद्धतिमाह—

एकतत्त्वतपोभ्यां सतीलोकलाभः ॥ १२६ ॥

इतः प्राक् स्वाभाविकसंस्कारस्य क्रमाभिव्यक्त्या नारीधर्मे मुक्तिमार्गः सरलो भवतीति निर्णीतम् । अधुनात्र शङ्केयं समुदेति यत् सर्वत्रैव वेदेषु वेदाविरोधिशास्त्रेष्वपि "ऋते ज्ञानान्न मुक्तिरिति" सर्वसम्मतः सिद्धान्त एवाङ्गीकृतः समुपलभ्यते, तत्कथं विरुद्धयोरनयोः मार्गयोः सामञ्जस्यं स्यात्, कथञ्च नारी सतीधर्म-बलेनैव मुक्तिमपि लब्धुमर्हति ? इत्यादि शङ्काकलापं व्यपोहितुमेवास्य सूत्रस्यावतारः । तथा हि सत्या योषितः उर्ध्वगतेरयमस्ति क्रमो यत् सत्याः तपःप्रभावेण स्वत एव पञ्चमलोकःसतीलोकः समुपतिष्ठते । तत्र च एकतत्त्वाभ्यासेन तस्या अन्तःकरणं योगयुक्तं भूत्वा ज्ञानार्जनक्षमं सम्पद्यते । ईदृशी धार्मिका सती शरीरपातानन्तरमवश्यं सतीलोकमुपसर्पति । यथोक्तं दक्षपराशराभ्याम्—

व्यालग्राही यथा व्यालं बलादुद्धरते बिलात् ।
एवमुद्धृत्य भर्तारं तेनैव सह मोदते ॥ इत्यादि ॥ १२६ ॥

प्रसङ्गसङ्गतिसम्प्राप्तं शङ्कासमाधानमाह—

पतिमयत्वात् पुरुषत्वम् ॥ १३० ॥

ननु तृतीयलोकः स्वर्लोको वा स्यादन्योऽप्यस्मादूर्ध्वलोकः सतीलोको वा स्यात्सर्वेऽपीमे स्वर्लोकाः सुखभोगहेतुका एवेति सतीधर्मस्यापि स्वर्गसुखभोजकत्वलक्ष्यकमेव सिध्यति । एवञ्चेद्दृशोर्ध्वगतिप्रदत्वेन सतीधर्म्मोऽभ्युदयप्रद एव भवितुमर्हति, न निःश्रेयसपदप्रदातेति शङ्कायाः समाहित्यर्थं सूत्रमिदमाह सूत्रकारः । तथा हि यथाऽन्ये कीटा भ्रमरातिनिदिध्यासात्तन्मयतामुपेत्य भ्रमरत्वमेवासादयन्ति तथैव सर्वोन्नतश्रेणिगा सती नारी स्वपतौ तन्मयतामुपेत्य पुरुषत्वमेवासादयति । यथोक्तं स्मृतिशास्त्रे—

सति सक्तो नरो याति सद्भावं ह्येकनिष्ठया ।
कीटको भ्रमरं ध्यायन् भ्रमरत्वमवाप्स्यते ॥

गीतोपनिषद्यपि—

यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवेति कौन्तेय ! सदा तद्भावभावितः ॥

अन्यत्रापि—

कीटोऽयं भ्रमरीभवत्यतिनिदिध्यासाद्यथाहं तथा ।
स्यामेवं रघुनन्दनोऽथ त्रिजटे ! दाम्पत्यसौख्यं गतम् ॥
शोकं मा वह मैथिलेन्द्रतनये ! तेनापि योगः कृतः ।
सीता सोऽपि भविष्यतीति सरले ! तन्मे मतं जानकि !

इति प्रथमतः पतितन्मयतैव नार्य्याः पुरुषत्वप्राप्तेर्निश्चितं निदानम्, द्वितीयतः शरीरत्यागवेलायां या हि भावना समुदेति तदनुसारिण्येवाग्रे गतिर्भवति । सती योषित् सहमरण-धर्मानुरूपं चितायां पत्या सह भस्मीभवेदाहो पतिध्याननिमग्ना शरीरं जह्यादुभयथापि तस्याः पतितन्मयता विज्ञानसिद्धा । अन्यतश्च सतीलोकेऽपि भोगसमाप्त्यनन्तरं पुरुषत्वप्राप्तिर्हि दार्शनिकविज्ञानतःसिद्ध्यति । विशेषतः सतीलोकस्य ज्ञानमयलोकत्वात् तत्र ज्ञानप्रधानपुरुषदेहोपलब्धिर्न विज्ञानविरुद्धा, नापि तत्प्राप्त्यनन्तरं ज्ञानप्रधानपुरुषदेहोपलब्ध्या मुक्तिद्वारोद्घाटनेन तत्पदप्राप्तावपि सन्देहः । इत्यतः सतीधर्म्मपूर्णतया नारीणां निःश्रेयसोपलब्धिरिति सर्वसम्मतः सिद्धान्तः ॥ १३० ॥

पुरुषधर्मनारीधर्मयो रहस्यं यथाक्रमं प्रतिपाद्येदानीं सृष्टिरहस्यं ब्रूते—

परिणति–सत्तामयी प्रकृतिर्ब्रह्मवत् ॥ १३१ ॥

स्वाभाविको हि संस्कारो मुक्ति-कारणम्, अस्वाभाविकस्तु बन्धनकारणम् इति प्रागेव प्रतिपादितम् । स्वाभाविकसंस्काराश्रयेण पुरुषः स्त्री वा स्वाभाविकसंस्कारहानं कुर्वन्तौ कथं मुक्तिभूमिमुपतिष्ठेते इत्येतदप्युक्तमेव । स्वाभाविको हि संस्कारो जीवोत्पत्ति-कारणं स एव च मुक्तिनिदानम् इति कथं सृष्टिविज्ञानेनास्य सामञ्जस्यम् ? इतिशङ्कायाः समुदय एव न स्यादित्याह । ब्रह्मप्रकृतेः स्वभावो हि परिणाममयः सत्तामयश्च, सा च ब्रह्मणः प्रकृतिरिति ब्रह्मवदेव ज्ञेया । उक्तञ्च प्रागपि यथा "अहं ममेतिवत्" ब्रह्म-तत्प्रकृत्योरभेद इति ।

विष्णुपुराणेऽप्युक्तम्—

शक्तिशक्तिमतोर्भेदं वदन्ति परमार्थतः ।
अभेदं चानुपश्यन्ति योगिनस्तत्त्वचिन्तकाः ॥

ब्रह्मणः स्वरूपे सच्चिदानन्दानामद्वैतसत्ता यदा वर्त्तते, तदा हि ब्रह्म-

प्रकृतिस्तस्मिन्नव्यक्ततया लीना तिष्ठति । यदा ब्रह्मणः सकाशाद् ब्रह्मप्रकृति र्व्यक्ततामासादयति तदा सद्भावमवलम्ब्यैव परिणमते । तदेव प्रकृते र्व्यक्ताव्यक्तदशारहस्यम् । अतश्च प्रकृतिस्वरूपं यद्यपि सत्भावमयं त्रिगुणतरङ्गपरिणामि च तथापि ब्रह्मैव सेति निःसंदेहः ब्रह्मणोऽनाद्यनन्तत्वादिलक्षणमवश्यन्तत्र विद्यत एवेति सुनिश्चितम् ॥ १३१ ॥

सृष्टिपक्षे किमस्मात् सिद्धमिति ब्रवीति—

तस्मादनाद्यनन्ता जीवधारा ॥ १३२ ॥

यदा सद्भावमयी ब्रह्मप्रकृतिरनाद्यनन्ता त्रिगुणात्मकतया परिणामिनी चेति तत्स्वभावादेव सृष्टिलीलापि अनाद्यनन्ता । अतश्च जीवधारापि अनाद्यनन्ता । अत्र नाणुरस्ति सन्देहो यद् ब्रह्माण्डपिण्डमयी व्यष्टिसृष्टिः सादिः सान्तेति स्वाभाविकसंस्कार उद्भिज्जदशायामुत्पत्तिशीलो जीवमुक्तिविधानसमये च लयशीलः । परन्तु धारारूपतो जीवसृष्टिरनादिरनन्तेति गीयते ॥ १३२ ॥

शङ्कासमाधाने अभिधत्ते—

सादि-सान्तत्वात्संस्कारस्य तन्मुक्तिः ॥ १३३ ॥

अत्र यदि कश्चन जिज्ञासुराशङ्केत यद् ब्रह्माण्डपिण्डात्मक-सृष्टिधारा तथा जीवधारा च अनादिरनन्ता चेत्तदा सृष्टिविनाशकस्य मुक्तिपदस्योदयः कथं स्याद् इति शङ्कायामिदं सूत्रम् । तथा हि—

इदं हि निसर्ग-सिद्धम् यत् संस्कारस्य स्वाभाविकत्वेऽस्वाभाविकत्वे वा सादित्वसान्तत्वाभ्यां जीवस्य मुक्तिरपि स्वभावसिद्धा । यदि कयाचिदपि युक्त्या यस्य पुंसः संस्कारसमूहो विनाशितः स्यात्तर्हि निर्बीजत्वात् तस्य महापुरुषस्य कृते कर्मसृष्टिरेकपदे एव निरुद्धा स्यादेवञ्च तस्य मुक्तिर्हस्तगतेव विज्ञेया । बीजाद् वृक्षोत्पत्तिं विधाय संस्कारनाशो विहितः स्यादाहोस्विद् भर्जितबीजवदेव संस्कारः शक्तिविरहितः सम्पादितः स्यादुभयथापि संस्कारविलये जीवमुक्तिरवश्यम्भाविनी ॥ १३३ ॥

विज्ञानं विस्पष्टयितुं संस्कारहानक्रममाह—

कालतः संस्कारक्षयो बीजवत् ॥ १३४ ॥

कर्मणो बीजस्य संस्कारस्य सादि-सान्तत्वेन तस्य हानप्रकाराः कियन्तः सन्ति । तत्र प्रथमः प्रकारो यथा संसारे सर्वाण्येव तत्त्वानि कालेन विनाशमुपयान्ति तथैव संस्कारोऽपि कालकवलितो भवत्येव । जीवस्याविर्भावस्य स्वाभाविकत्वे तस्य विलयस्याऽपि स्वाभाविकत्वे कः सन्देहः ।

वीजोदाहरणेऽपि सरलोऽयं पन्था यत् कस्यचनोद्भिज्जस्य वीजं महता प्रयत्नेन गोपायितं स्यात् तस्मिन्नङ्कुरोत्पत्तये नावसरः समुपलभ्येत तथापि बहुतर-कालानन्तरं तस्याङ्कुरोत्पादनशक्तिरेव विनष्टा भवति, बहुत्र प्रत्यक्षत एवोपलभ्यते यदतिचिरन्तने वीजे कीटस्पर्शविरहितेऽप्यङ्कुरोत्पादनशक्तिर्नैवोपलभ्यते, नापि तस्य वापेनाङ्कुरोपलब्धि र्दृश्यते। एवञ्च स्वाभाविको हि संस्कारः स्वभावेनैव जीवानाविर्भाव्य क्रमशस्तानग्रेसरान् विदधदन्ते मुक्तांश्च कृत्वा स्वयमेव हानमृच्छति।

स्वाभाविकेन संस्कारेणास्य विज्ञानस्य स्वाभाविक एव सम्बन्ध इति प्रागेव विवृतम्। यतो हि स्वाभाविकः संस्कारः केवलं कालमहिम्नैव स्वयं स्वाभाविकमेव परिणाममासादयन् अवसाने हानमुपैति नान्या विधा तस्य विलयने।

इदानीमस्वाभाविकसंस्कारस्य सम्बन्धं विवृणुते। जीवस्य मुक्ति सहजकर्मतो जीवन्मुक्तावस्थयाऽस्मिन्नेव काये भवेदुत जैवकर्मवशतः शुक्लमार्गेण सप्तमे लोके सम्पद्येताथवा ऐशकर्मप्रभावेणोन्नते देवाधिकारप्राप्ते प्राप्येत, सर्वत्रापि दशायां तस्य जीवस्य सञ्चितं कर्म तं विहाय ब्रह्माण्डप्रकृत्याश्रयेण कालान्तरे हानमुपैति। एवञ्च जीवस्य बन्धनदशायामेकस्मिन्नेव जन्मनि कालप्रभावतोऽनेके संस्कारा विलयं गच्छन्ति। यथा च वाल्यकालिकः संस्कारो यौवने विनश्यति, तौ च जराजीर्णेन्द्रिये वार्द्धक्ये विलयं गच्छतः।

तत्त्वजिज्ञासूनां शङ्कापनोदायेदमाह—यत् कालमहिम्ना केवलं स्वाभाविक एव संस्कारो विलयमृच्छति। यतः कालसाहाय्येन जीवत्वस्योत्पादकः स्वाभाविकः संस्कारः कालमहिम्नैव जीवानुद्भिज्जावस्थातो मनुष्ययोनौ प्रापय्य पूर्णज्ञानाधिगमे च तान् मुक्तिपदं प्रापय्य स्वयमपि विलीनो भवति।

पुनश्च शङ्कते यज्जीवन्मुक्तावस्थामधिगते जीवे सहजकर्मणाऽपीयं दशा समुदेतुमर्हति? अत्रोदाहरणरूपत इदं ज्ञातव्यं यत् शुकदेवजनक-शङ्कराचार्य्यप्रभृतयो जीवन्मुक्ता महात्मानोऽनेकविधान् अस्वाभाविकान् संस्कारान् बहुषु जन्मसुभुञ्जाना यदा जीवन्मुक्तपदप्रापके चरमे जन्मनि समुपस्थिता आसन्, तदा तेषां प्रारब्धसंस्कारा भोगान् समुत्पाद्य विलयं गता आसन्। तेषामस्वाभाविकाः संस्कारास्तु न मुक्तिबाधका अभूवन्। अपरतश्च तेषां स्वाभाविकाः संस्काराः ये च तेषां मनुष्यत्वप्राप्तौ विहतगतय आसन् ते च पुनः सारल्यं जुषमाणाः विदेहमुक्तावस्थायां पूर्णतामुपेत्य विलीनाः सञ्जाताः।

इयमीदृशी दशा अन्ययोर्द्वयोर्मुक्तावस्थयोस्तयोः कथं सम्भवितुं शक्या । जीवन्मुक्तावस्थातिरिक्ते द्वे मुक्तावस्थे स्तः । एका ऐशकर्म्मप्रभावतो ब्रह्मादिदेवावस्था, द्वितीया च जीवकर्ममहिम्ना शुक्लमार्गेण सूर्य्यमण्डलभेदिनामवस्थेति ।

तत्र प्रथमाया ब्रह्माद्यवस्थाया मीमांसा उदाहरणतो ज्ञेया । यथा—शास्त्रतो विज्ञायते-यत् भक्तकुलचूडामणिर्हनूमान् परस्मिन् जन्मनि ब्रह्मदेवपदे प्रतिष्ठितो भवितेति । ब्रह्मपदं हि ऐशकर्म्मणा प्राप्यते । तच्च जीवभावराहित्येन हेतुना सगुणब्रह्मपदत्वेनैव व्यवह्रियते । अत्र महावीरस्य हनूमतः पूर्वजन्मार्जितः प्रबलः शुभः संस्कारः, वर्तमानकालिकः सिद्धावस्थायां जायमानोऽलौकिकः शुभः संस्कारश्च, द्वावपीमौ सहभवौ तस्य प्रबलतपस्यायाः संस्कारात् प्रारब्धरूपेण परिणतौ सन्तौ तस्मै इमां महापदवीं प्रयच्छतः । अवशिष्टाश्च संस्कारा ब्रह्माण्डप्रकृतिमाश्रयिष्यन्ति । स्वाभाविकास्तु संस्काराः पूर्णतामुपेताः सगुणब्रह्मपदवीमुत्पादयिष्यन्ति ।

एवञ्च जैवकर्मणा अत्युग्रतपोदानयज्ञादिसाहाय्यतः सप्तमे ऊर्ध्वलोके समुपेत्य सूर्य्यमण्डलं भिन्दन् शुक्लगतिसाहाय्येन शरभङ्गो महर्षिः भीष्मश्च पाण्डवपितामहस्तथाऽन्ये च यदा मुक्तिपदं प्राप्नुवन्, तदापीदमेवोदाहरणमवगमनीयम् । यच्छुक्लगत्युत्पादकः कश्चनोग्रोऽस्वाभाविकः शुभसंस्कार एवासीद् । स्वाभाविकश्च संस्कारस्तेभ्यो मुक्तिं वितीर्य्य हानमुपगत आसीत् । तात्पर्यतो जीवदशायामपि केचन संस्काराः कालमहिम्ना हानमुपयान्ति मुक्तावस्थायाञ्च स्वाभाविकस्य संस्कारस्य जाज्वल्यमानमुदाहरणम् अस्य विज्ञानस्य पर्य्यालोचनया समुदेति ॥ १३४ ॥

इदानीं द्वितीयं क्रममाह—

प्रतिक्रियातोऽङ्कुरवत् ॥ १३५ ॥

संस्कारहानस्य द्वितीयस्तु क्रमोऽङ्कुरोत्पत्तिवज्ज्ञेयः । यथा हि एकस्माद्बीजादङ्कुरोत्पत्तौ सत्यां तरोरुत्पत्तिर्जायते बीजस्य च विनाशस्तथैव संस्कारस्यापि स्वाभाविकोऽयं क्रमो यद् आत्मना क्रियोत्पत्तिं कृत्वा तदनु विनश्यतीति । ये हि संस्काराः समानश्रेणिजात्यायुर्भोगान्समुत्पादयन्तः प्रारब्धरूपतामासाद्य क्रियां समुत्पादयन्ति, ते हि तज्जीवनस्वरूपाञ्जात्यायुर्भोगात्मकान् परिणामान्समुत्पाद्य तज्जीवनावसाने स्वयमपि हानमुपगच्छन्त्येव । गमागमचक्रस्य स्थैर्य्य-सम्पादन-समयेऽस्मिन् मृत्युलोकेऽन्यासु वा भोगभूमिषु संस्का-

रस्यायमेव क्रमः प्राबल्येन प्रचलति । मोक्षदशायाः पूर्वोक्तप्रकारत्रयेऽपि जीवन्मुक्तगतौ, त्रिमूर्तिगतौ शुक्लमार्गदशायाञ्च प्रारब्धतः परिणमन्तः संस्काराः कथं विलयं व्रजन्तीति पूर्वसूत्रे साधु समाहितम् ॥ १३५ ॥

सम्प्रति तृतीयं क्रममभिधत्ते—

अन्यतोऽपि कीटसम्पर्कवत् ॥ १३६ ॥

संस्कारहानस्य तृतीयं क्रमं बीजकीटसम्पर्कोदाहरणेन आह । यथा च कीटानुविद्धं बीजं नाङ्कुरोत्पादनायालम् तथैव केनापि स्वाभाविकेन हेतुना संस्काराणां क्रियोत्पादिनी शक्तिरेव विनाशिता स्यात्तदापि संस्कारहानमेव भवतीति ज्ञेयम् ।

इतः प्राक् हानस्य क्रमद्वयं प्रतिपादितम् । तत्र कालाश्रयेण जायमानस्य हानक्रमस्य सम्बन्धः प्राधान्येन स्वाभाविकसंस्कारेण, तथा मुक्तात्मनो गत्या सहैवावबोधनीयः । द्वितीयश्चाङ्कुरोत्पत्त्या जायमानः स्वाभाविकः क्रमो यो निगदितः, तस्य प्रधानतो बद्धजीवेन सम्बन्धोऽस्वाभाविकसंस्कारसम्बन्धतोऽवसेयः । अस्मिन् सूत्रे वर्णितस्तृतीयः क्रमस्तु केवलं मुक्तात्मना अस्वाभाविकेन संस्कारेण च सम्बध्नाति । फलतो मुक्तात्मनि अस्वाभाविकः संस्कारः कथं विलीनो भवतीत्येतन्निदर्शकमेवेदं विज्ञानम् ।

मुक्तात्मसु ज्ञानाग्निना भर्जिताः क्वथिताः क्रियमाणाः सञ्चिता वा संस्काराः स्वाङ्कुरोत्पादिकां शक्तिमेवोन्मूलयन्ति । जीवन्मुक्तपदवीमधिगता अपि महात्मानः स्वाभाविकसंस्काराधीनाः निर्वासनाः सन्तो यत् कर्म कुर्वन्ति न तेन कर्मबीजात्मका नूतनाः संस्काराः प्रादुर्भवन्ति । कदाचन प्रादुर्भवन्तोऽपि भर्जितबीजवदनुपयुक्ता एव भवन्ति । यथा हि—कीटानुविद्धं भर्जितं वा बीजम् अङ्कुरोत्पादिकया शक्त्या विहीनं भवति तथैव मुक्तात्मनां ज्ञानाग्निना दग्धाः क्रियमाणाः संस्कारा हानमेवच्छन्ति ।

शङ्कासमाधानार्थमिदमभिधत्ते यथा भर्जितबीजादङ्कुरोत्पत्त्यभावेऽपि क्षुधार्त्तस्य क्षुन्निवृत्तिरन्नकार्य्यञ्च सिध्यत्येव, तथैव मुक्तात्मनां क्रियमाणाः संस्काराः कियतां क्षणानां कृते स्मृतिमुत्पादयितुमर्हन्ति । परन्तु चरमतो वासनाविरहितानां जीवन्मुक्तानां मनसि क्लीवत्वं जुषमाणे सति नैव क्रियमाणकर्माणि सृष्टिमुत्पादयितुमलम्भवितुमर्हन्ति, नात्राणुरपि सन्देहः । उक्तञ्च श्रीमद्भगवता श्रीगीतोपनिषदि—

"ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन" ।

अन्यत्राप्युपनिषदि—

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥

छान्दोग्येऽपि—

नोपजनं स्मरन्निदं शरीरं स यथा प्रयोग्य-
आचरणे युक्त एवमेवायमस्मिञ्छरीरे प्राणो युक्त इति ॥१३६॥

प्रसङ्गतः शङ्कासमाधाने ब्रवीति—

अनुष्ठानादेः कर्मनिरासः ॥१३७॥

ननु मुक्तात्मन्येवान्यैरुपायैः संस्कारहानं सम्पद्यत इतिनियमे बद्धजीवानां कृते प्रायश्चित्तानुष्ठानादीनां कथं सार्थक्यम्? इति प्रश्ने समुत्तरयति—यद् अनुष्ठानादिना संस्कारक्षयो न भवति केवलं तदाघात एव व्याहन्यते। यदि प्रायश्चित्तानुष्ठानादिना संस्कारकर्मणो हानिसंभावना स्यात्तदेयमाशङ्का समुचिता स्याद्। अत्र त्वीदृश्याः शङ्काया अवसर एव नास्ति। यथा हि युध्यतो गजयोर्मध्ये प्रबलस्यापि गजस्योन्मत्तगजेन पलायनं कारयन्ति यतः स न कामपि हानिं विदध्यादिति। तथैवानुष्ठानादिकर्म्मणाऽन्यानि कर्माणि अपसार्य्यन्ते। तान्यशुभ-कर्म्माणि वस्तुतस्तु न नश्यन्ति किन्तु दूरीभूय तिष्ठन्ति। ते च संस्काराः फलो-न्मुखशक्ति-विरहिता भवन्ति ॥ १३७ ॥

अन्यच्चाह—

असाधारणधर्मतोऽपि ॥ १३८ ॥

असाधारणधर्मस्यासाधारणशक्त्याऽपि एवंविधो निरासः सम्भाव्यते। असाधारणधर्मस्य लक्षणं तस्य विस्तृतं विवेचनं च प्रथमे पादे स्फुटं प्रतिपा-दितम्। पूर्वजन्मार्जितशुभकर्मवेगेन मनुष्ये यदाऽसाधारण-योगशक्तिः स्वत एवो-देति। तदा तेनासाधारणलौकिकशक्तिबलेनापि प्रायश्चित्तादिकर्मशक्तिसमुदाहर-णानुसारम् असाधारणधर्माधिकारिणी स्त्री वा पुरुषो वा स्वकर्मनिरासं कर्तुं शक्नुतः।

राजर्षिर्विश्वामित्रोऽसाधारणयोगशक्त्याः तपःशक्त्याश्च प्रभावेण एक-स्मिन्नेव जन्मनि क्षत्रियत्वाद् ब्राह्मणतामधिगन्तुं समर्थो बभूव। अन्ये च क्रम-द्रष्टारो महर्षयस्तं तथैवाङ्गीचक्रुः। तथैवाऽसाधारणधर्माधिकारी पुमान् कर्मनिरासं कर्तुं शक्नोति। असाधारणशक्ति संस्कारं परिवर्तयन् महर्षिर्विश्वा-मित्रो यदेकपदे एव क्षत्रियसंस्कारं व्यावर्तयन् क्षत्रियशरीरञ्च ब्राह्मणपर-माणुभिः सम्भृतं चकार, तदसाधारणधर्मतः संस्कारपरिवर्तनस्य प्रबलमु-

दाहरणम् । तथैव नारीवर्गेऽपि द्रौपद्या उदाहरणमूहनीयम् । साधारणस्त्रीवर्गे तु कदाप्येवं न सम्भवति, यदेकस्मिन्नेव जन्मनि पञ्चानां पुरुषाणां पतित्वेन स्वीकृतावपि सतीत्वधर्मस्यादर्शस्तत्र तिष्ठेदाहो वहुभिः पुरुषैः सह सम्बन्धकरणेन सतीत्वपोषकः संस्कारश्च स्थातुमर्हेत् । परन्तु सर्वमप्येतद् द्रौपद्यां, साधु निःसन्दिग्धमासीत् । यतो हि आदर्शपतिव्रता द्रौपदी स्वपूर्वार्जिततपोमहिम्ना स्वालौकिकेन योगशक्तिप्रभावेण च द्वाभ्यामेव मासाभ्यां स्वान्तःकरणसंस्कार-राशीन् परिवर्तयितुं समर्था भवति स्म । स्वालौकिक्यानया शक्त्या चैकस्य पत्युः सेवाकरणावसरेऽपरस्य पत्युः संस्कारमेकपद एव सर्वथा विलोपयति स्म । येना-साधारणधर्मप्रभावतः प्राप्तेन चैवंविधेन स्वचित्ताधिपत्यबलेन एकस्मिन्नपि काले वहुभिः पतिभिः सम्बन्धं भजमानापि सा द्रौपदी स्वपातिव्रत्यमक्षुण्णमुवाह तपोमूलकः स सतीधर्मश्च तस्यां सततं जागरूक एवासीदिति ।

अहल्या द्रौपदी तारा कुन्ती मन्दोदरी तथा ।
पञ्चकन्या स्मरेन्नित्यं महापातकनाशनम् ॥ इति—

महापुरुषैः प्रातःस्मरणीय-भारतीयार्य्यललनास्वादर्शसती रमणी चिर-पूज्या गण्यते । अनेनोदाहरणेन स्त्रीजातावसाधारणधर्मप्रभावतः कर्मनिरासः प्रमाणितो भवति । एवञ्च यदा पुमान् पूर्वार्जिततपःप्रभावतोऽसाधारणधर्म्माधि-कारी स्यात्तदा प्रायश्चित्तशक्त्यनुरूपतः कर्मनिरासं कर्तुं प्रभवतीति सुनिर्णीतः पन्थाः ॥ १३८ ॥

सम्प्रति संस्कारतोऽङ्कुरोत्पत्तेः प्रथमं प्रकारमाह—

त्रैविध्यमङ्कुरोद्गमस्य भावभेदात् ॥१३९॥

प्रथमतः संस्कारहानस्य ततश्च संस्कारनिरासस्य प्रकारमभिधाय सम्प्रति संस्कारबीजतोऽङ्कुरोत्पत्तेः प्रथमं प्रकारं प्रख्यापयति । संसारेऽस्मिन् सर्वेऽपि पदार्थाः । भावत्रयात्मका इतितदनुरूपमेव सांसारिकं सुखं दुःखञ्च त्रिविधमेव गीयते आध्यात्मिकाधिदैविकाधिभौतिकभेदात् । इत्थञ्च त्रिविधस्य सुखस्य त्रिविधस्य च दुःखस्य समुदितस्य षड्विधस्यापि भोगसम्पत्तये पृथग्विधा एवाङ्कुरोत्पत्तयः प्ररोहन्तीति न विस्मरणीयम् ।

अङ्कुरोत्पत्तिविज्ञान-ज्ञानाय कर्मबीजात्मकस्य संस्कारस्य वैज्ञानिकं रहस्यं परिशीलनीयम् । प्रति-पिण्डमन्तःकरणचित्तांशे एकमीदृग् यन्त्रं विद्यते यत्रा-ध्यात्मिकस्याहो आधिदैविकस्य उताधिभौतिकस्य वा पदार्थस्य, तथा मानसिक-

स्याथवा शारीरकस्य भावस्य, स्थूलस्य सूक्ष्मस्य वा द्रव्यजातस्य प्रतिकृतिः तत्पिण्डान्तःकरणचिन्तासमकालमेव तस्मिन् वीजरूपेण प्रतिविम्बिता भवति स च तत्राङ्कितः संस्कारश्चित्ताकाशे चिदाकाशे महाकाशे च सर्वत्रैव व्याप्नोति।

एवमेवास्य संसारस्य कोऽपि भावः; काऽपि वृत्तिः कोऽपि पदार्थः कस्यापि पिण्डस्यान्तःकरणे कथमपि समुपस्थितश्चेत् स न कदापि विनष्टुमर्हति तेनैव वीजेन च सुखदायिनी दुःखदायिनी वा त्रिभावात्मिकाऽङ्कुरोत्पत्तिरवश्यं भवति। इत्थञ्च कारणरूपतो भावमयस्य जगतोऽङ्कुरोत्पत्तिरपि षड्धा गणयितुं शक्यत इति ॥ १३९ ॥

अधुना द्वितीयं प्रकारमाख्याति—

चातुर्विध्यमपि वर्गभेदात् ॥ १४० ॥

अस्मिञ्जगति वासनाया लक्ष्यभूतः कामार्थधर्ममोक्षभेदनाश्चतुर्विधश्चतुर्वर्गः प्रसिद्धः। एतेषां चतुर्णामानुकूल्येन प्रातिकूल्येन च सुखदुःखयोरपि पृथक् श्रेण्यो विभिद्यन्ते। यथा कामस्य प्राप्त्यप्राप्ती अर्थस्याधिगमानधिगमौ धर्मस्यानुष्ठाने सौकर्य्यासौकर्य्ये मोक्षाधिगतौ सौविध्यासौविध्ये इत्येवं द्वितीयस्या अङ्कुरोत्पत्तेः प्रकाराः द्विगुणिताश्चत्वारोऽष्टौ भवन्ति ॥ १४० ॥

प्रसङ्गतोऽभिदधाति—

तस्माद्धि स्मृतौ वैचित्र्यं कर्मविपाकस्य ॥ १४१ ॥

तस्माद् अङ्कुरोत्पत्तेः भेदात् स्मृतौ धर्म्मशास्त्रे कर्मविपाकस्य कर्मपरिणामस्य वैचित्र्यं वैलक्षण्यं समुपलभ्यत इति सूत्रार्थः।

वेदे तत्सम्मतधर्म्मशास्त्रादिषु च पूर्वसंस्कारादङ्कुरोत्पत्तिरूपाणां कर्म-
विपाकानां विचित्राणि स्वरूपाण्युपलभ्यन्ते। उपर्युक्त-त्रिभावात्मके चतुर्भा-
विपाकानां विचित्राणि स्वरूपाण्युपलभ्यन्ते। शास्त्रादिषु बहुविधं वैलक्षण्यपलभ्यते।
वात्मके वाङ्कुरोत्पत्तिवर्गे तस्य शास्त्रादिषु बहुविधं वैलक्षण्यपलभ्यते।
त्रिभावानुसारेण त्रिविधं दुःखं वर्गविचारेण चतुर्विधं दुःखमिति मिलित्वा
सप्तविधं दुःखं भवति। एवञ्च भावानुसारेणापि त्रिविधं सुखं वर्गानुक्रमेण
चतुर्विधं सुखमिति सुखस्यापि सप्तश्रेण्यो भवन्ति। अतश्च भोगतोऽङ्कुरोत्पत्ते-
श्चतुर्दशभेदा भवन्ति। ते च पुनरनेकधा भिद्यन्ते। प्रथमतः त्रिगुणभेदैनैषामनेके
भेदास्ततश्च कर्म्मबलतारतम्यतोऽप्यनेके विचित्रा भेदा उद्भवन्ति। इत्थञ्च
संस्काराणां बहुधा विचित्रता स्वत एवोद्भवन्ति। सर्गे चेदृशं वैचित्र्यं सर्व-
त्रैव दृश्यते। यथा, भुवनानां चतुर्दशत्वेऽपि तत्र भोगायतनपिण्डानामगणितत्वं
वैलक्षण्यञ्च सर्वलोकप्रसिद्धम्। तथैवाङ्कुरोत्पत्तिश्रेणिसंख्यायाः चतुर्दशत्वेऽपि
तद्वैचित्र्यं बहुधा शास्त्रेषूपलभ्यते। तत्र दिङ्मात्रमत्राधो निर्दिश्यते—

यथोग्रकर्मणां विपाकाः ।

अन्त्यपक्षिस्थावरतां मनोवाक्कायकर्मजैः ।
दोषैः प्रयाति जीवोऽयं भवयोनिशतेषु च ॥
हिंस्रा भवन्ति क्रव्यादाः कृमयोऽभक्ष्यभक्षिणः ।
परस्परादिनः स्तेनाः प्रेतान्त्यस्त्रीनिषेविणः ॥
विपाकः कर्मणां प्रेत्य केषाञ्चिदिह जायते ।
इह वाऽमुत्र वै केषां भावास्तत्र प्रयोजनम् ॥

अपरञ्च—

सुवर्णचौरः कौनख्यं सुरापः श्यावदन्तताम् ।
ब्रह्महा क्षयरोगित्वं दौश्चर्म्यं गुरुतल्पगः ॥
संयोगं पतितै र्गत्वा परस्यैव च योषितम् ।
अपहृत्य च विप्रस्वं भवति ब्रह्मराक्षसः ॥
हीनजातौ प्रजायेत पररत्नापहारकः ।
मणिमुक्ताप्रवालानि हृत्वा लोभेन मानवः ॥
विविधानि च रत्नानि जायते हेमकर्तृषु ।
यः स्वभार्य्यां परित्यज्य निर्दोषां कुलसम्भवाम् ॥
परदाररतो वा स्यादन्यां वा कुरुते स्त्रियम् ।
सोऽन्यजन्मनि देवेशि ! स्त्री भूत्वा विधवा भवेत् ॥
या नारी तु पतिं त्यक्त्वा मनोवाक्कायकर्मभिः ।
रहः करोति वै जारं गत्वा वा पुरुषान्तरम् ॥
तेन कर्मविपाकेन सा नारी विधवा भवेत् ।
व्यभिचारात्तु भर्तुः स्त्री लोके प्राप्नोति निन्द्यताम् ॥
शृगालयोनिं प्राप्नोति पापरोगैश्च पीड्यते ।
कूटसाक्षी भवेन्मूकः काणः स्यात्पंक्तिभेदकः ॥
अनोष्ठः स्याद्विवाहघ्नो जन्मान्धः पुस्तकं हरन् ।
गोब्राह्मणपदाघातात्खञ्जः पङ्गुश्च जायते ॥
गद्गदोऽनृतवादी स्यात्तच्छ्रोता वधिरो भवेत् ।
विहितस्याऽननुष्ठानान् निन्दितस्य च सेवनात् ॥
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ।
आत्मज्ञः शौचवान्दाता तपस्वी विजितेन्द्रियः ॥
धर्मविद्वेदविद्यावित् सात्त्विको देवयोनिताम् ।

त्रैविद्या मां सोमपाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते।
ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान् दिवि देवभोगान्॥
हित्वा सुखं मनसश्चाप्रियाणि देवः शक्रः कर्मणा श्रैष्ठ्यमाप।
बृहस्पतिर्ब्रह्मचर्य्यं चचार समाहितः संशितात्मा यथावत्॥
हित्वा सुखं प्रतिरुध्येन्द्रियाणि तेन देवानामगमद्गौरवं सः।

"अस्त्येय-प्रतिष्ठायां सर्वरत्नोपस्थानम्"।
"अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः"॥
अहिंसया च भूतानां परमायुः प्रवर्द्धते।
प्रवृत्तं कर्म संसेव्य देवानामेति साम्यताम्॥
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै।
वेदाभ्यास-तपोज्ञानमिन्द्रियाणाञ्च संयमः।
अहिंसा गुरुसेवा च निःश्रेयसकरं परम्।
शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते।
अथवा योगिनामेव कुले भवति धीमताम्।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्त्तते॥

अनेनोपर्य्युक्तोदाहरणेन संस्कारवैचित्र्यस्य कियदवगमनं भवति। ये केचनान्तर्दृष्टिसम्पन्ना महान्तो मानवा यदि कर्मणा संस्कारस्य संस्कारेण च कर्मणोऽवगतिं कर्तुमिच्छन्ति चेत्पूर्वोक्त-विज्ञानानुसारतः संयमसाहाय्येनानुसन्धातुमर्हन्ति॥ १४१॥

संस्कारोत्पत्तेर्मूलनिदानमनुसन्दधाति—

दृश्यजाड्यद्रष्टृचितौ संस्कारनिदानम्॥ १४२॥

क्रियोत्पत्तिर्यथा स्वाभाविकी तथैव क्रियाबीजात्मकसंस्कारोत्पत्तिरपि स्वाभाविकी। कारणमेतस्येदमेव यद् दृश्यात्मिका प्रकृतिर्जडरूपा द्रष्टृरूपः पुरुषस्तु चिन्मयरूपः। प्रकृतेश्च त्रिगुणात्मिकाया परिणामः स्वाभाविकः।

प्रकृतिर्यदा परिणमते तत्परिणामेन च या क्रिया समुत्पद्यते सैव कर्मशब्दभाक् प्रकृतिपरिणामजन्यं कर्म यदा तद्द्रष्टा पुरुषः समीक्षते, तेनेक्षणेन तस्मिन् यत् प्रतिविम्बं प्रकाशते तेनैव सह संस्कारस्य सम्बन्ध इति श्रुतावप्युदीरितम्।

'स ऐक्षत एकोऽहं बहु स्याम्'। पुरुषस्य चैतन्यात् प्रकृतेश्च जडत्वाद् इदं स्वभावसिद्धम्।

ननु पुरुषस्य निःसङ्गतया प्रकृतिस्पन्दजन्यक्रियायाः कथं तस्मिन् सम्बन्ध इति प्रश्ने समाहितिं ब्रूते। परब्रह्मशब्दवाच्ये उताहो परमात्माह्वे आहोस्वित् परमपुरुषनामके वा निर्गुणे तस्मिन्नेव संस्कारसम्पर्कः। यतो हि तस्यामवस्थायां नहि ब्रह्मणः प्रकृतेश्च पृथक्समुदयो भवति। तदानीं तुरीयावस्थायां प्रकृति र्हि ब्रह्मण्येव विलीना तिष्ठति। सगुणावस्थायामेव तत्र प्रकृतिसमन्विते तस्मिन् संस्कारसिद्धि र्भवितु मर्हति। तत्रैतावानेव भेदो यद्द्वयाः संस्कारोत्पादिकायाः प्रकृते र्विद्याऽविद्येति पृथग्भेदद्वयं विद्यते। तत्राऽविद्यया जीवे संस्कारसम्भवो विद्यया चेश्वरे मुक्तात्मनि च तत्समुदयः। जीवस्याऽज्ञानित्वात्तदन्तःकरणे संस्कारात्मकं कर्मबीजं सुगुप्तं तिष्ठति। मुक्तात्मसु तु ज्ञानस्थित्या तेषामन्तःकरणे समुदितोऽपि संस्कारो न स्थैर्य्यमासादयति। यतो हि बद्धो जीवात्मको द्रष्टा स्वात्मानं प्रकृतिवत् दृश्यं सम्मनुते। मुक्तात्मस्वरूपो ज्ञानी द्रष्टा तु स्वात्मानं प्रकृतेः पृथग् ज्ञात्वा प्रकृतिलीलया मोहित एव न भवतीति न तस्मिन् प्रकृतितरङ्गसञ्जातसंस्कारसम्पर्कः ॥ १४२ ॥

अधुना क्रमोन्नत्या तत्सम्बन्धमाह—

तच्छुद्ध्या क्रमोन्नतिः ॥ १४३ ॥

संस्कारस्य द्विविधा गतिः शुद्धाऽशुद्धेति भेदतः। यो हि संस्कार आत्मभावभावितः स शुद्धः। यश्चेन्द्रियासक्त्या निगडितः सोऽशुद्धः।

विज्ञानमिदमन्यथाऽपि प्रकाशीक्रियते। तथा हि—येन संस्कारेणात्मौजःसम्पर्कोऽस्ति स संस्कारो जीवमूर्ध्वमेवात्माभिमुखं नयति। यथा सूर्य्यरश्मिना संपृक्तो बाष्पराशिः स्वत एवोर्ध्वं नीयते। केवलमिन्द्रियासक्तिमान् संस्कारो जीवान् जड़त्वाज्ञानाभिमुखं नयन्नूर्ध्वं नयति। स्वाभाविकस्तु संस्कारः सदैव शुद्धो विद्यते। यतो हि—स समुत्पत्तिवेलायां प्रकृतेः स्वाभाविक-तरङ्गसाहाय्येनैव समुत्पद्यते, तथा जीववासनासम्पर्कराहित्यात्सदैव शुद्धस्तिष्ठति। अस्वाभाविकस्य संस्कारस्य भेदद्वयं पूर्वमेवोक्तम्। तत्र शुद्धसंस्कारतो जीवः सदा क्रमोन्नतिमेव विन्दति। स एव च जीवे कामार्थवासनां ह्रासयन् धर्ममोक्षप्रवृत्तिं प्रवर्द्धयति। अपरतश्च प्रवृत्तिं निरोधयन्निवृत्तिञ्च प्रवर्द्धयन् स्वाभाविकसंस्कारसाहाय्यमाचरति ॥ १४३ ॥

जीवोत्पत्त्या तत्सम्बन्धं दर्शयति—

आद्यात् कारणाविर्भावः ॥ १४४ ॥

आद्यात् प्रथमात् संस्कारात् कारणस्य कारणशरीरस्य आविर्भाव उत्पत्ति र्भवतीति सूत्रार्थः।

प्रकृतिर्यदा स्वभावतः परिणममाना स्वपरिणामप्रभावं चिन्मये पुरुषे आसञ्जयति, तदैव चिज्जडग्रन्थिरूपस्य जीवस्योत्पत्तिर्जायते, कारणशरीरस्य च तदैवाविर्भावः । इत्यत आदिसंस्कार एव जीवस्य कारणशरीरात्मक-जीवत्व-सृष्टेर्निदानं निगद्यते । मध्यमीमांसादर्शने।विज्ञानमिदं स्पष्टतः प्रतिपादितम्—

"चिज्जडग्रन्थिर्जीवः" इति ।

प्रकृतिर्हि स्वभावादेव नित्यपरिणामिनी । तस्याः परिणामस्य सीमस्थले द्वे स्तः । एकश्च पूर्णसत्त्वमयः सीमा द्वितीयश्च पूर्णतमोमयः सीमेति । जगज्जनयित्री प्रकृतिर्यदा पूर्णसत्त्वावस्थातः परिणममाना तमोऽभिमुखी भवति न तदा जीवोत्पत्तिर्जायते । यतो हि तदानीं तत्र चिन्मयभावस्य प्राधान्यं विराजते । यदा तु प्रकृतिः पूर्णान्धकारमये जडभावापन्ने परां काष्ठामधिरूढे तमोगुण-परिणामे प्रथम-परिणाममासादयति । फलतस्तमोगुणस्य चरमं—सीमानमध्यस्ता प्रकृतिर्यदा पुनश्चिन्मयभावाभिमुखी भवितुं प्रथमं परिणाममासादयति, तदैवान्तराले कियन्तं क्षणलवलेशमासाद्य यत् चेतन प्रतिबिम्बं जडे आसञ्जते, तन्निमित्तमाश्रित्य महोर्मिव्यग्रे महार्णवेऽनन्तचन्द्रबिम्बवत् असंख्याता जीवाः स्वभावत एवाविर्भवन्ति । सैव चिज्जडसंयोगतः समुत्पद्यमाना ग्रन्थिरेव जीव-शब्दवाच्येति विभावनीयम् ।

तमसः सकाशात् प्रथमपरिणामेन सह प्रथमोद्भिज्जजीवपिण्डः कथमुत्पद्यत इति दैवीमीमांसाऽपराख्यस्य मध्यमीमांसादर्शनस्यानेन विज्ञानेन मनागाभासीभवति । अस्मिंश्च प्रथमपरिणामे यो हि चिदाभासाविर्भावः स एव जीवान्तःकरणस्य प्राथमिकी सृष्टिः । अस्यां दशायां या चिज्जडग्रन्थिरुदेति सैव जीवस्य जीवत्वम् । तत्र च यो हि प्रथमः संस्कारः स्वतः समुदेति स एव स्वाभाविको जीवस्य कारणशरीरोत्पादक आदिसंस्कारो निगद्यते । तस्य च स्वाभाविकस्य संस्कारस्य सम्बन्धोऽविद्याविद्याभ्यामुभाभ्यामपि प्रकृतेः स्वभावाभ्यां सह विद्यते । तत्राऽविद्यात्मको हि प्रकृतिस्वभाव एकतो जीवसृष्टिं करोति, तरङ्गस्य द्वितीय-सीम्नि च जायमानो विद्या भूत्वा जीवान् विमोचयति । यतो हि स्वाभाविकः संस्कार आत्मन ऊर्ध्वगामिनीं क्रियां कुर्वन् जीवान् विमोच्यैव विलयं गच्छति ॥ १४४ ॥

लिङ्गशरीरेण सह तत्सम्बन्धं ब्रूते—

तन्नैसर्गिकगतिः सूक्ष्महेतुः ॥ १४५ ॥

स्वभावतः परिणममानायां प्रकृतौ चिज्जडग्रन्थेः प्राथमिक्यां क्रियायां

जायमानायां यत् किञ्चिद्भवति तस्य वर्णनमितः पूर्वस्मिन् सूत्रे विहितमेव। तेनैव स्वाभाविकेन परिणामेन सञ्जाततरङ्गा प्रकृतिः स्वतोऽग्रे संवर्द्धमाना लिङ्गशरीरं समुत्पादयति। प्रथमतो महत्तत्त्वं चित्कलासम्बन्धत आविर्भवति यच्च प्रधान-तत्त्वमप्युच्यते। द्वितीयस्मिंश्च स्वाभाविके परिणामेऽहंतत्त्वमाविर्भवति। यतो हि तदानीमेव कारणशरीरी जीव आत्मानमद्वैतब्रह्मसत्तातः पृथक्त्वेनानुभवितुं समर्थो भवति। अहंतत्त्वमेव जीवस्य जीवत्वं निर्धारयति। ततश्च पञ्चानां सूक्ष्मभूतानां सृष्टेः पार्थक्येन सह मनसः पञ्चानां ज्ञानेन्द्रियाणाञ्चोत्पत्तिर्जायते। तदैव प्राणाः कर्मेन्द्रियाणि च सम्भूय जीवं कर्मशालिनं विदधति। इत्थञ्च प्रकृतेः स्वाभाविकक्रियया प्राकृतिकस्तरङ्गः पुरतः संवर्द्धमान ऊनविंशतितत्त्वात्मकं लिङ्गशरीरं निर्माति। यथा च केचिदाहुः—"ऊनविंशतिमुखः पुरुषः" इति।

विज्ञानमिदमन्यथापि ज्ञातुं शक्यते। तथा हि—प्रकृतेः प्रथमे परिणामे स्वत एवानन्दमयकोशवत् कारणशरीरमुत्पद्यते। ततश्च स्वभावतः परिणामिनी प्रकृतिस्तस्यैव केन्द्रस्याश्रयेण विज्ञानमय-मनोमयप्राणमयकोशात्मकं लिङ्गशरीर-मुत्पादयतीति॥ १४५॥

प्रसङ्गतो भोगेन सह सूक्ष्मशरीरसम्बन्धं निदर्शयति—

तत्र भोगः॥ १४६॥

सूक्ष्मापरपर्य्यायं लिङ्गं शरीरं जीवेभ्यो भोगसौविध्यं सम्पादयति। पञ्च-तन्मात्राशब्दवाच्याः शब्दस्पर्शरूपरसगन्धाः पञ्चसूक्ष्मभूताऽपरपर्य्यायाः पञ्च ज्ञानेन्द्रियाणि मनश्चेत्येतैर्युक्तो जीवो वस्तुतो भोक्ता सम्पद्यते। यतो हि विनाऽन्तःकरणं न कस्यापि वस्तुनोऽनुभवो भवितुं सम्भाव्यते। उक्तञ्च "आत्मेन्द्रियमनोयुक्तो भोक्तेत्याहुर्मनीषिणः" इति॥ १४६॥

इदानीं विशेष-परिणामफलं ब्रूते—

तत्तीव्रवेगात्स्थूलम्॥ १४७॥

कारणशरीरत आरभ्य सूक्ष्मशरीरावधिर्यः प्रकृतेः परिणामः स च स्वतः साधारणरूपतयैव भवति। परन्तु स्थूलशरीरस्य कृते जायमानः प्रकृतेः परिणामो विशेषेणैव सम्पद्यते। श्रुतिस्मृतिषु चास्य बहुशः प्रमाणान्युपलभ्यन्ते।

"वदन् वाक्" "शृण्वन् श्रोत्रम्" इत्यादि श्रुतिः।

श्रीमद्भागवते विराट्पुरुषस्याभिमानतो जगदुत्पत्तिप्रसङ्गतोऽस्य सिद्धा-न्तस्य स्फुटं विवेचनमुपलभ्यते। यथा—

अन्तः शरीरमाकाशात् पुरुषस्य विचेष्टतः।
ओजः सहो बलं जज्ञे ततः प्राणो महानसुः॥
प्राणेनाक्षिपता क्षुत्तृडन्तरा जायते विभोः।
पिपासतो जक्षतश्च प्राङ्मुखं निरभिद्यत॥
मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायते।
ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते॥
विवक्षोर्मुखतो भूम्नो वह्निर्वाग्व्याहृतं तयोः।
जले चैतस्य सुचिरं निरोधः समजायत॥
नासिके निरभिद्येतां दोधूयति नभस्वति।
तत्र वायुर्गन्धवहो घ्राणो नसि जिघृक्षतः॥
यदात्मनि निरालोकमात्मानञ्च दिदृक्षतः।
निर्भिन्ने अक्षिणी तस्य ज्योतिश्चक्षुर्गुणग्रहः॥
बोध्यमानस्य ऋषिभिरात्मनस्तज्जिघृक्षतः।
कर्णौ च निरभिद्येतां दिशः श्रोत्रं गुणग्रहः॥
वस्तुनो मृदुकाठिन्यलघुगुर्वोष्णशीतताम्।
जिघृक्षतस्त्वग् निर्भिन्ना तस्यां रोममहीरुहाः॥
हस्तौ रुरुहतुस्तस्य नानाकर्म-चिकीर्षया।
तयोस्तु बलवानिन्द्र आदानमुभयाश्रयम्॥
गतिं जिगीषतः पादौ रुरुहातेऽभिकामिकाम्।
पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रियते नृभिः॥
निरभिद्यत शिश्नो वै प्रजानन्दाऽमृतार्थिनः।
उपस्थ आसीत् कामानां प्रियं तदुभयाश्रयम्॥
उत्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदम्।
ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः॥ इति॥

स्वाभाविकसंस्कारवशगो जीव उद्भिज्जयोनितः स्वेदजादियोनावुपसर्पेद् आहोस्विद् अस्वाभाविकसंस्काराधीनः सन् मनुष्यः स्यात्, तत्रापि क्षत्रियब्राह्मणादिः स्यात् देवोऽपि स्यात्, परन्तु तदीयस्थूलशरीरस्य तत्तद्योनिगतभोगोपयोगिता सम्पत्तयेप्रकृतिविशेषेणैव परिणामिनी भवति। यतो हि उक्तयोनिषु अथवा सहजमानवादिपिण्डेषु पार्थक्येन भोगोपलब्धिसिद्धये पार्थक्येनैव स्थूलशरीरोपलब्धिप्रयोजनमपेक्ष्यते। स्थूलैः पञ्चभिर्महाभूतैर्जायमानोऽन्नमयकोश एव स्थूलशरीरमित्युपदिश्यते। तच्च संस्कारजन्यतीव्रवेगतो जीवस्य भोगसम्पादन-सौविध्यार्थं प्रजायते॥ १४७॥

भावत्रयेण सार्धमेषां सम्बन्धमाह—

अध्यात्ममधिदैवमधिभूतमेतत् त्रयं क्रमात् १४८ ॥

संसारेऽस्मिन् सर्वेऽपि पदार्था भावत्रयोपेताः । दृश्येऽस्मिन् प्रपञ्चे न कोऽपि पदार्थोऽस्ति, य एतस्माद्भावत्रयात्पृथक् स्याद् । इति नियमादेव कारणशरीरमध्यात्मं,लिङ्गशरीराऽपरपर्य्यायं सूक्ष्मशरीरञ्चाधिदैवं,स्थूलशरीरञ्चाधिभूतम्। जीवभावस्य मूलकारणं कारणशरीरमिति तस्याध्यात्मत्वं स्वतः सिद्धम् । सर्वास्वप्यवस्थासु परमोपयोगित्वात् भोगे मोक्षेऽथवा गतागतचक्रे एव परमापेक्षणीयत्वात् लिङ्गशरीरस्याधिदैवत्वं सिध्यति । सर्वभोगाधारत्वात् स्थूलभूतैश्च सम्बन्धभागित्वात् स्थूलशरीरमधिभूतमित्यङ्गीकरणीयमेव ॥ १४८ ॥

तत्र प्रसङ्गतः स्थूलशरीरवैशिष्ट्यं लक्षयति —

भोगार्थं स्थूलमपेक्ष्यम् ॥ १४९ ॥

भोगाय इदमिति भोगार्थं भोगनिमित्तं स्थूलं स्थूलशरीरम् अपेक्ष्यम् अपेक्ष्यते इत्यर्थः ।

स्थूलशरीरस्येदं वैशिष्ट्यं विद्यते यत् तेन विना भोगसिद्धिर्नैव कदापि सम्भवति । यद्यपि लिङ्गशरीरमन्तराऽऽत्मनो भोग-संग्रहोऽसम्भव एव । यतो हि सूक्ष्मशरीर एव सर्वेन्द्रियैः सह मनसः स्थितिः सम्पद्यते । सूक्ष्मशरीरमन्तरा द्रष्टृदृश्ययोर्भोक्तृभोग्ययोः सम्बन्धस्थितिश्च दुर्लभैव, तथापि—भोगपूर्णसिद्धिः स्थूलशरीरेण विना नैव सम्भवति । यतो हि स्थूलभोगस्य साक्षात्सम्बन्धो यावत् स्थूलशरीरेण न भवति न तावद्भोगपूर्णता सम्पद्यते ।

उदाहरणतो यथा—गन्धशालिनः कस्यचन पुष्पस्य भोगो मनसापि चिन्तया संस्मृत्या वा आंशिकतया सम्पादयितुं शक्यते । परन्तु तस्य रूपस्पर्शगन्धादीनां सर्वात्मना भोगस्तु तावन्न सम्पद्यते यावत् स्थूलस्य तस्य स्थूलेनेन्द्रियेण शरीरेण च सम्बन्धो न स्यात् । अतश्च स्थूलशरीरेणैव स्थूलभोगस्य सर्वात्मना सिद्धिरित्यङ्गीकरणीयमेव ॥ १४९ ॥

एतस्यावसाननिदानं ब्रूते—

तस्मात्त्याज्यं जीर्णवस्त्रवत् ॥ १५० ॥

भोगे स्थूलस्य शरीरस्यापेक्षिकत्वात् जीवो यस्मिंल्लोके स्वकर्मप्रेरितो गच्छति तत्रैव तल्लोकीयभोगनिष्पत्तये तत्स्थस्थूलशरीरं गृह्णाति । अत एव च तत्स्थभोगपरिसमाप्तौ तत्रत्यस्थूलशरीरं जीर्णवस्त्रवद्विमुञ्चति । उक्तञ्च श्रुतिस्मृतिषु—

"जीवापेतं किलेदं म्रियते न जीवो म्रियते" ।

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥

उदाहरणतो यथाऽस्मिन्मृत्युलोके पञ्चीकृतमहाभूतनिर्मितं पार्थिवतत्त्वप्रधानं स्थूलशरीरं प्राप्नोति प्रारब्धकर्मानुसारेण च जात्यायुर्भोगादीन् स्वभोगाय समुपस्थितान् भुक्त्वाऽन्ते तत्कलेवरमवश्यमेव स जीवो विजहाति ।

प्रारब्धवेगजन्यायुषः परिसमाप्तौ सत्यामेव तज्जन्मजन्याः सर्वेऽपि प्रारब्धभोगाः परिसमाप्तिमृच्छन्ति । ततश्च सुतरां स जीवो जीर्णवस्त्रवत् तत्कलेवरं विहाय स्वकर्मानुकूलमस्मिन्परस्मिन्वा भोगलोके गत्वा तल्लोकीयभोगपरिपूर्णतायै नवीनवस्त्रपरिधानवत् स्थूलं नवीनं शरीरं गृह्णाति । विना स्थूलशरीरं भोगस्य सर्वाङ्गीणसिद्धिर्नैव सम्भवतीति सूक्ष्मशरीरधारिणो जीवस्य पौनःपुन्येन स्थूलशरीरग्रहणं तत्त्यागश्चावश्यकम् । तत्र तत्त्यागग्रहणयोः प्रारब्धं कर्मैव निदानम् ॥ १५० ॥

मनुष्येतरयोनौ तद्गतिं बोधयति—

एतन्नैसर्गिकं चतुर्विधभूतसङ्घेषु ॥ १५१ ॥

मानवयोनितोऽधस्तनेषूद्भिज्जस्वेदजाण्डजजरायुजेषु चतुर्विधेष्वपि योनिवर्गेषु भोगार्थं स्थूलशरीरस्य ग्रहणं तत्त्यागश्च स्वाभाविकमेव । तत्र हि स्थूलशरीरस्य ग्रहणत्यागयोर्न व्यक्तिगतप्रारब्धस्यापेक्षणमिति फलितार्थः । तात्पर्यंत उद्भिज्जयोनिमतः पिप्पलस्याण्डजयोनिशालिनश्च मयूरपक्षिणः स्वस्थूलशरीरधारणत्यागयोर्न व्यष्टिप्रकृत्यपेक्षा अपि तु समष्टिप्रकृतेः समष्टिनियमादेव तयोः स्थूलशरीरग्रहणत्यागौ सम्पद्येते । यथा यथा जीवः स्वाभाविकसंस्काराश्रयेण प्राकृतिकक्रमाभिव्यक्तिनियमानुरूपमेकस्या योनेरन्यस्यां योनावग्रे संसरति तथा तथोक्तयोनिगतभोगक्रमानुसारेण स्थूलशरीरोपलब्धिस्तस्य स्वत एव जायते। स्वत एव च तत्त्यागोऽपि संसिध्यति । न तत्र व्यष्टिसम्बन्धिप्रारब्धापेक्षा । बृहद्विष्णुपुराणेऽप्युक्तम्—

स्थावरे लक्षविंशत्यो जलजं नवलक्षकम् ।
कृमिजं रुद्रलक्षञ्च पक्षिजं दशलक्षजम् ॥
पश्वादीनां लक्षत्रिंशत् चतुर्लक्षञ्च वानरे ।
ततो हि मानुषा जाताः कुत्सितादेर्द्विलक्षकम् ॥ १५१ ॥

इदानीं मानवयोनिविषयमाह—

अनैसर्गिकं मनुष्येषु ॥ १५२ ॥

मानवयोनेः पूर्णावयवत्वात् तत्र जात्यायुर्भोगादयः प्रारब्धकर्मानुकूलतयैव परिणमन्ति। यतो हि मनुष्यतामभिगतो जीवः स्वीयकर्मप्रभावतोऽस्मिन्संसारावर्तचक्रे कथं वाभ्रम्यते इति स्फुटं विस्तरशो विवेचितम्पूर्वम्। अतो हि मानवानां स्थूलशरीरोपलब्धिस्तद्धानं च अस्वाभाविक-संस्कारप्रभावतस्तदीय-प्रारब्धकर्मवेगत एव भवति। प्रतिमनुष्यञ्च तत्तत्प्रारब्धकर्मानुरूपं जात्यायु-र्भोगादयः पार्थक्येनैव स्वतन्त्रतयैवोपतिष्ठन्ते। अतश्च मानवेषु तेषामस्वाभाविकत्वं स्फुटं सिध्यति ॥ १५२ ॥

प्रसङ्गादन्यदप्याह—

तथेतरेषु पिण्डसम्बन्धात् ॥ १५३ ॥

चतुर्विधेभ्यो भूतसङ्घेभ्यो मानवयोनितश्च भिन्ना बहवो जीवा अन्येषु लोकेषु तिष्ठन्ति। यथा—स्वर्गे किन्नर-गन्धर्व-देवतादयः। असुरलोकेऽसुरादयः पितृलोकेऽर्य्यमप्रभृतयो नित्या नैमित्तिकाश्च पितृगणाः। इमे सर्वेऽपि सुखभोगिनो जीवा अन्येऽपि प्रेतनरकादि-लोकनिवासिनो दुःखभागिनो जीवाः सर्वेऽपि स्थूलशरीरमपेक्षन्ते।

यतो हि विना पिण्डं भोगोपलब्धिरसम्भाविन्येव। तेषां स्थूलशरीरेषु परस्परमुपादान-वैलक्षण्यमावश्यकम्, परन्तु तत्र सर्वत्रैव लोकेषु स्थूलशरीरापेक्षा तु समानैव ॥ १५३ ॥

प्रसङ्गत आतिवाहिकं देहं वर्णयति—

सूक्ष्मानुरूपमातिवाहिकम् ॥ १५४ ॥

ननु सर्वत्रैव स्थूलशरीरापेक्षायामिह लोके स्थूलशरीरं हित्वाऽपरलोक-प्रस्थानकाले जीवः किं शरीरं गृह्णाति ? कथं एकस्माल्लोकादपरलोकं जिगमिषुः केन साधनेन स्वयात्रां साधयतीत्यादिशङ्कायाः समाधानेन विज्ञानं परिपुष्णाति।

जीवो यदा एकस्माल्लोकादपरलोकमुपसर्पति तदा तत्र साहाय्यरूपेणैकविधं स्थूलं शरीरं गृह्णाति तदेवातिवाहिकं शरीरं निगद्यते। तच्च सूक्ष्मशरीर-प्रतिरूपमपि स्थूलशरीरकार्य्यं संसाधयति। तदेव एकस्मादपरं स्थानं जीवान्नयतीति आतिवाहिकमुच्यते। उक्तञ्च श्रीमद्भागवते—

यातनादेहमावृत्य पाशैर्बध्वा गले बलात्।
नयतो दीर्घमध्वानं दण्ड्यं राजभटा यथा॥

श्रुतावप्युदीरितम्—

"प्राणस्तेजसा युक्तः सहात्मना
यथा संकल्पितं लोकं नयति।"

तत्रैव मुण्डकोपनिषदि–उच्चलोकं जिगमिषूणां जीवानां कृतेऽभिहितम्।

एह्येहीति तमाहुतयः सुवर्चसः
सूर्य्यस्य रश्मिभिर्यजमानं वहन्ति।
प्रियां वाचमभिवदन्त्योऽर्चयन्त्य
एष वः पुण्यः सुकृतो ब्रह्मलोकः॥

पुण्यलोके वा पापलोके वा जिगमिषतां सर्वेषामेव आतिवाहिकं शरीरमपेक्ष्यते। परन्तु तदातिवाहिकं शरीरं स्वयं न कार्य्यकारि यथा शैशवावस्थायामतिसुकुमारं शरीरं न स्वयं कार्य्यं सम्पादयितृ इति।

नरकादिपापलोकगमनयोग्यमातिवाहिकं देहं बिभ्रतज्जीवं यमदूता नरकाद्यधमलोकं प्रापयन्ति। स्वर्गादिपुण्यलोकगमनक्षमञ्च तद्देहधारिणं देवदूताः स्वर्गाद्युच्चलोकं नयन्ति। ते च जीवाः तत्र तत्र लोकेषु गत्वा पश्चात्तल्लोकार्हव्यवहारोपयोगिनं देहं समाप्नुवन्ति। मनोमय-विज्ञानमयानन्दमयकोशसम्वलितो हि प्राणमयः कोशो यदाऽन्नमयकोशात्मकस्थूलशरीरान्निर्गच्छति तदा तस्मिन्सूक्ष्मशरीरे एकस्यैवम्भूतस्यावरणस्याऽवश्यकं प्रयोजनमपेक्ष्यते येन तस्य सूक्ष्मशरीरस्य रक्षणमपि स्यात्तस्य जीवस्य लोकान्तरगमने सर्वथा सौविध्यं च सम्पादितं स्यादिति।

क्रियाशक्ति-प्रधानस्य प्राणमयकोशस्यैव साहाय्येन इदं कार्य्यं सम्पादयितुं शक्यत इति प्राणमयकोशोपादानेनैवाऽयमातिवाहिको देहो निर्मीयते। अत एवायमातिवाहिको देहः सूक्ष्मशरीरस्यैव रूपान्तरमभिधातुं शक्यते,अपरतश्च सूक्ष्मशरीरावरकत्वेन हेतुना स्थूलशरीरतयाऽप्यभिधातुम्पार्य्यते॥ १५४॥

अन्यविधामपि शङ्कां समाधत्ते—

संसृतिः सूक्ष्मस्य॥ १५५॥

सूक्ष्मस्य सूक्ष्मशरीरस्यैव संसृतिः संसरणं सम्भवति, ततोऽपि सूक्ष्मशरीरधारिण एव जीवस्य लोकान्तरगतिर्भवतीति सूत्रार्थः। ननु किं विधं शरीरं दधज्जीवो जन्मान्तरमृच्छति इति शङ्कायाः समाहितिं ब्रूते। वस्तुतः स्थूलशरीरस्य प्रयोजनं तत्तद्भोगलोकेषु भोगसिद्ध्यै त्ववश्यमपेक्ष्यते। परन्तु तत्तल्लोकीयभोगानुसारतो भिन्नान्येव तानि भवन्ति। लोकान्तरगत्यर्थन्तु सूक्ष्मशरीरमेवापेक्ष्यत इति सूक्ष्मशरीरधारिण एव लोकान्तरगतिरभ्युपेयते।

मृत्युलोके हि पृथिवीतत्त्वप्रधानं स्थूलशरीरं भवति। प्रेत-लोके च वायु-

तत्त्वप्रधानं, नरकलोके तु वृद्धं स्थूलशरीरमुपलभ्यते । स्वर्गलोके च तैजसं तरुणं च तदासाद्यते । इत्येवं तत्तल्लोकेषु तत्तल्लोकानुसारतो विभिन्नान्येव स्थूलशरीराणि भवन्ति । स्मृतावप्युदीरितम्—

पिशाचप्रेतभूतानां विहाराजिरमुत्तमम् ।
अन्तरिक्षं च तत्प्रोक्तं यावद्वायुः प्रवाति हि ॥ (देवीभागवते)

मनुसंहितायाः तृतीयाध्यायेऽपि—

"निमन्त्रितान् तु पितर उपतिष्ठन्ति तान् द्विजान् ।
वायुवच्चानुगच्छन्ति तथाऽऽसीनानुपासते" इति ॥

इत्याद्युक्त-प्रमाणैः प्रेतयोनिजजीवानां वायुतत्त्व-प्रधानमेव स्थूलशरीरं भवतीति साधु समर्थ्यते ।

सम्प्रति देवयोनिजा जीवाः तैजसं तरुणञ्च शरीरमासादयन्तीति प्रमाणयति । श्रीन्महाभारतीयवनपर्वणि समुपात्तम्—

"न शोको न जरा तत्र नायासपरिदेवने ।
ईदृशः स मुने ! लोकः स्वकर्मफलहेतुकः ॥
सुकृतैस्तत्र पुरुषाः सम्भवन्त्यात्म–कर्मभिः ।
तैजसानि शरीराणि भवन्त्यत्रोपपद्यताम् ॥"

इत्थञ्च आतिवाहिकशरीरमासाद्य तत्र लोकेषु गत्वा तल्लोकानुगुणं शरीरं लभमाना जीवाः सूक्ष्मशरीरधारिण एव भवन्तीति न विस्मरणीयम् ॥ १५५ ॥

तत्कारणमाह—

अस्वाभाविकादावागमनचक्रम् ॥ १५६ ॥

अस्वाभाविकात् संस्कारात् आवागमनचक्रं प्रचलतीति सूत्रार्थः ।

जीवो हि स्वकर्मबलेनैव विविधान् वैचित्र्यपूर्णान् अस्वाभाविकान् संस्कारान् संगृह्य आवागमनचक्रसृष्टिं सम्पादयति । मानवयोनितोऽधस्तनासु योनिषु तु विकासासम्पूर्णतया जगज्जननी प्रकृतिदेवी मातृस्थानीया साहाय्यमाचरति । येन तासु योनिषु जीवो न चक्रप्रवाहे पतति, किन्तु क्रमशः स्वोन्नतिं विदधानो व्रजति । इह मानवयोनावुपेत्य पूर्णतां समधिगतो जीवः स्वाधीनो भवति । स्वातन्त्र्यं समुपेत्य निरङ्कुशो भवन् नानाविधान् वैचित्र्यपरिपूर्णान् अस्वाभाविकान् संस्कारान् संगृह्य नानावैचित्र्यपूर्णान् विविधान् भोगलोकान् सम्पादयितुं स्वावागमनचक्रं सृजन् तत्र बाभ्रम्यमाणस्तिष्ठति एतदेव जीवानां बन्धनदशा-रहस्यम् ॥ १५६ ॥

प्रकृतमेव विषयं संस्कारज्ञाननिमित्तं पुनः प्रस्तौति—

रागद्वेषसम्बद्धोऽभिनिवेशः ॥ १५७ ॥

अस्वाभाविको हि संस्कारो रागसम्बन्धाभिनिवेशतो द्वेष-सम्बन्धाभिनिवेशतो वा जीवपिण्डे समुदेति । प्रथमतो हि तस्य द्वे श्रेणी भवतः ॥ १५७ ॥

तत्र प्रथमश्रेणिभेदं ब्रूते—

तनुरुदारश्च रागः ॥ १५८ ॥

रागसम्बन्धतो हि सम्पद्यमानः संस्कारोऽतिसूक्ष्मशक्तिसम्पन्नो भवति अथवोदारो भूत्वा प्रबलशक्तिसम्पन्नो वा भवति ॥ १५८ ॥

सम्प्रति द्वितीय-श्रेणिभेदं निरूपयति—

स्मरणास्मरणयोगो द्वेषः ॥ १५६ ॥

द्वेषाभिनिवेशतो जायमानो हि संस्कारो द्विधा सुस्मृतियुग् विस्मृतियुक् च भवति । तत्र प्रथमस्य संस्कारस्य स्मृतिस्तिष्ठति । द्वितीयस्य तु विस्मरणमेव भवति ॥ १५६ ॥

इदानीं विस्मृतियुक्तस्य संस्कारस्य वैशिष्ट्यं ब्रूते—

प्ररोहबाधो विस्मृतौ ॥ १६० ॥

पूर्वोक्तौ द्वौ रागजौ संस्कारौ, स्मृतियुक्तश्च द्वेषजाऽपरः, इमे त्रयोऽपि नियमतोऽङ्कुरं जनयन्ति । किन्तु विस्मृतियुक्तः संस्कारोऽङ्कुरोत्पत्तौ बाधक एव भवति ॥ १६० ॥

अधुना कर्मविपाकज्ञानं सङ्केतयति—

विचारानुगमतः कर्मविपाकदर्शनम् ॥ १६१ ॥

योगदर्शने सविकल्पकसमाधेश्चत्वारो भेदा उदीरिताः । वितर्कानुगतश्चैको विचारानुगतश्च द्वितीयः, आनन्दानुगतस्तृतीयः, अस्मितानुगतश्चतुर्थ इति । एषु चतुर्ष्वपि विचारानुगतसमाधिसाहाय्येन योगिनः सत्यभिलाषे कर्मविपाकरहस्यानुसन्धानं कर्तुमर्हन्ति । पूर्वोक्तविज्ञानमनुस्मरन्तः समाधिभूमावुपेत्य विचारानुगतसमाध्याश्रयेण कार्य्यमिदं साधयितुमर्हन्ति । उन्नता एव योगिराजाः संस्कारज्ञानप्राप्तये मार्गमिममाश्रयितुं शक्नुवन्ति ॥ १६१ ॥

तत्साफल्योपायं ब्रूते—

अन्तरायाभावे आसन्नम् ॥ १६२ ॥

अन्तरायाणां विघ्नानामभावेऽत्यन्ताभावे सति आसन्नं शीघ्रं योगसाफल्यं भवतीत्यर्थः ।

विघ्नानामभावे सति संस्कारसंयमविधाता योगी शीघ्रतयैव साफल्यमृच्छति। योगविघ्नानां वर्णनं बाहुल्येन योगदर्शने समुपलभ्यते। उपायप्रत्यय-भवप्रत्ययावस्थारहस्यपर्य्यालोचनया योगान्तरायाणामवगतिर्बहुशो जायते ॥ १६२ ॥

प्रकृतविषय-प्रसङ्गेन तद्भेदानाह—

पञ्चधाऽन्तरायाः ॥ १६३ ॥

योगसाधनवेलायां येऽन्तराया योगिषु तेषां योगयुक्तान्तःकरणेषु च जायन्ते। तान् पञ्चधा विभजन्ति तज्ज्ञा योगिनः।

तथा हि—अभिनिवेशज एको रागजन्यो द्वितीयो द्वेषजन्यस्तृतीयोऽस्मिताजन्यश्चतुर्थः, स च द्विविध इत्येवं सर्वे मिलित्वा पञ्चधा भवन्ति।

उन्नतोन्नतान्तःकरणेष्वपि महामायाप्रभावेणैषां पञ्चविधानां विघ्नानां समुद्भवसम्भावना सदैव विद्यते। परोपकारपरायणेषु महापुरुषेष्वपि जगत्कल्याणकरणाभिनिवेशः पुण्य-पापयोश्च रागद्वेषासक्तिसम्भवः स्वाभाविक एव। अतश्चाघटनघटनापटीयस्या महामायायाः प्रभावतोऽलक्षितानिश्चितरूपेण ईदृशानां विघ्नानामुत्पत्तिशङ्का तेषामत्युन्नतेषु प्रशान्तेष्वप्यन्तःकरणेषु यदा कदा विद्यत एव। योगिनामस्मिताऽवस्था यद्यपि सर्वोत्कृष्टा तथाऽपि तत्रावस्थायामपि द्विविधस्य विघ्नस्य समुत्पत्तिसम्भवः। अनयोरेव द्वयोर्योगविघ्नयोराधिदैवस्वरूपस्य सप्तशतीगीतासूपनिषत्सु मधुकैटभनाम्नो र्द्वयोरसुरयोः स्वरूपेण वर्णनं समुपलभ्यते।

अस्यामस्मितावस्थायां यौ समाधिशत्रुभूतौ द्वौ विघ्नौ स्तः, तयोरेवाधिदैवस्वरूपौ तौ मधुकैटभनामानौ दैत्यौ ब्रह्मणः समाधिस्थेऽन्तःकरणे ब्राह्म्या हि सृष्टेः समकालमेवान्तरायं चक्रतुः। तौ च ज्ञानरूपिणो भगवतश्चिन्मयस्य विष्णोः साहाय्याद्विनाशितौ अभूताम्।

अस्मितादशायां यदि नादावलम्बनं भवति तर्ह्येवानयोरन्तराययोः समुद्भवो जायते। तथा हि—नादे आनन्दमोहितमन्तःकरणं यत् तमोगुणाभिमुखं भवति सैव प्रथमावस्था। इतश्च जडात्मकस्य समाधेः समुद्रेकः सम्भवति। द्वितीयस्याञ्चावस्थायां नादसम्बन्धतश्च बहिर्मुखो भूत्वा योगी यदा स्वलक्ष्यच्युतो भवति तदैवास्य योगविघ्नस्योद्गमः। नादस्याश्रयेणैवानयोर्द्वयोरुद्भवः। द्वावेवेमौ तमोगुणमयौ स्तः। द्वौ चेमौ प्रबलौ समाधिविघ्नौ गण्येते। इत्थञ्च एभ्यः पञ्चविधेभ्योऽपि विघ्नेभ्योऽवसरमदत्वा संस्कारसंयमकर्तारः उन्नता योगिगणाः कर्म्म-विपाकपरिणाममधिगन्तुमर्हन्ति।

अङ्कुरोत्पत्ते र्भावजन्यां त्रिविधामपि श्रेणीं तथा वर्गजन्यां चतुर्विधां श्रेणीं तयोश्च वैचित्र्यं ध्यानविषयीकृत्य तेनैव सह समाधिवशतः संस्कारोत्पत्ते र्निदानञ्चोहयित्वा अपरञ्चास्वाभाविकानां संस्काराणामुत्पत्तिरहस्यञ्च सम्यज्ज्ञात्वा ततोऽपि योगविघ्नान् वञ्चयित्वा विचारात्मकस्य समाधेः साहाय्येन च तस्याः संयमशक्तैश्च साधु ध्रुवं स्फुटमुद्रेकेण योगिराजाः कर्मविपाकपरिणामं साधु समधिगन्तुमर्हन्तीति दुर्गमोऽयं पन्थाः सर्वयोगिनाम्।

प्राक्तनाः सर्वबन्द्यास्त्रिकालदर्शिनो महर्षयोऽनयैव लोकातीतया योगपद्धत्या कर्मबीजस्वरूपाणां संस्काराणामवगत्या कर्म-विपाकपरिणाममवगच्छन्ति स्म। तेनैव जन्मजन्मान्तरगतान्यपि वृत्तानि स्वहस्तस्थितामलकफलवत्सर्वात्मना विदन्ति स्म। पुराणादिषु च यद्बहूनामतीतानागतानां मानवदेवासुरोद्भिदादीनां जन्मजन्मान्तररहस्यवर्णनं प्रत्यक्षवदुपलभ्यते तदित्थम्भूताया एव योगशक्तेः परिणामफलमूहनीयमिति ॥ १६३ ॥

इदानीं पिण्डनिर्णयमातनोति—

त्रिविधं पिण्डं सहजमानवदेवभेदात् ॥ १६४ ॥

सहजाश्च मानवाश्च देवाश्च तेषां भेदः, तस्मात् हेतोः पिण्डं स्थूलशरीरं त्रिविधं त्रिप्रकारकं निगद्यत इति सूत्रार्थः।

स्थूलशरीरमेव पिण्डशब्दवाच्यं भवति। तस्य च श्रेणिविभागमुखेन तदीयविज्ञानं विस्पष्टयति महर्षिः सूत्रकारः त्रिविधमित्यादिना।

इह स्थूलजगति यावन्त्यपि स्थूलशरीराणि भवन्ति। तानि सर्वाण्यपि प्रकारत्रयभाञ्जि एव भवन्ति। तत्र प्रथमं सहजपिण्डं द्वितीयं मानवपिण्डं तृतीयञ्च देवपिण्डमिति भेदात्। स्मृतिशास्त्रादिषु सविशेषमुक्तमिदम्। तथा हि—

सहजो मानवो दैवो जीवपिण्डस्त्रिधा मतः।
मर्त्येभ्यश्चेतरे निम्ना भूतसङ्घाश्चतुर्विधाः॥
यैस्तु कर्म फलं पिण्डै र्भुज्यते सहजा हि ते।
मर्त्योपयुक्तपिण्डा हि कथ्यन्ते मानवाभिधाः॥
देवपिण्डाश्च ये व्याप्ता भुवनानि चतुर्दश।
वर्तन्ते पितरो दैवभोगायतनरूपिणः।
त्रिविधा एव नन्वेते वर्तन्ते पाञ्चभौतिकाः।
उपादानेषु किन्त्वेषां प्रभेदो वर्तते महान्॥ इति॥

मातृरूपायाः प्रकृतेर्वशवर्तिनो नियमत उन्नतशीलस्य चतुर्विधस्याऽपि भूत-

सङ्घस्य पिण्डः सहजपिण्डो निगद्यते । गतागतचक्रस्य प्रधानकारणरूपं मानवानां स्थूलशरीरं हि मानवपिण्डमुच्यते । इत्थञ्च चतुर्दशानां सूक्ष्मलोकानां जीवानां दैव्या शक्त्या विशिष्टानि यानि स्थूलशरीराणि तान्येव देवपिण्डं निरुच्यते । तत्र देवपिण्डधारिणो जीवा न मातृगर्भतः प्रादुर्भवन्ति तेषु विविधं वैचित्र्यं भवति । तथा ते दैवशक्तिशालिनो भवन्तीत्यत एव दैवपिण्डशब्दभाजो भवन्ति । यथा च महाभारते वनपर्वणि अभिहितमिति—

कर्मजान्येव मौद्गल्य ! न मातृपितृजान्युत ।
न संस्वेदो न दौर्गन्ध्यं पुरीषं मूत्रमेव वा ॥
तेषां न च रजो वस्त्रं वाधते तत्र वै मुने ।
न म्लायन्ति स्रजस्तेषां दिव्यगन्धा मनोरमाः ॥
संयुज्यन्ते विमानैश्च ब्रह्मन् ! एवं विधैश्च ते ॥ १६४ ॥

स्वाभाविकसंस्काराधीनं पिण्डं निरूपयति—

तत्राद्यमायत्तं स्वाभाविकस्य ॥ १६५ ॥

तत्र पिण्डनिरूपणप्रस्तावे आद्यं सहजपिण्डं स्वाभाविकस्य संस्कारस्य आयत्तम् अधीनम् भवतीति सूत्रार्थः ।

प्रकृतिदेव्याः स्वाभाविकेन स्पन्दनेन यथा स्वाभाविकस्य संस्कारस्य सहजस्य च कर्मणः सम्बन्धस्तथैव तेन सह सहजपिण्डस्याऽपि सम्बन्धः । प्रकृतिर्हि त्रिगुणात्मिकतया स्वभावत एव स्पन्दनवती । तस्याः सकाशाज्जायमानस्य स्वाभाविकस्य संस्कारस्योद्गमप्रकारस्तु साधु पूर्वं निरूपितः । तस्यैव स्वाभाविकस्य संस्कारस्य वेगतो जीवः क्रमाभिव्यक्तिनियमानुकूलं चतुर्विधानां भूतसङ्घानां चतुरशीतिलक्षसंख्यकेषु पिण्डेषु स्वत एव प्रविशन् ततश्चोद्गच्छन् पुरः संवर्द्धते । इमानि सहजपिण्डात्मकानि उन्नतिसोपानानि जीवानां क्रमोन्नतिमार्गे स्वत एवोपलभ्यन्ते ॥ १६५ ॥

प्रसङ्गतः शङ्कासमाधानमभिधत्ते—

तत्रेतरेऽपि भोगाय ॥ १६६ ॥

तत्र सहजपिण्डे इतरे अन्ये मानवदेवपिण्डगा जीवा अपि सम्भवतो भोगाय जनुरासादयन्तीति सूत्रार्थः ।

ननु सहजपिण्डगा जीवाः स्वत एव प्रकृतिस्वाभाविकतरङ्गप्रभावपतिताः सहजपिण्डमाश्रित्योद्भवन्ति पुनश्च मृत्युमुपेताः यथोर्ध्वमुपसर्पन्ति, इति नियमे जागरूके, शास्त्रादिषु समुपलभ्यमानस्य पिण्डान्तरगानां जीवानां सहजपिण्डप्र-

वेशप्रमाणस्य का गतिःस्यात्? श्रुतावप्येवम्भूतानां पिण्डान्तरगतानां जीवानां सहजपिण्डप्रवेशो दृश्यते यथा—

"य इह कपूयचरणाः अभ्यासो ह तद्ये कपूयां योनिमापद्येरन् श्वयोनिं वा शूकरयोनिं वा चाण्डालयोनिं वा" इति।

यमलार्जुनौ देवपिण्डजावपि जीवौ व्रजे वृक्षयोनिमुपेतावास्तामिति सर्वजनविदितो वृत्तान्तः। राजा नहुषो देवपिण्डधारी भूत्वाऽपि सर्पो बभूव इत्येतादृशीनां शङ्कानां किं दार्शनिकं समाधानम्? इति प्रश्ने समुत्तरयति—

जीवो यदा पञ्चकोशपूर्णतामासादयति तदा स पूर्णशक्तिसम्पन्नो भूत्वा स्वच्छन्दगति र्भवति। इत्थञ्च यथा स स्वीयतीव्रास्वाभाविकशुभसंस्कारबलेन उन्नतोन्नतान् लोकानासादयति तथैव स स्वकीयतीव्रास्वाभाविकाशुभसंस्कारवशात् नरकलोके प्रेतलोकेऽपि गन्तुमर्हति। विशेषतो दण्डभोगाय च सहजपिण्डे समागत्य अशुभसंस्कारभोगसमाप्तिं कर्तुमर्हति। परन्तु भोगोऽयं नैमित्तिको निगद्यते। यतो हि तस्याशुभभोगस्यावसितौ स जीवः पुनस्तत्रैव मानवपिण्डे देवपिण्डे वा समुपैति, यतः स तत्र समागत आसीदिति। अत्र सूत्रे 'अपि' शब्दो दण्डस्यासाधारण्यं द्योतयति। यदीदृशी घटना उग्रदण्डनिमित्तिका क्वचिदेव भवतीति॥ १६६॥

सम्प्रति अस्वाभाविक-संस्काराधीनं पिण्डं निदर्शयति—

अस्वाभाविकतन्त्रे द्वितीयतृतीये॥ १६७॥

द्वितीयश्च तृतीयञ्च ते, अस्वाभाविकस्य संस्कारस्य तन्त्रे आधीने इत्यर्थः। द्वितीयतृतीयपिण्डे मानवदेवरूपे अस्वाभाविकसंस्काराधीने इतियावत्।

यदा जीवोऽन्नमय-प्राणमय-मनोमय-विज्ञानमयानन्दमयकोशपरिपूर्णो गतागतचक्रे परिभ्रमति, अथवा देवश्रेणिमुपेत पेशकर्माधीनो दैवीं क्रमोन्नतिमासादयति, तदा हि सोऽनयोर्द्वयोरप्यवस्थयोरस्वाभाविकसंस्कारजन्यमेव पिण्डं प्राप्नोति। यतो हि स उभयत्रापि उन्नतावनताधिकारमासादयति। उभयत्रैवास्वाभाविकस्य भोगस्य निष्पत्तिर्भवति उभयत्रैव स स्वाधीनस्तिष्ठति। इत्थञ्च अनयोर्द्वयोरप्यवस्थयोः पिण्डं परिग्रहीता जीवोऽस्वाभाविकसंस्कारबलेनैव स्वपिण्डं परिगृह्णातीति विवेकः॥ १६७॥

प्रसङ्गतो जन्मान्तरनिमित्तं निर्वक्ति—

संस्कारप्राबल्यं जन्मान्तरनिमित्तम्॥ १६८॥

अन्यज्जन्म जन्मान्तरम् तस्य निमित्तम् कारणम् संस्कारस्य प्राबल्यम्

प्रबलतैव भवतीति सूत्रार्थः, मनुष्यसम्बद्धा अस्वाभाविकाः संस्काराः सञ्चित-क्रियमाण-प्रारब्धभेदेन त्रिधा विभक्ता उपलभ्यन्ते । यथोक्तं शम्भुगीतायाम्—

प्रारब्धं सञ्चितं कल्याः ! आगामीति प्रभेदतः ।
प्रोच्यते त्रिविधं कर्म्म कर्मतत्त्वविशारदैः ॥

अनन्तजन्मजन्मान्तरभवानां कर्मराशीनां संस्कारसमूहाः कर्माशये सञ्चिताः सङ्घीभूताः तिष्ठन्तः 'सञ्चित—' शब्दवाच्या भवन्ति । वर्तमानजन्मनि नवीनाः संगृह्यमाणाः संस्कारराशयः क्रियमाणपदाभिधेयाः। मानवानाम् एकस्य जन्मनोऽवसाने द्वितीयस्य च प्रारम्भे ये प्रबलाः संस्काराः फलोन्मुखीभूता नवीन-जन्मनो हेतुतां व्रजन्ति त एव प्रारब्धशब्देनोच्यन्ते । तत्र सञ्चितेष्वेव कर्मराशिषु य एकजातीयाः संस्काराः प्रबला भवन्ति । त एव नूतनं जन्मोत्पादयन्तीति विभावनीयम्। यथा हि सप्तस्वपि धातुषु समुदितेषु अयस्कान्तमणि निक्षिप्येत चेत्तत्र समुदाये सर्वानपि धातून् विहाय सोऽयस्कान्तमणिः केवलमयोधातु-मेवात्मसात् करोति, तथैव समानश्रेणिगाः प्रबलाः संस्कारसमूहाः सङ्घीभूय जीवेन सार्धं सम्मिल्य नूतनं देहं निर्म्मान्ति । यथोक्तं महाभारते—

बालो वा यदि वा वृद्धो यत्करोति शुभाशुभम् ।
तस्यां तस्यामवस्थायां तत् फलं प्रतिपद्यते ॥
यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।
तथा पूर्वकृतं कर्म्म कर्तारमनुगच्छति ॥ इति १६८ ॥

अधुना प्रकृतविषये शङ्कासमाधाने ब्रूते—

तत्प्रामाण्यं संस्कार-वैचित्र्यात् ॥१६९ ॥

जन्मान्तरसत्तां सन्दिहाने जिज्ञासौ तत्समाधानार्थं संस्कारविचित्रतां हेतुत्वेनोपन्यस्यति । संस्काराणां वैचित्र्यात् वैलक्षण्यात् तस्य जन्मान्तरस्य प्रमाणानां भावः प्रामाण्यम् यथार्थोऽनुभवो विधातव्य इति भावः ।

जन्मान्तरस्य सत्तायां प्रत्यक्षं प्रमाणमिदमवगमनीयम् यत् प्रतिमनुष्यं संस्काराणां वैचित्र्यम् पृथगेवासाद्यते । तत्र विना किञ्चित् प्राक्तनं कारणं कथ-मिदं सम्भवतीति अकामेनाऽपि भवता स्वीकरणीयमेव । इत्थञ्च प्राक्तने कारणे सिद्धे तदेव कारणं कर्मणो बीजभूतः संस्कारो ज्ञेयः ॥ १६९ ॥

तदेव विज्ञानं पुन र्विस्पष्टयति—

क्रियावैचित्र्यादेतज् ज्ञेयम् ॥ १७० ॥

ननु संस्कारवैचित्र्ये एव किं प्रमाणमित्याशङ्कायां सूत्रकृन्महर्षिः

समुत्तरयति। क्रियाणां वैचित्र्याद् वैलक्षण्याद् एतत् संस्कारवैचित्र्यं ज्ञेयम् अनवन्तत्वाच्चेति सूत्रार्थः। प्रतिमानवं क्रियाणां पार्थक्यं प्रत्यक्षत एवासाद्यते, अतश्च प्रतिमानवं वैचित्र्यपूर्णानां कर्मबीजरूपाणां संस्काराणामपि पार्थक्यं सिद्ध्यत्येव।

इह संसारे कश्चिद्राजा, कश्चित् प्रजावर्गः। कोऽपि पूर्णाङ्गः, कोऽपि विकलाङ्गः। कश्चिद् धनी, अपरोऽकिञ्चनः। कश्चन सुन्दरः इतरः कुत्सितः। कोऽपि नीरोगः, कोऽपि चिररोगी। कश्चिद् अल्पायुः, कोऽपि दीर्घायुः। कोऽपि बुद्धिमान्, कोऽपि मन्दमतिः। कोऽपि ब्राह्मणः, कोऽपि शूद्रः। कोऽपि सुखी कोऽपि दुःखी, इत्येवं प्राक्तनसंस्काराणां फलस्वरूपा विविधाः क्रियाविचित्रता मानवेषु समुपलभ्यमानाः संस्काराणां वैचित्र्यं प्रमापयन्ति। संस्कार-वैचित्र्य-सिद्धौ च जन्मान्तरसिद्धिः स्वत एवोदेति। अतश्च पूर्वोक्तशङ्कायास्तत्र अवसर एव नायाति। उक्तञ्च मानवसंहितायाम्—

यथर्तुलिङ्गान्यृतवः स्वयमेवर्तुपर्य्यये
स्वानि स्वान्यभिपद्यन्ते तथा कर्माणि देहिनः इति॥ १७०॥

इदानीं संस्कारफलान्याह—

ततो जातिः॥ १७१॥

संस्कारात्मकस्य कारणस्य प्रथमं कार्य्यं जातिः। संस्कारात्मकबीजात्-या प्रथमा क्रिया जायते सैव जातिः। आर्य्यजातिः, अनार्य्यजातिः, ब्राह्मणजातिः शूद्रजातिः। इत्यादिकं सर्वमपि प्रारब्धसंस्कारस्य प्राथमिकं फलं गीयते। यतो हि गुणत्रयपरिणामैः सह जातीनां साक्षादेव सम्बन्धः। गुणानामाधारः स्थूलशरीमेवास्ति इत्यतो मातापित्रो रजोवीर्य्यप्राधान्येनैव जातिवैशिष्ट्यमूहनीयम्। जन्मना सार्धं तस्या जातेर्घनिष्ठसम्बन्धभागित्वात् तस्याः सर्वापेक्षया वैशिष्ट्यम्।

विशेषतो भोगेनापि जाते महान् सम्बन्धः। यतो हि यस्या जातेः पिण्डे जीवो जन्म गृहीत्वा प्रविशति। तत्र यथायोग्यरजोवीर्य्याभ्यामीदृगधिकारस्तेना साद्यते यथा भोगानुभवे विविधं वैचित्र्यं समुत्पद्यते। तथा हि अनार्य्यजातेराचारानुभवे आर्य्यजातेराचारानुभवे च महदन्तरमहोरात्रवदुपलभ्यत एव। धार्मिकस्यैकस्य ब्राह्मणस्य धनसम्बन्धीयानुभवे तत्रैव कुसीदग्राहिणो वैश्यस्य धनसम्बन्धीयानुभवे च स्वर्गपातालवदन्तरम्भविष्यत्येव।

अन्योऽपि विशेषो विद्यते जातौ। यतो हि अभ्यासेन कर्म्मणां साधारणतया परिवर्तनं भवितुम्पार्य्यते। परन्तु जातेर्जन्मना सह साक्षात् सम्बन्धसत्वात् न तत्रेदं परिवर्तनं भवितुमर्हति।

विषयोऽयमन्यथाऽपि विवरितुं शक्यते । तथा हि—शूद्रजातिजो जीवो ब्राह्मणजातिसम्बन्धिकर्माभ्यासं कर्तुमर्हति । परन्तु पूर्वसंस्काराधीनतया विशेषजातौ समुत्पन्नतया तज्जातिगरजोवीर्य्योत्पन्नविशेषशरीरलाभेन च विशेषगुणाधिकारिणि तस्मिन् कथमपि जातिपरिवर्तनं नैव भवितुमर्हति । जातेस्तु जन्मना सह विशेष–सम्बन्धभागित्वात् सा तु सैव स्थास्यति या जन्मतः समुत्पन्ना विद्यते ।

जन्मना सह जातेरकाट्य-सम्बन्धोऽस्तीत्यस्येदं वैज्ञानिकं रहस्यं यद्वु एकजातीयं कर्मान्यजातौ कदाचिदागच्छेदपि, परन्तु तत्र गुणपरिवर्तनं नैव सम्भवति । यतो हि सत्त्वरजस्तमांसि त्रीण्यपि तत्त्वानि रजोवीर्य्याभ्यामेवाकृष्यन्ते इति ॥ १७१ ॥

द्वितीयं फलमभिधत्ते—

आयुः ॥ १७२ ॥

प्रारब्धस्य संस्कारस्य द्वितीयं फलमायुर्विद्यते । वस्तुतः कर्म्मपरिपाकं भोक्तुमेव जीवा जनुर्गृह्णन्ति । तस्य नियतस्य फलस्य भुक्त्यै देशकालौ अपेक्ष्येते । तत्र पूर्वसूत्रोक्ता जातिरेव देशशब्दान्तर्गता ज्ञेया । योगशास्त्रेऽपि स्थूलशरीरमेव देशरूपेणोक्तम्—तथा हि—

प्रकृतेर्मण्डलं यत्तद् ब्रह्माण्डं तत्समष्टितः ।
तदेव पिण्डरूपेण प्रोच्यते व्यष्टिनामतः ॥

आयुश्चैव कालरूपेण प्रोच्यते । यतो हि विना कालनियमनं भोगनियमसिद्धिरेव न सम्भवति । उदाहरणतो यथा–एकस्य मनुष्यस्यायुरशीतिवर्षात्मकं यदि नियम्येत, तदैव तदीयभोगपरिणामो बाल्य-यौवन-जराप्रभृतीनामन्तर्भावानां नियमितत्वं च सम्भाव्यते । अतश्चेदमवश्यमेवावधारणीयम् यत् प्रारब्धपरिपाकात्मन आयुषोऽपि प्राधान्यम् ॥ १७२ ॥

तृतीयं वक्ति—

भोगश्च ॥ १७३ ॥

भोगनिमित्तमादायैव जीवो जन्मान्तरं गृह्णातीत्यभिहितं प्राक् । एकविधस्य भोगस्य परिसमाप्तौ जीवो जीर्णवस्त्रत्यागानन्तरं नवीनपटपरिधानवत् एकं पिण्डं परित्यज्य पिण्डान्तरमाश्रयति । उक्तञ्च गीतोपनिषदि—

वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही ॥इति॥

इदमेवेह जगति मृत्युशब्दवाच्यं जन्मान्तर-शब्दवाच्यं वोच्यते । एतस्य प्रधानं कारणं भोग एवोच्यते । एषां त्रयाणामपि फलानामुपादानं श्रीमता महर्षिपतञ्जलिनाऽपि योगशास्त्रे कृतम्—तथा हि—

'सति मूले तद्विपाको जात्यायुर्भोगः' ॥ इति ॥

एषु सर्वेष्वपि भोगस्यैव मुख्यत्वम् । यतो हि भोगसमाप्तिनिमित्तादेव जीवो जन्मान्तरं पिण्डान्तरं वा गृह्णातीति सुनिर्णीतः पन्थाः ।

प्रकृति-वैभवानामनन्तवैचित्र्यपरिपूर्णवत् भोगवैचित्र्यस्याऽपि नास्ति सीमा । तथापि शास्त्रकृद्भिः महर्षिभिः गुणविचारणया सात्त्विक-राजस-तामस-भेदेन त्रिधा विभागो भोगानां परिदर्शितः । अन्यतोऽपि सुख-दुःख-मिश्ररूपेणापि त्रिविधो विभागो विहित एवास्ते ॥ १७३ ॥

जन्मान्तरगतिं विस्पष्टयितुमिदमुच्यते—

आतिवाहिकवैलक्षण्यं संस्कारवैलक्षण्यात् ॥ १७४ ॥

ननु जन्मान्तरगतिसम्बन्धतो जायमानो जीवानाम् आतिवाहिको देहः समानो भवति, आहोस्वित् विभिन्नो भवतीति शङ्कायामुत्तरयति—आतिवाहिकेति—संस्काराणां वैलक्षण्यात् वैचित्र्यात् आतिवाहिकानां शरीराणामपि वैलक्षण्यं सिध्यत्येवेति सूत्रार्थः । तथा हि—

तमोभावापन्नानां चतुर्विधानां भूतसङ्घानां ये जीवाः सन्ति तेषामातिवाहिका देहा जडत्वविशिष्टा एव भवन्ति । मनुष्यत्वमधिगतेष्वेव जीवेषु तेषामातिवाहिकदेहानां तज्जाड्यमपसरति । परन्तु अस्यामुन्नतावस्थायामपि आतिवाहिकदेहानां बहवो भेदा भवितुमर्हन्ति । तथा हि—यमदूता यदा जीवान् मृत्युलोकतो नयन्ति प्रेतलोकं, तदाऽन्यविधैवातिवाहिकदेहावस्था भवति । यदा च ताञ्जीवान्नरकलोके प्रापयन्ति तदाऽन्यथैवातिवाहिकानां तदीयदेहानामवस्था भवति । इत्थमेव देवदूतै र्देवलोके समुपस्थापितानां जीवानामातिवाहिकदेहावस्था भिन्नप्रकारिकैव सञ्जायते । अतश्च स्वाभाविकास्वाभाविकशुभाशुभसंस्कारेषु वैलक्षण्यदर्शनात् तत्सम्बन्धतः आतिवाहिकदेहेष्वपि वैलक्षण्यसमुद्रेकः सुनिश्चित एव ॥ १७४ ॥

प्रसङ्गादभिधत्ते—

संसरणमातिवाहिकेन ॥ १७५ ॥

भोगार्थं जन्मान्तरावाप्तिं लोकान्तरप्राप्तिं वा सूक्ष्मशरीरमेव विदधाति, स्थूलशरीरन्तु यस्य लोकस्य भवति तस्मिन्नेव लोके स्वप्रधानोपादानकारणे

विलीनं भवतीति पूर्वमेवोक्तम् । इदानीमनेन सूत्रेणेदमेव विवृणोति यद् आतिवाहिकं शरीरं स्वसूक्ष्मशरीरेण धृत्वा जीवो लोकाल्लोकान्तरं व्रजति । यथोक्तं श्रीमद्भागवते—

यातनादेहमावृत्य पाशैर्बध्वा गले बलात् ।
नयते दीर्घमध्वानं दण्ड्यं राजभटो यथा ॥इति ।

तात्पर्य्यतो जीवानां केभ्यश्चिदपि लोकेभ्योऽस्मिन्मृत्युलोके समागमने, आहोस्विदितो मृत्युलोकात् परस्मिन् कस्मिंश्चिदपि लोके समुपस्थितौ, अथवाऽन्यत्रैवैकस्माल्लोकाल्लोकान्तरगतौ, इत्थंविधे संसरणादिकार्य्ये आतिवाहिकदेहं विना सौविध्यमेव न सम्भवति । अतश्च जीव आतिवाहिकं देहं स्वसूक्ष्मशरीरोपरि समाच्छाद्य सर्वत्र लोकेषु गतागतं करोतीति सर्वसम्मतः सिद्धान्तः ॥१७५॥

लोकान्तरगतिं सुस्पष्टयितुं ब्रवीति—

प्रेतत्वं मूर्च्छया ॥ १७६ ॥

ननु शुभाशुभपुण्यपाप-परिणामरूपतः स्वर्गनरकलोकावाप्तिस्तु सर्वथा बुद्धावारोहत्येव । परन्तु तृतीयदशारूपं प्रेतत्वं कथं सिध्यति, कथञ्च तदुत्पद्यते इति शङ्कां समाधातुमिदमाह—मूर्च्छया प्रेतत्वं प्रेततामाश्रयति जीव इति ।

चतुर्दशसु भुवनेषु दैवासुरभोगविचारणया चतुर्दशापि लोकाः शुभभोगसम्पादनार्थैव निर्मिताः सन्ति । तत्र भूर्भुवःस्वरादय ऊर्ध्वलोकाः सप्त दैवसुखभोगसम्पत्तये अतलवितलसुतलादयः सप्ताधोलोका आसुरसुखभोगार्थं निर्मिता इति विवेकः । तेषु भूलोकान्तर्गतोऽयमस्माकं मृत्युलोकोऽस्ति । ननु अनेन सह साक्षात्सम्बन्धभाक् सुखभोगक्षम इहत्यो लोकः पितृलोक उच्यते । दुःखभोगायापि अनेनैव सम्बन्धभाग् एतदन्तर्गत एव नरकलोको विद्यते । इत्थञ्चाभ्यां पितृलोकनरकलोकाभ्यामेव सुख-दुःखभोगनिर्वाहे सिद्धे प्रेतलोकस्य तु किमपि प्रयोजनमेव न सिध्यतीति शङ्कायाः समाधानं कृत्वा जन्मान्तररहस्यं स्फुटं प्रतिपादयितुमाह—

सुखदुःखमयात्मिकाया द्विविधाया अपि गतेर्भिन्ना एका तृतीया गतिरपि विद्यते, यद्गतिभोगाश्रयो लोकः प्रेतलोको निगद्यते यां प्रेतत्वगति माहु र्महर्षयः । मूर्च्छातस्तस्या उत्पत्तिर्भवति । स च मृत्युलोकसान्निध्यभाग् इति श्रुतिरेव प्रमाणयति । तथा हि—

"ये सूर्य्यन्नतितिक्षन्त आतपन्तममुं दिवः ।
अरायान् वस्तवासिनो दुर्गन्धीं लोहितास्यान् ।
मककान् नाशयामसि" इति ॥

वेदोक्तोऽयं मन्त्रः प्रेतावेशं मोचयितुं प्रयुज्यते। गीतोपनिषद्यपि प्रेतत्व-साधकं प्रमाणमुपलभ्यते। तथा हि—

"प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः"

इत्यादिवाक्यकदम्बैः प्रेतयोनिः प्रमाणिता विद्यते। यदा जीवः स्थूल-शरीरं विजहाति तदा स चरमं प्रबलतमं संस्कारं स्वान्तःकरणे संगृह्यैव मानव-पिण्डं त्यजति। यथा सप्तस्वपि धातुषु पतितेनायस्कान्तमणिना केवलं लौहमेवा-कृष्यते, तथैव तेन चरमसंस्कारेण प्रबलतमेनाकृष्टा बहवः संस्काराः कर्माशया-दाकृष्टाः प्रारब्धशब्दवाच्या भवन्ति। तैरेव च भविष्यज्जीवनार्थं जात्यायु-र्भोगा निर्मीयन्ते। परन्तु जीवानां मृत्युवेलायां यदीयं सरला गतिर्न लब्धा स्यात्, तस्य पञ्चत्वमासादयिष्यतो जीवस्यान्तःकरणं चरमं प्रबलसंस्कारं संग्रहीतुं च न समर्थं स्यात्। केनाऽपि कारणविशेषेण मूर्च्छया समाक्रान्तः स मूर्च्छितो भवेच्चेत्तदा या गतिस्तेनासाद्यते सैव प्रेतत्वशब्दवाच्या गीयते।

प्रेतलोकोऽपि दुःखपूर्ण एव; किन्तु तत्रैतादृशी मूढावस्थाऽपि काचित्स-ञ्जायते यस्यां दुःखानुभवो नानुभूयते। इत्यत एवाऽयं लोकः स्वर्गनरकाभ्यां विल-क्षण एवेति ज्ञातुं शक्यते। प्रेतत्वं हि, अल्पीयसाऽपि समयेन भोक्तुमपार्य्यते बहुना दीर्घेणाऽपि कालेन भोक्तुं शक्यते। अन्तत इदन्तु सर्ववादिसम्मतमस्ति यत् स्थूल-शरीरत्यागवेलायां जीवे केनापि विशेषकारणेनैव प्रेतत्वदशा संक्रा-मति ॥१७६॥

प्रकृतविषयं पुनरपि स्पष्टयति—

असाधारण्यं तस्य ॥१७७॥

दुःखमयस्य नरकलोकस्य, सुखमयस्य च बहुविधस्य स्वर्गलोकस्य गतिभ्यां प्रेतलोकस्य काऽपि विलक्षणैव गतिः श्रूयते। प्रथमतस्तु गतिरियं सर्वतोभावेन तमोगुणाश्रितत्वात् मूढगतिर्जैर्गीयते। द्वितीयतश्च मृत्युलोकसान्निध्यभागेव प्रेतलोक इति तत्र गतौ न दूरगमनापेक्षा, तृतीयतश्च स्वर्गलोके नरकलोके वा गमने जीवोऽन्यसंस्कारयुक्तमेव शरीरमधिगच्छति, इह प्रेतलोके तु न तथा। यतो हि प्रेतदेहः प्राक्तनमृत्युलोकस्थदेहानुरूप एव भवति। चतुर्थतश्च प्रेतशरीरे प्राक्तनः सर्वोऽपि संस्कारो जाग्रदेव तिष्ठति। अन्यस्मिंस्तु शरीरे नैवं भवति। इत्यादिकारणकलापैरिदमवश्यमभ्युपगमनीयं यत् प्रेतलोको हि सर्वेभ्योऽन्येभ्यो लोकेभ्यो विलक्षण एवेति ॥१७७॥

प्रसङ्गतः प्रेतश्राद्धस्य वैशिष्ट्यं ब्रूते—

तस्माद् वैशिष्ट्यं प्रेतश्राद्धस्य ॥१७८॥

को हि जीवः प्रेतो भवति, को न भवतीत्यस्य ज्ञानाभावात् सर्वेषामेव कृते प्रेतश्राद्धकल्पो विधीयते । उक्तञ्च महर्षिणा मरीचिना—

"प्रेतान् पितॄंश्च निर्दिश्य भोज्यं यत् प्रियमात्मनः ।
श्रद्धया दीयते यत्र तच्छ्राद्धं परिकीर्तितम् ॥"

इदं हि सर्वस्यापि श्राद्धस्य शास्त्रीयं लक्षणं विज्ञेयम् । एतद्धि श्राद्धस्य वैशिष्ट्यम् । विषयिणां मानवानां मरणानन्तरं प्रेतत्वं सुस्थिरमेवेत्यत एव प्रेतश्राद्धस्य विधिः श्राद्ध-प्रणाल्यामवश्यकरणीयत्वेनाङ्गीकृतोऽस्ति । को हि प्रेतो जातः कश्च न जात इत्यस्य ज्ञानं यदा साधारणबुद्धिधारिभि र्न कर्तुं पार्य्यते, तदा प्रेतश्राद्धं विधाय प्रेतत्वमुक्तिकरणोपायश्चावश्यं विधेय इति धर्माचार्य्याणां सिद्धान्तः । वस्तुतः प्रेतत्वप्राप्तिश्च मृत्युलोकतः प्रस्थानवेलायामेव भवति । अन्यै र्भोगलोकैः सह तस्य न कोऽपि सम्बन्धो ज्ञेयः । मानवः प्रेतत्वान्मुक्तो भूत्वा नरके स्वर्गे वा समुपसर्पति । ततश्च परावर्तनवेलायां प्रेतलोकस्य कोऽपि सम्बन्धो न भवति । अन्यच्च प्रेतत्वप्राप्ति र्हि अन्यलोकप्राप्तौ बाधिकैव गीयते । यतो हि मूर्च्छातस्तस्योत्पत्तिर्भवति । अतश्च प्रेतत्वनिवृत्तये यावन्त उपाया निर्णीतास्तेषां वैशिष्ट्यमवश्यमङ्गीकरणीयम् ॥ १७८ ॥

प्रसङ्गतः श्राद्धस्य विज्ञानं निर्वक्ति—

श्रद्धामूलकं श्राद्धम् ॥१७९॥

प्रेतश्राद्धस्यावश्यकत्वे सिद्धे तत्र श्राद्धविज्ञाने स्वत एव जिज्ञासोदेति इत्यतोऽभिधत्ते । श्रद्धा विश्वासो मूलं निदानं यत्र तद्धि श्राद्धं कथ्यते । फलतः श्राद्धक्रियाया अनुष्ठाने श्रद्धैव प्रधानं कारणम् । या हि मनोमये कोशे श्रद्धाजन्या क्रियोत्पत्ति र्भवति, तयैव क्रियया लोकान्तरगस्यान्यस्य जीवस्य तृप्तिर्भवति । सूक्ष्मं हि जगत् प्राणमय-मनोमयकोशाभ्यां परिव्याप्तम् । केवलम् अन्नमयकोश एव सर्वस्मिन्नपि लोके सर्वास्वपि अवस्थासु पृथग् विभिन्न एव तिष्ठति । वस्तुतस्तु अन्नमयकोश एव पिण्डशब्देनाभिधीयते । इदञ्च प्रागेवाभ्यधायि यदिह मृत्युभूमावन्नमयकोश एवावशिष्यते, अपरे तु चत्वारोऽपि कोशा लोकान्तरेऽपि गतागतमातन्वन्ति । क्रियाविचारतश्च मनसः सर्वेन्द्रियाऽऽधिपत्येन सर्वेन्द्रियसंचालकत्वेन च मनोमयकोशस्य प्राधान्यमूहनीयम् । इत्थञ्चैकपिण्डस्थमनोमयकोशेनान्यपिण्डग-मनोमयकोशस्य स्वजातिमूलकाऽतितरां घनिष्ठः सम्बन्धोऽध्यवसेयः । इत्यस्मादेव हेतो र्यदि कश्चित्सम्बन्धविशिष्टः

पुमान् पितृलोकगतं प्रेतलोकगतं वा स्वसम्बन्धिनं श्रद्धया स्मरति चेत्तदा सा तदीया स्मृतिस्तस्य स्वसम्बन्धिनो मनोमयकोशं शीघ्रमेव स्पृशति। ध्यातृध्येययो र्मनोमयकोशगतमावरणं दूरत्वं वा सा श्रद्धैवामूलमपसारयति। येन न तयोरन्तराले आवरणलेशोऽपि तिष्ठति। श्रद्धाबलेन मृत्युलोकस्थाऽपि मनोमयकोशशक्तिरन्यलोकीयमनोमयकोशं यावदुपतिष्ठति। तत्रोपेत्य च तृप्तिं सम्पादयति। श्रद्धायाश्च त्रयो भेदाः विज्ञेयाः। तथा हि—

प्रथमा तामसी प्रोक्ता द्वितीया राजसी मता।
तृतीया सात्त्विकी ज्ञेया श्रद्धैवं त्रिविधा स्मृता॥

तत्र विश्वासप्रधाना तामसी, जिज्ञासाप्रधाना राजसी, ज्ञानप्रधाना सात्त्विकी चेति विश्वास-जिज्ञासा-ज्ञान-प्राधान्येनैव ताः स्वकार्य्याणि सम्पादयन्ति। इत्थञ्च श्राद्धेऽन्धविश्वासबहुला तामसी श्रद्धैव बहूनि कार्य्याणि संसाधयति। यतो हि विश्वाससहचरी सा द्रुतमेव लोकान्तरेऽन्तःकरणस्य सूक्ष्मसूक्ष्मां गतिं प्रापयति। श्राद्धक्रिया विशेषतः साधारणगृहस्थानां कृते एव विहितास्ति। उन्नतानां तत्त्वज्ञानिनां कृते तु कृतायामकृतायां वा श्राद्धक्रियायां न विशेषतो हानि र्लाभो वा प्रत्यक्षतः समुपलभ्यते। यतो हि ते तत्त्वज्ञानिनो महात्मान आत्मारामा भवन्ति। इत्यस्मादेव हेतोः सन्यासिनां कृते श्राद्धस्य विधिर्नावलोक्यते। आत्मज्ञानिना पुंसा च स्मृता एव परलोकान्तरिता जीवा यथेच्छं शान्तिभाजः सन्तृप्ता भवन्तीत्यपि गीयते।

योगदृष्टिसम्पन्ना योगिनस्तु प्रत्यक्षं कुर्वते यच्छ्राद्धे समाहूताः प्रेतत्वभाजो जीवाः पितृलोकगामिनो वा जीवाः श्राद्धकर्त्रा श्रद्धयोपेतेन मनसा प्रतिपादितानि सर्वाणि वस्तुजातानि यथावद् गृह्णन्तीति। श्राद्धकल्पे च मनःशुद्धि-वाक्यशुद्धि-द्रव्यशुद्धीनां तिसृणामपि समानमस्ति प्रयोजनम्। आसामेकस्या अपि वैगुण्ये श्राद्धे वैगुण्याशङ्का सम्भाव्यते। यथायोग्यं शास्त्रप्रतिपादितैः पदार्थजातै र्द्रव्यशुद्धिर्भवति। यथार्थमुच्चारितैश्च शास्त्रीयमन्त्रैर्वाक्यशुद्धिरवसेया। श्रद्धया च मनःशुद्धिः सम्पाद्यते। तत्रापि श्राद्धक्रियाया अलौकिकत्वविचारणया मनःशुद्धिप्रधानैव श्रद्धाऽभ्यर्हितेति सिद्धान्तः। केचन तु श्राद्धकल्पे वाक्यशुद्धिप्रधानां श्रद्धामभ्यर्हितामामनन्ति। तथा हि—

"पितरो वाक्यमिच्छन्ति, भावमिच्छन्ति देवताः। इति॥ १७९॥

सिद्धान्तमिमं पुनर्द्रढयति।—

तत्रातो मनःक्रियाप्राधान्यम्॥ १८०॥

तत्रातो मनःक्रियाप्राधान्यम् ॥ १८० ॥

श्रद्धायाः मनोधर्मत्वात् सर्वप्राधान्याच्च श्राद्धक्रियायां मानसिक्या एव

क्रियायाः प्राधान्यमित्यभ्युपगमनीयमेव । मनसि जायमानायां शुद्धश्रद्धायां तस्य त्रिविधा शुद्धिः स्वयमुदेति । तथा श्रद्धया तदाकारतामापन्नं मनः पवित्रं भवति । श्रद्धा भक्तिश्च श्रीमतो भगवतश्चरणारविन्दस्थानीये गण्येते । इत्यत एव श्रद्धाभक्तियुक्तमन्तःकरणं श्रीमद्भगवच्चरणारविन्दसन्निहितं भवति । इत्थञ्च स्वत एव श्रद्धया मनसोऽप्याधिभौतिकी शुद्धिर्भवति । श्रद्धायुक्तञ्च मनः कर्मनियामकानां देवानां कृपामाश्रयति, यतो हि तस्य दैवराज्येन सम्बन्धो जायते । ततश्चैकं पिण्डगं मनो द्वितीयपिण्डकार्य्यकृत् भूत्वाधिदैविकशुद्धिभाग् भवति । श्रद्धाबलेन च मनो यदा ऐकाग्र्यं भजते, तस्य विक्षेपसङ्घाः स्वयमेव विलयमृच्छन्ति, तदैव स जीवः शिवसायुज्यं प्राप्नोति, एषैव मनस आध्यात्मिकी शुद्धिरिष्यते । या च श्रद्धाबलेन स्वत एवासाद्यते । श्रद्धया त्रिविधशुद्धिविशिष्टे मनसि श्राद्धयज्ञे नियुक्ते सति तत्र यज्ञे मनःक्रियाप्राधान्यमेव भविष्यति अत्र कः सन्देहः ।

श्राद्धयज्ञे मनोविज्ञानस्य प्राधान्यमिति अन्तर्दृष्टिसम्पन्नाः पुरुषास्तु प्रत्यक्षतो जानन्त्येव । परन्तु परलोकगामिभिरात्मभिः सम्बन्धस्थापनाभिलाषिणः परलोकतत्त्ववेत्तारोऽपि स्वल्पपरिश्रमेणैव तत्तत्त्ववेदिनो भवन्तीत्यपि विभाव्यमेव । प्रेतगणाश्च दूरवर्तिनोऽपि स्मरणमात्रेणैव नैकट्यभाजो भवन्ति । श्राद्धतत्त्वं हि मानसक्रियामूलकमिति, ये चात्मानो नैव प्रेतत्वमाश्रयन्ति तेषां कृतेऽपि कृतं श्राद्धं निष्फलं न भवति । यस्य श्राद्धो भवति स कस्मिन्नपि लोके कस्यामपि योनौ गतः स्यात्तदा तच्छ्राद्धीयं द्रव्यं तस्य तल्लोकयोनियोग्यभोगोपयोगिनः पदार्था भूत्वा तस्मिन्नेव लोके तस्यामेव योनौ तं श्राद्धोद्देश्यजीवं प्रीणयतीति शास्त्रीयःसिद्धान्तः । यथा तडित्प्रवाहमाश्रित्य एकदेशीयं रूपं शब्दं वा देशान्तरे गत्वा तत्तद्रूपशब्दस्वरूपेण परिणमते । तथैव श्राद्धान्नमेकस्माल्लोकाल्लोकान्तरे गत्वा मनसो व्यापकशक्तिप्रभावेण तत्तल्लोकीयभोग्यपदार्थरूपेण परिणमते । यथोक्तं स्मृतिशास्त्रे—

देवो यदि पिता जातः शुभकर्मानुयोगतः ।
तस्यान्नममृतं भूत्वा देवत्वेऽप्यनुगच्छति ॥
गान्धर्वे भोगरूपेण पशुत्वे च तृणं भवेत् ।
श्राद्धान्नं वायुरूपेण नागत्वेऽप्यनुगच्छति ॥
पानं भवति यक्षत्वे राक्षसत्वे तथामिषम् ।
दानवत्वे तथा मांसं प्रेतत्वे रुधिरोदकम् ॥
मानुषत्वेऽन्नपानादि नाना भोगरसो भवेत् ॥ १८० ॥

भूयोऽपीदं विज्ञानं द्रढयति—

तस्माद्विशिष्यते तर्पणम् ॥ १८१ ॥

तस्मात् श्राद्धतत्त्वे मनसः प्राधान्यात् तर्पणं मनोयोग-मूलक-जल-प्रदान-मात्र-साध्यं कर्म विशिष्यते विशिष्टं भवतीति सूत्रार्थः। श्रुतिसम्मतशास्त्रेषु तर्पणमहिमा बाहुल्येन गीयते। यथा शातातपस्मृतौ—

तर्पणं तु शुचिः कुर्य्यात् प्रत्यहं स्नातको द्विजः।
देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमम् ॥

योगियाज्ञवल्क्येनाप्युक्तम्—

नास्तिक्यभावात् यश्चापि न तर्पयति वै सुतः।
पिवन्ति देहनिस्रावं पितरोऽस्य जलार्थिनः ॥

अनेन पितृभ्यः स्वदेहनिस्राव-प्रदानेन स घोरां पापयोनिमृच्छति। धर्म्माचार्य्याः तत्त्वदर्शिनो महर्षयोऽसमर्थानां साधकानां कृते तर्पणयज्ञविधानेन सुमहत् सारल्यं व्यदधुरिति महाकारुण्यं तेषाम्। तथा हि—दैवराज्येन सम्बन्धभागूब्रह्मयज्ञो दैवयज्ञः पितृयज्ञो भूतयज्ञश्चेति चत्वारोऽपि महायज्ञाः केवलमेकेन तर्पणानुष्ठानेनापि पूर्णतामधिगच्छन्ति। तत्र च तर्पणयज्ञे केवलस्य मनसो जलस्य चेत्युभयस्यैवापेक्षा विद्यते, नान्यस्य द्रव्यस्य तादृगावश्यकत्वम्। एतेन सिध्यतीदं यत्तर्पणयज्ञेन कीदृगलौकिकं कार्य्यं सिध्यतीति। इह तर्पणयज्ञे श्रद्धालुः साधकः केवलं श्रद्धाबहुलो भूत्वा जलमात्रावलम्बनेन स्वमनोमयकोशं चालयति, तदा तस्य मनःशक्तिः पितृलोके समुपेत्य पितृगणान्, देवलोके समुपस्थाय देवान्, ऋषींश्च तर्पयति। ततश्च तद्द्वारैव आब्रह्मस्तम्बपर्य्यन्तं जगत् तर्पयतीति समुदीरितं स्मृतिशास्त्रे—

आब्रह्मस्तम्बपर्य्यन्तं देवर्षिपितृमानवाः।
ते सर्वे तृप्तिमायान्ति पुंसा दत्तैस्तिलोदकैः। इति ॥ १८१ ॥

पुनरपि प्रकृतमेव विज्ञानं पुष्णाति—

सिकतापिण्डमापदि ॥ १८२ ॥

मनःशक्तेः श्रद्धायाश्च माहात्म्यमीदृक् प्रवलं विद्यते, यदापत्काले बालुकापिण्डेनाऽपि श्राद्धयज्ञः पूर्णतामासादयति। तत्प्रदानेनैव तत्तल्लोके पितृगणाः स्वभोग्यान्नमासाद्य तृप्तिमृच्छन्ति। एतदपि श्राद्धतत्त्वस्य श्रद्धामूलकत्वे प्रत्यक्षं प्रमाणमवसेयम्। तथा हि शास्त्रम्—

निर्धनो दुर्गतो मग्नः पितृश्राद्धे समागते।
रुदन् सरित्तटे गत्वा वालुकापिण्डमन्ततः।

निर्वपेच्छ्रद्धयाविष्टः पितॄनुद्दिश्य भक्तितः ।
तेनैव पितरस्तस्य तृप्तिमायान्ति नैष्ठिकीम् । इति ।

वस्तुतः श्रद्धाशालिना मनसैव श्राद्धस्य सर्वमपि कृत्यं सिध्यति । तेनैव च साधु देवर्षिपितरस्तृप्तिमायान्तीति विज्ञानमिदं पूर्वसूत्रे साधु समर्थितम् ।

साधारणशक्तिमतां मानवानां केवले मानसयागे श्रद्धामूलके च श्राद्धतत्त्वविज्ञाने नैव विश्वासो दार्ढ्यमुपैति, नापि तेषां मनःशक्तिः केवलमनायाससाध्या, साधारणोपायसाध्या वेति तेषामेव श्रद्धामनःशक्त्युत्पत्त्यै श्राद्धयज्ञे बहूनां साधनानां विधानं, प्रयाससाध्या बहुवित्तव्ययकराश्चोपायाः सामर्थ्यवतां कृते समुपन्यस्ताः । इत्यत एव सर्वसाधनविरहितः पुमान् सत्यश्रद्धाविशिष्टः श्राद्धयज्ञमनुतिष्ठन् स्वासामर्थ्यमयोग्यताञ्च परिदर्शयन् दीनमानसस्तीव्रश्रद्धया मानसं वालुकापिण्डमेव निर्वपति चेत्, तस्यापि सम्पूर्णमेव श्राद्धयज्ञफलमुपतिष्ठते । अयं हि श्रद्धामहिमा मानसयज्ञस्य शक्तेरेवाविर्भावक इति सुतरां विमर्शनीयम् । उक्तञ्च शास्त्रेषु—

"उत्तमो मानसो यागो बाह्यपूजाऽधमाऽधमा" । इति ।

वस्तुतो बाह्यपूजायां समर्पिताः फलपुष्पनैवेद्यादयः पदार्थाः साक्षाद् दैवादिलोकान्तरे नैव गच्छन्ति । किन्तु केवलं तेषां पदार्थानां धारणायुक्तं मनः श्रद्धाबलेन संस्कृतं सत् रूपान्तरं कृत्वा तानेव पदार्थान् सूक्ष्मलोकान्तरं प्रापयतीति बाह्यपूजायामीदृशी प्रणाली कार्य्यसम्पादिका निगद्यते । मानसयागेन तु सर्वमपीदं द्रुतमेव साधितं भवतीति सरलः पन्थाः । परन्तु तत्र मानसिकयोग्यतायाः ध्रुवमावश्यकताऽपेक्षिता भवतीत्यपि विभावनीयम् ।

ननु मानस-यागस्याभ्यर्हितत्वेन वालुकापिण्डार्पणेनापि सिद्धे क्वापि श्राद्धे वालुकापिण्डार्पणतया समर्पयितुः पितृभ्यो वालुकैवोपतिष्ठते उतान्यत्, वालुकोपस्थितौ च कथं तेषां पितॄणां तृप्तिरित्यादिशङ्कायाः समाहितिमाह—यत् श्राद्धकर्ता हि विपन्निमग्नो वालुकापिण्डदानबुद्ध्या तु श्राद्धं न करोति । किन्तु श्रद्धालुः सोऽतिदारिद्र्यात् श्राद्धार्थं किमपि वस्तु स्वशक्त्या अलभमानो वालुकावलम्बनेन पिण्डं निर्माय मानसपूजया स्वपितॄन् तर्पयति । अपरतश्च पितृतृप्तिक्षमं पदार्थजातञ्च मनसैव समर्पयतीति नासामञ्जस्यम् । तात्पर्य्यंत एवंविधे श्राद्धयागे मनःसंकल्पितानामेव पदार्थानां समर्पणं विधीयते ।

ननु शास्त्रादिषु यत् समुपलभ्यते—

"पितरो वाक्यमिच्छन्ति भावमिच्छन्ति देवताः"

इत्यस्य वाक्यस्यानेन विज्ञानेन सह कीदृक् सम्बन्धः स्यादिति प्रश्ने-

उत्तरयति—यदस्य विज्ञानस्यावगतये प्रथमतः श्रद्धाभक्त्योर्लक्षणमवगमनीयम्। तथा हि श्रद्धा विश्वासमूलिका भक्तिश्चानुरागमूलिका; कुत्रचन क्रियायां क्वचन देशे काले पात्रे वा दृढविश्वाससत्त्वे श्रद्धोत्पद्यते। भक्तेर्मधुरः प्रवाहस्तु साधकस्यान्तःकरणतले तावन्न प्रवहति यावत्तस्य तदन्तःकरणं क्वचनेष्टविशेषे अनुरागप्रवणं न जायते। यतो हि शास्त्रेषु भक्तिविषये श्रूयते—

"सा पराऽनुरक्तिरीश्वरे"।

इत्यत इदं सिध्यति यद् देवताभिधे इष्टदेवे पूर्णानुरागे समुत्पन्ने सत्येव भक्तिरुदेति, भक्त्यैव च स इष्टदेवः प्रसीदति। उपासनायज्ञस्येदमेव रहस्यम्। पितृयज्ञस्य श्राद्धादिकल्पस्य तु किमप्यन्यदेव रहस्यमस्ति। तथा हि श्राद्धकल्पे साधारणतया श्रद्धोत्पत्तये वाक्यरूपमन्त्रोपरि विश्वासस्थापनमेव प्रधानम्। तर्पणश्राद्धरूपयज्ञेषु मानसयागस्य रहस्यानभिज्ञः साधारणो यज्ञकर्त्ता यावन्मन्त्रोपरि दृढं विश्वासं न प्रतिष्ठापयति तावत्तस्यान्तःकरणं श्रद्धासाहाय्येन त्रिविधां शुद्धिं नैवासादयितुमर्हति। अतश्च साधारणतया पितृयज्ञेषु वाक्यात्मकमन्त्राणामावश्यकत्वं स्वीकृतमास्ते ॥ १८२ ॥

पुनरपि प्रकृतमेव विषयं दृढयति—

संस्कारवैचित्र्यं कार्य्यकारणभेदात् ॥ १८३ ॥

कार्य्यञ्च कारणञ्च ते तथोक्ते, तयोर्भेदात् संस्काराणां वैचित्र्यं वैलक्षण्यम् इति सूत्रार्थः। स्वाभाविकस्य संस्कारस्यैकविधत्वेऽपि अस्वाभाविकस्य तस्यानन्तं वैचित्र्यपूर्णं नानात्वं दुर्वारमेव। एतस्य तात्पर्य्यमस्ति यद् कारण-कार्य्ययोर्भेदस्तिष्ठति। संस्कारः कर्मणः कारणं भवति, कर्म च संस्कारस्य कारणं भवति। यथा बीजं वृक्षस्य कारणं, वृक्षश्च बीजस्य कारणमिति। इत्थञ्चास्वाभाविकसंस्कारेषु क्रमशः शनैःशनैर्भेदप्रसङ्गेन वैचित्र्यपूर्णतामाश्रितेषु कतिभिरेव संस्कारैर्नियमिता जात्यायुर्भोगा उत्पद्यन्ते। तैश्च जात्यायुर्भोगैरनन्तानां जात्यायुर्भोगानामुपयोगीनि कर्म्माणि निर्मीयन्ते, तैश्च वैचित्र्यपूर्णाः संस्काराः संगृह्यन्ते। अनेनैव प्रकारेण संस्काराणां विचित्रता वर्द्धते ॥ १८३ ॥

इदानीं शङ्कासमाधाने अभिधत्ते—

अन्योन्याश्रयित्वं समस्य ॥ १८४ ॥

ननु एवं वैचित्र्यपूर्णेभ्यः संस्कारेभ्यः कथं नियमिता जात्याभोगा उद्भवन्तीति शङ्कायाः समाधानार्थमेवास्य सूत्रस्यावतारः। यदा संस्काराः समभावापन्ना एकश्रेणिगा भवन्ति, तदा ते परस्पराश्रिता भवन्ति। यथा हि

वकश्रेणयो हंसश्रेण्यश्च परस्पराश्रिता भवन्ति तथैवैकश्रेणिगाः संस्काराः परस्पर-साान्निध्यभाजः । इत्यत एव ते सर्वे मिलित्वा नियमितान् जात्यायुर्भोगान् निर्माय नूतनं जन्म ग्राहयन्ति। एकस्य स्थूलशरीरस्य पातानन्तरं द्वितीयस्य स्थूल-शरीरस्योत्पत्तितः पूर्वम् एकविधो हि प्रबलः संस्कारः स्वश्रेणिगान् कियतः संस्कारान् समभावापन्नतया स्वत एवाकृषति, तदा ते बीजस्य वृक्षात्मना परिण-तेरिव नूतनं पिण्डं निर्माय नवीनं भोगजीवनं सम्पादयन्ति ॥ १८४ ॥

प्रसङ्गतः संस्कारशुद्धिं प्रमाणयति—

तच्छुद्धौ वेदाः प्रमाणम् ॥ १८५ ॥

कथं च संस्कारशुद्धिर्भवति स च शुद्धः संस्कारः कथं क्रियाशुद्धिं विदधाति तथा च क्रियाशुद्ध्या कथम् अभ्युदयनिःश्रेयसौ सम्पादयति । इत्यत्र वेद एव प्रमाणम् । संस्कारशुद्ध्या हि प्रथमं क्रियाशुद्धिर्भवति ततश्चाभ्युदय-निःश्रेयसौ भवतः । अस्वाभाविको हि संस्कारः शुद्धो भूत्वा स्वाभावि-केन संस्कारेण संगत्य कथं निःश्रेयसं प्रापयति, कथं च परिशुद्धः संस्कारो गता-गतचक्रं विलङ्घयय्य कैवल्यं लम्भयतीति पूर्वमेव साधु समर्थितम् ।

ननु कर्मगतेः संस्कारगतेश्चातिदुर्ज्ञेयतया कीदृशात् कर्मणः कीदृशस्य संस्कारस्य, कीदृशाच्च संस्कारात् कीदृशस्य कर्मणः समुत्पत्तिरिति, तथा कीदृशस्य च संस्कारस्योत्पत्त्याग्रेऽभ्युदयनिःश्रेयसयोः पन्थाः सरलः सम्पद्यते, इत्यादीनां प्रश्नानां किमुत्तरमिति जिज्ञासायां लौकिकबुद्धेरगम्यतया ज्ञानमय-वेदस्यैवेह प्रामाण्यमिति निर्णीतः पन्थाः ।

स्मृतावप्युक्तम्—

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।
एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता । इति ।

वेदानां तत्सम्मतशास्त्राणाञ्चाभ्रान्ततया तदनुसारेण संस्कारसंग्रहणेऽ-वश्यं प्राप्तिः कल्याणस्येति निश्चितम् ॥ १८५ ॥

प्रकृतविषयं पुनर्द्रढयति—

अज्ञानपिहितस्य तदाश्रयाच्छ्रेयः ॥ १८६ ॥

अधिकारिणामुत्तममध्यमाधमभेदेन तिस्रः खलु श्रेणयो भवन्ति । उत्त-मोऽधिकारी स्वत एव योगानुशासनाधीनो भवति । अतश्च स सदात्म-निरत इति तस्य संस्काराः शुद्धा एवोद्भवन्ति, अपरतश्च तस्य बाह्य-परामर्शापेक्षैव न भवति । परन्तु मध्यमराजसिकाधिकारिण सन्देहसत्त्वात्

अधमाधिकारिणि च प्रमादसत्वात् वेदाश्चैव तयोः प्रधानमालम्बनम्। इत्यस्मादेव हेतोराचारकर्मणो युक्तिविचारविरहितो भूत्वा श्रुतिस्मृतिसमुदिताज्ञा-प्रतिपालनमेव समुचितम्।

उक्तञ्च मनुना—

श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः।
इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम्॥
श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ॥

अन्यत्रापि—

श्रुतिस्मृती ममैवाज्ञे उल्लङ्घ्ये नैव कर्हिचित्।
आज्ञालङ्घी मम द्वेषी मद्भक्तोऽपि ह्यवैष्णवः॥ १८६॥

सम्प्रति संस्कारपरिणामरहस्यं ब्रूते—

संस्कारपरिणामो बीजपरिणामवत् ॥ १८७ ॥

संस्काराणां परिणामः परिणतिः बीजानां परिणामवत् परिणतिवज्ज्ञेय इति सूत्रार्थः। यथा बीजादङ्कुरोद्गमोऽङ्कुराच्च वृक्षविस्तारः तस्मात्फलोद्भवो भवति, पुनश्च फलाद्बीजं बीजादङ्कुरक्रमेण वृक्षोत्पत्तिरिति बीजवृक्षचक्रं सदा परिवर्तते, तथैव संस्कारात् कर्म, कर्मणः शुभाशुभफलं पुनः कर्म पुनश्च संस्कार इति संस्कार-कर्म-चक्रं सदैव विवर्तते। फलत एकस्मात् संस्कारात् कर्मोत्पत्त्या तदुपभोगेन तद्विमुक्तिसत्वेऽपि बीजवृक्षवत् क्रमचक्रं प्रचलत्येव। येन जीवस्य गतागतचक्रं न परिसमाप्यते यतश्च जीवो न विमुक्तिमृच्छति॥ १८७॥

इदानीं संस्काराद्विमुक्तिरहस्यमभिधत्ते—

अकामे भ्रष्टबीजवत् ॥१८८॥

संस्कारस्येदृशीं दुर्दमनीयां प्रबलां शक्तिं निरीक्ष्य ततः पृथक्भवनाय स्वत एवेच्छोदेति। तदुच्यते यद्यपि संस्कारस्येदृशी प्रबला बन्धनकारिणी शक्ति विद्यते, तथापि तत्रैवम्भूतस्तस्योपायोऽप्यस्ति यस्यानुष्ठानेन संस्कारः सृष्टिसमुत्पादनेऽसमर्थः क्लीववद्भवति। यथोक्तं भागवते—

"भर्जिता क्वथिता धाना प्रायो बीजाय नेष्यते" इति।

कामनानाशविषये श्रीमता भगवता श्रीगीतोपनिषदि समीरितम्।

प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्।
आत्मन्येवात्मना तुष्टः, स्थितप्रज्ञस्तदोच्यते॥

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ॥
नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यञ्शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन्स्वपन् श्वसन् ॥
प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ।
ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥
आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत् कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥

अस्वाभाविकस्य संस्कारस्य मूलकारणं वासनोच्यते। जीवो यदा पञ्चकोशपूर्णतामधिगत्य मानवयोनावुपेत्य स्वाधीनो भवति, तदैव पूर्णशक्ति-विशिष्टः स नवां नवां वासनां संग्रहीतुं समर्थो भवति। या च वासनाप्रति-च्छाया तस्यान्तःकरणे प्रतिफलति तयैवास्वाभाविकः संस्कारः समुज्जृम्भते। यदि च तत्त्वज्ञानोदयप्रभावतो वासनासमुच्छेद एकपद एव सम्भाव्येत, तदा जीवकृतकर्म्मभिः संस्कारसंग्रहो न जायेत वासनाभावात्। यतो हि वासनैव कर्मणां बन्धकत्वे निदानम्। तस्य वासना तु ज्ञानोदयेनोन्मूलितैवास्तीति निष्कण्टकस्तस्य मोक्षमार्गः। अथवेदमपि वक्तुं शक्यते यत् उन्मूलितवासनानां जीवानां कर्मभिर्यावन्तः संस्कारास्तदन्तःकरणे संगृह्यन्ते ते सर्वेऽपि भृष्टबीज-वदङ्कुरोत्पादनशक्तिशून्या भवन्ति। यथा च भृष्टाश्चणका भक्षणोपयोगिनः सन्तोऽपि अङ्कुरोत्पादनकर्मणि त्वसमर्था एव भवन्ति। तथैव वासनाविरहितैः पुम्भिरुपार्जिता अपि संस्काराः फलोत्पादनशक्तिविरहिता एव भवन्तीति सुनि-र्णीतः पन्थाः ॥ १८८ ॥

कथमिह भवति संस्कारविमुक्तिरित्युच्यते—

क्रियामुक्तेस्तद्विमुक्तिः ॥ १८९ ॥

क्रियाणां मुक्त्या निवृत्या तेषां संस्काराणां विमुक्तिरपगतिर्भवतीति सूत्रार्थः। यथा हि—आम्रबीजमुप्तं सदङ्कुरोत्पत्त्या वृक्षरूपेण परिणमति चेत्तदा तस्य विमुक्तिरुच्यते, तथैव संस्काररूपकारणतः कर्मरूपकार्य्योत्पत्तौ जायमा-नायां सत्यां तस्य संस्कारस्य विमुक्तिर्भवतीत्यभ्युपगन्तव्यम्। वासनाभावे संस्कारस्य संस्कारत्वमेव न तिष्ठति। केवलं नाममात्रतः स्मृतिजननायैव संस्कार-शब्दवाच्यतया सतिष्ठति। वस्तुतस्तु स भृष्टबीजवदसमर्थस्तिष्ठतीति पूर्वमेवोक्तम्।

परन्तु वासनायां विद्यमानायां, फलतः संस्कारस्य स्वपूर्वस्वरूपसत्वे तु कार्य्योत्पत्त्या फलोपलब्धिजननमन्तरा स न विलयमृच्छतीति निश्चप्रचम् ॥१८६॥

तदभावे किं भवतीत्युच्यते—

तदभावे बीजस्थितिवत् ॥१६०॥

यदि पूर्वोक्तविज्ञानानुसारं बीजाद् वृक्षोत्पत्तिर्न स्यात्, फलतः संस्कारात क्रियारूपस्य भोगस्य सिद्धिर्न जायेत चेत्तदा स बीजगुप्तिवद्गोपनीय एव भवति। यथा कृषका अन्नबीजं रक्षन्ति देशकालप्राप्तौ च तद्बीजं वपन्ति, तथैव यदाऽस्वाभाविकात् संस्कारराशेः क्रियात्मकस्य भोगस्योपलब्धिर्न भवेच्चेत्तदा ते सर्वेऽपि संस्काराः कर्माशये सुरक्षितास्तिष्ठन्ति ॥ १६० ॥

तेषां स्थायित्वरहस्यमभिधत्ते—

सत्त्वतमसोर्हेतुत्वं संस्कारस्थितौ ॥ १६१ ॥

सत्त्वगुणावस्थायां तमोगुणावस्थायाञ्चेत्यवस्थयोर्द्वयोः संस्कारा न क्रियाशीला भवन्ति। तमोभावश्च प्रकृत्याश्रितः, सत्त्वभावश्च स्वरूपप्रवणो भवति। परन्तु द्वावपि अद्वैतभावमयावेवोच्येते। उदाहरणतो यथा उद्भिद आरभ्य मानवं यावद्याऽद्वैतभावमयी क्रमोन्नतिर्भवति सैव तमोमय्याः प्रकृतेः समाश्रिता गति र्निगद्यते। जीवन्मुक्ते महापुरुषे सप्तमं लोकमधिगतवति च महर्षौ शुद्धा सत्त्वभावमयी अलौकिकी स्वरूपप्रवणा गतिर्विद्यते। सहजपिण्डेन मुक्तात्मना चानयोर्द्वयोर्यथाक्रमः सम्बन्धो विद्यते। द्वयोरप्यनयोरवस्थयोः कृते द्विविधे उदाहरणे प्रत्तेस्तः। तत्र एका पूर्णा तमोगुणमयी द्वितीया च पूर्णा सत्त्वगुणात्मिका ज्ञेया। इमे एव द्विविधे अप्यवस्थे ज्ञानिष्वपि रूपान्तरत उपलभ्येते। तत्र मुक्तात्मसु ये कर्मयोगिनो भवन्ति ते स्वात्मानं कर्मप्रवाहे जडवत् प्रवाहयन्ति। ये च ज्ञानयोगिनो भवन्ति ते हि सचेष्टाः सन्त आत्मानात्मविचारं कुर्वन्तोऽग्रे संसर्पन्ति। श्रीगीतोपनिषदुक्ताः कर्मयोगिनस्तु चतुर्विधभूतग्रामवदग्रे संसरन्ति। इमौ द्वावपि प्रकृतिप्रवाहं नातिक्रामतः। सांख्यमार्गाश्रितो योगी तु सप्तमलोकाश्रितमहात्मजनसदृशो ज्ञानाश्रयेणैवाग्रे गच्छति। उक्तञ्च श्रीगीतोपनिषदि—

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः।
एकमप्यास्थितः सम्यगुभयो र्विन्दते फलम् ॥
यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।
एकं सांख्यञ्च योगञ्च यः पश्यति स पश्यति ॥

संस्कारात् कथं क्रियोत्पत्तिः, कति च प्रधानभेदाः संस्काराणाम्, संस्कारेण

सह गतागतचक्रस्य जन्मान्तरस्य च कीदृक् सम्बन्धः, संस्कारो विद्यमानोऽपि भृष्टबीजवत् निष्फलं कथं तिष्ठति, यदि भृष्टबीजवन्न स्यात्; तथा फलदोऽपि न भवेत्तदा कथं स राशीभूय एकस्मिन्नाशये तिष्ठति, इत्यादीनां सर्वेषामपि विज्ञानानां विस्तृतं विवेचनमत्र पूर्वसन्दर्भेण सम्पादितमेवेति तत्र न किमपि वक्तव्यं विद्यते ।

सम्प्रति तत्त्वज्ञानिनो महापुरुषस्य कर्माशयस्थसंस्कारसमुदया अविनश्यन्त एव क्रियाविरहिता भूत्वा एकत्र राशीभूय तिष्ठन्ति । तस्य तत्त्वज्ञानिनश्च मुक्तिमार्गे नान्तरायमाचरन्तीति विवक्षया सूत्रकृन्महर्षिरिदमुक्तवान् । उपरि उदाहरणरूपेण जीवानां द्वे स्वतन्त्रदशे दर्शिते यत्रोभयत्रापि संस्काराः निष्फला एव भवन्ति । तेनैवोदाहरणेनोहनीयम् यज्ज्ञानिनो महापुरुषा द्विविधा भवन्ति । यत्र संस्कारसमुदया राशीभूता अपि निष्फला भवन्ति तयोर्द्वयोरपि अवस्थयोरुदाहरणं श्रीगीतोपनिषदि समासाद्यते । तथा हि—

सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥
ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥

स्वस्वरूपास्थानयोग्यताशालिनां महात्मनामिमे उभे अप्यवस्थे स्वतस्तिष्ठतः । तत्र प्रथमा सांख्यावस्था द्वितीया च योगावस्था । प्राक्तनकर्मानुसारेणैव कश्चन पुमांसं सांख्यप्रधाना कश्चन योगप्रधाना इत्थमिमे उभे अप्युपसरतः। तत्र प्रथमा सत्त्वाश्रिता द्वितीया च तामसाधिष्ठिता । प्रथमावस्थायां केवलमात्मज्ञानमेवैकमवलम्बनं भवति, द्वितीयस्याञ्च तस्यां योगी स्वीयां वासनां विहाय केवलं प्रकृति-प्रवाहमात्रमेवावलम्बते । अनयोरुभयोरप्यवस्थयोः संस्कारबीजं सुरक्षितमेव तिष्ठति, न देहिनमाश्रयितुमर्हति, यतश्च देही संस्कारजालतो दूरमेव तिष्ठतीति ॥ १६१ ॥

अधुना विपरीतामवस्थां वर्णयति—

न रजसस्तद्धेतुत्वाद् ॥ १६२ ॥

तस्याङ्कुरस्य हेतुस्तस्य भावस्तत्त्वाद् रजसि रजोगुणे न तस्य सिद्धिरिति सूत्रार्थः । सत्त्वगुण-तमोगुणौ यथा परिधिं यावदुपसर्पतः न तथा रजोगुणगतिः । रजोगुणश्च चतसृभिः शक्तिभिर्विशिष्टः कथ्यते । स एव सत्त्वतमसी सक्रिये करोति, इत्यस्मादेव हेतोस्तत्राङ्कुरोत्पत्तिरपि भवति । संस्कारात्मके बीजे

रजोगुणात्मकस्य जलस्य यदा सेको जायते तदावश्यमेवाङ्कुरोद्गमो भवति। इत्यत एव रजोगुणावस्थायां संस्कारसमूहाः सदा क्रियाशीलाः फलोन्मुखाश्च भवन्ति। जीवानां सर्वापि साधारणावस्था रजोगुणकोटिगैव मन्यते। यस्य परिणति र्गतागतचक्रस्थितिरुच्यते। अनयैव दशया मनुष्यपिण्डदेवपिण्डयो-रामुक्तेः सदा सम्बन्धस्तिष्ठति॥ १९२॥

ततश्च किं सिध्यतीत्याह—

ततः शुभं वाऽशुभं वा॥ १९३॥

क्रियोपप्लुताद्रजोगुणान्मुख्यतो द्वे अवस्थे प्रजायेते। तत्रैका जीवानां कृते शुभदाऽपरा चाऽशुभदेति। यथा एक एव भगवान् कालो द्विधाऽत्मानं विभज्य दिनं रजनीञ्च निर्माति। तथैव रजोगुणः शुभमशुभं वा फलं प्रयच्छति। यद्विध जीवानां क्रमोन्नतिं विदधाति तच्छुभं निगद्यते, यच्च तदीयक्रमोन्नतौ बाधां जनयति तद्विध अशुभं फलमुच्यते। लोकान्तरे इदमेव शुभाशुभं फलं जनयति, गतागतचक्रञ्च चालयतीति॥ १९३॥

सम्प्रति सृष्टिहेतुभूतां ब्रह्मशक्तिं निर्वक्ति—

ब्रह्मशक्तिरचिन्त्या दाहशक्तिवदनलस्य॥ १९४॥

ब्रह्माण्ड-पिण्डसृष्ट्योरतिशयसान्निध्यभाजः कारणसंस्कारस्य रहस्यमुक्त्वा सम्प्रति मौलिकं रहस्यं जिज्ञापयिषुः सर्वप्रथमम् अचिन्त्याया ब्रह्मशक्तेर्विषय-मेवोत्थापयति–यथाऽग्नितस्तद्दाहिका शक्ति र्नस्वतन्त्रा किन्तु अग्निस्तद्दाहिका शक्तिश्चोभावपि तौ परस्परमभिन्नौ, यथा च दहनादिकृत्यम् अग्नेर्दाहिकया शक्त्यैव सम्पाद्यते तस्याश्च दाहिकाशक्तेः पार्थक्यमग्नितोऽचिन्त्यमेव। तथैव ब्रह्म-णस्तच्छक्तेरपि सर्वथाऽचिन्त्यः सर्वविधोऽपि सम्बन्ध ऊहनीयः॥ १९४॥

सम्प्रति सृष्टिप्रादुर्भावप्रकारमाह—

पुरुष-सम्बन्धोऽव्यक्तेन॥ १९५॥

यथा हि वह्निस्तदीया शक्तिश्च परस्परमभिन्नौ तथैव यावत्कालं यत्र वाऽद्वैत-भावस्तिष्ठति तत्र सर्वथा सृष्टेरभाव एव भवति। सर्ग-प्रादुर्भाव-वेलायान्तु प्रकृतेः स्वातन्त्र्यं प्रथमं प्रकाशते सैव निर्गुणावस्थाविमोकतः सगुणावस्थोपलब्धिरुच्यते। सैवावस्था अव्यक्तपुरुषसम्बन्धो निगद्यते। तदानीमव्यक्त-प्रकृत्या सच्चिदान-न्दात्मकस्य पुरुषस्य सम्बन्धो निरूढो भवति। यथोक्तमुपनिषदि—

'मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्'।

इयं हि सृष्टेर्मूलावस्था प्रथमं कारणमुच्यते। अस्यामेवावस्थायां प्रकृति-

परिणामः प्रारभ्यते । अयं हि प्रकृत्यालिङ्गितः पुरुषः सगुण-ब्रह्मत्वेन गीयते ॥ १६५ ॥

अपरं परिणाममाह—

ततः कालो व्यक्तश्च ॥ १६६ ॥

प्रकृतेर्द्वितीय-परिणामे तु कालो व्यक्तश्चाविर्भवतः । यदा हि प्रकृतौ सत्त्व-रजस्तमांसि त्रयोऽपि गुणाः प्रकटिता भवन्ति, फलतः प्रकृतिस्त्रिगुणात्मिका सती स्वतन्त्रसत्तावती जायते सैव प्रकृतेः व्यक्तशब्दवाच्या व्यक्तावस्थोच्यते । अत्रैवावस्थायां कालस्यापि प्रादुर्भावो गुणत्रयाभिव्यक्त्या सहैव जायते । यतो हि कालाभिव्यक्तिं विना प्रकृतेर्व्यक्तावस्था नानुभूयते । अस्यामेवावस्थायां प्रकृतिः स्वीयां स्वतन्त्रसत्तां दर्शयित्वा निर्गुणमपि ब्रह्म सगुणं सोपाधिकं वा विदधाति । अस्यामेव द्वितीयावस्थायां सा स्वाव्यक्तदशातो व्यक्तं कालमपि प्रसूते । कालनिर्वचनञ्च स्मृतिष्वेवमुपलभ्यते ।

तदेतत् सर्वमेवासीद् व्यक्ताव्यक्तस्वरूपवत् ।
तथा पुरुषरूपेण कालरूपेण च स्थितम् ॥
परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विज ।
व्यक्ताऽव्यक्ते तथैवान्ये रूपे कालस्तथा परम् ॥
प्रधानपुरुषो व्यक्तः कालानां परमं हि यत् ।
पश्यन्ति सूरयः शुद्धं तद्विष्णोः परमं पदम् इति ॥ १६६ ॥

अधुना देशरहस्यमभिधत्ते—

व्यक्तदेशयोस्तादात्म्यम् ॥ १६७ ॥

द्वैतोत्पत्तिदशायामेव प्रथमं कालः प्रकाशते, ततश्च तेनैव सार्धं देशोऽपि प्रादुर्भवति । ब्रह्मशक्तिरूपिणी प्रकृतिर्यावदद्वैतरूपेण तत्र ब्रह्मणि लीना विराजते, तस्याः स्वतन्त्रतया स्थितिर्यावन्नाभूयते सैवावस्था केवलब्रह्मपदवाच्या भवति । तस्यां ह्यवस्थायां प्रकृतिः सम्पूर्णतया विलीना तिष्ठति ।

यदा हि प्रकृतिः स्वीयस्वतन्त्रसत्तया सम्वलिता भवति तदानीं प्रकृति-पुरुष-संयोगेन याऽनुभूतिः प्रथमा बुद्धावारोहति सैव कालपरिचायिकाऽनुभूतिरुच्यते । कालश्च तत्र चित्सत्ताव्यञ्जको निगद्यते । द्वैतभावाभिव्यक्तौ सर्वप्राथम्येन कालज्ञानं स्वभावसिद्धम् । 'भाति' 'अस्ति' इत्यनयोः स्वरूपयोर्मध्ये प्रथमं भातीत्यस्यानन्तरञ्च अस्तीत्यस्य स्वरूपं प्रकटीभवति । इत्यत एव प्रथमं कालस्योत्पत्तौ सत्यां तदनन्तरं व्यक्तभावापन्नायाः प्रकृते विलासक्षेत्र-

त्मकस्य देशस्यानुभवो द्वितीयक्षणे प्रजायते। अतश्च व्यक्तभावो देशश्चेतीमौ परस्परं तादात्म्याश्रितावेव प्रतिभातः ॥ १९७ ॥

अधुनाऽपरः परिणामो निगद्यते—

गुणसाम्याद्गुणव्यञ्जकं महत् ॥ १९८ ॥

अत्र तु गुणानां कार्य्योत्पत्तिवेलायां प्रथमं महदुत्पद्यते। यथोक्तं विष्णुपुराणे—

> गुणसाम्यात् ततस्तस्मात् क्षेत्रज्ञाधिष्ठितान्मुने !
> गुणव्यञ्जनसम्भूतिः सर्गकाले द्विजोत्तम ॥
> प्रधानतत्त्वमुद्भूतं महान्तं तत् समावृणोत् ।

सांख्य-दर्शने प्रकृतेर्महान् इत्यादिपरिणामक्रमोऽभिहितो दृश्यते। इतश्च पूर्वावस्थायां गुणानां साम्यमेव तिष्ठति। तदानीन्तु भावातीतयो बुद्ध्या अग्राह्ययो र्देशकालयो रेवानुभवो भवतीत्यभ्युपगन्तव्यम्। तदनन्तरं हि स्वतन्त्रतया परिणामोन्मुखे गुणत्रये प्रथमं महत्तत्त्वमेवोत्पद्यते।

इदं सर्वमपि पूर्वोक्तं विज्ञानं स्पष्टप्रतिपत्तयेऽन्यथापि विव्रियते। तथा हि—यदा प्रकृतिः स्वातन्त्र्यमाश्रित्य ब्रह्मतः पार्थक्येन न तिष्ठति; किन्तु ब्रह्मण्येव विलीना तिष्ठति। सैवाऽद्वैतावस्थोपेता ब्रह्मसत्ता निगद्यते। यदा च प्रकृति र्ब्रह्मणः सकाशात् पृथग्भूय स्वातन्त्र्यसत्ताशालिनी प्रभवति, सैव सगुणावस्था कालदेशयोः परिचायिका। इमे अद्वैत-द्वैतात्मके द्वे अप्यवस्थे पूर्वापरीभावेन परस्परं सन्निदधाते। एतावत्कालावधि प्रकृतिरेव स्वस्वरूपेणाविर्भवति। गुणास्तु नाधुनापि स्वतन्त्रसत्ताशालिनो भवन्ति। यदा हि गुणेषु सर्वप्रथमं व्यञ्जकावस्था समुदेति तदैव महत्तत्त्वमाविर्भवति। तत्र च महत्तत्त्वे सत्त्वस्यैव पूर्णावस्था सन्तिष्ठते। इतो हि गुणानां कार्य्यावस्थाप्रारब्धिः प्रचलति। वस्तुतोऽवस्थायामस्यामेव ब्रह्माण्डपिण्डात्मिका सृष्टिः प्रारभ्यते। अस्यामेवावस्थायां शुद्धसत्त्वमय्यां प्रकृतौ द्रष्टृदृश्यभावसम्बन्धस्थितिरुदेति। "यो बुद्धेः परतस्तु सः" इत्यादिशास्त्रै र्या शुद्धा बुद्धि र्निर्दिश्यते, तयैव परिशुद्धया बुद्ध्या महत्तत्त्वस्यास्य सम्बन्धोऽवसेयः ॥ १९८ ॥

पुनश्चेदं विज्ञानं विस्पष्टयति—

त्रिगुणं तत् ॥ १९९ ॥

महत्तत्त्वस्य त्रिगुणात्मकप्रकृतिव्यञ्जकत्वात् तदाविर्भावेन सह प्रकृतेः सत्त्वरजस्तमोरूपाणां त्रयाणां गुणानामप्याविर्भावः सुनिश्चित इत्यभ्युपगन्त-

व्यम् । गुणपरिणामेऽयमकम्प्यो नियमो वर्त्तते यत् तमोगुणविकाशे सत्त्वरजसोरप्रकाशः, रजोगुणप्राकट्ये सत्त्वतमसोरनुद्रेकः, सत्त्वसमुद्रेके च तमोरजसोस्तिरोधानम् । महत्तत्त्वस्य त्रिगुणात्मकत्वेऽपि शुद्ध सत्त्वस्यैव प्राधान्यं तत्रोह्यम् । अत एव तत्र सत्त्वमेवं प्रद्युत्य प्रभवति स्ववृत्तिविकाशे । इतरे च तमोरजसी निगूढे निभृतं तिष्ठत इति न तयोः कार्य्यसद्भावः ॥ १९९ ॥

भूयोऽपि स्पष्टयितुमेवाह—

अव्यक्तमावृतं महता त्वग्बीजवत् ॥ २०० ॥

अव्यक्तभावापन्ना प्रकृतिर्हि दृश्यप्रपञ्चस्य निदानम् । पुरुषस्तु निर्लिप्तस्तद्द्रष्टृमात्रः । अनयोरेव द्रष्टृदृश्ययोः प्रथमं कार्य्यं महत्तत्वम् । तच्च महत्तत्वं प्रादुर्भवदेव अव्यक्तं त्वक्कर्त्तृकबीजाच्छादनवत्सर्वत आच्छादयति । यथा हि त्वचि सत्यां यथार्थबीजं तत्र निगूढं तिष्ठति तथैव महत्तत्त्वप्रकाशे तत्राव्यक्तभावो निगूढस्तिष्ठति । इत्यत एव प्रकृतिपुरुषात्मकसृष्टिलीलायां महत्त्वमेव सूक्ष्मातिसूक्ष्मं प्रधानं तत्त्वमुच्यते ।

अस्य विज्ञानस्यावगत्यै ब्रह्मप्रकृत्योरुभयोरेवावस्थायाः परिज्ञानमावश्यकम् । प्रकृतिर्यदा ब्रह्मणि लीना तिष्ठति । सैवाद्वैतावस्था प्रकृतेस्तुरीयावस्थोच्यते । त्रिगुणसाम्यावस्थापन्ना सा यदा परिणामोन्मुखी भवति तदा ब्रह्म-विष्णु-महेशजननी हिरण्यगर्भकालादिप्रसवित्रीति कारणप्रकृति र्गीयते । प्रकृते स्तृतीयावस्था व्यक्तावस्था निगद्यते । सैव सूक्ष्मा प्रकृतिरुच्यते । इयमेव प्रकृतिर्जगत्प्रपञ्चस्य साक्षान्निदानम् । स्थूलञ्च प्रकृतिमयं जगत्तस्याः कार्य्यं जेगीयते । इत्थमेव ब्रह्मप्रकृतिं स्थूलसूक्ष्मकारण-तुरीयात्मकरूपेण ज्ञात्वा वाङ्मनोबुद्धिवैभवातीतं सृष्टिविज्ञानं प्रत्येतुमर्हति पुमानिति ॥ २०० ॥

तदनन्तरभवं परिणाममाख्याति—

तस्मात् त्रिविधोऽहङ्कारः ॥ २०१ ॥

स्वभावादेव परिणामिनी प्रकृतिर्महत्तत्त्वानन्तरं द्वितीयं परिणाममहङ्कारतत्त्वं प्रसूते । तच्चाहङ्कारतत्त्वं त्रिगुणानुसारेण त्रिविधं भवति । अहंतत्त्वत एव जीवभावस्योदयो भवति । अहंतत्त्वबलेनैव देही स्वात्मानं स्वतन्त्रतया विराट् शरीरतो भिन्नत्वेनाध्यवस्यति । 'भाति' 'अस्ति' चेत्युभयोऽपि भावः परस्परं मिलितः स्वतन्त्रामेवान्यामेकां सत्तां जनयति, या हि अहंतत्त्व-शब्दवाच्या भवति । त्रिविधाहङ्कारविषये स्मृतय इत्थमभिदधति । तथा हि—

वैकारिकस्तेजसश्च भूतादिश्चैव तामसः।
त्रिविधोऽयमहङ्कारो महत्तत्त्वादजायत।

प्रकृतिर्हि ब्रह्मणः सकाशात् पृथग् भवन्ती निर्गुणमपि ब्रह्म सगुणं सम्पादयति। अपरञ्च तदानीं ब्रह्मणः ब्रह्मप्रकृतेश्च सत्ता पार्थक्येन प्रतीयते। यदा प्रकृतिपुरुषात्मक-श्रृङ्गारेणानन्दमयकोषस्योदयो भवति, तदानीमेव चानन्दमयकोशेनात्मा संच्छन्नो भवतीति कथ्यते। ततश्च आत्मप्रतिबिम्बिता शुद्धसत्त्वमयी प्रकृति र्महत्तत्त्वशब्दभाग् भवति। अस्यामेवावस्थायामुच्यते यदानन्दमयकोशसहित आत्मा विज्ञानमयकोशेनाच्छन्नो भवतीति। एतदनन्तरञ्च यदा जीवस्य स्वतन्त्रसत्ताऽस्मितया स्थिरीकृता भवति,तदैव त्रिगुणात्मकस्य त्रिविधाऽहङ्काररूपस्याहन्तत्त्वस्योदयो जायते। अस्यामेवावस्थायां कथ्यते यन्मनोमयकोशेन कोशद्वयावृत आत्मा आच्छादितो विद्यत इति। पूर्वदशायां यथा बुद्ध्युदयो भवति तथैव अस्यां दशायां मनसोऽप्युदयो भवतीति।

केषुचिच्छास्त्रेषु आत्मनः क्रमश आनन्दमयकोशेन विज्ञानमयकोशेन मनोमयकोशेन चावृतत्वस्योपाख्यानमासाद्यते। कुत्रचन शास्त्रेषु च प्रधानेन महतस्तत्त्वस्य तेन च त्रिविधाहङ्कारस्याच्छादनं क्रियत इत्यासाद्यते। इत्थं परस्परं विरुद्धयोः सिद्धान्तयोः शास्त्रादिषु सत्त्वे केन सत्येन भाव्यमिति शङ्कायाः समाधानमाह—

पञ्चभिः कोशैरात्मन आवरणं स्वाभाविकमेव। अपरञ्चानन्दमयकोशतो विज्ञानमयकोशस्य ततश्च मनोमयकोशस्य स्थौल्यं विज्ञानसिद्धम्। अतश्च सूक्ष्मस्य स्थूलेनावरणमपि विज्ञानसिद्धम्, तथा तद्विरुद्धदिशा प्रथमेन प्रधानेन द्वितीयस्य महतस्तेन चाहंकारस्याच्छादनमपि द्वितीयं दार्शनिकविज्ञानं नैव युक्तिविहीनम्। यतो हि यथा आकाशे वायुरोतप्रोतो वायौ च जगदित्येवंविधया तस्य समाधानमूह्यम्॥ २०१॥

तदनन्तरं जायमानं परिणाममाह—

ततः सूक्ष्म-प्रपञ्चः॥ २०२॥

त्रिविधेनाहङ्कारेण कथं सूक्ष्मस्य प्रपञ्चस्योदय इति विषयस्य वेदशास्त्रयोरनेकधा वर्णनमासाद्यते। तस्य सारांशोऽयमवसेयः। तामसाहङ्कारो हि विकारमासाद्य शब्दतन्मात्रं ससर्ज। शब्दतन्मात्रं हि शब्दविशिष्टमाकाशं ससर्ज। आकाशो हि विकृतिमासाद्य स्पर्शतन्मात्रं ससर्ज, तस्माच्च स्पर्शगुणविशिष्टो वायुरुदपद्यत। तदनन्तरं विकृताद्वायो रूपतन्मात्रा ज्योतिश्च समुदपद्येताम्। ज्योतिषि च विकृतायां रसतन्मात्रोत्पत्तिः, ततश्च तद्विशिष्टं जलं समुदपद्यत, जले

च विकृते गन्धतन्मात्रोत्पत्तिः, ततश्च तद्विशिष्टा पृथिवी समुत्पद्यते । यदीयो गुणो गन्ध उच्यते । सूक्ष्मभूतानामेव तन्मात्रशब्दवाच्यत्वमूहनीयम् ।

राजसादहङ्काराद् दशानामिन्द्रियाणामुत्पत्तिरभिहिता । सात्त्विकाच्च तस्मात्तदधिष्ठातृदेवानामिति केषाञ्चनाभिधानम् । केऽपि तु सात्त्विकाहङ्काराज्ज्ञानेन्द्रियगणो राजसाच्च कर्मेन्द्रियाणि उभयात्मकमत्र मन इत्याहुरिति ।

चेतनसाहाय्यमन्तरा न जडे क्रियोत्पत्तिः । यथा परमपुरुषसाहाय्यमन्तरा मूलप्रकृतिरपरिणामिनी तिष्ठति । तत्संयोगेनैव तदर्थं कार्य्यकरीति सांख्यसिद्धान्तः । तथैव प्रकृतिपरिणामतो जायमानाः सर्वेऽपि पदार्थाः पृथक्त्वेन स्वात्मनि स्वाधिष्ठातृदेवान् स्थापयन्ति, ये च तेषामधिदैवभावा उच्यन्ते । तेष्वेव सात्त्विकाहङ्कारस्थितिः । राजसादहङ्काराद्दशानामिन्द्रियाणां समुत्पत्तिरिति पक्षसमर्थकमिदं विज्ञानमवसेयम् । यतो हि रजोगुणस्य धर्मः क्रिया सा चेन्द्रियबलेनैव प्रपञ्चेऽस्मिञ्जायते । इत्थञ्चाहङ्कारात् सूक्ष्मप्रपञ्चोत्पत्तिरिति पर्य्यवसितम् ।

विज्ञानमिदमन्यथापि अवगन्तुम्पार्य्यते । तथा हि—आनन्दमयकोशो विज्ञानमयकोशश्च कारणप्रपञ्चशब्देनोच्यते । मनोमयकोशः प्राणमयकोशश्च सूक्ष्मप्रपञ्चो निगद्यते । प्राण एवेन्द्रियादिसाधनानां सर्वा अपि क्रियाः सञ्चालयति । अतश्च सोऽपि सूक्ष्मशरीरान्तर्गत एव कथ्यते ॥२०२॥

अधुनाऽन्तिमपरिणामं ब्रवीति—

स्थूलजातमन्ते ॥ २०३ ॥

पञ्चीकृतानां महाभूतानां कार्य्यं स्थूलप्रपञ्चशब्देनोच्यते । ब्रह्माण्डं पिण्डश्च तदीयं स्वरूपमुच्यते । स्थूलशरीरस्य विस्तरशो विवेचनं पूर्वमेवानुष्ठितम् । पिण्डानां विभेदा अपि प्रागेव यथायथं निरूपिताः । इत्थञ्च पिण्डसमूहानां ब्रह्माण्डस्य स्थूलांशानाञ्च प्रकृत्या सम्बन्धो ज्ञेयः । फलतो यत्किञ्चित् सूक्ष्मप्रकृतेः कार्य्यजातं तदेव स्थूलप्रपञ्चमुच्यते ॥ २०३ ॥

सृष्टिप्रसङ्गतोऽभिधत्ते—

पिण्डवदुत्पत्तिविनाशौ ब्रह्माण्डस्य ॥ २०४ ॥

ब्रह्माण्डस्य ब्रह्माण्डगोलकस्य उत्पत्तिविनाशौ सृष्टिप्रलयौ पिण्डवद् पिण्डसदृशावेव विज्ञेयौ इति सूत्रार्थः । यथा हि—संस्कारात्मककारणतः पिण्डसृष्टिर्जायते तथैव ब्रह्माण्डोत्पत्तिरपि विभावनीया । सञ्चिता एव संस्काराः फलोन्मुखाः सन्तः प्रयाणकाले चरमवृत्तिवशाद् विपाकमारूढा अङ्कुरिता भवन्तः प्रारब्ध-

शब्दवाच्या भवन्ति, प्रारब्धपरिपाकेनैव मानवैः पिण्डरूपं स्थूलशरीरं समासाद्यते। एवमेव "यथापूर्वमकल्पयदिति" वैदिकविज्ञानानुसारतो गतब्रह्माण्डस्य पूर्वसंस्कारस्मरणपूर्वकं सगुणब्रह्मस्वरूपो ब्रह्मा ब्रह्माण्डान्तरं निर्माति। यथा हि प्रारब्धभोगानन्तरं पिण्डपातो जायते तथैव ब्रह्माण्डस्य समष्टिप्रारब्धभोगानन्तरं तद्ब्रह्माण्डमपि महाप्रलयात्मकप्रकृतिगर्भे विलीयते ॥ २०४ ॥

प्रसङ्गतो ब्रह्माण्डोत्पत्तिकारणं विस्पष्टयति—

कारणवारि जन्महेतुः ॥ २०५ ॥

मनुष्यपिण्डेन देवपिण्डेन च सार्धं यथा कर्माशयस्य सम्बन्धस्तदुदाहरणानुसारतो ब्रह्माण्डेन सह कारणवारिणः सम्बन्धो विज्ञेयः। जीवानां कर्माशयकोशेऽनन्तकोटिजन्मनां कर्मबीजसंस्काराः सुरक्षितास्तिष्ठन्ति तेषु। च ये संस्काराः प्रारब्धीभूय उपरितनस्तरगता भवन्ति। त एव हि नूत्नं पिण्डं निर्मान्ति। तथैव ब्रह्माण्डस्यापि समष्टिसंस्कारः कारणसमुद्रः कारणवारि वोच्यते। उक्तञ्च मनुना—

"अप एव ससर्जादौ तासु बीजमवासृजत्।
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ॥"

एकस्य ब्रह्माण्डस्योत्पत्तिवेलायां कारणसमुद्रतः संस्कारराशिः सङ्घीभूय तद्ब्रह्माण्डस्य समष्टिप्रारब्धं जनयति। अतश्च कारणवार्य्येव ब्रह्माण्डोत्पत्तिहेतुत्वेनावसेयम् ॥ २०५ ॥

प्रसङ्गतोऽभिधत्ते—

तत्र त्रिमूर्त्तिः ॥ २०६ ॥

एकस्य ब्रह्माण्डस्योत्पत्तिकारणं समष्टिप्रारब्धबीजमङ्कुरितं सत् यदा ब्रह्माण्डं निर्मातुमुन्मुखं भवति, तदा पूर्वोक्तविज्ञानानुसारतः प्रकृति-परिणामः समष्टिरूपतो भवति। तत्र त्रिगुणात्मक-परिणामानुसारेण त्रयाणामपि गुणानामधिष्ठातारो ब्रह्मा विष्णु महेशश्चेति त्रयो देवा आविर्भवन्ति। यथोक्तं मनुना—

"तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।
तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥"

इम एव त्रयो ब्रह्माण्डस्य वस्तुतो नेतारो भवन्ति। एकश्च सृष्टेरपरः स्थितेरन्यस्तु प्रलयस्याधिष्ठाता भवति। यस्य ब्रह्माण्डस्येमेऽधिष्ठातारो भवन्ति, तस्य सर्वमप्यध्यात्माधिदैवाधिभौतिकप्रपञ्चजातमेषामेवाधीनं यथाक्रमं तिष्ठति ॥ २०६ ॥

प्रसङ्गसङ्गत्याऽन्यदप्याह—

ततश्चतुर्दशकलं गोलकम् ॥ २०७ ॥

अद्यावधि दृश्यप्रपञ्चजातस्य मौलिकमधिदैवस्वरूपं वर्णयित्वा सम्प्रति तस्याधिभूतस्वरूपं वक्ति । मूर्तित्रयस्याविर्भाववेलायामेव चतुर्दशसु भागेषु ब्रह्माण्डगोलकं विभक्तं तिष्ठति । कारणावस्थायां प्रकृतेस्त्रिगुणात्मिकत्वेऽपि तत्कार्य्यं सप्तसु भागेषु विभक्तं भवति । यथा हि कालः सप्ताहे, रश्मिः सप्तज्योतिषि, अन्धकारो हि सप्तच्छायावर्गे, ज्ञानमज्ञानञ्च सप्त-सप्तभूमिकायां विभक्तं तिष्ठति, तथैव ब्रह्माण्डमपि सप्तसु देवलोकेषु सप्तस्वेवासुरलोकेषु विभक्तं विद्यते । इमान्येव सप्त सप्त मिलित्वा चतुर्दशभुवनान्युच्यन्ते ॥ २०७ ॥

मूर्तित्रयेऽपि उत्पादिका मूर्त्तिः केत्याह—

उत्पादको ब्रह्मा ॥ २०८ ॥

यदा हि ब्रह्मप्रकृतिस्तुरीयावस्थायां ब्रह्मण्येव विलीना तिष्ठति तदा तद्ब्रह्म अद्वैतपदभाग् भवति । ततश्च यदा प्रकृति निजां तुरीयामवस्थां जहती सूक्ष्मावस्थां च गृह्णती स्वातन्त्र्येण स्ववैभवमासादयति, तदानीं प्रकृतेः सूक्ष्मावस्थायां तयाऽलिङ्गितः परमः पुरुष ईश्वरः पुरुषविशेषः प्रजापतिर्वोच्यते । तदनन्तरञ्च प्रकृतेः कारणावस्थायां यदा त्रिगुणविकारो विकाशमासादयति त्रयोऽपि गुणाः स्वस्वकार्य्ये स्वातन्त्र्येण तत्पराः भवन्ति । तदैव तेषां त्रयाणामपि गुणानामधीश्वराः त्रिमूर्तिशब्दवाच्या भवन्ति । तत्र तेषु ब्रह्मैव प्रथमो गण्यते । तत्र श्रुतिरपि प्रमाणयति—

"ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्त्ता भुवनस्य गोप्ता" ।

"हिरण्य-गर्भं जनयामास पूर्वम्" ।

"यो वै ब्रह्माणं विदधाति पूर्वम् ॥"

रजोगुणादेव सृष्टिर्भवति । यतो हि रजोगुणः प्रवृत्तिशीलो निगद्यते । तस्य रजोगुणस्यावलम्बेन सगुणो ब्रह्मस्वरूपो यः कार्य्यसम्पादको भवति स एव श्रीभगवान् ब्रह्मेत्युच्यते । एकस्य ब्रह्माण्डस्य सर्वमपि कार्य्यजातं तस्यैवाधिष्ठातृत्वे सम्पद्यते ।

सृष्टिविज्ञानं विस्पष्टयितुं पुनराह—यदाऽद्वैतस्वरूपतो द्वैतभावमयस्य दृश्यप्रपञ्चस्योदयो भवति, सा हि सृष्टेः प्रथमावस्था स्तरद्वये विभाजितुं शक्यते । एका हि प्रजापतेः सगुणब्रह्मणः सृष्टिर्द्वितीया हि जगत्कर्त्तुर्ब्रह्मणः सृष्टिः । सर्वतः प्रथमं ब्रह्माण्डगोलकस्यादिमावस्था समुद्भवति । फलतो जीवोत्पत्तितः पूर्वं जीवानां वासोपयोगि अण्डगोलकं सगुणब्रह्मण इच्छानिच्छारूपे-

च्छया प्रकृतिस्वभावेनेति यावदुत्पद्यते। अयं हि सृष्टेः प्रथमः स्तरः समाख्यायते। तदनन्तरञ्च तस्मिन्नेव ब्रह्माण्डे तिसृणां ब्रह्मविष्णुमहेशात्मकमूर्तीनामाविर्भाववेलासमकालमेव तद्गोलकं भागद्वये विभक्तं सत् सप्तोर्द्ध्वं सप्ताधोभागे चतुर्दशभुवनरूपेण विभक्तं भवति। तत्रैव च चतुर्दशस्वपि भुवनेषु त्रिविधा अपि जीवपिण्डराशयः प्रादुर्भवन्ति। सैव ब्राह्मी सृष्टिरुच्यते। तत्र ब्राह्मसृष्टावेव यथार्थतो जीवसृष्टिः प्रारब्धा भवति। यस्याः त्रिविधानामपि पिण्डानां पूर्वमेव विस्तरशो वर्णनं विहितमास्ते ॥ २०८ ॥

स्थितिकर्त्ता क इति दर्शयति—

स्थितिहेतु विष्णुः ॥ २०९ ॥

पूर्वमेवेदं समर्थितमस्ति यद् यत्र रजस्तमसोः साम्यमुदेति तत्रैव सत्त्वोदयः समेधत इति। रजसा सृष्टेराकर्षणस्य च सम्बन्धः। तमसा तु प्रलयस्य विकर्षणशक्तेश्चेति निराकुलः पन्थाः। उदाहरणतो यथा—सृष्टेरारम्भसमये सर्वेषामेव परमाणूनां समाकर्षणं भवति, प्रलयकाले च सर्वेषां तेषां विकर्षणं जायते। यदा हि अनयोरुभयोरपि क्रिययोः समन्वयो विराजते तदैव ब्रह्माण्डपिण्डात्मिकायाः सृष्टेः स्थितिरक्षुण्णा तिष्ठति। सत्त्वगुणस्येदं विलसितं यत् स्थितिर्निश्चला निरुपद्रवा च समेधमानैवोत्तरोत्तरं वर्द्धत इति। अस्या एव सृष्टेः सात्त्विक्याः क्रियाया अधिष्ठातृदेवो भगवान् विष्णुर्निगद्यते। तत्र सृष्टौ यावन्त्यपि सत्त्वगुणाश्रितानि कार्य्यजातानि सन्ति तानि सर्वाण्यपि श्रीमतः सत्त्वाश्रयस्य भगवतो विष्णोराधिष्ठातृत्वे सम्पद्यन्ते ॥ २०९ ॥

सम्प्रति प्रलयकर्त्तारं निर्दिशति—

संहर्त्ता रुद्रः ॥ २१० ॥

सृष्टिस्थितिप्रलयेषु त्रिष्वपि चरमा क्रिया प्रलयरूपा भवति। इत्यतश्च शास्त्रेषूपलभ्यते यद् रुद्रस्य सर्वतोऽपि समधिकमायुरिति। ब्रह्माण्डे यत्र कुत्राऽपि प्रलयक्रिया ब्रह्माण्डपिण्डात्मकसृष्टिप्रपञ्चे प्रचलति, सा सर्वाऽपि श्रीमतो भगवतो रुद्रस्याधिष्ठातृत्व एव समेधत इति। ब्रह्मविष्णुमहेशात्मकं पदत्रयमिदं गण्यते। अस्यैव पदत्रयस्याधिकारिणो ब्रह्मविष्णुमहेशाः त्रयोऽपि देवा ईश्वरशब्देनैव गृह्यन्ते। रुद्रायुःपरिमाणत एव तदीयब्रह्माण्डस्याप्यायु र्भवति। यत्र चैकस्मिन्नेव रुद्रायुःपरिमाणात्मके ब्रह्माण्डे अनेके विष्णवः परिवर्तन्ते। तत्रापि एकस्मिन्नेव विष्णुभोग्यायुष्कालमध्ये अनेके ब्रह्माणः परिवर्तमाना भवन्ति। पदानि च तेषां नित्यानि तेषु परिवर्तमानेष्वपि तानि तथैव तिष्ठन्ति न परिवर्तितानि भवन्ति।

अनाद्यनन्तेऽस्मिन् प्रकृतिराज्ये सादिसान्ते एकस्मिन् ब्रह्माण्डे सादि-सान्ता इमे त्रयोऽपि पदाधिकारिणः सगुणब्रह्मापरपर्य्यायेण कार्य्यब्रह्मशब्देनाभिधीयन्ते। यथा हि प्रकृतेः परिणामकृते पुरुषस्य प्रयोजनमपेक्ष्यते, तथैव प्रत्येकगुणक्रियासम्पत्तयेऽपि एकस्याधिदैवस्यपेक्षाऽवश्यकी इति नियमत एव प्रलयकर्त्ता तमोगुणस्याधिष्ठाता श्रीभगवान् रुद्रो निगद्यते ॥ २१० ॥

प्रसङ्गतः सर्गस्य मौलिकं विभागं निर्णयति—

स्थावरसर्गः सप्तधातुमयः ॥ २११ ॥

स्थावरसृष्टिः पूर्वोक्तमौलिक सप्तविभागानुसारेण सप्तधातुषु विभक्ता विद्यते। तत्रादौ स्थावरजङ्गमभेदतः सृष्टिर्द्विधा, स्थावरा जडभावापन्ना जङ्गमाचेतनभावापन्नेति विवेकः। तत्र प्रस्तर-मृत्तिकाप्रभृतयः स्थावरसृष्टिकोटिमाश्रिताः, यावत्पिण्डं पिण्डसृष्टयो जङ्गमान्तर्गताः। स्थावरसृष्टौ सुवर्णादि-सप्तधातूनां प्राधान्यम्। तत्र तेषां धातूनां तारतम्यभावेन तेषु स्थूलानां वैद्युतिकशक्तीनां तारतम्यं विद्यते। तेनैव तारतम्यभावेन तत्र गुणविकाशो भवति।

पूज्यपादानां महर्षीणामयं सिद्धान्तोऽस्ति यत् यावत्यः स्थावरसृष्टयः सन्ति तत्र सर्वत्र स्वर्णलोहादिसप्तधातूनां तारतम्यं तिष्ठति। तदनुसारत एव तेषु तडिदादिसप्तस्थूलशक्तीनामाकर्षणविकर्षणे भवतः। तदनुसारेणैव तेषु तादृशानां गुणानां विकाशो भवति। एषामेव सप्तधातूनां तारतम्यभावतः सर्वास्वपि स्थावर-सृष्टिषु फलोत्पत्तिर्भवति।

शङ्कासमाधानभावेन विस्पष्टयितुमाह—तथा हि संसारेऽस्मिन् ये धातव-उपधातवः श्रूयन्ते प्रतिदिनञ्च तेषामाविष्कारः समेधमान एवास्ते। पदार्थविज्ञानविद्यया धातूनामनेकत्वमेव संसाध्यते तत्र किं निदानमिति शङ्कायाः समाधानमाह—

सर्वदर्शिनां महर्षीणां मते जगति यावन्तो धातव उपधातवो वा सन्ति अग्रेऽपि भविष्यत्काले यावन्तोऽपि धातव आविष्कृता भविष्यन्ति, ते सर्वेऽपि शास्त्रोक्तेषु सप्तस्वेव धातुषु अन्तर्भूता भविष्यन्ति। यतो हि तेष्वपि नवीनाविष्कृतेषु धातुषु प्रधानीभूतानामेषामेव सप्तानां धातूनां रूपान्तरं तिष्ठति।

द्वितीया शङ्का तु स्थूलप्रकृतेः विभागसप्तकविषये सम्भवति। तस्याः समाधानमिदम्। यत् तुरीयाशक्तिः कारणशक्तिः सूक्ष्मशक्तिश्चेति शक्तित्रयातिरिक्ता याः स्थूलशक्तयः पञ्चीकृतेषु स्थावरजङ्गमात्मिकायाञ्च सृष्टौ व्याप्ता विद्यन्ते, ता अपि महर्षिभिः धर्म्माचार्य्यैः सप्तसु भागेषु विभाजिताः सन्ति। वैद्युतिकादिस्थूलशक्तयश्च तासामेव शक्तीनामन्तर्गता ज्ञेयाः। सम्प्रति पदार्थ-विज्ञा-

नविद्याविदोऽपि तासां शक्तीनां कियज्ज्ञानमासादयन्तो दृश्यन्ते । किन्तु लौकिकसृष्टित आसां शक्तीनां साधु ज्ञानं सुदुर्लभमेव भवति । आसामेव स्थूल-शक्तीनां प्रभावेण स्थूलजगत्प्रपञ्चे सर्वेऽपि परिणामा जायमाना उपलभ्यन्ते । ते हि परिणामाः सृष्टिमूलकाः स्युः स्थितिमूलका वा भवेयुराहो प्रलयमूलकाः स्युस्ते सर्वेऽपि तासामेव शक्तीनां प्रभावतो जायन्ते इति निश्चप्रचम् । अपरञ्च स्थूलप्रपञ्चे सप्तधातूनां साहाय्येनैवेषामाकर्षणविकर्षणक्रियाः सम्पद्यन्ते ॥ २११ ॥

अधुना द्वितीयं ब्रवीति—

तथा जङ्गमः ॥ २१२ ॥

यथा हि स्थावरेषु सप्तानां धातूनां सम्बन्धो विद्यते तथैवेहाऽपि जङ्गमेषु रक्तमांसादि सप्तधातूनां स्वभावसिद्धा सम्बन्धसत्ताऽवसेया । आयुर्वेद-शास्त्रस्याऽयमविकम्प्यः सिद्धान्तोऽस्ति यद्रसरक्तमांसमेदोऽस्थिमज्जाशुक्रस्वरूपाणां सप्तानां धातूनां साहाय्येनैव सर्वेऽपि पिण्डानि स्वस्थीभवन्ति, तथैषामेव सप्तानां धातूनां साहाय्येन जीवानां स्थूलशरीराणि निर्मीयन्ते । उपवेदात्मकस्य तस्यैव शास्त्रस्याऽयमपि सिद्धान्त उद्घुष्यते यत् शरीरेषु सत्त्वरजस्तमःस्वरूपाणां त्रयाणामपि गुणानां प्रतिनिधिरूपेण यथाक्रमं पित्त-वात-कफात्मकास्त्रयस्तत्त्वभेदा विद्यन्ते । यथा हि सत्त्वरजस्तमसां साम्ये सति प्रकृतिः साम्यावस्थामुपेता भवति, ततश्च प्रकृति-साम्यतो मुक्तिपदमप्युदेति, तथैव स्थूलशरीरेऽपि पित्त-वातकफानां त्रयाणामपि साम्येन स्थूलशरीरं स्वस्थं तिष्ठति । म्यञ्चैषामेव साम्यं मुक्तिपदोपलब्धये समर्थं भवति । तस्यैव शास्त्रस्यायमपि सिद्धान्तो विद्यते यत् पित्त-वातकफानां साम्येनैव रसरक्तमांसादि सप्तधातूनां सामञ्जस्यं शरीरे तिष्ठति येन स्वास्थ्यस्य रक्षा समासादिता भवति । केचनायुर्वेदशास्त्रज्ञास्तु पुरुषेषु सप्तमं धातुं शुक्रमामनन्ति । तत्स्थाने स्त्रीषु तु रजो वीर्य्यञ्चेत्युभे अपि स्वीकुर्वन्ति । तस्मादेव हेतोः स्त्रीषु तेषां सम्मतौ अष्टौ धातवो भवन्ति । एतद्धि स्त्रीणां सृष्टिक्रियायां प्राधान्ये निदानम् । परन्तु स्त्रीजातौ केवलं रजस एव सत्तास्वीकारे तस्यैव च वीर्य्यान्तर्भावेन तदाख्ययैव समाधाने सप्तधातुविज्ञाने न कोऽपि विरोधो ज्ञेयः ॥ २१२ ॥

अन्यच्चाह—

ॐकारतः शब्दसर्गः सप्तविधः ॥ २१३ ॥

प्रकृतविज्ञानपुष्ट्यै सृष्टिप्रकरणस्था अपरेऽपि विभागाः परिदर्श्यन्ते । तथा

हि शब्दमय्याः सृष्टेर्यः प्रथमस्तरङ्ग उद्भवति तस्यापि सप्तैव निषादर्षभगान्धार-षड्जमध्यम-धैवतपञ्चमा इति विभागा भवन्ति । प्रणवस्योत्पत्तावपि शास्त्र-कृत एवं व्याहरन्ति । तथा हि—

काय्यं यत्र विभाव्यते किमपि तत्स्पन्देन सव्यापकम् ।
स्पन्दश्चाऽपि तथा जगत्सु विदितः शब्दान्वयी सर्वदा ॥
सृष्टिश्चापि तथादिमाकृतिविशेषत्वादभूत् स्पन्दिनी ।
शब्दश्चोदभवत् तदा प्रणव इत्योङ्काररूपः शिवः ॥

साम्यावस्थापन्नया प्रकृत्या यथा ओङ्कारात्मकस्य प्रणवस्य सम्बन्धस्तथैव वैषम्यावस्थाशालिन्या प्रकृत्या सप्तानां स्वराणां सम्बन्धः । शब्दमय्याः सृष्टे-र्मूलं कारणं निदानमिति यावत् निषादादयः सप्तस्वरा एवावसेयाः । ते च सप्तापि स्वराः प्रणवाज्जायमानास्तस्यैव सप्तधा निविभागत्वेन परिगणिताः सन्ति । सर्वासामपि शाब्दिकसृष्टीनां मूलं कारणं त एव सप्तस्वराः कथ्यन्ते । अत्रेदं जागरूकं प्रमाणं यद् जगति इत्थम्भूता न केऽपि शब्दाः सन्ति ये एभिः सप्तभिः स्वरग्रामैर्न प्रकटीक्रियन्ते । अतश्चेदं निर्विवादं सिध्यति यद् एकेन अद्वितीयेन ॐकारेणैव सप्तानां स्वराणां प्राथमिकी सृष्टिर्भवति । ततश्च तैः सर्वाऽपि शब्दमयी-सृष्टिर्जायते ययेदं जगत् सर्वतो भावेन परिव्याप्तम् ॥ २१३ ॥

तद्वच्च—

तथेतरे ॥ २१४ ॥

रूपरसादीनां सृष्टिरपि सप्तविधैव परिलक्ष्यते । शब्दसृष्टितोऽन्या यावत्योऽपि सृष्टय इह जगति परिलक्ष्यन्ते ताः सर्वा अपि अनेनैव वैज्ञानिकनिय-मेन सप्तधैव विभावनीया । यथोक्तं शास्त्रान्तरे—

"परं यथार्थतस्त्वेका द्वितीयाऽहं न संशयः ।
अन्ये भेदाश्च भो देवाः श्रूयन्तां सप्तधा मम ॥
स्थूलसूक्ष्मप्रपञ्चेषु व्याप्तास्मि सप्तरूपतः ।
अज्ञानज्ञानयोरस्मि भूमयः सप्त सप्त च ॥
उद्र्ध्वलोकाश्च ये सप्त ह्यधोलोकाश्च सप्त ये ।
अहमेवास्मि ते सर्वे सप्त प्राणास्तथैव च ॥
सप्त व्याहृतयः सप्त समिधः सप्तदीप्तयः ।
अहमेवास्मि भो देवाः ! सप्तहोमा न संशयः ॥
वारा वै सप्त भूत्वाथ कालं हि विभजाम्यम् ।

सप्तभूम्यनुसारेण ज्ञानस्य त्रिदिवौकसः।
सप्त ज्ञानाधिकाराश्चोपासनायास्तथैव ते॥
सप्त कर्माधिकाराश्च सर्वे तेऽस्म्यहमेव भोः।"

इत्थञ्च सर्वत्रैव संसारेषु स्थूलसूक्ष्मरूपात्मके प्रपञ्चे सप्तानामेव सृष्टि-भेदानां प्रत्यक्षतोऽनुभवो जायते। यथा हि पिण्डान्तर्गताः सप्त धातवः स्थावरे ब्रह्माण्डेऽपि सप्तधातवः इत्येवं सप्तधा सृष्टिः सर्वत्रैव संविभक्ता दृश्यते। स्वरसृष्टिरपि सप्तधैव विभक्तेति सम्प्रत्येव प्रमाणितं। तथैवो-पर्य्युक्तेन शास्त्रीयप्रमाणेनेदमेव प्रमाणितं भवति, यत् सर्वमपि अन्तर्बहिर्जगत् सूक्ष्मस्थूलात्मकं वा जगत् सप्तविधसृष्टिविभागेनैव परिव्याप्तमिति॥२१४॥

रूपसृष्टिरहस्यस्य वैशिष्ट्यमभिधत्ते—

रूपसर्गश्चतुर्दशविधो ब्रह्माण्डवत्॥ २१५॥

सृष्टेर्विविधानामङ्गानां सप्तविभागाः सन्तीति सर्वथा लक्षयित्वा सम्प्रति रूपविज्ञानरहस्यं लक्षयितुकामः सूत्रकृद् ब्रूते–यथा ब्रह्माण्डं चतुर्दशसु विभागेषु विभक्तं तथैव रूपसृष्टिरपि चतुर्दशधा विभक्तोच्यते।

ब्रह्माण्डमिदं चतुर्दशलोकमयमुच्यते, तथा हि उपरितनाः भूर्भुवः प्रभृतयः सप्तलोकाः। अधोगाश्चातलवितलादयः सप्तलोकाश्चेति मिलित्वा चतुर्दश भवन्ति। तत्रोपरिस्थाः सप्त लोका देवलोकशब्देनोच्यन्ते। अधोगाश्च सप्तासुरलोकशब्द-वाच्या भवन्ति। इम एव श्रेणिद्वयगा लोकाः चतुर्दशभुवनशब्देनाप्युच्यन्ते।

दृश्यमयी सृष्टिः सर्वापि रूपमयीति विज्ञानसिद्धम्। अतश्च तस्या अपि चतुर्दशविभागे विभक्तत्वं नासम्भवि। तथा हि रूपसृष्टिः द्विधा विभक्ता दृश्यते। सप्तधा ज्योतिषि, सप्तधैव छायायाम्, इत्थं मिलित्वा साऽपि चतुर्दश-धैव कथ्यते।

शास्त्रेषूपलभ्यते यत् सूर्य्यदेवस्य रथे सप्ताश्वा अग्रे तिष्ठन्ति ये चाग्रे रथमाकर्षन्ति सप्त च पृष्ठे तिष्ठन्ति ये च रथेन सहैव व्रजन्ति। तत्रेदमेव विज्ञान-मवगन्तव्यम् यत् सप्ताग्रेतना ज्योतिर्मया रूपविभागाः सप्त च पृष्ठगास्तच्छाया एव नान्यत् किञ्चित्। तात्पर्य्यतः प्रकाशाः सप्त ज्योतिर्मया अन्धकाराश्च सप्त छायामया अवसेयाः। सम्प्रति चित्रकलायामपि सप्तरङ्गाणि सप्त च तदीय-च्छाया दर्शयित्वा दृश्यचित्राणि निर्मीयन्ते। अतश्च सर्वापि रूपसृष्टिश्चतुर्दश-विभागे विभक्तेति सर्वथैवोहनीयम्॥ २१५॥

अन्यदप्याह—

आधिक्यं शब्दरूपयोर्नामरूपात्मकत्वाद्विश्वस्य नामरूपात्मकत्वाद्विश्वस्य ॥ २१६ ॥

इतिश्रीमहर्षिभरद्वाजकृत-कर्म्ममीमांसादर्शने संस्कारनामको द्वितीयः पादः समाप्तः ।

सृष्टि-प्रपञ्चस्तद्विभागाश्च सर्वे नामरूपात्मका एव सन्ति ।। यत्रैव सृष्टिर्विद्यते येऽपि च सृष्टाः पदार्थाः सन्ति तेषां सर्वेषामपि नामरूपे स्तः । यतो हि विना नामरूपाभ्यां नैव किमपि दृश्यं सम्भवति । सुतरां जगतोऽस्य नामरूपात्मकत्वमेव स्वतः सिद्ध्यति । इत्थतश्च नामरूपयोः सर्वाधिकविस्तारे न कोऽपि सन्देहलेशः । संस्कारजन्यायाश्च समष्टि-व्यष्टिसृष्टावपि नामरूपयोरेवातिविस्तारः ।

एतत्सूत्रोक्तविज्ञानावगतये सर्वप्रथममिदमवगन्तव्यम् यत् अवाङ्मनसगोचरेऽद्वितीये ब्रह्मणि यदा द्वैतप्रपञ्चोदयो भवति तदा तन्नामरूपात्मकमेव भवति । दृश्यमपि तत्र यत्किञ्चनोत्पद्यते तदपि पूर्वसंस्कारजन्यमेव । इत्थञ्च संस्कारजन्या सर्वाऽपि सृष्टिः नामरूपाश्रयेणैव प्रचलति । कारणे विद्यमानयोर्नामरूपयोः कार्य्येऽपि तयोराधिक्ये कः संशयः । यावद्धि सृष्टिसत्ताऽस्ति तावन्नामरूपसत्ताऽपि स्थास्यतीत्यत्र कः सन्देहः । तच्च नामरूपात्मकं विज्ञानं सत्यमूलकमित्येवावभासते । यतो हि यस्य पदार्थस्य वाह्यं स्वरूपं यथाऽवलोक्यते तस्याभ्यन्तरीणं स्वरूपमपि तादृगेव भवति । एतन्नियमानुरूपमेव मानवं रूपं दृष्ट्वा तदीयाभ्यन्तरीणां प्रकृतिमपि ज्ञातुं प्रभवन्ति सामुद्रिकविज्ञानविदो विद्वांसः । एतद्विज्ञानानुसारमेवार्य्यजातिषु नामकरणसंस्कारप्रथाऽवलोक्यते । इत्यत एव नामकरणमपि तासु आर्य्यजातिषु संस्कारत्वेन गण्यते । यस्य वर्णनं पूर्वमेव विहितम् । सूत्रेऽस्मिन् विश्वस्य नामरूपात्मकत्वविषये या द्विरुक्तिरुपलभ्यते सा हि नामरूपात्मकविज्ञानस्याधिक्यपरिपोषणाय महत्त्वप्रतिपादनायैवोपात्तेति विज्ञेयम् । पादसमाप्तिसूचनायापि द्विरुक्तिर्भवतीति दार्शनिकानां सम्प्रदायः ॥ २१६ ॥

इति श्रीमहर्षि-भरद्वाजकृत-कर्ममीमांसादर्शने सभाष्ये संस्कारपाद-नामको द्वितीयः पादः समाप्तः ॥

———

सनातनधर्मोपयोगिनो ग्रन्थाः ।

निम्ननिर्दिष्ट-ग्रन्था वैज्ञानिकयुक्त्या धर्मशास्त्रप्रमाणेन च सनातनधर्म-सिद्धान्तं दृढ़ीकुर्वन्ति । एतेषामध्ययनेन महोपकारो भविष्यतीति तद्ग्रहणार्थं-निवेद्यन्ते ।

धर्मकल्पद्रुमः, अष्टमभागपर्यन्तम्, क्रमशो मूल्यं २), १॥), २), २), २), १॥), २), २), प्रवीणदृष्टिमें नवीन भारत दो भाग प्रत्येकका २) नवीनदृष्टिमें प्रवीण-भारत १) साधनचन्द्रिका १।॥) शास्त्रचन्द्रिका १॥) धर्मचन्द्रिका १) सनातनधर्म-दीपिका ।॥) आर्यगौरव ॥) आचारचन्द्रिका ॥) नीतिचन्द्रिका ॥) चरित्रचन्द्रिका प्रथमभाग १) द्वितीयभाग १।) धर्मसुधाकर २) शम्भुगीता १) शक्तिगीता १) संन्यासगीता १) धीशगीता ।॥) सूर्यगीता ॥) विष्णुगीता १) गुरुगीता ।) कर्ममीमांसादर्शन हिन्दीभाष्य सहित, प्रथम भाग १॥) द्वितीयभाग २), कर्म-मीमांसादर्शनम् संस्कृतभाष्यसहितम् २) श्रीरामगीता २॥) कहावतरत्नाकर ७) गोस्वामी तुलसीदासजीकी रामायण १॥) श्रीमद्भगवद्गीता गीतार्थचन्द्रिका-व्याख्यासहित २॥) व्रतोत्सवचन्द्रिका ३) दैवीमीमांसादर्शन प्रथमभाग १॥) सती-चरित्रचन्द्रिका २) परलोकरहस्य ।) चतुर्दशलोकरहस्य ।) नित्यकर्मचन्द्रिका ।) धर्मकर्मदीपिका ॥) सदाचारसोपान ‐) ब्रह्मचर्यसोपान ।) राजशिक्षासोपान ≡) उपदेशपारिजात (संस्कृत) ॥) कल्किपुराण १॥) योगदर्शन हिन्दीभाष्यसमेत २) स्वजातीय-महायज्ञसाधन १।) मन्त्रयोगसंहिता १) हठयोगसंहिता ।॥) श्रीसप्त-शतीगीता (दुर्गा) सजिल्द १) साधारण ।॥) ईशोपनिषद् ॥) केनोपनिषद् ॥) वेदान्तदर्शन ।=), कठोपनिषद् १) मार्कण्डेयपुराण-हिन्दी प्रथमभाग १) भगवद्गीता प्रथमखण्ड सभाष्य १) त्रिवेदीय सन्ध्या ।=), संगीतसुधाकर ।=) सुगमसाधनचन्द्रिका =) गोव्रततीर्थमहिमा ॥) वर्ल्डस्इटरनलरिलिजन (अंग्रेजी) ३) कन्याशिक्षासोपान ‐) महिलाप्रश्नोत्तरी ‐) धर्मप्रश्नोत्तरी ।) धर्मसोपान ।) साधनसोपान ।) शास्त्रसोपान ।) धर्मप्रचारसोपान ≡) तत्त्वबोध =) स्तोत्र-कुसुमाञ्जलि (संस्कृत) ।),

अखिलभारतवर्षीयसंस्कृत-विश्वविद्यालयस्य पाठ्यग्रन्थावली सर्व्वाऽपि निम्नाङ्कितप्राप्तिस्थाने लभ्यते ।

प्राप्तिस्थानम्—

मैनेजर–निगमागमबुकडिपो

भारतधर्म-सिण्डिकेट लिमिटेड–भवन,

स्टेशन रोड, बनारस सिटी ।